६२. वचः दीर्घप्रसद्मनी ईशे वाजस्य गोमतः। ईशे हि पित्वोऽविषस्य दावने।। (मित्रावरुणौ) — ऋ. ८.२५.२०

६३. क्षेमस्य च प्रयुजस्य त्वमीशिषे शचीपत— ऋ. ८.३७.५

६४. ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः।— ऋ. ८.४४.१८

६५. मनोर्विश्वस्य घेदिम आदित्या राय ईशते— ऋ. ८.४७.४

६६. मा नो निद्रा ईशत मोत जल्पिः।— ऋ. ८.४८.१४

६७. त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम्।— ऋ. ८.६४.३

६८. य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे। यो अप्सु चन्द्रमा इव सोमश्चमूषु ददृशे। पिबेदस्य त्वमीशिषे। यं ते श्येनः पदाभरत् तिरो रजांस्यस्पृतम्। पिबेदस्य त्वमीशिषे।।— ऋ. ८.८२.७

६९. ईशे यो वृष्टे उत उस्रियो वृषा (पवमान सोमः)— ऋ. ९.७४.३

७०. माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम्।— ऋ. ९.८५.८

७१. ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ (अग्निः)— ऋ. १०.६.३

७२. ईशाना वार्याणां क्षयन्तीश्चर्षणीनां। अपो याचामि भेषजम्। (आपः)— ऋ. १०.९.५

७३. सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे। (सोमः)— ऋ. १०.२५.७

७४. यदीशीयामृतानां उत वा मर्त्यानाम्। जीवेदिन्मघवा मम।— ऋ. १०.३३.८

७५. मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे।— ऋ. १०.३६.२

७६. विषूवृदिन्द्रो अमते उत क्षुधः स इद्रायो मघवा वस्व ईशते।— ऋ. १०.४३.३

७७. य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम। (सार्वत्रिक ऋचा)—ऋ.१०.१२१.३

७८. नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः।।— ऋ.१०.१८५.२

७९. त्वमीशिषे सास्मित्रा सत्सि बर्हिषि-- — ऋ.१०.४४.५

८०. महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम्। (विश्वेदेवाः)— ऋ.१०.५६.४

८१. न सेशे यस्य रम्बते अन्तरा सक्थ्या कपृत्। सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः।। न सेशे यस्य रोमशं निषेदुषो विजृम्भते। सेदीशे-----ऋ.१०.८६.१६

८२. इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम्। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः— ऋ.१०.८९.१०

८३. द्विपद व चतुष्पद का ईशन— अथर्ववेद २.३४.१, ४.२.१, ६.२८.३, ८.२.२३, ४.२८.६

८४. यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम्।— अ.३.१५.३

८५. यस्य नेशे यज्ञपतिर्न यज्ञो नास्य दातेशे न प्रतिग्रहीता। यो विश्वजिद् विश्वभृद् विश्वकर्मा घर्मं नो ब्रूत यतमश्चतुष्पात्।।— अ.४.११.५

८६. सर्वे देवा अतित्रसन् ये संग्रामस्येशते।— अ. ५.२१.७

८७. समुद्र ईशे स्रवतामग्निः पृथिव्या वशी। चन्द्रमा नक्षत्रामीषे त्वमेकवृषो भव।।— अ.६.८६.२

८८. देव संस्फान सहस्रापोषस्येशिषे। तस्य नो रास्व तस्य नो धेहि तस्य ते भक्तिवांसः स्याम— अ.६.७९.३

८९. मृत्युरीशे द्विपदां मृत्युरीशे चतुष्पदां।— अ.८.२.२३

९०. भवो दिवो भव ईशे पृथिव्या भव आ पप्र उर्वन्तरिक्षम्।— अ.११.२.२७

९१. ईशा वशस्य या जाया सास्मिन् वर्णमाभरत् (विवाह/वधू सूक्त ?) — अ.११.८.१७

९२. ईशां वो वेद राज्यं त्रिषंधे अरुणैः केतुभिः सह।— अ.११.१२.२/११.१०.२

९३. मा नो अद्य गवां स्तेनो मावीनां वृक ईशत— अ.१९.४७.६

९४. यो अस्य विश्वजन्मन ईशे विश्वस्य चेष्टतः।— अ.११.६.२३/११.४.२३।

(तैत्तिरीय संहिता नहीं लिखी)

## ईशान

१. इन्द्रश्च सोम गोपती ईशाना पिप्यतं धियः द्वारा इन्द्र व सोम द्वारा प्रजा के ऐश्वर्य व आधिपत्य की प्राप्ति।— जै.ब्रा.१.९५

२. यद् ईशानम् इन्द्र इति प्रतिहरेद् ईशानो यजमानस्य पशून् अभिमानुकस् स्यात्। अथ यत् शानम् इन्द्र इति प्रतिहरति नेशानो यजमानस्य पशून् अभिमन्यते शान्ताः प्रजा एधन्ते।— जै.ब्रा.१.१३३

३.-----पुरूतमं पुरूणां ईशानं वार्याणाम्। इन्द्रं सोमे सचा सुते। स घा नो योग आ भुवत् स राये स पुरंध्याम्। पशवो वै रयिः। ततो वै ते तान् पशून् भूतान् उदसृजन्त।— जै.ब्रा.१.२२६

४. अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः। ईशानम् अस्य जगतस् स्वर्दृशम् ईशानम् इन्द्र तस्थुषः।। इति स्तोम्या। न त्वावं अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। इति स्तोत्रिया— जै.ब्रा.१.२९३

५.--- -ते देवा ईशानं देवं अब्रुवंस् त्वं वै न श्रेष्ठो ऽसि। तम् उद्धारम् उद्धरस्वेति।— जै.ब्रा.२.२५४

६. इन्दुर् इन्द्राय पवते इति देवासो अब्रुवन्। वाचस् पतिर् मखस्यते विश्वस्येशान ओजसा।। इति विश्ववतीर् भवन्ति। वैश्वदेवं हि एतद् अहः।— जै.ब्रा.३.५३

७. ईशाना पिप्यतं धियः।—जै.ब्रा.३.६५,२.१२

८. ईशान इमा भुवनानि वीयस इति वीति सिमानां रूपं। युजान इन्दो हरितस् सुपर्ण्य इति शक्वर्यो वै हरितस् सुपर्ण्यः।— जै.ब्रा.३.८४

९. त्रिणवेन स्तोमेन पंक्तिम् अभ्यक्रन्दत। ततो मरुतो ऽसृजतेशान मुखान्।— जै.ब्रा.३.३८१

१०. तम् अस्यां ऊर्ध्वायां दिशि मरुतो ऽन्वैच्छन्न ईशानमुखाः। ते अन्वविन्दन् यत् श्वेतं रूपं तत्।— जै.ब्रा.३.३८२

११. यद् घर्मः पर्यवर्तयत्। अन्तान्पृथिव्या दिवः। अग्निरीशान ओजसा। 'वरुणो धीतिभिः सह। इन्द्रो मरुद्भिः सखिभिः सह।— तै.ब्रा.१.५.५.२

१२. साकमेध पर्व अनन्तरभावि वपन मन्त्रौ : यो अस्या पृथिव्यास्त्वचि। निवर्तयत्योषधीः। अग्निरीशान ओजसा। वरुणो धीतिभिः सह। इन्द्रो मरुद्भिः सखिभिः सह।— तै.ब्रा.१.५.५.४

१३. ईशानं त्वा भुवनानां अभिश्रियम्। स्तौम्यग्न उरुकृतं सुवीरम्। हविर्जुषाणः सपत्नां अभिभूरसि। जहि शत्रूंरप मृधो नुदस्व।। (अग्निः)— तै.ब्रा.२.४.७.११

१४. ईशाना वार्याणाम्। क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्।।— तै.ब्रा.२.५.८.५

१५. ब्रह्मणस्पते सुयमस्य विश्वहा। रायः स्याम रथ्यो विवस्वतः। वीरेषु वीरां उपपृङ्धि नस्त्वम्। यदीशानो ब्रह्मणा वेषि मे हवम्।— तै.ब्रा.२.८.५.३

१६.--- -ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।— तै.ब्रा.३.१०.८.९

१७. श्रद्धा देवी प्रथमजा ऋतस्य। विश्वस्य भर्त्री जगतः प्रतिष्ठा। तां श्रद्धां हविषा यजामहे। सा नो लोकममृतं दधातु। ईशाना देवी भुवनस्याधिपत्नीः।— तै.ब्रा.३.१२.३.२

१८. ईशानमस्य जगतः स्वर्दृशम् इति असौ वाव स्वर्दृक्तेन सूर्य नातिशंसति— ऐ.ब्रा.४.१०

१९. ओंकार की मात्राएं: या सा तृतीया मात्रा ईशानदेवत्या कपिला वर्णेन। यस्तां ध्यायते नित्यं, स गच्छेदैशानं पदं।— गोपथ ब्रा.१.१.२५

२०. ब्रह्मन् इत्येव चतुर्थमामन्त्रयते। त्वं ब्रह्मासि- इतीतरः प्रत्याह। रुद्रोऽसि सुशेवः।----तद्- वीर्याण्येवास्मिन्नेतत् पूर्वेण दधाति। अथैनमेतच्छमयत्येव। तस्मादेव सर्वस्येशानो मृडयति यदेनं शमयति।— श.ब्रा.५.४.४.१२

२१. यान्येतानि देवत्रा क्षत्त्राणि। इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात् क्षत्त्रात्परं नास्ति।— श.ब्रा.१४.४.२.२३

२२. यदैतमनुपश्यत्यात्मानं देवमंजसा। ईशानं भूत भव्यस्य न तदा विचिकित्सति।— श.ब्रा.१४.७.२.१८

२३. शारीरक ब्राह्मणम् : स वा अयमात्मा। सर्वस्य वशी। सर्वस्येशानः। सर्वस्याधिपतिः।--एष भूताधिपतिः। एष लोकेश्वरः।— श.ब्रा.१४.७.२.२४

२४: शाण्डिल्य विद्या ग्रन्थः। मनोमय पुरुषोपासना : मनोमयोऽयं पुरुषः भाः सत्यः। तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा, एवमयन्तरात्मन्पुरुषः। स एष सर्वस्य वशी। सर्वस्येशानः— श.ब्रा.१४.८.८.१

२५. श्रीमन्थ कर्म ब्राह्मणम् : अथैनमुद्यच्छति- आमोऽस्यामं हि ते मयि। स हि राजा ईशानोऽधिपतिः स मा राजेशानोऽधिपतिं करोतु।— श.ब्रा.१४.९.३.१०

२६. ऋग्वेद में ईशानासः (सायण भाष्य : ऋत्विज)

२७. पुरुष एवेदं सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति।— तै. आ. ३.१२.१

२८. हरिं हरन्तं अनुयन्ति देवाः। विश्वस्येशानं वृषभं मतीनाम्। ब्रह्म सरूपमनु मेदमागात्। अयनं मा विवधीर्विक्रमस्व।।— तै.आ.३.१५.१, तै. आ. आ. ४९।

(ऋग्वेद आदि नहीं लिखे)

## ईश्वर

१. (शकट से अवरोहण के समय) : दृंहन्तां दुर्याः पृथिव्याम्। गृहा वै दुर्याः। ते हैत ईश्वरो गृहा यजमानस्य— शतपथ ब्रा.१.१.२.२२

२. यज्ञः :- यस्मात् पराङ् भवति, पराङु हैवास्माद्यज्ञो भवति। स यो हैनं तत्रानुव्याहरेत्- पराङस्माद्यज्ञोऽभूत् इति, ईश्वरो ह यत्तथैव स्यात्।— श.ब्रा.२.१.४.१९,२१

३. प्राणः :- यस्मात् पराङ् भवति, पराङु हैवास्मात् प्राणो भवति। स यो हैनं तत्र अनुव्याहरेत्- पराङस्मात्प्राणोऽभूत् इति, ईश्वरो ह यत्तथैव स्यात्।— श.ब्रा.२.१.४.२०, २२

४. वाजपेयः - तस्येश्वरः प्रजा पापीयसी भवितोरिति।— श.ब्रा.५.१.१.९

५. वयो वा एष रूपं भवति-यो ऽग्निं चिनुते। ईश्वर आर्तिमार्तोः। तस्मान्न वयसोऽग्निचिदश्नीयात्।— श.ब्रा.१०.१.४.१३

६. (दक्षिण हाथ में जुहू और सव्य में उपभृत लेते हैं)। न तथा कुर्यात्। यो हैनं तत्र ब्रूयात्-प्रतिप्रतिं न्वा अयमध्वर्युर्यजमानस्य द्विषंतं भ्रातृव्यमकत्प्रत्युद्यामिनं इति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.११.४.२.१

७. प्रगृह्य बाहू स्रुचौ धारयंति। न तथा कुर्यात्।-- - शूलौ न्वा अयमध्वर्यु बाहू अकृत। शूलबाहुर्भविष्यति। ईश्वरो ह तथैव स्यात्। अथ हैष मध्यमः प्राणः, तस्मादु तमुपन्यच्येवैव धारयेत्।— श.ब्रा.११.४.२.४

८. अथ हैतत् कृपणम्, यो ऽयमणु दीर्घमस्वरमाश्रावयति। यो हैनं तत्र ब्रूयात्, कृपणं न्वा अयमध्वर्युर्यजमानमकत्; द्विषतो भ्रातृव्यस्योपावसायिनमिति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.११.४.२.९

९. पार्श्वत उ हैके स्रुचमुपावहृत्य पर्याहृत्योपभृत्यधिनिदधति। न तथा कुर्यात्।---अतीर्थेन न्वा अयमध्वर्युराहुतीः प्रारौत्सीत्। सं वा शरिष्यते घुणिर्वा भविष्यतीति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.११.४.२.१४

१०. तां हैतामेके सावित्रीमनुष्टुभमन्वाहुः। वाग्वा अनुष्टुप्। तदस्मिन्वाचं दध्म इति। न तथा कुर्यात्।---- आ न्वा अयमस्य वाचमदित, मूको भविष्यतीति। ईश्वरो ह तथैव स्यात्। तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयात्।— श.ब्रा.११.५.४.१३

११. अथ हैके दक्षिणतस्तिष्ठते वाऽसीनाय वाऽऽन्वाहुः। न तथा कुर्यात्।---बुल्बं न्वा अयमिमजीजनत। बुल्बो भविष्यतीति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.११.५.४.१४

१२. बहिर्द्धा न्वा अयं प्राणेभ्यो दक्षिणा अनैषीत्। न प्राणानददक्षत्। अन्धो वा स्रामो वा बधिरो वा पक्षहतो वा भविष्यतीति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.११.७.२.४

१३. विष्णुक्रमणम् : भस्मनाऽस्य पदमपि वपाम इति वदन्तः। तदु तथा न कुर्यात्।---आसां न्वा अयं यजमानस्यावाप्सीत्। क्षिप्रे परमा सा नावप्स्यते। ज्येष्ठगृह्यं रोत्स्यतीति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.४.१.४

१४. स्वर्ग्यं वा एतत्। यदग्निहोत्रम्।---प्रति न्वा अयं स्वर्गाल्लोकादवारुक्षत्। नास्येदं स्वर्ग्यमिव भविष्यति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.४.२.७

१५. अग्निहोत्रम् : परासिचत न्वा अयमग्निहोत्रम्। क्षिप्रे ऽयं यजमानः परासेक्ष्यत् इति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.४.२.९

१६. यस्याग्नावग्निमभ्युद्धरेयुः। किं तत्र कर्म। का प्रायश्चित्तिः ? ईश्वरौ वा एतौ संपाद्याशांतौ यजमानस्य प्रजां च पशूंश्च निर्दहतः।— श.ब्रा.१२.४.३.४

१७. (आहवनीय अननुगत रहने पर) गार्हपत्यः अनुगच्छेत्। (तो क्या प्रायश्चित्त है ?) तं हैके तत एव प्राञ्चमुद्धरन्ति। प्राणा वा अग्नयः। प्राणानेवास्मा एतदुद्धराम इति वदन्तः। तदु तथा न कुर्यात्। प्राचो न्वा अयं यजमानस्य प्राणान् प्रारौत्सीत्। मरिष्यत्ययं यजमानः। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.४.३.६

१८. (आहवनीय अननुगत रहते हुए) गार्हपत्य अनुगच्छेत्। अथ हैके प्रत्यंचमाहरन्ति। प्राणोदानाविमाविति वदन्तः। न तथा कुर्यात्। स्वर्ग्यं वा एतत्। यदग्निहोत्रम्।---- -नास्येदं स्वर्ग्यमिव भविष्यतीति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.४.३.७

१९. अथ हैकेऽन्यं गार्हपत्यं मन्थन्ति। तदु तथा न कुर्यात्।----अग्नेर्न्वा अयमधिद्विषन्तं भ्रातृव्यमजीजनत। क्षिप्रेऽस्य द्विषन् भ्रातृव्यो जनिष्यते। प्रियतमं रोत्स्यति इति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.४.३.८

२०. अथ हैके अनुगमय्यान्यं मन्थन्ति। तस्याशां नेयात्। अपि यत् परिशिष्टमभूत्। तदजीजसत। नास्य दायादश्चन परिशेक्ष्यत इति। ईश्वरो ह तथैव स्यात्। —श.ब्रा.१२.४.४.९

२१. (दीर्घसत्री के अग्निहोत्र करते हुए मरने पर): तं हैके ग्रामाग्निना दहंति। न तथा कुर्यात्। एष वै विश्वात्

क्रव्यादग्निः। स हैनं ईश्वरः सपुत्रं सपशुं समत्तोः।— श.ब्रा.१२.५.१.१४

२२. अथ हैके-प्रदव्येन दहन्ति। न तथा कुर्यात्। एष वा अशान्तोऽग्निः। स हैनमीश्वरः सपुत्रं सपशुं प्रदग्धोः।— श.ब्रा.१२.५.१.१५

२३. अथ हैके उल्मुक्येन दहंति। न तथा कुर्यात्। एष वै रुद्रियो ऽग्निः। स हैनमीश्वरः सपुत्रं सपशुमभिमन्तोः। १६। अथ हैके अन्तरेणाग्नींश्चितिं चित्वा तमग्निभिः समुपोषन्ति। ---- क्षिप्रेऽस्याशसनं जनिष्यते। प्रियतमं रोत्स्यतीति। ईश्वरो ह तथैव स्यात्।— श.ब्रा.१२.५.१.१७

२४. ईश्वरो वा एष आर्तिमार्तोः। यो ब्रह्मणे देवेभ्योऽप्रतिप्रोच्याश्वं बध्नाति।— श.ब्रा.१३.१.२.४

२५. ईश्वरो वा एष पराङ्प्रदघोः। यः पराचीराहुतीर्जुहोति। पुनरावर्तते। अस्मिन्नेव लोके प्रतितिष्ठति।— श.ब्रा.१३.१.३.४

२६. अग्निः पशुरासीत्।---यावानग्नेर्विजयः। यावान् लोकः। यावदैश्वर्यं तावांस्ते विजयः।— श.ब्रा.१३.२.७.१३

२७. वायुः पशुरासीत्।---- -सूर्यः पशुरासीत्।— श.ब्रा.१३.२.७.१५

२८. रश्मिना वा अश्वो यतः। ईश्वरो वा अश्वोऽयतोऽधृतोऽप्रतिष्ठितः परां परावतं गन्तोः।— श.ब्रा.१३.३.३.५

२९. पारिप्लव : सर्वासां विशामैश्वरयमाधिपत्यं गच्छति।— श.ब्रा.१३.४.३.१५

३०. अंतरतरम्-यदयमात्मा। स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्। प्रियं रोत्स्यतीति। ईश्वरो ह तथैव स्यात्। आत्मानमेव प्रियमुपासीत।— श.ब्रा.१४.४.२.१९

३१. पुत्रमन्थ कर्म ब्राह्मणम् : स य इच्छेत्। पुत्रो मे गौरो जायेत। वेदमनुब्रुवीत। सर्वमायुरियात्। क्षीरौदनं पाचयित्वा। सर्पिष्मंतमश्नीयाताम्। ईश्वरौ जनयितवै।---दध्योदनं---उदौदनं--तिलौदनं---- मांसौदनम्— श.ब्रा.१४.९.४.१३

३२. अतिथिमिति पदं भवति नैतत्कुर्यादित्याहुरीश्वरो ऽतिथिरेव चरितोः।— ऐतरेय आरण्यक १.१.१

३३. तदेतत्पुष्पं फलं वाचो यत्सत्यं स हेश्वरो यशस्वी कल्यणकीर्तिर्भवितोः— ऐ.आ.२.३.६

३४. वाचि वै तदैन्द्रं प्राणं न्यचायन्नित्येतत्तदुक्तं भवति। स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरायुषः प्रैतोरिति— ऐ.आ.२.३.५

३५. मध्यं ह्येषामंगानामात्मा मध्यं छन्दसां बृहती। स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरायुषः प्रैतोरिति।— ऐ.आ.२.३.५

३६. मेक्षाम्यूर्ध्वस्तिष्ठन् मा मा हिंसिषुरीश्वराः।— अथर्ववेद ७.१०२.१/७.१०७.१

३७. उतामृतत्वस्येश्वरो यदन्येनाभवत् सह। (पुरुष सूक्त)— अथर्ववेद १९.६.४

३८. प्राणाय नमो यस्य सर्वमिदं वशे। यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम्।— अथर्ववेद११.६.१/११.४.१

३९. प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न।— अथर्ववेद ११.६.१०/११.४.१०

४०. ईश्वरो वा एष पराङप्रदघः। यो यूपं रोहति। हिरण्यमध्यवरोहति। अमृतं वै हिरण्यम्।------- बस्ताजिनमध्यवरोहति— तै.ब्रा.१.३.७.७

४१. रुद्रो वा एषः। यदग्निः। स आधीयमान ईश्वरो यजमानस्य पशून्हिंसितोः। संप्रियः पशुभिः भुवदित्याह।— तै.ब्रा.१.१.८.४

४२. एकधा तेजस्विनी देवतामुपैतीत्याहुः। सैनमीश्वरा प्रदह इति।— तै.ब्रा.१.३.१.४, १.३.१.६

४३. एष वै मनुष्याणां यज्ञः। देवानां वा इतरे यज्ञाः। तेन वा एतत्पितृलोके चरति। प्रजापते न त्वदेतानि इति मन्त्र से गार्हपत्य देश को प्रत्यागमन करता है। यः पितृभ्यः करोति। स ईश्वरः प्रमेतोः।---पितृलोके वा एतद्यजमानश्चरति। यत्पितृभ्यः करोति। स ईश्वर आर्तिमार्तोः।— तै.ब्रा.१.३.१०.१०

४४. ईश्वरो वा एष दिशो ऽनून्मदितोः। यं दिशोऽनुव्यास्थापयन्ति। दिशामवेष्टयो भवन्ति। दिक्ष्वेव प्रतितिष्ठत्यनुन्मादाय।— तै.ब्रा.१.८.३.१

४५. ईश्वरं तं यशोऽर्तोरित्याहुः। यस्यां ते व्याचष्ट इति।— तै.ब्रा.२.२.१.६

४६. घर्मो वा एषो ऽशान्तः। अर्धमासेऽर्धमासे प्रवृज्यते। यत्पुरोडाशः। स ईश्वरो यजमानं शुचाऽप्रदहः। पर्यग्निं करोति। पशुमेवैनमकः। शान्त्या अप्रदाहाय।— तै.ब्रा.३.२.८.५

४७. चक्षुर्वै सत्यम्। सत्येनैवैनदभिघारयति। ईश्वरो वा एषोऽन्धी भवितोः। यश्चक्षुषाऽऽज्यमवेक्षते। निमील्यावेक्षेत। दाधाराऽऽत्मन्चक्षुः।— तै.ब्रा.३.३.५.२

४८. ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः। इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमति स्वाहेति चतृषु पत्सु जुहोति। एता वा अश्वस्य बन्धनम्।— तै.ब्रा.३.८.९.३

४९. ४ दिशाएं। चारों से परिग्रहण करता है।— तै.ब्रा.३.८.१२.२

५०. ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः। यत्सायंधृतीर्जुहोति। अश्वस्य यत्यै धृत्यै।— तै.ब्रा.३.९.१३.२

५१. एवं हीश्वरा या दीक्षिता जाया पुत्रं लभेतेति।— गोपथ ब्रा. १.३.२३

५२. शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः इति। आत्मानं प्रत्यभिमृशति। ईश्वरो वा एषोऽप्रत्यभिमृष्टो यजमानस्यायु प्रत्यवहर्तुमनर्हन् मा भक्षयेदिति।— गो.ब्रा.२.३.६

५३. जागृयाद् रात्रिम्। यावदु ह वै न वा स्तुवते न वा शस्यते तावदीश्वरा असुरा रक्षांसि च यज्ञमन्ववनयन्ति।— गो.ब्रा.२.५.५

५४. एषा ह वै यज्ञस्य पुरोगवी यद् दक्षिणा। यथार्हामः स्रस्तमतिरेतदन्त्येतेष एवेश्वर उन्नेता।— गो.ब्रा.२.६.१४

५५. पशोर्वै प्रतिमा पुरोडाशः। स नायजुष्कमभिवास्यः। वृथेव स्यात्। ईश्वरा यजमानस्य पशवः प्रमेतोः। सं ब्रह्मणा पृच्यस्वेत्याह। प्राणा वै ब्रह्म। प्राणाः पशवः।— तै.ब्रा.३.२.८.८

५६. (होता) यद्विच्छन्दसः कुर्याद् ग्रीवासु तद् गण्ड दध्यादीश्वरो ग्लावोजनितोः।— ऐ.ब्रा.१.२५

५७. ईशान दिशा : सैषा दिगपराजिता। तस्मादेतस्यां दिशि यतेत वा यातयेद्वेश्वरो हानृणाकर्तोः।— ऐ.ब्रा.१.१४

५८. ईश्वरौ वा एतौ संयन्तौ यजमानं हिंसितोर्यश्चासौ पूर्व उद्धृतो भवति यमु चैनमपरं प्राणयन्ति।-- -(पहली अग्नि जिसे उत्तरवेदी पर लाकर स्थापित करते हैं। दूसरी अग्नि जिसे आग्नीध्र-धिष्ण्य के प्रति लाते हैं। यह दो अग्नियां ईश्वर हैं।)— ऐ.ब्रा.१.३०

५९. ईश्वरो ह यद्यप्यन्नो यजेताथ होतारं यशोऽर्तोस्तस्मादनु ब्रुवतैव अनुप्रपत्तव्यम्। (यद्यपि होता यागकर्ता नहीं होता, किन्तु अनुव्रजन करते होता को) यशः कीर्ति अर्तो, ईश्वरो ह प्राप्तुं समर्थैव।— ऐ.ब्रा.२.२०

६०. तद्धैक आहुस्तान्वो मह इति शंसेत्-- -यदेतां शंसेदीश्वरः पर्जन्योऽवर्षोः। पिन्वन्त्यप इत्येव शंसेत्।— ऐ.ब्रा.३.१८

६१. यदेना एषिष्यमाणस्य संनिर्वपेदीश्वरो हास्य वित्ते देवा अरन्तो (अक्रीडितुं)— ऐ.ब्रा.३.४८

६२. यदि सोमं ब्राह्मणानां स भक्षो----यदा वै क्षत्रियाय पापं भवति ब्राह्मणकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा ब्राह्मतामभ्युपैतोः-- -अथ यदि दधि वैश्यानां स भक्षो----यदा वै क्षत्रियाय पापं भवति वैश्यकल्पो ऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यतामभ्युपैतोः----अथ यद्यपः शूद्राणां स भक्षः----यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रतामभ्युपैतोः— ऐ.ब्रा.७.२९

६३. अवरोध आदि भक्षण : ईश्वरो ह वा एषोऽप्रत्यभिमृष्टो मनुष्यस्यायुः प्रत्यवहर्तारनर्हन्मा भक्षयतीति— ऐ.ब्रा.७.३३

६४. कल्पते ह वा अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रियमश्नुतेऽश्नुते ह प्रजानामैश्वर्यं आधिपत्यं य एवमेता अनु देवता एतामासन्दीमारोहति क्षत्रियः सन्।— ऐ.ब्रा.८.६

६५. यदसर्वेण वाचोऽभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रैतो इति।----ईश्वरो ह सर्वमायुरैतोः सर्वमाप्नोद्विजयेनेत्यु ह स्माह उद्दालक आरुणिः— ऐ.ब्रा.८.७

६६. अश्नुते ह प्रजानामैश्वर्यं आधिपत्यं य एवमेताममित्राणां व्यपनुत्तिं ब्रुवन्गृहानभ्येति।— ऐ.ब्रा.८.११

६७. अति ब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरिति।— बौ.श्रौ.सू.१३.१७

६८. अथ वा यस्यैष धिष्णियो हीयते सो अनुध्यायति स ईश्वरो रुद्रो भूत्वा प्रजां पशून्यजमानस्य शमयितो— बौ.श्रौ.सू.१४.३.५

६९. यो वै सोमस्याभिषूयमाणस्य प्रथमो अंशु स्कन्दति स ईश्वर इन्द्रियं वीर्यं प्रजां पशून्यजमानस्य निर्हन्तोः-----उपायः— बौ.श्रौ.सू.१४.४.१२

७०. --- प्रथमं मेधाकामस्य मध्यतो रुक्कामस्य ता वा एताः क्षीरे शृता भवन्ति ता यत्सह सर्वा निर्वपेदीश्वरा एनं प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत्।— बौ.श्रौ.सू.१४.१९.५

७१. वायुः पशुरासीदादित्यः पशुरसीदितीश्वरो अवघ्रातोरित्येतस्मिन्काल आहवनीये स्रुवाहुतिं जुहोति।— बौ.श्रौ.सू.१५.२७

७२. अग्निर्वै कामो देवानामीश्वरः।— शांखायन श्रौ.सू.१६.१०.६

७३. स यदोपतापी स्याद् यत्रास्य समं सुभूमिस्पष्टं स्यात् तद् ब्रूयाद् इह मे अग्निं मन्थतेति। ईश्वरो हागंदो भवितोः।— जैमिनीय ब्रा. १.४६

७४. अरण्यं इव वा एते यन्ति ये बहिष्पवमानं सर्पन्ति। तान् ईश्वरो रक्षो वा हन्तोर् अन्या वा नंष्ट्रा। अथ द्वितीयां जुहोति— जै.ब्रा.१.८३

७५. तिसृभिर् अन्तरिक्षात् तिसृभिर् दिवं गमयन्ति। स्वर्गलोको यजमानो भवति। ईश्वरो ह तु प्रमायुको भवितोः।— जै.ब्रा.१.८७

७६. एतेन (यज्ञायज्ञीयेन) ह स्म वै पुरा सर्वाणि स्तोत्राणि स्तुवन्ति। तद् आहुर् ऊर्ध्वा वा एते स्वर्गं लोकं रोहन्ति ये यजन्ते। त ईश्वराः परांचो अतिपत्तोर् इति तद् यज्ञायज्ञीयेनोपरिष्टात् स्तुवन्ति।— जै.ब्रा.१.१७३

७७. आपो वा इदम् अग्रे महत् सलिलम् आसीत्। तद् अपाम् एवैश्वर्यं आसीत्। यद् अपाम् एवैश्वर्यम् आसीद् अपां राज्यम् अपाम् अन्नाद्यं तद् अग्निर् अभ्यध्यायन् ममेदम् ऐश्वर्यं मम राज्यं ममान्नाद्यं स्याद् इति। स एतम् अग्निष्टोम संपदम् अपश्यत्।— जै.ब्रा.१.२३७

७८. --- अदन्ति ह वा अमुष्ममिन् लोके पशवः पुरुषम्। तस्माद् उ ह गोर् अन्ते नग्नो न स्यात्। ईश्वरो हास्माद् अपक्रमितोस् त्वचं अस्य बिभर्मीति।— जै.ब्रा.२.१८२

७९. तद् उ विराजो ऽन्नाद्यस्यैश्वर्यम् आधिपत्यं गच्छन्ति।— जै.ब्रा.२.३३९

८०. यद् गायत्र्या अध्य् उत्तिष्ठेयुर् ईश्वरा अप्रतिष्ठिताश् चरितोः।— जै.ब्रा.२.३४९

८१. अग्नी रात्रि असौ आदित्यो अहरेते एव भंगे ईट्ट ईश्वरो भूतं च भविष्यद्याज्ञातोर्य एवं वेद।— काठक सं. ७.६

८२. --- बिभ्यति वै देवेभ्यः पशवो देवानामेष एको योऽग्निमुपतिष्ठते। ते ऽस्मादीश्वराः प्रत्रसस्संहितासि विश्वरूपेत्येतानि वै गोर्नामानि— काठक सं ७.७

८३. तस्मादपि ये ऽल्पा पशवस्ते नक्तं बहव इव दृश्यन्ते त ईश्वरा अमुं लोकमनुपदो— काठक सं. ७.८

८४. ईश्वरं वा एता उभौ यशोऽर्तोर्यो व्याचष्टे यश्च दक्षिणत आस्ते— काठक सं. ९.१६

८५. एकमेव दद्याद् त्रिवृतं तु त्रिवृद्धि प्राणो बहु वा एतदन्यदन्यज्जुहोति स ईश्वरो ऽन्यद्रूपं— काठक सं११.२

८६. ---अतः प्राचीनमोषधयो रौद्रीः प्रतीचीनं शुष्यन्ति प्राचीनं शुष्यन्ति प्रतीचीनं प्रत्यक्षमेवैना ऋध्नोतीश्वरो दुश्चर्मा भवितोर्य एतया यजते।— काठक सं. ११.५

८७. षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठतीश्वरस्तु तदति दुश्चर्मैव भवितो तेजांसि ह्येष प्रत्यारोहन्नेति— काठक सं.११.५

८८. सर्वाणि वा एतानीन्द्रियाणि वीर्याणि यत् पृष्ठानि तान्येनमीश्वराण्यनायतनानि निर्मृजो व्यतिषजेद्— काठक सं. १२.५

८९. ईश्वराणि वा एनमेतानि छन्दांसि अशान्तानि निर्मजः पशुमालभेत शान्त्या अनिर्मार्गाय।— काठक सं. १२.८

९०. एष वै रुद्रः पशुश्रपण एव ईश्वरो वा एष एतमतोऽनूत्थाय हन्तोः— काठक सं २२.११

९१. दीक्षितम् : पत्नीं तु न संयाजयेदमेध्या वा एषापूता नेश्वरा स्वर्गलोकं गन्तोः तामुदयनीये संयाजयति— काठक सं. २३.९

९२. अनग्नौ वा एतामाहुतिं जुहोति तामीश्वराणि रक्षांस्यनूदय्य हन्तोर्यदपो निनयति शान्त्या एव— काठक सं. २४.४

९३. अग्निर्वा एष वैश्वानर उपावसृज्यते यदग्निष्टोमस्स ईश्वरो ऽशान्तो यजमानं च सदस्यांश्चाभ्युषः प्रोर्णुवीत यजमान आत्मनो ऽनभिदाहाय।— काठक सं. २६.१

९४. अग्निना वा एष तन्वं विपरिधत्ते तानूनप्त्रे सैनमीश्वरा हिंसितोः— काठक सं. २६.२

९५. यात्मनस्तां पूर्वां ब्रूयाद्यदितरस्य पूर्वां ब्रूयादीश्वरो निकमो— काठक सं.२६.२

९६. ईश्वरो यज्ञो विवृहो यदुक्थं विगृह्णाति— काठक सं. २७.१०

९७. सोमपा वा एते ब्राह्मणास्तेषां तेजस्वीनि चक्षूंष्यरातीयन्ति वा एते ददते त एनमीश्वराः प्रतिनुदस्तेभ्य एव नमस्करोति— काठक सं. २८.४

९८. पात्नीवतम् : वज्रो वा एष पुरस्तात् संमीयते यदेकादशिनी स ईश्वरः प्रत्यंचं यज्ञं संपुरो यत् पात्नीवतो मीयते— काठक सं. ३०.१

९९. पात्नीवतम् : परांच इव ह्येते न रोहन्ति त ईश्वराः प्रमेतो— काठक सं. ३०.५

१००. स ईश्वरो यजमानो ऽपशुः पराभवितोर्ये बध्यमानमनुबध्यमानाः— काठक सं. ३०.९

१०१. पुरोडाश— काठक सं ३१.७

१०२. छन्दोभिर्हि पराङ् रोहति स ईश्वरः प्रमेतोः।— काठक सं. ३२.५

१०३. असुर्यं वा एतस्माद्वर्णं कृत्वा तेज इन्द्रियं वीर्यं प्रजा पशवो ऽपक्रामन्ति यस्य यूपो विरोहति स ईश्वर ईजानः पापीयान् भवति— काठक सं.३४.२

१०४. अग्नये वीतमन्यवे स्वाहेति जुहुयादीश्वरो वा अभिचरो ऽशान्तः प्रत्यङ्डेता शान्त्यै।— काठक सं.३७.१४

(तैत्तिरीय संहिता, मैत्रायणी संहिता नहीं देखे।)

## उक्थ

१. वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः। सुतसोमा अहर्विदः।।— ऋग्वेद १.२.२

२. त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो। त्वां वर्धन्तु नो गिरः।।— ऋ.१.५.८

३. एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या। इन्द्राय सोमपीतये।।— ऋ.१.८.१०

४. उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे। शक्रो यथा सुतेषु णो रारणत् सख्येषु च।।— ऋ.१.१०.५

५. इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम्। क्रतुर्भवत्युक्थ्यः।।— ऋ.१.१७.५

६. स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहद्भानुः।।— ऋ.१.२७.१२

७. मिमीहि श्लोकमास्ये पर्जन्य इव ततनः। गाय गायत्रमुक्थ्यम्।।— ऋ.१.३८.१४

८. प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।— ऋ.१.४०.५

९. उक्थेभिरर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे।— ऋ.१.४७.१०

१०. सास्मासु धा गोमदश्वावदुक्थ्यमुषो वाजं सुवीर्यम्।।— ऋ.१.४८.१२

बृहत् स्वश्चन्द्रममवद् यदुक्थ्यमकृण्वत भियसा रोहणं दिवः।— ऋ.१.५२.९

११. उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः।।— ऋ.१.५४.७

१२. अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः।— ऋ.१.६१.१३

१३. धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः।।— ऋ.१.६४.१४

१४. वीळु चिद् दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण।— ऋ.१.७१.२

१५. सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति। होता गृणीत उक्थ्यः।।— ऋ.१.७९.१२

१६. तस्मिन् ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम्।।— ऋ.१.८०.१६

१७. अधि द्वयोरदधा उक्थ्यं वचो यतस्रुचा मिथुना या सपर्यतः।— ऋ.१.८३.३

१८. ग्रावा यत्र वदति कारुरुक्थ्यस्तस्येदिन्द्रो अभिपित्वेषु रण्यति।— ऋ.१.८३.६

१९. इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन। सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः।।— ऋ.१.८४.५

२०. अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु। उक्थं मदश्च शस्यते।।— ऋ.१.८६.४

२१. यस्याजस्रं शवसा मानमुक्थं परिभुजद् रोदसी विश्वतः सीम्।— ऋ.१.१००.१४

२२. नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम्।— ऋ.१.१०५.१२

२३. अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम्।— ऋ.१.१०५.१३

२४. स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः।— ऋ.१.१३०.१०

२५. अथा दधाते बृहदुक्थ्यं वय उपस्तुत्यं बृहद् वयः।।— ऋ.१.१३६.२

२६. उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम्।।— ऋ.१.१३६.५

२७. अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः।— ऋ.१.१४०.१३

२८. आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ।।— ऋ.१.१६५.४

२९. असद् यथा न इन्द्रो वन्दनेष्ठास्तुरो न कर्म नयमान उक्था।।— ऋ.१.१७३.९

३०. ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः।— ऋ.१.१८४.१

३१. अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः।— ऋ.२.८.५

३२. अमर्त्यं चिद् दासं मन्यमानमवाभिनदुक्थैर्वावृधानः।।— ऋ.२.११.२

३३. उक्थेष्विन्नु शूर येषु चाकन् त्स्तोमेष्विन्द्र रुद्रियेषु च।— ऋ.२.११.३

३४. बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान्।— ऋ.२.११.१६

३५. तदाहना अभवत् पिप्युषी पयोऽंशोः पीयूषं प्रथमं तदुक्थ्यम्।।— ऋ.२.१३.१

३६. समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः।।— ऋ.२.१३.२

३७. विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः।।— ऋ.२.१३.३

३८. असिन्वन् दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः।।— ऋ.२.१३.४

३९. तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन् त्सास्युक्थ्यः।।— ऋ.२.१३.५

४०. स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः।।— ऋ.२.१३.६

४१. यश्चासमा अजनो दिद्युतो दिव उरुरूर्वा अभितः सास्युक्थ्यः।।— ऋ.२.१३.७

४२. ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत् सास्युक्थ्यः।।— ऋ.२.१३.८

४३. अरज्जौ दस्यून् त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः।।— ऋ.२.१३.९

४४. षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः।।— ऋ.२.१३.१०

४५. जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः।।— ऋ.२.१३.११

४६. नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन् त्सास्युक्थ्यः।।— ऋ.२.१३.१२

४७. आविस्तत् कृष्व यदसत् त उक्थ्यं बृहस्पते वि परिरापो अर्दय।।— ऋ.२.२३.१४

४८. सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्।। (दे.राका)— ऋ.२.३२.४

४९. ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयम्।— ऋ.३.२.१३

५०. मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम्।— ऋ.३.२.१५

५१. प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः।— ऋ.३.५.२

५२. अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः।— ऋ.३.१०.६

५३. प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे।।— ऋ.३.१२.५

५४. अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः।— ऋ.३.२०.१

५५. तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम्।— ऋ.३.२६.२

५६. उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते।।— ऋ.३.३३.८

५७. विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति।।— ऋ.३.३४.७

५८. रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन्। उक्थेष्विन्द्र गिर्वणः।।— ऋ.३.४१.४

५९. इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे। उक्थेभिः कुविदागमत्।।— ऋ.३.४२.४

६०. चर्षणीधृतं मघवानमुक्थ्यमिन्द्रं गिरो बृहतीरभ्यनूषत।— ऋ.३.५१.१

६१. नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः।— ऋ.३.५१.४

६२. धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः।— ऋ.३.५२.१

६३. एदं बर्हिर्यजमानस्य सीदाऽथा च भूदुक्थमिन्द्राय शस्तम्।।— ऋ.३.५३.३

६४. शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन्।।— ऋ.४.२.१६

६५. कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते।।— ऋ.४.३.४

६६. सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः।— ऋ.४.४.७

६७. अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः।— ऋ.४.६.११

६८. त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि।— ऋ.४.११.३

६९. शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म।।— ऋ.४.१६.२

७०. श्रवस्यवः शशमानास उक्थैरोको न रण्वा सुदृशीव पुष्टिः।।— ऋ.४.१६.१५

७१. नव्ये देष्णे शस्ते अस्मिन् त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः।।— ऋ.४.२०.१०

७२. ऋञ्जसानः पुरुवार उक्थैरेन्द्रं कृण्वीत सदनेषु होता।।— ऋ.४.२१.५

७३. ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति।।— ऋ.४.२२.१

७४. उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः। उक्थेष्विन्द्र आभजत्।— ऋ.४.३०.१६

७५. ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा।— ऋ.४.३३.१०

७६. अनश्वो जातो अनभीशुरुक्थ्यो रथस्त्रिचक्रः परि वर्तते रजः।— ऋ.४.३६.१

७७. अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवस्तद् व उक्थ्यम्।।— ऋ.४.३६.४

७८. यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे।।— ऋ.४.४२.६

७९. इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते।— ऋ.४.४९.१

८०. यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन् द्रविणं सद्य आप।।— ऋ.४.५१.७

८१. विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत् सविता सुम्नमुक्थ्यम्।।— ऋ.४.५३.२

८२. वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे।— ऋ.५.४.७

८३. उतो न उत् पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर।।— ऋ.५.६.९

८४. चित्रा वा येषु दीधितिरासन्नुक्था पान्ति ये। स्तीर्णं बर्हिः स्वणरि श्रवांसि दधिरे परि।।— ऋ.५.१८.४

८५. समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि। देवानां दूत उक्थ्यः।।— ऋ.५.२६.६

८६. पुरू यत् त इन्द्र सन्त्युक्था गवे चकर्थोर्वरासु युध्यन्।— ऋ.५.३३.४

८७. अस्मा इत् काव्यं वच उक्थमिन्द्राय शंस्यम्।— ऋ.५.३९.५

८८. विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः।— ऋ.५.४२.९

८९. विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः।— ऋ.५.४५.१

९०. अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय।— ऋ.५.४५.३

९१. उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति।।— ऋ.५.४५.४

९२. वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम।।— ऋ.६.१.१०

९३. यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत्।— ऋ.६.५.५

९४. पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः।।— ऋ.६.१०.१

९५. पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः।— ऋ.६.१०.३

९६. यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट्।— ऋ.६.१३.४

९७. कृष्वा कृत्नो अकृतं यत् ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः।।— ऋ.६.१८.१५

९८. सुत इत् त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे।— ऋ.६.२३.१

९९. सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत्।।— ऋ.६.२३.५

१००. अर्चत्र्यो मघवा नृभ्य उक्थैर्बुक्षो राजा गिरामक्षितोतिः।।— ऋ.६.२४.१

१०१. वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः।— ऋ.६.२४.६

१०२. वृद्धस्य चिद् वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना।।— ऋ.६.२४.७

१०३. त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि।— ऋ.६.२६.५

१०४. इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः।।— ऋ.६.२९.४

१०५. वर्धाद् यं यज्ञ उत सोम इन्द्रं वर्धाद् ब्रह्म गिर उक्था च मन्म।— ऋ.६.३८.४

१०६. तद् व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि।— ऋ.६.४४.६

१०७. नयसीद्वति द्विषः कृणोष्युक्थशंसिनः। नृभिः सुवीर उच्यसे।।— ऋ.६.४५.६

१०८. इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता।— ऋ.६.५९.१०

१०९. इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित्।।— ऋ.६.६५.४

११०. सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा।।— ऋ.६.६७.१०

१११. सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः।।— ऋ.६.६९.३

११२. सद्यश्चिन्नु ते मघवन्नभिष्टौ शास उक्था।— ऋ.७.१९.९

११३. तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद् यथा नः।।— ऋ.७.२६.१

११४. उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः।— ऋ.७.२६.२

११५. शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। चकृमा सत्यराधसे।।— ऋ.७.३१.२

११६. उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत् प्र वदात्यग्रे।— ऋ.७.३३.१४

११७. अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन्।।— ऋ.७.३४.१६

११८. य ईवतो वृषणो अस्ति गोपा सो अद्वयावी हवते व उक्थैः।।— ऋ.७.५६.१८

११९. भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित्।— ऋ.७.५६.२३

१२०. इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत।।— ऋ.८.१.१

१२१. उक्थं चन शस्यमानमगोररिरा चिकेत। न गायत्रं गीयमानं।।— ऋ.८.२.१४

१२२. वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते।।— ऋ.८.२.१६

१२३. गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि। सत्रा दधिरे शवांसि।।— ऋ.८.२.३०

१२४. त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः। त्वां सुतास इन्दवः।।— ऋ.८.६.२१

१२५. इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः। अनुत्तमन्युमजरम्।— ऋ.८.६.३५

१२६. इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम्। कण्वा उक्थेन वावृधुः।।— ऋ.८.६.४३

१२७. यदद्य वां नासत्योक्थैराचुच्युवीमहि।— ऋ.८.९.९

१२८. यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद् वा सुम्नेभिरुक्थ्या।।— ऋ.८.९.२१

१२९. यद् वासि सुन्वतो वृधो यजमानस्य सत्पते। उक्थे वा यस्य रण्यसि समिन्दुभिः।।— ऋ.८.१२.१८

१३०. इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम्। विदे वृधस्य दक्षसो महान् हि षः।।— ऋ.८.१३.१

१३१. स्तोता यत् ते अनुव्रत उक्थान्यृतुथा दधे। शुचिः पावक उच्यते सो अद्भुतः।।— ऋ.८.१३.१९

१३२. त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः। स्तोतॄणामुत भद्रकृत्।।— ऋ.८.१४.११

१३३. तदद्या चित् त उक्थिनो ऽनु ष्टुवन्ति पूर्वथा।— ऋ.८.१५.६

१३४. यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या। अपामवो न समुद्रे।— ऋ.८.१६.२

१३५. अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे।— ऋ.८.२७.१

१३६. यदि मे रारणः सुत उक्थे वा दधसे चनः। आरादुप स्वधा गहि।— ऋ.८.३२.६

१३७. पन्य इदुप गायत पन्य उक्थानि शंसत। ब्रह्मा कृणोत पन्य इत्।— ऋ.८.३२.१७

१३८. स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः।— ऋ.८.३३.२

१३९. नायमच्छा मघवा शृणवद् गिरो ब्रह्मोक्था च सुक्रतुः।।— ऋ.८.३३.१३

१४०. आ नो याह्युपश्रुत्युक्थेषु रणया इह।— ऋ.८.३४.११

१४१. ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम्।— ऋ.८.४५.२९

१४२. य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः।— ऋ.८.५१.३

१४३. य उक्था केवला दधे यः सोमं धृषितापिबत्।— ऋ.८.५२.३

१४४. प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक्।।— ऋ.८.५३.६

१४५. उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः।— ऋ.८.६२.१

१४६. दिवो मानं नोत्सदन् त्सोमपृष्ठासो अद्रयः। उक्था ब्रह्म च शंस्या।— ऋ.८.६३.२

१४७. कं ते दाना असक्षत वृत्रहन् कं सुवीर्या। उक्थे क उ स्विदन्तमः।।— ऋ.८.६४.९

१४८. य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम्।।— ऋ.८.६६.२

१४९. वयं तत् त इन्द्र सं भरामसि यज्ञमुक्थं तुरं वचः।।— ऋ.८.६६.५

१५०. तेषां हि चित्रमुक्थ्यं वरूथमस्ति दाशुषे। आदित्यानामरंकृते।।— ऋ.८.६७.३

१५१. तुभ्येदिन्द्र मरुत्वते सुता सोमासो अद्रिवः। हृदा हूयन्त उक्थिनः।।— ऋ.८.७६.८

१५२. आ त्वशत्रवा गहि न्युक्थानि च हूयसे। उपमे रोचने दिवः।।— ऋ.८.८२.४

१५३. वयमु त्वा शतक्रतो गावो न यवसेष्वा। उक्थेषु रणयामसि।।— ऋ.८.९२.१२

१५४. आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो। स्तोतृभ्य इन्द्र मृळय।।— ऋ.८.९३.२७

१५५. तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः।— ऋ.८.९५.६

१५६. एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान् ममत्तु।।— ऋ.८.९५.७

१५७. उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम्।— ऋ.८.९६.११

१५८. तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः।।— ऋ.८.९९.२

१५९. स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम्।।— ऋ.८.१०३.४

१६०. आ कलशेषु धावति पवित्रं परि षिच्यते। उक्थैर्यज्ञेषु वर्धते।— ऋ.९.१७.४

१६१. यत् सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु। तन्नः पुनान आ भर।— ऋ.९.१९.१

१६२. पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः।।— ऋ.९.२४.६

१६३. सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यम्।। सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्यम्।।— ऋ.९.२९.२

१६४. पुनान इन्दवा भर सोम द्विबर्हसं रयिम्। वृषन्निन्दो न उक्थ्यम्।— ऋ.९.४०.६

१६५. आत् सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत्। उक्थं यदस्य जायते।।— ऋ.९.४७.३

१६६. संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम्।— ऋ.९.४८.२

१६७. अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्यम्।।— ऋ.९.६१.१५

१६८. पवस्व सोम क्रतुविन्न उक्थ्यो ऽव्यो वारे परि धाव मधु प्रियम्।— ऋ.९.८६.४८

१६९. दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत।— ऋ.९.११०.८

१७०. अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्। वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता।।— ऋ.९.१११.३

१७१. विप्रस्य वा यच्छशमान उक्थ्यं वाजं ससवाँ उपयासि भूरिभिः।।— ऋ.१०.११.५

१७२. त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे। शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे।।— ऋ.१०.२४.२

१७३. एते शमीभिः सुशमी अभूवन् ये हिन्विरे तन्वः सोम उक्थैः।— ऋ.१०.२८.१२

१७४. समानमु त्यं पुरुहूतमुक्थ्यं रथं त्रिचक्रं सवना गनिग्मतम्।— ऋ.१०.४१.१

१७५. समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति।— ऋ.१०.४४.८

१७६. आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने।— ऋ.१०.४५.१०

१७७. पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः।।— ऋ.१०.४८.४

१७८. दिद्युं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करम्।।— ऋ.१०.४८.९

१७९. स्वां प्रजां बृहदुक्थो महित्वा ऽऽवरेष्वदधादा परेषु।— ऋ.१०.५६.७

१८०. सं यन्मित्रावरुणावृञ्ज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः।।— ऋ.१०.६१.१७

१८१. वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः।।— ऋ.१०.६१.२६

१८२. उक्थशुष्मान् वृषभरान् त्स्वप्रसस्ताँ आदित्याँ अनु मदा स्वस्तये।।— ऋ.१०.६३.३

१८३. उक्थेभिरत्र मतिभिश्च विप्रो ऽपीपयद्गयो दिव्यानि जन्म।।— ऋ.१०.६४.१६

१८४. इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत्। तुरीयं स्विज्जनयद्विश्वजन्यो ऽयास्य उक्थमिन्द्राय शंसन्।।— ऋ.१०.६७.१

१८५. देवानां नु वयं जाना प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे।।— ऋ.१०.७२.१

१८६. अग्निमुक्थैर्ऋषयो वि ह्वयन्ते ऽग्निं नरो यामनि बाधितासः।— ऋ.१०.८०.५

१८७. नीहारेण प्रावृता जल्प्या चाऽसुतृप उक्थशासश्चरन्ति।।— ऋ.१०.८२.७

१८८. तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः।।— ऋ.१०.८८.५

१८९. त्वं हर्यसि तव विश्वमुक्थ्यमसामि राधो हरिजात हर्यतम्।।— ऋ.१०.९६.५

१९०. इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः।— ऋ.१०.१००.५

१९१. मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः।।— ऋ.१०.१०४.२

१९२. तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम्।— ऋ.१०.१०७.६

१९३. हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या प्र ब्रवाम।।— ऋ.१०.११२.१

१९४. सहस्रधा पञ्चदशान्युक्था यावद् द्यावापृथिवी तावदित् तत्।— ऋ.१०.११४.८

१९५. छन्दः किमासीत् प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे।।— ऋ.१०.१३०.३

१९६. अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत्।।— ऋ.१०.१३०.४

१९७. बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे।।— ऋ.१०.१४०.१

१९८. इदं देवाः शृणुत ये यज्ञिया स्थ भरद्वाजो मह्यमुक्थानि शंसति।— अथर्ववेद २.१२.२

१९९. इन्द्र उक्थामदान्यस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा।— अ.५.२६.३

२००. वैश्वानरो न आगमदिमं यज्ञं सजूरुप। अग्निरुक्थेष्वंहसु।। वैश्वानरोऽङ्गिरसां स्तोममुक्थं च चाक्लृपत्। ऐषु द्युम्नं स्वर्यमत्।।— अ.६.३५.२-३

२०१. सा (कुहू) नो रयिं विश्ववारं नि यच्छाद् ददातु वीरं शतदायमुक्थ्यम्।।— अ.७.४९.१

२०२. सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्।। (राका)— अ.७.५०.१

२०३. पृतनाजितं सहमानमग्निमुक्थैर्हवामहे परमात् सधस्थात्।— अ.७.६५.१

२०४. एकरात्रो द्विरात्रः सद्यःक्रीः प्रक्रीरुक्थ्यः। ओतं निहितमुच्छिष्टे यज्ञस्याणूनि विद्यया।।— अ.११.९.१०

२०५. क्रव्यादमग्निं शशमानमुक्थ्यं हिणोमि पथिभिः पितृयाणै।— अ.१२.२.१०

२०६. विप्रस्य वा यच्छशमान उक्थ्यो वाजं ससवाँ उपयासि भूरिभिः।।— अ.१८.१.२२

२०७. सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती।— अ.१८.१.४३

२०८. शुचीदयन् दीध्यत उक्शासः क्षामा भिन्दन्तो अरुणीरप व्रन्।।— अ.१८.३.२१

२०९. विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति।।— अ.२०.११.७

२१०. वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते।— अ.२०.१८.१

२११. रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन्। उक्थेष्विन्द्र गिर्वणः।।— अ.२०.२३.४

२१२. इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे। उक्थेभिः कुविदागमत्।— अ.२०.२४.४

२१३. अधि द्वयोरदधा उक्थ्यं वचो यतस्रुचा मिथुना या सपर्यतः।— अ.२०.२५.३

२१४. ग्रावा यत्र वदति कारुरुक्थ्यस्तस्येदिन्द्रो अभिपित्वेषु रण्यति।— अ.२०.२५.६

२१५. त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः। स्तोतॄणामुत भद्रकृत्।।— अ.२०.२९.१

२१६. त्वं हर्यसि तव विश्वमुक्थ्यमसामि राधो हरिजात हर्यतम्।।— अ.२०.३०.५

२१७. मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः।।— अ.२०.३३.१

२१८. अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः।— अ.२०.३५.१३

२१९. सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था।— अ.२०.३७.९

२२०. यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या। अपामवो न समुद्रे।।— अ.२०.४४.२

२२१. स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः। कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः।।— अ.२०.५२.२

२२२. स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः।— अ.२०.५७.१५

२२३. एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या। इन्द्राय सोमपीतये।— अ.२०.६०.६

२२४. तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा। वृषपत्नीरपो जया दिवदिवे।।— अ.२०.६१.३

२२५. त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो। त्वां वर्धन्तु नो गिरः।।— अ.२०.६९.६

२२६. एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या। इन्द्राय सोमपीतये।।— अ.२०.७१.६

२२७. शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म।।— अ.२०.७७.२

२२८. इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत।।— अ.२०.८५.१

२२९. तुरीयं स्विज्जनयद् विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन्।।— अ.,२०.९१.१

२३०. यद् वासि सुन्वतो वृधो यजमानस्य सत्पते। उक्थे वा यस्य रण्यसि समिन्दुभिः।।— अ.२०.१११.३

२३१. यदद्य वा नासत्योक्थैराचुच्युवीमहि। यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतम्।।— अ.२०.१४०.४

२३२. यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद्वा सुम्नेभिरुक्थ्या।।— अ.२०.१४२.६

२३३. ब्रह्मणः प्राशित्रहरणम् : तस्मादेतदृषिणाभ्यनूक्तम्- 'पिता यत् स्वां दुहितरमधिष्कन् क्ष्मया रेतः सञ्जग्मानो निषिञ्चत्' इति। तदाग्निमारुतमित्युक्थम्।— शतपथ ब्रा. १.७.४.४

२३४. सप्त चैव शतानि विंशतिश्च। संवत्सरे-संवत्सरे ह वा अस्याग्निहोत्रं महतोक्थेन सम्पद्यते। संवत्सरे-संवत्सरे महदुक्थमाप्नोति-य एवं विद्वानग्निहोत्रं जुहोति -एतदु हास्याग्निहोत्रं महतोक्थेन सम्पद्यते-महदुक्थमाप्नोति।— श. २.३.३.२०

२३५. यद्युक्थ्यः स्यात्। मध्यमं परिधिमुपस्पृशेत्। त्रयः परिधयः-त्रीण्युक्थानि। एतै रु हि तर्हि यज्ञः प्रतितिष्ठति।— श. ३.९.३.३३

२३६. आग्रयण ग्रहः - आत्मा ह्यस्यैषः, मध्यऽइव ह्ययमात्मा दक्षिणोक्थ्यस्थाली भवति, उत्तराऽऽदित्यस्थाली।— श.४.२.२.१६

२३७. उक्थग्रहः - अयं ह वाऽअस्यैषोऽनिरुक्त आत्मा, यदुक्थ्यः, सोऽस्यैष आत्मैव।— श.४.२.३.१

२३८. सैषा कामदुघैवेन्द्रस्योद्धारः। त्रिभ्य एवैनं प्रातःसवनऽउक्थेभ्यो विगृह्णाति, त्रिभ्यो माध्यन्दिने सवने-तत् षट्कृत्वः। षड्वाऽऋतवः। ऋतवो वाऽइमान्त्सर्वान्कामान्पचन्ति।— श.४.२.३.६

२३९. तं वा अपुरोरुक्कं गृह्णाति। उक्थं हि पुरोरुक्। ऋग्घि पुरोरुक्। ऋग्घ्युक्थम्।— श.४.२.३.७

२४०. ऋग्घि पुरोरुक्। ऋग्घ्युक्थम्। स यदेवैनमुक्थेभ्यो विगृह्णाति-तेनो हास्यैष पुरोरुङ्गान्भवति।— श.४.२.३.९

२४१. उक्थाव्यं गृह्णामि इति। उक्थेभ्यो ह्येनं गृह्णाति।— श.४.२.३.१०

२४२. तदु ह चरकाध्वर्यवो विगृह्णन्ति-उपयामगृहीतोऽसि देवेभ्यस्त्वा देवाव्ययम्। उक्थेभ्यः उक्थाव्यम्।— श.४.२.३.१५- १७

२४३. विप्रुड् होमः - तद्धि सलोम-यदाग्नेयम्; अग्निष्टोमऽआलभेत। यद्युक्थ्य स्यात्-ऐन्द्राग्नं द्वितीयमालभेत। ऐन्द्राग्नानि ह्युक्थानि।— श.४.२.५.१४

२४४. स शुक्रामन्थिनौ प्रथमौ गृह्णाति। शुक्रवद्ध्येतत्सवनम्। अथाग्रयणम्। अथ मरुत्वतीयम्। अथोक्थ्यम्। उक्थ्यानि ह्यत्रापि भवन्ति। तद्धैके-उक्थ्यं गृहीत्वाऽथ मरुत्वतीयं गृह्णन्ति। तदु तथा न कुर्यात्। मरुत्वतीयमेव गृहीत्वाऽथोक्थ्यं गृह्णीयात्।— श.४.३.३.३

२४५. पात्नीवत ग्रहः - यद्युक्थ्यः स्यात्-सोमं प्रभावयेति ब्रूयात्।— श.४.४.२.१८

२४६. हारियोजन ग्रहः - शस्तोक्थस्य इति शस्तानि ह्युक्थानि भवन्ति।— श.४.४.३.११

२४७. अनुबन्ध्यायागः - यत्र वै देवा रेतः सिक्तं प्राजनयन्-तदाग्निमारुतमित्युक्थम्।— श.४.५.१.८

२४८. माध्यन्दिने वैनान्त्सवने गृह्णीयात्। उक्थ्यं गृहीत्वा उपाकरिष्यन्वा पूतभृतः। अयं ह वाऽअस्यैषोऽनिरुक्त आत्मा-यदुक्थ्यः।— श.४.५.४.७

२४९. आग्रयणपात्रम्, उक्थ्यपात्रम्, आदित्यपात्रम्-एतान्येवानु गावः प्रजायन्ते। तानि वै तानि पुनर्यज्ञे प्रयुज्यन्ते।— श.४.५.५.८

२५०. पञ्च ह त्वेव तानि पात्राणि-यानीमाः प्रजा अनु प्रजायन्ते-समानमुपांश्वन्तर्यामयोः, शुक्रपात्रम्, ऋतुपात्रम्, आग्रयणपात्रम्, उक्थ्यपात्रम्। पञ्च वाऽऋतवः सम्वत्सरस्य।— श.४.५.५.१२

२५१. पात्रावकाशमन्त्राः - अथोक्थ्यम्-ओजसे मे वर्चोदा वर्चसे पवस्व इति।— श.४.५.६.३

२५२. अथ सोमातिरिक्तानाम्। यद्यग्निष्टोममतिरिच्येत-पूतभृत एवोक्थ्यं गृह्णीयात्। यद्युक्थ्यमतिरिच्येत-षोडशिनमुपेयुः। यदि षोडशिनमतिरिच्येत-रात्रिमुपेयुः। यदि रात्रिमतिरिच्येत-अहरुपेयुः।— श.४.५.१०.८

२५३. विषुवदहः - यद्युक्थ्यः स्याद्-ऐन्द्राग्नं द्वितीयमालभेत। ऐन्द्राग्नानि ह्युक्थ्यानि।— श.४.६.३.३

२५४. अग्निर्वाऽअग्निष्टोमः। अग्निष्टोममेवैतेनोज्जयति। ऐन्द्राग्नमुक्थेभ्यः आलभते। ऐन्द्राग्नानि वाऽउक्थानि उक्थान्येवैतेनोज्जयति। ऐन्द्रं षोडशिनऽआलभते।— श. ५.१.३.१

२५५. केशवपनीय अतिरात्रः - तस्यैकविंशं प्रातःसवनम्, सप्तदशं माध्यन्दिनं सवनम् पञ्चदशं तृतीयसवनम्। सहोक्थैः, सह षोडशिना, सह रात्र्या।— श.५.५.३.३

२५६. बृहद्भानो शवसा वाजमुक्थ्यम्-इति। बलं वै शवः। बृहद्भानो बलेनान्नमुक्थ्यमित्येतत्।— श.७.३.१.२९

२५७. पञ्चनाकसदिष्टकोपधानम्: - स पुरस्तादुपदधाति---आज्यमुक्थमव्यथायै स्तभ्नातु इति। आज्येन हैषोक्थेनाव्यथायै पृथिव्यां स्तब्धा।— श.८.६.१.५

२५८. अथ दक्षिणतः, प्रउगमुक्थमव्यथायै स्तभ्नातु इति। प्रउगेण हैषोक्थेनाव्यथायै पृथिव्यां स्तब्धा।— श.८.६.१.६

२५९. अथ पश्चात्।-----मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु इति। मरुत्वतीयेन हैषोक्थेनाव्यथायै पृथिव्यां स्तब्धा।— श.८.६.१.७

२६०. अथोत्तरतः। --निष्केवल्यमुक्थमव्यथायै स्तभ्नातु इति। निष्केवल्येन हैषोक्थेनाव्यथायै पृथिव्यां स्तब्धा।— श.८.६.१.८

२६१. अथ मध्ये।-- -वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताम् इति। वैश्वदेवाग्निमारुताभ्यां हैषोक्थाभ्यामव्यथायै पृथिव्यां स्तब्धा।— श.८.६.१.९

२६२. एकत्रिंशच्छन्दस्येष्टकोपधानम् :- सा-या सा श्रीः। महत्तदुक्थम्। तद्यत्तन्महदुक्थम्-एतास्ताश्छन्दस्याः।— श.८.६.२.२

२६३. प्रतिष्ठा द्विपदाः। एतावद्वै महदुक्थम्। महदुक्थं श्रीः।— श.८.६.२.४

२६४. तदाहुः- कथमस्यैतच्छतरुद्रियं महदुक्थमाप्नोति, कथं महतोक्थेन सम्पद्यत इति।---अशीतिभिर्हि महदुक्थमाख्यायते। अथ यदूर्ध्वमशीतिभ्यो यदेवादो महत उक्थस्योर्ध्वमशीतिभ्यः- एतदस्य तत्। एवमु हास्यैतच्छतरुद्रियं महदुक्थमाप्नोति। एवं महतोक्थेन सम्पद्यते।— श.९.१.१.४४

२६५. समिद्धे अग्नावधि मामहानः-इति। यजमानो वै मामहानः। उक्थपत्रः-इति। उक्थानि ह्येतस्य पत्राणि।— श.९.२.३.९

२६६. तदाहुः-कथमस्यैषा वसोर्धारा महदुक्थमाप्नोति, कथं महतोक्थेन सम्पद्यते इति।---अशीतिभिर्हि महदुक्थमाख्यायते। अथ यदूर्ध्वमशीतिभ्यो-यदेवादो महत उक्थस्योर्ध्वमशीतिभ्यः एतदस्य तत्। एवमु हास्यैषा वसोर्धारा महदुक्थमाप्नोति, एवं महतोक्थेन सम्पद्यते।— श.९.३.३.१९

२६७. उख्यसंभरणमीमांसा : स यद्यसंवत्सरभृते महदुक्थं शंसेद्-ऋगशीतीः शंसेत्। असर्वं वै तद्-यदसंवत्सरभृतः।------ यदि चासंवत्सरभृतः-सर्वमेव महदुक्थं शंसेत्।— श.९.५.१.६३

२६८. त्रयो ह वै समुद्राः-अग्निर्यजुषाम्, महाव्रतं साम्नाम्, महदुक्थमृचाम्।— श.९.५.२.१२

२६९. अथ योऽस्य सोऽग्रं रसोऽगच्छत्-महत्तदुक्थम्। तमस्य तं रसमृक्सामाभ्यामनुयन्ति।— श.१०.१.१.४

२७०. तस्मिन् होता महतोक्थेन रसं दधाति। सर्वा हैता ऋचो यन्महदुक्थम्।— श.१०.१.१.५

२७१. न वै महाव्रतमिदं स्तुतं शेत इति पश्यन्ति, नो महदिदमुक्थमिति।— श.१०.१.१.६.

२७२. स तृतीयं वयोविधमात्मानमपश्यत्। महदुक्थं तद्व्यधत्त। तेन दिवमाप्नोत्।— श.१०.१.२.१

२७३. अयं वाव लोकः-एषोऽग्निश्चितः। अन्तरिक्षं महाव्रतम्। द्यौर्महदुक्थम्। तस्मादेतानि सर्वाणि सहोपेयात्। अग्निम्, महाव्रतम्, महदुक्थम्।— श.१०.१.२.२

२७४. अथाध्यात्मम्। मन एवाग्निः। प्राणो महाव्रतम्। वाङ्महदुक्थम्।— श.१०.१.२.३

२७५. आत्मैवाग्निः। प्राणो महाव्रतम्। वाङ्महदुक्थम्।— श.१०.१.२.४

२७६. शिर एवाग्नि। प्राणो महाव्रतम्। आत्मा महदुक्थम्।--------महदेवोक्थमातमां ख्यायते। आत्मा हि महदुक्थम्।— श.१०.१.२.५

२७७. अशीतिभिर्हि महदुक्थमाख्यायते।----ततो यानि पञ्चविंशतिः। स पञ्चविंश आत्मा।------एतावद्वै महदुक्थम्। तदेतदत्रैव महदुक्थमाप्नोति।— श.१०.१.२.९

२७८. अथ यत्तत्रोद्गातुः पुरस्ताज्जप्यम्-तच्छतरुद्रियम्। वसोर्धारा महदुक्थम्।— श.१०.१.५.३

२७९. एष उ एवोक्। तस्यैतदन्नं थम्। तदुक्थम्-ऋक्तः। तदेतदेकं सत्-त्रेधाऽऽख्यायते।— श.१०.४.१.४,१५,२१,२२

२८०. तस्मिन् (ग्रहे) होता महतोक्थेन रसं दधाति। सर्वा हैता ऋचो-यन्महदुक्थम्।— श.१०.४.१.१३

२८१. प्राण उ एवोक्-तस्यान्नमेव थं तदुक्थं ऋक्तः।— श.१०.४.१.२३

२८२. मण्डलपुरुषोपासनं ब्राह्मणम् : यदेतन्मण्डलं तपति-तन्महदुक्थम्। ता ऋचः, स ऋचां लोकः।— श.१०.५.२.१

२८३. तस्मान्महदुक्थं परस्मै न शंसेत्-नेदेतां प्रतिष्ठां छिनदा इति। एतां ह स प्रतिष्ठां छिन्ते-यो महदुक्थं परस्मै शंसति। तस्मादुक्थशसं भूयिष्ठं परिचक्षते।— श.१०.५.२.५

२८४. उक्थमिति बह्वृचाः, एष हीदं सर्वमुत्थापयति।— श.१०.५.२.२०

२८५. उक्थविधोपासनम् : अथोक्थस्य। अग्निर्वा उक् तस्याहुतयः एव थम्। आहुतिभिर्ह्यग्निरुत्तिष्ठति।— श. १०.६.२.८

२८६. आदित्यो वा उक्, तस्य चन्द्रमा एव थम्। चन्द्रमसा हि आदित्य उत्तिष्ठति इत्यधिदेवतम्। अथाध्यात्मम्-प्राणो वाऽउक्, तस्यान्नमेव थम्। अन्नेन हि प्राण उत्तिष्ठति-इति नु एवोक्थस्य। स एषोऽग्निविधः, अर्कविधः, उक्थविधः। यत् पुरुषः सः। यो हैतमेवमग्निविधमर्कविधमुक्थविधं पुरुषमुपास्ते।— श.१०.६.२.९

२८७. उत नो ब्रह्मन्नविषऽउक्थेषु देवहूतमः— श.११.४.३.१९

२८८. ते (देवाः) शताग्निष्टोमं सत्रमुपैम। ते यावदासीनः परापश्येत्तावतस्तमोऽपाहन्महि। एवमेव शतोक्थ्येन। यावत्तिष्ठन्परापश्येत्तावतस्तमो-ऽपाहन्महि।--- स होवाच असर्वक्रतुभ्यां वै यज्ञाभ्यामगंत। यदग्निष्टोमेन चोक्थ्येन च। शतातिरात्रं सत्रमुपेत।— श.११.५.५.४

२८९. सम्वत्सरे समुद्रप्रतरणोपासनम् : तदाहुः-कति संवत्सरस्यातिरात्राः। कत्यग्निष्टोमाः। कत्युक्थ्याः। कति षोडशिनः।— श.१२.२.१.६

२९०. द्वादशशतमग्निष्टोमाः। द्वे चतुस्त्रिंशे शते उक्थ्यानाम्। द्वादश षोडशिनः।— श.१२.२.१.७

२९१. एकविंशतिरुक्थ्याः। द्वादश वै मासाः संवत्सरस्य। पञ्चर्तवः। त्रयो लोकाः। तद्विंशतिः। एष एवैकविंशः। य एष तपति एतामभिसंपदम्।------एक उक्थ्यः षोडशिमान्। अन्नं वा उक्थ्यः। वीर्यं षोडशी।— श.१२.२.२.७

२९२. तद्वा एतत्त्रयं सह क्रियते। अग्निरर्क्यं महदुक्थ्यम्।-----अथ यत्संवत्सरं सुत्याभिरेति, तेनो एवास्य महदुक्थ्यमाप्तं भवन्ति।— श.१२.३.३.१४

२९३. अहं वै ते तद्वक्ष्यामि। यथा त उक्थ्यानि मणिरिव सूत्र ओतानि भविष्यन्ति। सूत्रमिव वा मणाविति।— श.१२.३.४.२

२९४. विंशतिशतं पुरस्तात् विषुवत उक्थ्यान्यहान्युपयन्ति। विंशतिशतमुपरिष्टात्। इति नु य उक्थ्यान् स्वरसाम्न उपयन्ति।---- -सप्तदशं शतं पुरस्तात् विषुवत उक्थ्यान्यहान्युपयन्ति। सप्तदशमुपरिष्टात्।— श.१२.३.५.१३

२९५. अथ क्वैतस्य साम्न उक्थम्। का प्रतिष्ठा।---त्रया देवा एकादशेति। एतद्वा एतस्य साम्न उक्थम्। एषा प्रतिष्ठा।— श.१२.८.३.२७

२९६. तस्य हैकेऽग्निष्टोमसाम चतुःसाम कुर्वन्ति। नाग्निष्टोमः। नोक्थ्य इति वदन्तः।— श.१३.५.१.२

२९७. उत्तर महिम ग्रहः - उक्थ्यो यज्ञः। तेनान्तरिक्षलोकमृध्नोति।— श.१३.५.३.९

२९८. त्रयस्त्रिंशमग्निष्टोमसाम। एकविंशा-न्युक्थानि। एकविंशः षोडशी।— श.१३.५.३.१०

२९९. त्रिवृदग्निष्टोमः। पंचदश उक्थ्यः सप्तदशं तृतीयमहः सोक्थकम्। एकविंशः षोडशी।— श.१३.५.४.९

३००. द्वात्रिंशान्युक्थानि। एकविंशः षोडशी।— श.१३.५.४.१०

३०१. एकविंशान्याज्यानि। त्रिणवान्युक्थानि।-----एकविंशान्युक्थानि। एकविंशः षोडशी।— श.१३.५.४.२०

३०२. पुरुषमेधः - तस्याग्निष्टोमः प्रथममहर्भवति। अथोक्थ्यः। अथातिरात्रः। अथोक्थ्यः। अथाग्निष्टोमः। स वा एष उभयतोज्योतिः। उभयतउक्थ्यः।— श. १३.६.१.८

३०३. पुरुषमेधः - अन्नमुक्थ्यः। आत्माऽतिरात्रः। तद्यदेता उक्थ्यावतिरात्रमभितो भवतः। तस्मादयमात्माऽन्नेन परिवृढः।— श.१३.६.१.९

३०४. सर्वमेधः - इन्द्रस्तुदुक्थ्यो द्वितीयमहर्भवति।------ सूर्यस्तुदुक्थ्यस्तृतीयमहर्भवति।— श.१३.७.१.४

३०५. त्र्यन्न ब्राह्मणं :- त्रयं वा इदं नाम रूपं कर्म। तेषां नाम्नां वागित्येतदेषामुक्थ्यम्। अतो हि सर्वाणि नामान्युत्तिष्ठन्ति। अथ रूपाणाम्। चक्षुरित्येतदेषामुक्थ्यम्। अतो हि सर्वाणि रूपाण्युत्तिष्ठन्ति।-अथ कर्मणाम्। आत्मेत्येतदेषामुक्थ्यम्। ' अतो हि सर्वाणि कर्माण्युत्तिष्ठन्ति।— श.१४.४.४.१

३०६. प्राणोपासनाब्राह्मणम् : उक्थम्। प्राणो वा उक्थम्। प्राणो हीदं सर्वमुत्थापयति। उद्धास्मा उक्थविद्धीरस्तिष्ठति। उक्थस्य सायुज्यं सलोकतां जयति।— श.१४.८.१.४१

३०७. देवाश्च ह वा असुराश्च संग्रामं समयतन्त। तत्रैतास्तिस्रो होत्रा जिह्मं प्रतिपेदिरे। तासामिन्द्र उक्थानि सामानि लुलोप। तानि होत्रे प्रायच्छत्। आज्यं ह वै होतुर्बभूव, प्रउगं पोतुः।— गोपथ ब्राह्मण १.३.५

३०८. एकविंशतिउक्थ्याः। एक उक्थ्यः षोडशी। अन्नं वा उक्थ्यो, वीर्यं षोडश्येव।— गो.ब्रा.१.४.२०

३०९. अथ यद् द्वादशमासान् सुत्याभिः, तेनेदं महदुक्थमवाप्नोति।----------अथ यद् द्वादशाहं सुत्याभिः, तेनेदं महदुक्थमवाप्नोति।— गो.ब्रा.१.५.१०

३१०. यजस्वैव हन्त तु ते तद् वक्ष्यामि, यथा सूत्रे मणिरिव सूतान्युक्थाहानि भवन्ति सूत्रमिव वा मणाविति।— गो.ब्रा.१.५.११

३११. अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः। वाजपेयो ऽतिरात्रश्चाप्तोर्यामात्र सप्तमः। इत्येते सुत्याः।— गो.ब्रा.१.५.२३

३१२. ऋचो ऽस्य भागांश्चतुरो वहन्त्युक्थशस्त्रैः प्रमुदो मोदमानाः।— गो.ब्रा. १.५.२४

३१३. उक्थ्या वाजिनः।— गो.ब्रा.२.१.२२

३१४. अथ यद्यहीन उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्यामा वा स्यात्, सर्वाभिः सर्वाभिरत ऊर्ध्वं व्याहृतिभिरनुजानाति,--।— गो.ब्रा.२.२.१४

३१५. हिंकृत्योक्थश ऋचार्त्विज्यं कुर्वन्ति।— गो.ब्रा.२.३.९

३१६. गायत्रीमेवैतत् पुरस्तात् प्रातःसवने ऽचीक्लृपताम्। उक्थं वाचीत्याह शस्त्वा चतुरक्षरम्। ओमुक्थशा इत्यध्वर्युः प्रतिगृणाति चतुरक्षरम्।------ -त्रिष्टुभमेवैतत् पुरस्ताद् माध्यंदिने ऽचीक्लृपताम्। उक्थं वाचीन्द्रायेत्याह शस्त्वा षडक्षरम्। ओमुक्थशा यजेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरम्।------ - जगतीमेवैतत् पुरस्तात् तृतीयसवने ऽचीक्लृपताम्। उक्थं वाचीन्द्राय देवेभ्य इत्याह शस्त्वा नवाक्षरम्। ओमुक्थशा इत्यध्वर्युः प्रतिगृणाति त्र्यक्षरम्। तद् द्वादशाक्षरं संपद्यते।— गो.ब्रा.२.३.१०

३१७. तस्मादेकमेवोक्थं होता मरुत्वतीयेन प्रतिपद्यते निष्केवल्यमेव।— गो.ब्रा.२.३.१२

३१८. प्र वो मित्राय गायत इत्युक्थमुखम्।— गो.ब्रा.२.३.१३

३१९. अयमु त्वा विचर्षणे इत्युक्थमुखम्।— गो.ब्रा.२.३.१४

३२०. सद्यो ह जातो वृषभः कनीनः इत्युक्थमुखम्।— गो.ब्रा.२.४.१

३२१. इन्द्रः पूर्भिदातिरद्दासमर्कैः इत्युक्थमुखम्।— गो.ब्रा.२.४.२

३२२. भूय इद् वावृधे वीर्याय इत्युक्थमुखम्।— गो.ब्रा. २.४.३

३२३.--- -प्रगाथायोक्थमुखाय परिधानीयाया इति पञ्चकृत्व आह्वयन्ते।— गो.ब्रा.२.४.४

३२४. पञ्चोक्थानि माध्यंदिनस्य सवनस्य। स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोति, ---।— गो.ब्रा.२.४.४

३२५. यदभ्युत्थायाहोरात्रयोः संधेर्निर्जघ्नुः, तस्मादुत्थाः।----यदग्निरश्वो भूत्वा प्रथमः प्रजिगाय, तस्मादाग्नेयीभिरुक्थानि प्रणयन्ति।---- यत् पञ्च देवता अभ्युत्तस्थुः, तस्मात् पञ्च देवता उक्थे शस्यन्ते।----एते ह वा एतान् पञ्चभिः प्राणैः समीर्योदस्थापयन्। तस्मादु एवैताः पञ्च देवता उक्थे शस्यन्ते।— गो.ब्रा.२.४.११

३२६. ये ह वा एनं पञ्चभिः प्राणैः समीर्योदस्थापयन् ता उ एवैताः पञ्च देवता उक्थे शस्यन्ते।— गो.ब्रा.२.४.१२

३२७. अथ कस्माद् भूयिष्ठा देवता उक्थे शस्यन्त इति? अन्तो वा आग्निमारुतमन्तरुक्थान्यन्त आश्विनम्।---- अथ कस्माद् भूयिष्ठा देवता उक्थे शस्यन्त इति? द्वे द्वे उक्थमुखे भवतः, तद् यद् द्वे द्वे।— गो.ब्रा.२.४.१३

३२८. अथ यदैन्द्रावरुणं मैत्रावरुणस्योक्थं भवति, ऐन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति, ऐन्द्रावैष्णवमच्छावाकस्योक्थं भवति।----- -।— गो.ब्रा.२.४.१४

३२९. अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवति- इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रतौ इत्यृचाभ्यनूक्तम्।---- -चर्षणीधृतं मघवानमुक्थ्यम् इत्युक्थमुखम्। --------ऐन्द्रावरुणमस्यैतद् नित्यमुक्थम्।— गो.ब्रा.२.४.१५

३३०. अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति-इन्द्रश्च सोमं पिबतं बृहस्पते--------। प्र

मंहिष्ठाय बृहते बृहद्रये इत्युक्थमुखम्।----- ऐन्द्राबार्हस्पत्यमस्यैतद् नित्यमुक्थम्।— गो.ब्रा.२.४.१६

३३१. अथ यदैन्द्रावैष्णवमच्छावाकस्योक्थं भवति- इन्द्राविष्णू मदपती मदानामा सोमं यातं----। ऋतुर्जनित्री तस्या अपस्परि इत्युक्थमुखम्। ---- ऐन्द्रावैष्णवमस्यैतद्, नित्यमुक्थम्।— गो.ब्रा.२.४.१७

३३२. अथाध्वर्यो शंशंसावोमिति स्तोत्रियानुरूपायोक्थमुखाय परिधानीयाया इति चतुश्चतुराह्वयन्ते।---- -असौ वै लोकस्तृतीयसवनम्। तस्य पञ्च दिशः। पञ्चोक्थानि तृतीयसवनस्य। स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोति।— गो.ब्रा.२.४.१८

३३३. पुरुषो वै यज्ञः। तस्य शिर एव हविर्धानम्, मुखमाहवनीयः, उदरं सदः, अन्नमुक्थानि, ------। — गो.ब्रा.२.५.४

३३४. तदाहुः-यदेतत् साम गीयते, अथ क्वैतस्य साम्न उक्थम्? का प्रतिष्ठा? त्रया देवा एकादशेत्याहुः, एतद् वा एतस्य साम्न उक्थम्, एषा प्रतिष्ठा।— गो.ब्रा.२.५.७

३३५. ता (प्रजाः) अतिरिक्तोक्थे वारवन्तीयेनावारयन्। तस्मादेषो ऽतिरिक्तोक्थवान् भवति।— गो.ब्रा.२.५.९

३३६. तद् यथैवादो ऽह्न उक्थानामाग्नेयं प्रथमं भवति, एवमेवैतदत्राप्याग्नेयं प्रथमं भवति।---- ऐन्द्रावैष्णवमच्छावाकस्योक्थं भवति। चतुराहा- वान्यतिरिक्तोक्थानि भवन्ति। पशवो वा उक्थानि।— गो.ब्रा.२.५.१०

३३७. तदाहुः -- कथं द्वयुक्थो होतैकसूक्त एकोक्था होत्रा द्विसूक्ता इति? असौ वै होता यो ऽसौ तपति, स वा एक एव, तस्मादेकसूक्तः।------रश्मयो वाव होत्रा, ते वा एकैकं, तस्मादेकोक्थाः। तद् यदेकैकस्य रश्मेर्द्वौ द्वौ वर्णौ भवतः, तस्माद् द्विसूक्ताः। संवत्सरो वाव होता, स वा एक एव, तस्मादेकसूक्तः। तस्य यद्द्वयान्यहानि भवन्ति शीतान्यन्यान्युष्णान्यन्यानि, तस्माद् द्वयुक्थः। ऋतवो वाव होत्राः, ते वा एकैकम्, तस्मादेकोक्थाः।-----स यत् पुरुषो भवत्यन्यथैव प्रत्यङ् भवत्यन्यथा प्राङ्, तस्माद् द्वयुक्थः। अङ्गानि वाव होत्राः, तानि वा एकैकम्, तस्मादेकोक्थाः। तद् यदेकैकमङ्गं द्युतिर्भवति, तस्माद् द्विसूक्ताः। तदाहुः -- यद् द्वयुक्थो होतैकसूक्त एकोक्था होत्रा द्विसूक्ताः, कथं तत् समं भवति ?-------। तदाहुः -- यदग्निष्टोम एव सति यज्ञे सर्वा देवताः सर्वाणि छन्दांस्याप्याययन्ति, अथ कतमेन छन्दसायातयामान्युक्थानि प्रणयन्ति, कया देवतयेति? गायत्रेण छन्दसाग्निना देवतयेति ब्रूयात्।— गो.ब्रा.२.६.६

३३८. आग्नेयीषु मैत्रावरुणस्योक्थं प्रणयन्ति।---- -- -ऐन्द्रीषु ब्राह्मणाच्छंसिन उक्थं प्रणयन्ति।---- - वीर्यं वा इन्द्रः, ब्रह्म बृहस्पतिः, पशव उक्थानि, वीर्येणैव तद् ब्रह्मणा चोभयतः पशून् परिगृह्णाति, स्थित्यै, अनपक्रान्त्यै। ऐन्द्रीष्वच्छावाकस्योक्थं प्रणयन्ति।-३--- -- -धराणि ह वा अस्यैतान्युक्थातानि भवन्ति यद् नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुत्।— गो.ब्रा.२.६.७

३३९. एतेषां वा एषां शिल्पानां विश्वजिति सांवत्सरिके द्वे होतुरुक्थे माध्यंदिनमभिप्रच्यवेते, हन्ताहमित्थमेवयामरुतं शंसयानीति।— गो.ब्रा.२.६.९

३४०. यद् वेवैनाः संशंसति, यद् नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुदेतानि वा अत्रोक्थानि भवन्ति, तस्माद् न संशंसति।— गो.ब्रा.२.६.१६

३४१. महावीर प्रवर्ग्य पात्र हेतु एकपातिनी ऋचाएं : परि त्वा गिर्वणो गिरोऽधि द्वयोरदधा उक्थ्यं वचः— ऐतरेय ब्राह्मण १.१९

३४२. अधि द्वयोरदधा उक्थ्यं वच इति, द्वयोर्ह्येतत्तृतीयं छदिरधि निधीयते, इति। उक्थ्यं वच इति यदाह यज्ञियं वै कर्मोक्थ्यं वचो यज्ञमेवैतेन समर्धयति, इति।— ऐ.ब्रा.१.२९

३४३. प्रजापतेर्वा एतदुक्थं यत्प्रातरनुवाकस्तस्मिन्सर्वे कामा अवरुन्ध्यन्ते— ऐ.ब्रा.२.१७

३४४. समस्यत्युत्तरे पदे तस्मात्पुमानूरू समस्यति तन्मिथुनं मिथुनमेव तदुक्थमुखे करोति प्रजात्यै।— ऐ.ब्रा.२.३५

३४५. सा विराट् त्रयस्त्रिंशदक्षरा भवति त्रयस्त्रिंशद्वै देवा-----तत्प्रथम उक्थमुखे देवता आक्षरभाजः करोत्यक्षरमेव तद्देवता अनुप्रपिबन्ति देवपात्रेणैव तद्देवतातृप्यन्ति।----या वा आग्नेन्द्रयैन्द्राग्नी वै सा सेन्द्राग्नमेतदुक्थं ग्रहेण च तूष्णींशंसेन च।— ऐ.ब्रा.२.३७

३४६. अच्छिद्रोक्था कवयः शंसन्निति ये वा अनूचानास्ते कवयस्त इदमच्छिद्रं रेतः प्रजनयन्नित्येव तदाह।--- -ब्रह्म वै बृहस्पतिः क्षत्रं सोम स्तुतशस्त्राणि नीथानि चोक्थामदानि च दैवेन चैवैतद्ब्रह्मणा प्रसृतो दैवेन च क्षत्रेणोक्थानि शंसति।— ऐ.ब्रा.२.३८

३४७. ग्रहोक्थं वा एतद्यत्प्रउगं नव प्रातर्ग्रहा गृह्यन्ते नवभिर्बहिष्पवमाने स्तुवते----। वायव्यं शंसति तेन वायव्य उक्थवान्। ऐन्द्रवायवं शंसति तेनैन्द्रवायव उक्थवान्। मैत्रावरुणं शंसति तेन मैत्रावरुण उक्थवान। आश्विन शंसति तेनाऽऽश्विन उक्थवान्। ऐन्द्रं शंसति तेन शुक्रामन्थिना उक्थवन्तौ। वैश्वदेवं शंसति तेनाऽऽग्रयण उक्थवान्। सारस्वतं शंसति। न सारस्वतो ग्रहोऽस्ति। वाक्तु सरस्वती ये तु के च वाचा ग्रहा गृह्यन्ते तेऽस्य सर्वे शस्तोक्थाः। उक्थिनो भवन्ति य एवं वेद।— ऐ.ब्रा.३.१

३४८. यजमान का पुनर्जन्म : अन्नाद्यं वा एतेनावरुन्धे यत्प्रउगयन्याऽन्या देवता प्रउगे शस्यतेऽन्यदन्यदुक्थं प्रउगे क्रियते। अन्यदन्यदस्यान्नाद्यं गृहेषु य एवं वेद। एतद्ध वै यजमानस्याध्यात्मतमिवोक्थं यत्प्रउगं तस्मादेनेनैतदुपेक्ष्यतममिवेत्याहुरेतेन ह्येनं होता संस्करोति। वायव्यं शंसति---- -। ऐन्द्रवायवं शंसति-----। मैत्रावरुणं शंसति------- -। आश्विनं शंसति----- -। ऐन्द्रं शंसति-- ----। वैश्वदेवं शंसति---- ---। सारस्वतं शंसति— ऐ.ब्रा.३.२

३४९. प्राणानां वा एतदुक्थं यत्प्रउगं सप्त देवताः शंसति सप्त वै शीर्षन्प्राणाः शीर्षन्नेव तत्प्राणादधाति।— ऐ.ब्रा.३.३

३५०. विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिरिति वैश्वदेवमुक्थं शस्त्वा वैश्वदेव्या जयति यथाभागं तद्देवता प्रीणाति।— ऐ.ब्रा.३.४

३५१. गर्भा वा एत उक्थानां यन्निविदस्तद्यत्पुरस्तादुक्थानां प्रातःसवने धीयन्ते तस्मात्पराञ्चो गर्भा धीयन्ते पराञ्चः संभवन्ति। पेशा वा एत उक्थानां यन्निविदस्तद्यत्पुरस्तादुक्थानां प्रातःसवने धीयन्ते यथैव प्रवयणतः पेशः कुर्यातादृक्तत्---- -।— ऐ.ब्रा.३.१०

३५२. सौर्या वा एता देवता यन्निविदस्तद्यत्पुरस्तादुक्थानां प्रातःसवने धीयन्ते मध्यतो मध्यंदिने ततस्तृतीयसवन आदित्यस्यैव तद्व्रतमनु पर्यावर्तन्ते।— ऐ.ब्रा.३.११

३५३. उक्थं वाचीन्द्रायेत्याह शस्त्वा सप्ताक्षरमोमुक्थशा इत्यध्वर्युश्चतुरक्षरं तदेकादशाक्षरं संपद्यत।-------- उक्थं वाचीन्द्राय देवेभ्य इत्याह शस्त्वैकादशाक्षरमोत्यध्वर्युरेकाक्षरं तद्द्वादशाक्षरं संपद्यते।— ऐ.ब्रा.३.१२

३५४. तान्यु वा एतान्युपसदामेवोक्थानि यद्धाय्या अग्निर्नेतेत्याग्नेयी प्रथमोपसत्तस्या एतदुक्थं त्वं सोम क्रतुभिरिति सौम्या द्वितीयोपसत्तस्या एतदुक्थं पिन्वन्त्यप इति वैष्णवी तृतीयोपसत्तस्या एतदुक्थम्।— ऐ.ब्रा.३.१८

३५५. सो (इन्द्रः)ऽवेदिमे वै लोक मे सचिवा इमे माऽकामयन्त हन्तेमानस्मिन्नुक्थ आभजा इति तानेतस्मिन्नुक्थ आभजदथहैते तर्ह्युभे एव निष्केवल्ये उक्थे आसतु।----मरुत्वतीयमुक्थं शस्त्वा मरुत्वतीयया यजति यथाभागं तद्देवताः प्रीणाति।— ऐ.ब्रा.३.२०

३५६. स एतं माहेन्द्रं ग्रहमब्रूत माध्यंदिनं सवनानां निष्केवल्यमुक्थानां त्रिष्टुभं छन्दसां---।—ऐ.ब्रा.३.२१

३५७. पाञ्चाजन्यं वा एतदुक्थं यद्वैश्वदेवं सर्वेषां वा एतत्पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितृणां चैतेषां वा एतत्पञ्चजनामुक्थं सर्व एनं पञ्चजना विदुः।— ऐ.ब्रा.३.३१

३५८. अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्याग्निमारुतमुक्थं शस्त्वाऽऽग्निमारुत्या यजति यथाभागं तद्देवताः प्रीणाति।— ऐ.ब्रा.३.३८

३५९. इति नु पुरस्तादथोपरिष्टात्पञ्चदशोक्थ्यस्य स्तोत्राणि पञ्चदश शस्त्राणि स मासो मासधा संवत्सरो विहित संवत्सरोऽग्निर्वैश्वानरोऽग्निष्टोमः संवत्सरमेवानूक्थ्योऽग्निष्टोममप्येत्युक्थ्यमपि यन्तमनु वाजपेयोऽप्येत्यत्युक्थ्यो हि स भवति।— ऐ.ब्रा.३.४१

३६०. अग्निष्टोमं वै देवा अश्रयन्तोक्थान्यसुरास्ते समावद्वीर्या एवाऽऽसन्न व्यवर्तन्त तान्भरद्वाज ऋषीणामपश्यदिमे वा असुरा उक्थेषु श्रितास्तानेषां न कश्चन पश्यतीति सोऽग्निमुदह्वयत्। ऐह्यू षु ब्रवाणि ते ऽग्न इत्थेतरा गिर। असुर्या ह वा इतरा गिरः।---- भरद्वाजो ह वै कृशो दीर्घः पलित आस। सोऽब्रवीदिमे वा असुरा उक्थेषु श्रितास्तान्वो न कश्चन पश्यतीति। तानग्निरश्वो भूत्वाऽभ्यत्यद्रवद्यदग्निरश्वो भूत्वाऽभ्यत्यद्रवत्तत्साकमश्वं समाभवत्तत्साकमश्वस्य साकमश्वत्वम्। तदाहुः साकमश्वेनोक्थानि प्रणयेदप्रणीतानि वाव तान्युक्थानि यान्यन्यत्र साकमश्वादिति। प्रमंहिष्ठीयेन प्रणयेदित्याहुः प्रमंहिष्ठीयेन वै देवा असुरानुक्थेभ्यः प्राणुदन्त।— ऐ.ब्रा.३.४९

३६१. ते वा असुरा मैत्रावरुणस्योक्थमश्रयन्त सोऽब्रवीदिन्द्र कश्चाहं चेमानितोऽसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीद्वरुणस्तस्मादैन्द्रावरुणं----ते वै ततोऽपहता असुरा ब्राह्मणाच्छंसिन उक्थमश्रयन्त सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीद्बृहस्पतिस्तस्मादैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवने शंसति---ते वै ततोऽपहता असुरा अच्छावाकस्योक्थमश्रयन्त सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीद्विष्णुस्तस्मादैन्द्रावैष्णवमच्छावाकस्तृतीयसवने शंसति— ऐ.ब्रा.३.५०

३६२. वज्रो वै षोळशी पशव उक्थानि तं परस्तादुक्थानां पर्यस्य शंसति। तं यत्परस्तादुक्थानां पर्यस्य शंसति वज्रेणैव तत्षोळशिना पशून्परिगच्छति — ऐ.ब्रा.४.१

३६३. चितैधमुक्थमिति ह स्म वा एतदाचक्षते यदेतदाश्विनं— ऐ.ब्रा.४.१०

३६४. उक्थ्यो भवति पशवो इति उक्थानि पशूनामवरुद्ध्यै।— ऐ.ब्रा.४.१२

३६५. उक्थ्य एव स्यात्पशुसमृद्धो यज्ञः पशुसमृद्धं सत्रं सर्वाणि चतुर्विंशानि स्तोत्राणि प्रत्यक्षाद्ध्येतदहश्चतुर्विंशं तस्मादुक्थ्य एव स्यात्।— ऐ.ब्रा.४.१२

३६६. आदित्यों व अङ्गिरसों में स्वर्ग लोक हेतु प्रतिस्पर्धा : यथा वा प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थ्यः सर्वेऽभिप्लवाः षळहा आक्ष्यन्त्यन्यान्यहानि तदादित्यानामयनम्। प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थः सर्वे पृष्ठ्याः षळहा अक्ष्यत्यन्याहानि तदङ्गिरसामयनम्।— ऐ.ब्रा.४.१७

३६७. तदाहुर्विषुवत्येवैतदहः शंसेद्विषुवान्वा एतदुक्थानामुक्थं विषुवान्विषुवानिति ह विषुवन्तो भवन्ति श्रेष्ठतामश्नुवत।— ऐ.ब्रा.४.२२

३६८. अनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवं रथस्त्रिचक्र इति त्रिवत्तृतीयेऽहनि तृतीयस्याह्नो रूपम्।— ऐ.ब्रा.५.२

३६९. भूर्भुवः स्वरित्युक्थ्ये वाऽतिरात्रे वा ब्रूयादिन्द्रवन्तः स्तुध्वमिति।— ऐ.ब्रा.५.३४

३७०. अथाऽऽह यदेतास्तिस्र उक्थिन्यो होत्राः कथमितरा उक्थिन्यो भवन्तीति। आज्यमेवाऽऽग्नीध्रीयाया उक्थं मरुत्वतीयं पोत्रीयायै वैश्वदेवं नेष्ट्रीयायै ता वा एता होत्रा एवं न्यङ्गा एव भवन्ति।— ऐ.ब्रा.६.१४

३७१. ऐरयेथामेरयेथामित्यच्छावाक उक्थ्येऽभ्यस्यति स हि तत्रान्त्यो भवति।— ऐ.ब्रा.६.१५

३७२. एतानि वा अत्रोक्थानि नाभानेदिष्ठो वालखिल्या वृषाकपिरेवयामरुत्स यत्संशंसेदपैव स एतेषु कामं राध्नुयात्।— ऐ.ब्रा.६.३६

३७३. उक्थ्य एवायं पञ्चदशः स्यादित्याहुरोजो वा इन्द्रियं वीर्यं पञ्चदश ओजः क्षत्रं वीर्यं राजन्यस्तदेनमोजसा क्षत्रेण वीर्येण समर्धयति।---- विराज्येवैनं तदन्नाद्ये प्रतिष्ठापयति तस्मात्तदुक्थ्यः पञ्चदशः स्यादित्याहुः।— ऐ.ब्रा.८.४

३७४. -------तं वाजपेयं तं षोडशिनं तम् उक्थ्यं तम् अग्निष्टोमं तम् इष्टिपशुबन्धांस्---- अभिसमभरन्।— जैमिनीय ब्राह्मण १.४

३७५. एते असृग्रम् इन्दवः तिरः पवित्रम् आशवः इति। आशवः इति स्तोमान् विश्वानि इत्य् उक्थानि अभि सौभगा इत्य् एवैनान् जातान् सौभाग्येनाभ्यानक्।— जै.ब्रा.१.९४

३७६. ते ऽसुरास् त्रयाणां सवनानां रसं वीर्यं प्रवृह्यान्धं तमः प्राविशन्।-----ते देवा असुरान् अन्वभ्यवायन्। तान् असुरान् एतैर् एवोक्थैः प्रत्युदतिष्ठन्। यद् उक्थैः प्रत्युदतिष्ठंस् तद् उक्थानाम् उक्थत्वम्।— जै.ब्रा.१.१७९

३७७. पशवो वा उक्थानि वज्रष् षोडशी। यद् उक्थानाम् अन्ततष् षोडशिना स्तुवन्ति वज्रेणैव तत् पशून् परिगृह्णन्त्य् अपरावापाय।— जै.ब्रा.१.२०१

३७८. तद् आहुर् नोक्थष् षोडशी कार्य इति। पशवो वा उक्थानि वज्रष् षोडशी।— जै.ब्रा.१.२०२

३७९. एषा वा उक्थस्य संमा यद् रात्रिः। त्रीण्य् उक्थानि त्रिदेवत्यस् संधिः।------रात्र्या त्वाव त्रयोदशो मास आप्यते।— जै.ब्रा.१.२०६

३८०. ब्रह्म वा अग्निष्टोमः। ब्रह्म वै ब्राह्मणस्य स्वम्। अग्निष्टोमं च ह्य् अतिमन्यत उक्थं च षोडशिनम्। तद् उ वा आहुर् अग्निष्टोममात्रं वावाग्निष्टोमेनाभिजयत्य् उक्थमात्रम् उक्थेन षोडशिमात्रं षोडशिना रात्र्या त्वाव सर्वम् अवरुन्द्ध इति।— जै.ब्रा.१.२०७

३८१. आश्विनं ह खलु वै संधेर् उक्थम्।— जै.ब्रा.१.२०९

३८२. चतुर्विंशत्यर्धमासस् संवत्सरश् चतुर्विंशति रात्र्या उक्थामदानि।— जै.ब्रा.१.२१२

३८३. --- इमं जम्भसुतं पिब धानावन्तं करम्भिणम् अपूपवन्तम् उक्थिनम् इति।— जै.ब्रा.१.२२०

३८४. ----ऽत्य् उ वा एकविंशान्य् उक्थानि रात्रिर् एत्य् अथ केनैषाम् एकविंशम् अनु रात्रिस् संतिष्ठत इति।— जै.ब्रा.१.२३२

३८५. कस्माद् यन्ति पवमानाः पराञ्चः कस्माद् उक्थ्या पुनर् अभ्याकनिक्रति इति। देवा अन्यां वर्तनिम् अध्वरस्य मानुषास उपजीवन्त्य् अन्याम्। तस्माद् यन्ति पवमानाः पराञ्चस् तस्माद् उक्थ्याः पुनर् अभ्याकनिक्रति इति।— जै.ब्रा.१.२७७

३८६. अथोक्थानि छन्नमिश्राणीव गायेत्। अह्नो ह्य् उक्थानि अथ रात्रिम् आविर् एव गायेत्। छन्नेवाह्नो रात्रिः।— जै.ब्रा.१.३४०

३८७. यदीतरे ऽग्निष्टोमं कुर्वीरन्न् अथात्मनोक्थ्यं कुर्वीरन्। यदीतर उक्थ्यं कुर्वीरन्न् अथात्मना षोडशिनं गृह्णीरन्।— जै.ब्रा.१.३४४

३८८. यदि तृतीयसवनात् सोमो ऽतिरिच्यते ऽतो उक्थ्यं कुर्वीरन्। यद्य् उक्थ्यम् अतिरिच्येत षोडशिनं गृह्णीरन्।— जै.ब्रा.१.३५०

३८९. यदि तृतीयसवने कलशो दीर्येतोक्थ्यं कृत्वा यत् सोमम् इन्द्र विष्णवे इत्य् एतासु ब्रह्मसाम कुर्युः।— जै.ब्रा.१.३५२

३९०. अथ यद् उक्थ्या भवन्ति। पशवो वा उक्थ्यानि। अन्नं पशवः। स यथान्नेन सह श्रेयांसं प्रतिनन्दन्तम् उपेयाद् एवम् एवैनम् एतद् उक्थ्यै स्वरसामभिर् उपयन्ति।------ -तद् यद् उक्थान्य् अन्तरेण भवन्ति। पशवो वा उक्थानि। अन्नं पशवः। अन्नेनैतम् अशमयन्।— जै.ब्रा.२.७

३९१. तान् (गर्भान्) उक्थैर् उत्थापयति। तद् उक्थानां उक्थत्वम्। तेभ्य एतद् देव्यं मध्व् अशीतीर् अन्नाद्यं प्रयच्छति।— जै.ब्रा.२.२४

३९२. तद् धैतद् एके ऽभिप्लवस्य षष्ठम् अहर् उक्थ्यं कुर्वन्त्य् एवं सभारम् इति।— जै.ब्रा. २.३२

३९३. अथ यास् तिस्रः परिशिष्टा आसुस् तानि हैवोक्थानि चक्रतुः। स एष उक्थ्यो यज्ञः। शश्वद् धैष एव प्रथम उक्थ्यानाम्-अथ ततो ऽग्निष्टोमा एव पराञ्चः।।— जै.ब्रा.२.८४

३९४. स (मनुस्तोमः) उक्थ्यो भवति। प्रजा वै पशव उक्थानि। प्रजा वै पशवः प्रजननम्।— जै.ब्रा.२.१०८

३९५. यजमानकामो वा एष यद् ब्रह्मसाम। स्व एव तद् आयतने यजमानम् अन्नाद्येन समृद्ध्यन्ति। स उक्थ्यो भवति-प्रजा वै पशव उक्थानि। प्रजा वै पशव स्वर्गो लोक।— जै.ब्रा.२.१०९

३९६. प्रजापतिः पशून् असृजत। ते ऽस्मात् सृष्टाः प्राद्रवन्। तान् अग्निष्टोमेनाविवारयिषत। ते तद् अत्याद्रवन्। तान् उक्थ्येनाविवारयिषत। ते तद् अत्याद्रवन्। तान्----।— जै.ब्रा.२.११०

३९७. एहीळा एहीळा इति -- पशवो वा इळा -- तस्माद् एतान्य् अतिरिक्तोक्थानि कार्याणीति।------ तस्माद् एतान्य् अतिरिक्तोक्थानि कार्याण्य् एवेति।— जै.ब्रा.२.११२

३९८. स (गोसवः) उक्थ्यो भवति -- प्रजा वै पशव उक्थानि। प्रजा वै पशव स्वर्गो लोक।— जै.ब्रा.२.११३

३९९. स (विवधः) उक्थ्यो भवति -- पशवो वा उक्थानि -- पशूनाम् एवावरुद्ध्यै।— जै.ब्रा. २.११४

४००. अग्निष्टोमयज्ञा वा आदित्या उक्थ्ययज्ञा अंगिरसः। स एष उक्थ्यो निदानेन सन् अग्निष्टोमः प्रत्याह्रियते क्षिप्रतायै।— जै.ब्रा.२.१२१

४०१. स उक्थ्यो भवति। विड् वा उक्थानि। क्षत्रम् एव तद् विश्य् अध्यूहन्ति।— जै.ब्रा.२.१४०

४०२. तस्य प्रत्नं पीयूषं पूर्वं यद् उक्थ्यम् इत्य् एताः सतोबृहतयो भवन्ति गायत्रीभाजनम्।— जै.ब्रा.२.१४२

४०३. तस्य पञ्च स्तोत्राणि चतुस्त्रिंशानि कुर्युस् सर्वान् पवमानान् उभे ब्रह्मसामनी। तावतीर् उक्थ्यस्य स्तोत्र्याः। आप्नुवन्ति तं कामं य उक्थ्ये। नो वा अग्निष्टोमाद् यन्ति। न ह खलु वा एषो ऽग्निष्टोमो नोक्थ्यो न षोडशिमान् नातिरात्रः।— जै.ब्रा.२.१९२

४०४. हाविष्मतम् एवोत्तरस्याह्न उक्थेषु ब्रह्मसाम कुर्युः।— जै.ब्रा.२.२३७

४०५. अथ यस्यैतस्य ज्योतिर् उक्थ्यः पूर्वम् अहर् भवत्य् आयुर् अतिरात्र उत्तरम्,------।— जै.ब्रा.२.२३८

४०६. तस्य (प्राजापत्यस्य)अग्निष्टोमाव् अभितो भवत, उक्थ्यौ मध्ये। ब्रह्म वा अग्निष्टोमः, प्रजा पशव उक्थ्यानि।— जै.ब्रा. २.२८८

४०७. अथ यस्यैतस्य ज्योतिषी अग्निष्टोमाव् अभितो भवतो, गोआयुषी उक्थ्याव् अन्तरौ, ज्योतिर् अतिरात्रो मध्ये, प्रजननकामो हैतेन यजेत।-------गोआयुषी उक्थ्याव् अन्तरौ भवतः। पशवो वा उक्थानि।---- अथ यस्यैतस्य ज्योतिषी अतिरात्राव् अभितो भवतो, गोआयुषी उक्थ्याव् अन्तरौ, ज्योतिर् अग्निष्टोमो मध्ये,-- --। गोआयुषी उक्थ्याव् अन्तरौ भवतः। पशवो वा उक्थानि।— जै.ब्रा.२.२९६

४०८. अथ यस्यैतस्य विश्वजिद् अभिजिताव् अतिरात्राव् अभितो भवतो, गौर् आयुर् गौर् आयुर् इति चत्वार उक्थ्या मध्ये, पशुकामो हैतद् उपेयुः।---- अथैते चत्वारो मध्य उक्थ्या भवन्ति। पशवो वा उक्थानि।— जै.ब्रा.२.३००

४०९. संवत्सरो वा एष यद् अग्निष्टोमः।---- अथैकविंशैर् उक्थ्यै रात्रिम् उपावरोहेयुर् इति।— जै.ब्रा.२.३०४

४१०. --- -चत्वार एते मध्य उक्थ्या भवन्ति। पशवो वा उक्थानि। तेषां सहस्रं स्तोत्र्याः।— जै.ब्रा.२.३१५

४११. अथैष विविधः। तस्य ज्योतिर् अग्निष्टोमो गौर् उक्थ्य आयुर् उक्थ्यो ज्योतिर् अग्निष्टोम आयुर् अतिरात्रो ज्योतिर् अग्निष्टोमो गौर् उक्थ्य आयुर् उक्थ्यो ज्योतिर् अग्निष्टोमः। पशुकामो हैतेन यजेत। तस्यैषो ऽन्यतस्संगो गोआयुषी उक्थ्याव् अन्तरौ भवतः। पशवो वा उक्थानि।------।— जै.ब्रा.२.३२१

४१२. अथैष कुसुर्विन्ददशरात्रः। तस्य त्रयस् त्रिवृतो ऽग्निष्टोमास् त्रयः पञ्चदशा उक्थ्यास् त्रयस् सप्तदशा उक्थ्या ज्योतिर् अतिरात्रो,---- -।— जै.ब्रा.२.३३२

४१३. अथैषो ऽभ्रिर् उभयतःक्ष्णूः। तस्य त्रिवृद् अग्निष्टोमः पुरस्ताद् भवति, त्रिवृद् अग्निष्टोम उपरिष्टाद्, अष्टाव् उक्थ्याः सप्तदशा मध्ये।--------ब्रह्म वा अग्निष्टोमः, पशव उक्थानि। ब्रह्मणैव तद् उभयतः पशून् परिगृहीते ऽपरावापाय।— जै.ब्रा.२.३३३

४१४. अथैते सप्ताहा भवन्ति।-----अग्निष्टोमाः परस्ताद् भवन्त्य, अग्निष्टोमा अवस्ताद्, उक्थ्या मध्ये। ब्रह्म वा अग्निष्टोमः, पशव उक्थ्यानि।— जै.ब्रा.२.३४७

४१५. पूर्वस्याह्नस् सौभरम् उक्थेषु ब्रह्मसामं कुर्युर् यद्य् उभे बार्हते अहनी संपद्येयाताम्।— जै.ब्रा.२.३५८

४१६.--अग्निष्टोमाद् एव ज्योतिर् निरमिमीत, उक्थ्येभ्यो गां, रात्र्या आयुः।— जै.ब्रा.२.३७५

४१७. पशवो वा उक्थानि -तेभ्यो हि यन्ति। तस्य त्रीणि स्तोत्राण्य् अष्टाचत्वारिंशानि कुर्युर् पवमानौ ब्रह्मसाम। तावतीर् उक्थ्यस्य स्तोत्र्याः। आप्नुवन्ति तं कामं य उक्थ्ये, नो वा अग्निष्टोमाद् यन्ति।— जै.ब्रा.२.३७८

४१८. तद् आहुर् विलोमेव वा एतद् यज्ञः क्रियते यदाग्निष्टोमौ विश्वजिदभिजितौ भवतो ऽग्निष्टोमो विषुवान् उक्थ्या स्वरसामानः।— जै.ब्रा.२.३८७

४१९. त उ वा उक्थ्या भवन्ति-पशवो वा उक्थान्य्, अन्नं पशवः-पशुभ्यो ऽन्नाद्यात् प्रजां नेद् अन्तरयामेति।— जै.ब्रा.२.३८८

४२०.---तेनाग्नष्टोम। तान्य् उ एव द्वादश सन्ति पञ्चदश चतुर्विंशानि स्तोत्राणि भवन्ति। तेनोक्थ्यः। स वा एषो ऽग्निष्टोमस् सन्न् उक्थ्य, उक्थ्यस् सन्न् अग्निष्टोमः। उभौ ह तौ कामाव् उपाप्नोति यश् चाग्निष्टोमे यश् योक्थ्ये य एवं वेद।— जै.ब्रा.२.४३८

४२१.--- -त एते चत्वारो मध्य उक्थ्या भवन्ति। पशवो वा उक्थानि। तेषां सहस्रं स्तोत्र्याः।— जै.ब्रा.२.४४२

४२२. एते वै सर्वे यज्ञक्रतवो यद् अग्निष्टोम उक्थो ऽतिरात्रः।— जै.ब्रा.३.८

४२३. यद् एतान्य् अष्टाव् अहानि मध्य उक्थ्यानीति, न तत्र जाम्य् अस्तीति ब्रूयात्। पशवो वा उक्थानि। पशून् एवैतत् पशुभिस् समाकरोति।— जै.ब्रा.३.९

४२४. एतस्माद् ध वा इदं ब्राह्मणानां राज्ञाम् इव प्रकाशो यद् गायत्रीषूक्थं ब्रह्मसाम भवति।— जै.ब्रा.३.३४

४२५. तासु सत्रासाहीयम् उक्तब्राह्मणम्। तद् उक्थसाम भवति-पशवो वा उक्थानि- पशूनाम् एवावरुद्ध्यै। तद् आहुर् उक्थसाम सत् पवमाने क्रियते कस्मात् तद् इति।---- तद् यद् अत्र सत्रासाहीयं क्रियते तेनैनद् उक्थेभ्यो न च्यावयन्ति।---- अथो पशवो वा उक्थान्य्, आत्मा मध्यन्दिनः।— जै.ब्रा.३.६९

४२६. अथैतद् उक्थभाजनम्। उक्थानां वा एष एको यत् षोडशी।— जै.ब्रा. ३.८३

४२७. यत् सोम चित्रम् उक्थ्यम् इति चित्रवतीर् भवन्ति-चित्ररूपा वै पशवः।— जै.ब्रा.३.१०१

४२८. एतो न्व् इन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैर् उक्थैर् वावृध्वांसं शुद्धैर् आशीर्वान् ममत्तु इति। ततो वा इन्द्रश् शुद्धः पूतो मेध्यो ऽभवत्।— जै.ब्रा.३.२२८

४२९. इन्द्रम् इत् स्तोता वृषणं सचा सुते मुहुर् उक्था च शंसत। अवक्रक्षिणं वृषभं यथाजुवं गां न चर्षणीसहम्। इति।— जै.ब्रा.३.२९३

४३०. स (प्रजापतिः) एतान् अष्टाव् उक्थ्यान् अष्टातयान् पशून् दिशो ऽनुव्यतनोद् वामदेव्यम् अन्तरिक्षम्, — जै.ब्रा.३.३१८

४३१. तस्यैषा देवता दीक्षमाणस्य तेज इन्द्रियं वीर्यं यशो नादत्ते। तद् एतद् उक्थस्यैव स्तम्भः। ते ये ऽर्वाञ्चो रश्मयस् तैर् अस्येमे लोका स्तब्धा य एतस्माद् अर्वाञ्चो, ऽथ यत् किं च प्राणभृत् सशरीरम्। अथ य ऊर्ध्वास्----।— जै.ब्रा.३.३५९

४३२. अथ यद् धा इत्य् एष हीदं सर्वं हरति। स एष एवोक्थ्यम्। एष हीदं सर्वम् उत्थापयतीव। तस्माद् एष एवोक्थम्।— जै.ब्रा.३.३७९

४३३. आज्यानां प्रथमा (विष्टुतिः) पृष्ठानां द्वितीयोक्थानां तृतीया। याज्यानां सा होतुर्य्या पृष्ठानां सा मैत्रावरुणस्य योक्थानां सा ब्राह्मणाछंसिनो— ताण्ड्य ब्राह्मण ३.११.२

४३४. यज्ज्योतिष्टोमो भवति यज्ञमुखन्तदृध्नुवन्ति यदुक्थो यज्ञक्रतोरनन्तरयाय यद्रात्रिः सर्वस्याप्त्यै।— तां.ब्रा.४.१.६

४३५. यावत्यश्चतुर्विंशस्योक्थस्य स्तोत्रीयास्तावत्यः संवत्सरस्य रात्रयः स्तोत्रीयाभिरेव तत् संवत्सरमाप्नुवन्ति।— तां.ब्रा.४.२.७

४३६. यद्युक्थं स्मात्रैककुभश्चोद्वंशीयश्चान्तत प्रतिष्ठाप्ये वीर्य्यं वा एते सामनी वीर्य्य एवान्ततः प्रतितिष्ठन्ति।— तां.ब्रा.४.२.१०

४३७. अथो खल्वाहुरुक्थमेव कार्य्यमह्नः समृद्ध्यै।— तां.ब्रा.४.२.१३

४३८. तानाहुरुक्था कार्य्या अग्निष्टोमा इति यद्युक्थाः स्युः। पशवो वा उक्थानि शान्तिः पशव शान्तेनैव तद्विषुवन्तमुपयन्ति। तदाहुर्विवीवधमिव वा एतद् यदग्निष्टोमो विषुवानग्निष्टोमौ विश्वजिदभिजितावथेतर उक्थाः स्युरिति।— तां.ब्रा.४.५.१९

४३९. यद्युत्सृजेयुरुक्थान्युत्सृजेयुस्तदेवोत्सृष्टं तदनुत्सृष्टं।— तां.ब्रा.५.१०.५

४४०. देवा वा अग्निष्टोममभिजित्योक्थानि नाशक्नुवन्नभिजेतुं तेऽग्निमब्रुवंस्त्वया मुखेनेदञ्जयामति सोऽब्रवीत् किम्मे ततः स्यादिति यत्कामयस इत्यब्रुवन् सोऽब्रवीन्मद्देवत्यासूक्थानि प्रणयानिति। तस्मादाग्नेयीषूक्थानि प्रणयन्ति।— तां.ब्रा.८.८.२

४४१. तस्मात्साकमश्वेनोक्थानि प्रणयन्त्येतेन हि तान्यग्रेऽभ्यजयन्।— तां.ब्रा.८.८.५

४४२. पशून् वा एभ्यस्तानाहरत्पशवो वा उक्थानि पशुकाम उक्थेन स्तुवीत पशुमान् भवति।— तां.ब्रा.८.८.८

४४३. यदि बृहत्सामातिरात्रः स्यात्सौभरमुक्थानां ब्रह्मसाम कार्य्यं बृहदेव तत्तेजसा समर्द्धयति।— तां.ब्रा.८.८.११

४४४. नार्मेध साम : विच्छन्दसऋचो भवन्त्यहोरात्रयो रूपं। नैव ह्येतदह्नोरूपं न रात्रेर्य्यदुक्थानां।— तां.ब्रा.८.८.२५

४४५. गायत्रीषु ब्रह्मवर्च्चसकामायोक्थानि प्रणयेयुर्गायत्र्यां ब्रह्मसामानुष्टुभ्यछावाकसाम सैषा गायत्री सम्पद्यते।— तां.ब्रा.८.१०.१

४४६. विराट्स्वन्नाद्यकामायोक्थानि प्रणयोयुरुष्णिहि ब्रह्मसामानुष्टुभ्यछावाकसाम सैषा विराट् सम्पद्यते।— तां.ब्रा.८.१०.७

४४७. अक्षरपङ्क्तिषु ज्यैष्ठ्यकामायोक्थानि प्रणयेयुरुष्णिहि ब्रह्मसामानुष्टुभ्यछावाकसाम सैषानुष्टुप् सम्पद्यते।— तां.ब्रा.८.१०.९

४४८. देवा वा उक्थान्यभिजित्य रात्रिन्नाशक्नुवन्नभिजेतुन्तेऽसुराव्रात्रिन्तमः प्रविष्टान्नानुव्यपश्यंस्तेतमनुष्टुप्शिरसं प्रगाथमपश्यन्-----तां.ब्रा.९.१.१

४४९. एषा वा उक्थस्य सम्मा यद्रात्रिः। त्रीण्युक्थानि त्रिदेवत्यः सन्धिः। यथा वा अह्न उक्थान्येवमेषरात्रेः सन्धिर्नानारूपाण्यह्न उक्थानि नानारूपा एते तृचा भवन्ति।— तां.ब्रा.९.१.२७

४५०.--- तौ (अश्विनौ) अब्रूतामस्मद्देवत्यमिद-मुक्थमुच्याता इति तस्मादाश्विनमुच्यते।— तां.ब्रा.९.१.३६

४५१. अग्निष्टोमेन वै देवा इमं लोकमभ्यजयन्नन्तरिक्षमुक्थेनातिरात्रेणामुन्त इमं लोकं पुनरभ्यकामयन्त-----— तां.ब्रा.९.२.९

४५२. यदीतरोऽग्निष्टोमः स्यादुक्थः कार्य्योयद्युक्थोऽतिरात्रो यो वै भूयान्यज्ञक्रतुः स इन्द्रस्य प्रियो— तां.ब्रा.९.४.१५

४५३. तृतीयसवने सोमातिरेके : एतदन्यत् कुर्युरुक्थान्यत्प्रणयेयुरुक्थानि वा एष निकामयमानोऽभ्यतिरिच्यते योऽग्निष्टोमादतिरिच्यते यद्युक्थ्येभ्योऽतिरिच्येतातिरात्रः कार्य्यो रात्रिं वा एष निकामयमानोऽभ्यतिरिच्यते य उक्थ्येभ्यो-ऽतिरिच्यते— तां.ब्रा.९.७.११

४५४. गायत्रीं वा एतां ज्योतिष्पक्षामासते यदेतं द्वादशाहमष्टौ मध्य उक्था अग्निष्टोमावभितो मासा स्वर्गं लोकमति— तां.ब्रा.१०.४.५

४५५. जामि वा एतद्यज्ञे क्रियत इत्याहुर्यत् त्रिष्पुरस्ताद्रथन्तरमुपयन्तीति सौभरमुक्थानां ब्रह्मसाम भवति तेनैव तदजामि।— तां.ब्रा.१०.४.७

४५६. मैत्रावरुणोक्थस्य स्तोत्रीयम् : अपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदेति सलोमत्वाय।— तां.ब्रा.११.११.२

४५७. द्वितीयस्योक्थस्य स्तोत्रीयं : एवाह्यसि वीरयुरिति समानं वदन्त्य इदमित्थमसदिति। (अथ तृतीयस्योक्थस्य स्तोत्रीयं तृचं) - इन्द्रं विश्वा अवीवृधन्नित्यवर्द्धन्त ह्येतर्हि यजमानमेवैतया वर्द्धयन्ति।— तां.ब्रा.११.११.४

४५८. मैत्रावरुणोक्थसाम : साकमश्वं भवत्युक्थानामभिजित्या अभिक्रान्त्यै। एतेन ह्यग्र उक्थान्यभ्यजयन्नेतेनाभ्यक्रामन्।— तां.ब्रा.११.११.५

४५९. स्तोम क्लृप्ति विधाने उक्थानां प्रथमस्य स्तोत्रीयं तृचं : आते अग्न इधीमहीति। अपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदेति सलोमत्वायैव।— तां.ब्रा.१३.६.२

४६०. द्वितीयस्योक्थस्य स्तोत्रीयं तृचं : इन्द्राय साम गायतेति पूर्णा ककुभस्तेनानशनायुको भवति।— तां.ब्रा.१३.६.३

४६१. तृतीयस्योक्थस्तोत्रीयं तृचं : असावि सोम इन्द्र त इति सिमानां रूपं स्वेनैवैनांस्तद्रूपेण समर्द्धयति।— तां.ब्रा.१३.६.५

४६२. द्वितीयस्योक्थस्य साम : सौमित्रं भवति।— तां.ब्रा.१३.६.८

४६३. मैत्रावरुणोक्थस्य साम : गूर्द्धो भवति।-— तां.ब्रा.१३.१२.४

४६४. ब्रह्मण उक्थस्तोत्रस्य साम : गोतमस्य भद्रं भवति।-— तां.ब्रा.१३.१२.६

४६५. अच्छावाकोक्थस्य साम : उद्वंशपुत्रो भवति।— तां.ब्रा.१३.१२.९

४६६. चतुर्विंश स्तोम। उक्थस्तोत्राणां प्रथमस्य स्तोत्रीयं तृचं : आते वत्सोमनो यमदित्यपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि यदेति सलोमत्वायैव।— तां.ब्रा.१४.६.१

४६७. द्वितीयस्योक्थस्य स्तोत्रीयं तृचं : त्वन्न इन्द्राभरेति पूर्णाः ककुभः।— तां.ब्रा.१४.६.२

४६८. तृतीयस्योक्थस्य स्तोत्रीयं तृचं : यदिन्द्र चित्रं मइह नास्ति त्वादातमद्रिवो-— तां.ब्रा.१४.६.४

४६९. तृतीयस्योक्थस्य साम : वीङ्कं भवति।— तां.ब्रा.१४.६.९

४७०. पूर्भवदेषूक्थेषु स्तोत्रीयेषु स्तोमक्लृप्तिः - चतुर्व्विंश एव स्तोमो भवति तेजसे ब्रह्मवर्च्चसाय।— तां.ब्रा.१४.६.११

४७१. छन्दोमा। चतुश्चत्वारिंशत्स्तोमः। उक्थानां प्रथमस्य स्तोत्रीयं तृचं : प्रेष्ठं वो अतिथिमित्यातिथ्यस्यैव तद्रूपं क्रियते।— तां.ब्रा.१४.१२.१

४७२. द्वितीयस्योक्थस्य स्तोत्रीयं तृचं : ऐन्द्रनोगधिप्रियेतीन्द्रियस्य वीर्य्यस्यावरुध्यै।— तां.ब्रा.१४.१२.२

४७३. तृतीयस्योक्थस्य स्तोत्रीयं तृचं : पुरां भिन्दुर्य्युवकविरमितौजा अजायतेन्द्रो विश्वस्य कर्म्मणो-- — तां.ब्रा.१४.१२.३

४७४. प्रथमस्योक्थस्य सामः औशनं भवति।— तां.ब्रा.१४.१२.४

४७५. द्वितीयस्योक्थस्य साम : सांवर्त्तं भवति।— तांब्रा१४१२६

४७६. तृतीयस्योक्थस्य साम : मारुतं भवति।— तां.ब्रा.१४.१२.८

४७७. त्रिषूक्थस्तोत्रेषु स्तोमं : चतुश्चत्वारिंश एव स्तोमो भवत्योजस्येव तद्वीर्य्ये प्रतितिष्ठत्योजो वीर्य्यं त्रिष्टुप्।— तां.ब्रा.१४.१२.१०

४७८. नवम् अहः। उक्थेषु प्रथमस्य स्तोत्रीयं तृचं : आग्नेयीषु पूर्व्वेषामह्नामुक्थानि प्रणयन्त्यथैतस्याह्न आग्नेय्यैन्द्र्यां प्रणयन्त्युभयोरेव रूपयोः प्रतितिष्ठति।— तां.ब्रा.१५.६.१

४७९. प्रथमोक्थस्तोत्रनिर्वर्त्तकं साम : ऐध्मवाहं भवति।— तां.ब्रा.१११५६२

४८०. द्वितीयोक्थस्तोत्रनिर्वर्त्तकं साम : त्रैककुभं भवति।— तां.ब्रा.१५.६.४

४८१. तृतीयस्योक्थस्य निर्वर्त्तकं साम : उद्वंशीयं भवति।— तां.ब्रा.१५.६.६

४८२.--- -यदन्तरा सोमा यन्त्यन्तरोक्थानि शस्यन्तेऽन्तरा वषट्कुर्वन्ति तेनाजामि।— तां.ब्रा.१६.५.२५

४८३. अथैष विश्वज्योतिरुक्थ्यः। पशवो वा उक्थानि पशवो विश्वं ज्योतिर्विश्व एव ज्योतौ पशुषुप्रतितिष्ठति।— तां.ब्रा.१६.१०.१

४८४. उक्थस्तोत्रेष्वन्तिमेऽन्यत्साम : उद्वंशीयमुक्थानामन्ततो भवति सर्व्वेषां वा एतत् पृष्ठानां रूपं सर्वेष्वेव रूपेषु प्रतितिष्ठति। उक्थो भवति पशवो वा उक्थानि पशव सहस्रं पशुष्वेव तत्पशून्दधाति।— तां.ब्रा.१६.१०.११

४८५. माध्यन्दिने पवमाने यौधाजयस्याधारभूतास्तिस्रः स्तोत्रीया : प्रत्नम्पीयूषम् पूर्व्यं यदुक्थमिति सतोबृहत्यो भवन्ति।— तां.ब्रा.१६.११.८

४८६. उक्थो भवति पशवो वा उक्थानि पशवो नृशंसमग्रं परिणयन्ति पशुभिरेवैनानग्रं परिणयति।— तां.ब्रा.१७.२.४

४८७. तीव्रसोमाख्यं सप्तदशस्तोमकमुक्थ-संस्थमेकाहः- सप्तदश उक्थ्यः।— तां.ब्रा.१८.५.१

४८८. तृतीयोक्थे उद्वंशीयमनूद्य प्रशंसा : उद्वंशीयमुक्थानामन्ततो भवति सर्वेषां वा एतत्पृष्ठानां रूपं सर्वेष्वेव रूपेषु प्रतितिष्ठति। उक्थो भवति पशवो वा उक्थानि पशुष्वेव प्रतितिष्ठति।— तां.ब्रा.१८.५.२४

४८९. वाजपेयैकाहः - सप्तदश उक्था षोडशिमान् सप्तदशी।— तां.ब्रा.१८.६.१

४९०. उद्वंशीयमुक्थानामन्ततो भवति सर्वेषां वा एतत् पृष्ठानां रूपं सर्वेष्वेव रूपेषु प्रतितिष्ठति।— तां.ब्रा.१८.६.१७

४९१. उक्थं शस्यते वषट्कारोऽन्तरा तेनाजामि।— तां.ब्रा.१८.६.२२

४९२. यज्ञारण्ये सन्तिष्ठत इत्याहुरत्युक्थान्येत्यतिषोडशिनन्न रात्रिं प्राप्नोतीति।— तां.ब्रा.१८.६.२४

४९३. अभिषेचनीयस्योक्थसंस्थारूपत्वं : आत्मना वा अग्निष्टोमेनर्ध्नोत्यात्मना पुण्योभवत्यथ यदुक्थानि पशवो वा उक्थानि विडुक्थानि यदुक्थानि भवन्त्यनुसन्तत्याएव।— तां.ब्रा.१८.८.६

४९४. चतुष्टोम क्रतु विधानं : आत्मा वा अग्निष्टोमः पशवश्छन्दांस्यात्मन्येव तत्पशून् प्रतिष्ठापयति नोक्थोनाग्निष्टोमो न हि ग्राम्याः पशवो नारण्याः।— तां.ब्रा.१९.५.११

४९५. उक्थः षोडशिमान् भवति पशवो वा उक्थानि वज्रः षोडशी वज्रेणैवास्मै पशून् परिगृह्णात्यनपक्रामुका अस्मात्पशवो भवन्ति नोक्थोनातिरात्रो न हि ग्राम्याः पशवो नारण्याः।— तां.ब्रा.१९.६.३

४९६. इन्द्रस्तोमाख्यं क्रतुः - अथैष पञ्चदश इन्द्रस्तोम उक्थ्यः। एतेन वा इन्द्रोऽत्यन्या देवता अभवदत्यन्या प्रजा भवति य एवं वेद।— तां.ब्रा.१९.१६.१

४९७. उक्थ्यो भवति पशवो वा उक्थानि विडुक्थानि विशमेवास्मै पशूननुनियुनक्त्यन-पक्रामुकास्माद्विड् भवति।— तां.ब्रा.१९.१६.६

४९८. अतिरात्रस्तोम क्लृप्तिः--- एकविंशोऽग्निष्टोमः सोक्थः पञ्चदशी रात्रिस्त्रिवृत्सन्धिः।--एषोऽग्निष्टोम एष उक्थ एषोऽतिरात्रोऽग्निष्टोमेन वै देवा इमं लोकमभ्य-जयन्नुक्थैरन्तरिक्षंरात्र्यामुं लोकमजयन्न-होरात्राभ्यामभ्य-वर्त्तन्त।— तां.ब्रा.२०.१.३

४९९. सर्वस्तोमातिरात्रः- त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि-— तां.ब्रा.२०.२.२.१

५००. आप्तोर्याम क्रतुस्तोमः--- त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथममथैकविंशमथ सप्तदशमेकविंशः षोडशी-— तां.ब्रा.२०.३.१

५०१. प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टा अपाक्रामंस्तानग्निष्टोमेन नाप्नोत्तानुक्थैर्नाप्नोत्तान् षोडशिना नाप्नोत्---— तां.ब्रा.२०.३.२

५०२. विषुवदतिरात्राख्य क्रतुः --- एकविंशोऽग्निष्टोमः सप्तदशान्युक्थानि पञ्चदशी रात्रिस्त्रिवृत्सन्धिः।— तां.ब्रा.२०.५.१

५०३. अभिजिदतिरात्राख्य क्रतुः - त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि-— तां.ब्रा.२०.८.१

५०४. विश्वजिदतिरात्राख्य क्रतुः - त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविंशे---— तां.ब्रा.२०.९.१

५०५. अङ्गिरसां द्विरात्रं : त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थानि---— तां.ब्रा.२०.११.२

५०६. यदग्निष्टोमः पूर्वमहर्भवत्युक्थ्य-मन्तर्य्यन्ति यद्युक्थोऽग्निष्टोमं। यज्ज्योतिरुक्थ्यः पूर्वमहर्भवति नाग्निष्टोममन्तर्यन्ति नोक्थानि। अथोत्तरस्याह्न उक्थेभ्योऽधिरात्रिमुपयन्ति तेनोक्थान्यनन्तरितानि।— तां.ब्रा.२०.११.६

५०७. चैत्ररथं द्विरात्रम् : अथ यस्य ज्योतिरुक्थ्यः पूर्वमहर्भवत्यायुरतिरात्र उत्तरं।— तां.ब्रा.२०.११.८

५०८. अश्वत्रिरात्रम् : चतुष्टोमोग्निष्टोम एकविंश उक्थः सर्व्वस्तोमोतिरात्रः।— तां.ब्रा.२१.४.१

५०९. छन्दोमपवमानाख्यं चतुर्थं त्रिरात्रम् :----- एकविंशोग्निष्टोमः सोक्थोष्टाचत्त्वारिंशाः पवमानाएकविंशान्याज्यानि त्रिणवानि पृष्ठानि त्रयस्त्रिंशोग्निष्टोमेकविंशान्युक्थानि सषोडशिकानि-— तां.ब्रा.२१.६.१

५१०. चतुर्व्वीराख्यं चतूरात्रम् :--- एकविंशोऽग्निष्टोमः सोक्थश्चतुर्विंशाः पवमाना---- त्रिणवोग्निष्टोमः सोक्थश्चतुर्विंशाः पवमाना एकविंशान्याज्यानि----त्रयस्त्रिंशोऽग्निष्टोम एकविंशान्युक्थानि--- तां.ब्रा.२१.९.१

५११. चतुर्णामह्नां संस्थानं : अग्निष्टोमः प्रथममहरुक्थोद्वितीयं षोडशी तृतीयमतिरात्रश्चतुर्थन्नानावीर्य्यतायै।—तां.ब्रा.२१.९.६

५१२. जमदग्नेश्चतूरात्रम् : अथोत्तरस्याह्नः---- एकविंशं तृतीयसवनं सोक्थं। तृतीयस्याह्न-----त्रिणवं तृतीयसवनं द्वे चोक्थे एकविंशमच्छावाकस्य। ------

चतुर्थस्याह्न---- त्रयस्त्रिंशोग्निष्टोम एकविंशोक्थानि स षोडशिकानि।—तां.ब्रा.२१.१०.३

५१३. वसिष्ठस्य चतूरात्रम् :---- -एकविंशं तृतीयसवनं सोक्थं---- -त्रिणवं तृतीयसवनं सोक्थम्-----त्रयस्त्रिंशं तृतीयसवनं प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं-— तां.ब्रा.२१.११.१

५१४. प्रत्यवरोहीण्युत्तमस्याह्न उक्थानि भवन्ति प्रतिष्ठित्यै।— तां.ब्रा.२१.११.४

५१५. सञ्जयाख्यं चतूरात्रम् :-----त्रिवृदग्निष्टोमः पञ्चदशउक्थः सप्तदशउक्थ एकविंशोतिरात्रो विश्वामित्रस्य सञ्जयः।— तां.ब्रा.२१.१२.१

५१६. अभ्यासंग्याख्यं पञ्चरात्रम् : -- - प्रत्यवरोहीण्युक्थानि त्रिणवं प्रथमं द्वे एकविंशे-—— तां.ब्रा.२१.१३.१

५१७. पञ्चशारदीयाख्यं पञ्चरात्रम् : त्रिवृदग्निष्टोमः पञ्चदश उक्थः सप्तदश उक्थः पञ्चदश उक्थः सप्तदशातिरात्रः-—तां.ब्रा.२१.१४.१

५१८. अन्तर्म्महाव्रतस्य पञ्चरात्रम् : ज्योतिष्टोमोग्निष्टोमो गौरुक्थो महाव्रतं गौरुक्थ आयुरतिरात्रः।— तां.ब्रा.२१.१५.१

५१९. त्रिकद्रुकाख्यं द्वितीयं षड्रात्रम् : त्रिवृदग्निष्टोमः पञ्चदशउक्थः सप्तदशउक्थो ज्योतिर्गौरायुरतिरात्रः।— तां.ब्रा.२२.२.१

५२०. ऐन्द्रं पञ्चमं सप्तरात्रम् : ज्योतिष्टोमोग्निष्टोमो गौरुक्थ आयुरुक्था-भिजिदग्निष्टोमो— तां.ब्रा.२२.८.१

५२१. पशुसाधनं द्वितीयन्नवरात्रम् : ज्योतिष्टोमोग्निष्टोमो गौरुक्थ आयुरुक्थोभ्यासंग्यः पञ्चाहो-—— तां.ब्रा.२२.१३.१

५२२. त्रिकद्रुकाख्यं प्रथमं दशरात्रम् : त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यस्त्रिवृदग्निष्टोमः सप्तदशोग्निष्टोमः एकविंश उक्थ्यः सप्तदशोग्निष्टोमस्त्रिणवोग्निष्टोमस्त्रयस्त्रिंश उक्थ्यः--अग्निष्टोमेन वै देवा असुरान्निगृह्य मध्यत उक्थ्यैः प्रजया पशुभिः प्राजायन्ताग्निष्टोमेनैव भ्रातृव्यन्निगृह्य मध्यत उक्थ्यैः प्रजया पशुभिः प्रजायते।— तां.ब्रा.२२.१४.१

५२३. द्वितीयं कुसुरुविन्ददशरात्रम् : त्रयस्त्रिवृतोग्निष्टोमास्त्रयः पञ्चदश उक्थ्यास्त्रयः सप्तदश उक्थ्या एकविंशोतिरात्रः-—— तां.ब्रा.२२.१५.१

५२४. देवपुराख्यं चतुर्थं दशरात्रम् : त्रिष्टोमोग्निष्टोमो ज्योतिरुक्थ्यस्त्रिष्टोमोग्निष्टोमो गौरुक्थ्याभिजिदग्निष्टोमो गौरुक्थ्यो विश्वजिदग्निष्टोम आयुरुक्थ्यो विश्वजिदग्निष्टोमस्य सर्वस्तो-मातिरात्रः।— तां.ब्रा. २२.१७.१

५२५. विधृतिसंज्ञकानामेकोनपञ्चाशद्रात्रीणां सप्तानाम्मध्ये प्रथमं सत्रं : अतिरात्रस्त्रीणि त्रिवृन्त्यहान्यग्निष्टोममुखान्यतिरात्रो दश पञ्चदशा उक्थ्याः षोडशिमद्दशममहरतिरात्रो द्वादश सप्तदशा उक्थ्या अतिरात्रः पृष्ठयः षडहातिरात्रो द्वादशैकविंशा उक्थ्यातिरात्रः।— तां.ब्रा.२४.११.१

५२६. सवितुः ककुभ इति संज्ञं पञ्चममेकोनपञ्चाशद्रात्रंः-----अग्निष्टोममुखः षडहोथ यानित्रीण्यहान्यग्निष्टोमावभित उक्थ्यम्मध्यतोनवपञ्चदशान्यग्निष्टोममुखः षडहोऽथ यानि त्रीण्यहान्यग्निष्टोमावभित उक्थ्यं मध्यतो---अथ यानि त्रीण्यहान्यग्निष्टोमावभित उक्थ्यम्मध्यतो----अथ यानि त्रीण्यहान्यग्निष्टोमावभित उक्थ्यम्मध्यतो द्वादशाहस्य-— तां.ब्रा.२४.१५.१

५२७. पृष्ठ्यमयनम् :----त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडह-—— तां.ब्रा. २५.१.१

५२८. अथैष पञ्चदश इन्द्रस्तोम उक्थ्य एतेन वा इन्द्रोत्यन्यादेवता अभवदत्यन्याः प्रजा भवन्ति य एतदुपयन्ति।— तां.ब्रा. २५.१.९

५२९. पृष्ठ्याख्यमङ्गिरसामयनम् :----- त्रयः स्वरसामानः पञ्चदश इन्द्रस्तोम उक्थ्यः पृष्ठ्यः षडहः-— तां.ब्रा. २५.२.१

५३०. तेषां पौर्णमास्यां गोष्टोमस्तोमो भवत्युक्थ्यो बृहत् सामा।-------तेषाममावास्यायामायुष्टोमः स्तोमो भवत्युक्थ्योरथन्तरसामा।— तां.ब्रा. २५.१०.७

५३१. अग्निर्यजुर्भिः। सविता स्तोमैः। इन्द्र उक्थामदैः। मित्रावरुणावाशिषा।--- तैत्तिरीय आरण्यक ३.८.१

५३२. नोक्थ्ये प्रवृञ्ज्यात्। प्रजा वै पशव उक्थानि। यदुक्थ्ये प्रवृञ्ज्यात्। प्रजां पशूनस्य निर्दहेत्।— तै.आ. ५.६.८

५३३. तत्तन्न सूर्क्ष्यम्। उक्थ्या एव सप्तदशाः परःसामानः कार्याः। पशवो वा उक्थानि। पशूनामवरुद्ध्यै।— तै.ब्रा.१.२.२.१

५३४. उक्थ्याः सप्तदशाः परःसामानः। ते सँस्तुता विराजमभिसंपद्यन्ते। द्वे चर्चावतिरिच्येते।----- तैत्तिरीय ब्राह्मण १.२.२.२

५३५. देवा वै यथादर्शं यज्ञानाहरन्त। योऽग्निष्टोमम्। य उक्थ्यम्। योऽतिरात्रम्। ते सहैव सर्वे वाजपेयमपश्यन्।— तै.ब्रा.१.३.२.१

५३६. ब्रह्मवादिनो वदन्ति। नाग्निष्टोमो नोक्थ्यः। न षोडशी नातिरात्रः। अथ कस्माद्वाजपेये सर्वे यंज्ञक्रतवोऽवरुध्यन्ति इति।-----आग्नेयं पशुमालभते। अग्निष्टोममेव तेनावरुन्धे। ऐन्द्राग्नेनोक्थ्यम्। ऐन्द्रेण षोडशिनः स्तोत्रम्।— तै.ब्रा.१.३.४.१

५३७. आत्मानमेव स्पृणोत्यग्निष्टोमेन। प्राणापानावुक्थ्येन। वीर्यं षोडशिनः स्तोत्रेण।------ इममेव लोकमभिजयत्यग्निष्टोमेन। अन्तरिक्षमुक्थ्येन। सुवर्गं लोकँ षोडशिनः स्तोत्रेण---- -।— तै.ब्रा.१.३.४.२

५३८. तामिन्द्र उक्थ्यस्थाल्येन्द्रियमदुहत्। यदुक्थ्यस्थाली भवति। इन्द्रियमेव तया यजमान इमां दुहे।— तै.ब्रा.१.४.१.५

५३९.---यत्प्रतीचीनँ संगवात्। प्राचीनं मध्यंदिनात्। ततो देवा उक्थ्यं निरमिमत।— तै.ब्रा.१.५.३.१

५४०.----- -आत्मन आग्रयणम्। अङ्गेभ्य उक्थ्यम्। आयुषो ध्रुवम्।— तै.ब्रा.१.५.४.२

५४१. आत्मनैवाग्निष्टोमेनर्ध्नोति। आत्मना पुण्यो भवति। प्रजा वा उक्थानि। पशव उक्थानि। यदुक्थ्यो भवत्यनुसंतत्यै।— तै.ब्रा.१.८.७.२

५४२. अग्निष्टोममुक्थ्यमतिरात्रमृचः। एता वै व्याहृतय इमे लोकाः। इमान्खलु वै लोकाननु प्रजाः पशवश्छन्दांसि प्राजायन्त।— तै.ब्रा.२.२.४.३

५४३. (तं सोमं) उक्थैरुदस्थापयन्। तदुक्थानामुक्थत्वम्।— तै.ब्रा.२.२.८.७

५४४. समुद्रं न सिन्धव उक्थशुष्माः। उरुव्यचसं गिर आविशन्ति।— तै.ब्रा.२.४.५.२

५४५. सोमान्त्सुराम्णः। उपो उक्थामदाः श्रौद्विमदा अदन्।— तै.ब्रा.२.६.१५.२

५४६. होता यक्षच्छतक्रतुम्। हिरण्यपर्ण-मुक्थिनम्। रशनां बिभ्रतं वशिम्।— तै.ब्रा.२.६.१७.७

५४७. एष गोसवः। षट्त्रिंश उक्थ्यो बृहत्सामा।— तै.ब्रा.२.७.६.१

५४८. प्रजापतिः पशूनसृजत। तेऽस्मात्सृष्टाः पराञ्च आयन्। तानग्निष्टोमेन नाऽऽप्नोत्। तानुक्थ्येन नाऽऽप्नोत। तान्षोडशिना नाऽऽप्नोत्।------ तान्विष्णुरेकविँशेन स्तोमेनाऽऽप्नोत्।— तै.ब्रा.२.७.१४.१

५४९. सूर्यवन्तं मघवानं विषासहिम्। इन्द्रमुक्थ्येषु नामहूतमँ हुवेम।— तै.ब्रा.२.७.१५.६

५५०. यो राय ईशे शतदाय उक्थ्यः। यः पशूनाँ रक्षिता विष्ठितानाम्। प्रजापतिः प्रथमजा ऋतस्य। सहस्रधामा जुषताँ हविर्नः।— तै.ब्रा.२.८.१.४

५५१. मनोतासूक्ताभिधानम् : अस्मा उ ते महि महे विधेम। नमोभिरग्ने समिधोत हव्यैः। वेदी सूनो सहसो गीर्भिरुक्थैः। आ ते भद्रायाँ सुमतौ यतेम।— तै.ब्रा.३.६.१०.४

५५२. सावित्र चयनाभिधानम् : अथ यदाह। अग्निष्टोम उक्थ्योऽग्निर्ऋतुः प्रजापतिः संवत्सर इति। एष एव तत्।— तै.ब्रा.३.१०.९.८

५५३. यो ह वै यज्ञक्रतूनां चर्तूनां च संवत्सरस्य च नामधेयानि वेद। न यज्ञक्रतुषु नर्तुषु न संवत्सर आर्तिमार्च्छति। अग्निष्टोम उक्थ्योऽग्निर्ऋतुः प्रजापतिः संवत्सर इति।— तै.ब्रा.३.१०.१०.४

५५४. चातुर्होत्र चयनाभिधानम् : इममेव लोकं पशुबन्धेनाभिजयति। अथो अग्निष्टोमेन। अन्तरिक्षमुक्थ्येन। स्वरतिरात्रेण।—तै.ब्रा.३.१२.५.६

५५५. प्र सू तिरा शचीभिर्ये त उक्थिन इत्युक्थं वा एतदहरुक्थवद्रूपसमृद्धमेतस्याह्नो रूपम्।— ऐतरेय आरण्यक १.२.१

५५६. प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यमित्युक्थं वा एतदहरुक्थवद्रूप-समृद्धमेतस्याह्नो रूपम्।— ऐ.आ.१.२.१

५५७. सर्वान्प्रगाथाञ्छंसति सर्वेषामह्नामाप्त्यै सर्वेषामुक्थानां सर्वेषां पृष्ठानां सर्वेषां शस्त्राणां सर्वेषां प्रउगाणां सर्वेषां सवनानाम्।— ऐ.आ.१.२.१

५५८. आ शासते प्रति हर्यन्त्युक्थेत्युक्थं वा एतदहरुक्थवद्रूपसमृद्धमेतस्याह्नो रूपम्।— ऐ.आ.१.२.२

५५९. वृषा वै प्रेङ्खो योषासन्दी तन्मिथुनं मिथुनमेव तदुक्थमुखे करोति प्रजात्यै।— ऐ.आ.१.२.४

५६०. नृणामु त्वा नृतमं गीर्भिरुक्थैरित्युक्थं वा एतदहरुक्थवद्रूपसमृद्धमेतस्याह्नो रूपम्।— ऐ.आ.१.३.७

५६१. सहस्रधा पञ्चदशान्युक्थेति पञ्च हि दशतो भवति-— ऐ.आ.१.३.८

५६२. सहस्रधा महिमानः सहस्रमित्युक्थान्येव महयति।— ऐ.आ.१.३.८

५६३. उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवीतो हीदं सर्वमुत्तिष्ठति यदिदं किञ्च।----अन्तरिक्षमेवोक्थमन्तरिक्षं वा अनु पतन्त्यन्तरिक्षमनु धावयन्ति तस्य वायुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते। असावेव द्यौरुक्थममुत प्रदानाद्धीदं सर्वमुत्तिष्ठति यदिदं किञ्च तस्यासावादित्योऽर्कोऽन्नमशीतयो ऽन्नेन हीदं सर्वमश्नुते। इत्यधिदैवतम्। अथाध्यात्मम्। पुरुष एवोक्थमयमेव महान्प्रजापतिरहमुक्थमस्मीति विद्यात्। तस्य मुखमेवोक्थं यथा पृथिवी तथा। तस्य वागर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते। नासिके एवोक्थं यथान्तरिक्षं तथा। तस्य--------। ललाटमेवोक्थं यथा द्यौस्तथा। तस्य चक्षुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते।— ऐ.आ.२.१.२

५६४. ता अहिंसन्ताहमुक्थमस्म्यह-मुक्थमस्मीति। ता अब्रुवन्हन्तास्माच्छरीरादुत्क्रामास तद्यस्मिन्न उत्क्रान्त इदं शरीरं पत्स्यति तदुक्थं भविष्यतीति। वागुदक्रामद-----चक्षुरुदक्रामद---- -मन उदक्रामत्---- -प्राण उदक्रामत्तत्प्राण उत्क्रान्ते ऽपद्यत।-- -ता अहिंसन्तैवाहमुक्थ-मस्म्यहमुक्थमस्मीति। ता अब्रुवन्हन्तेदं पुनः शरीरं प्रविशाम तद्यस्मिन्नः प्रपन्न इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति।-----प्राण प्राविशत्तत्प्राणे प्रपन्न उदतिष्ठत्तदुक्थमभवत्। तदेतदुक्थाँ प्राण एव। प्राण उक्थमित्येव विद्यात्। तं देवा अब्रुवंस्त्वमुक्थमसि त्वमिदं सर्वमसि------।— ऐ.आ.२.१.४

५६५. यो ह वा आत्मानं पञ्चविधमुक्थं वेद यस्मादिदं सर्वमुत्तिष्ठति स संप्रतिवित्। पृथिवी वायुराकाश आपो ज्योतींषीत्येष वा आत्मोक्थं पञ्चविधमेतस्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येति।— ऐ.आ.२.३.१

५६६. एष वै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो यदेतन्महदुक्थम्। तदेतत्पञ्चविधं त्रिवृत्पञ्चदशं सप्तदशमेकविंशं पञ्चविंशमिति स्तोमतो---- -।— ऐ.आ.२.३.४

५६७. स वा एष वाचः परमो विकारो यदेतन्महदुक्थं तदेतत्पञ्चविधं मितममितं स्वरः सत्यानृते इति।--- ऐ.आ.२.३.६

५६८. एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव---।— ऐ.आ.३.२.३

५६९. नृणामु त्वा नृतमं गीर्भिरुक्थैरिति तिस्रः।— ऐ.आ.५.१.६

५७०. परिहित उक्थ उक्थसंपदं जपति। उक्थवीर्यस्य स्थान उक्थदोहः।— ऐ.आ.५.३.१

५७१. एतास्त उक्थ भूतय एता वाचो विभूतयः। ताभिर्म इह धुक्ष्वामृतस्य श्रियं महीम्।।— ऐ.आ.५.३.२.५

५७२. ओमुक्थशा यज सोमस्येतीज्यायै संप्रेषितो-— ऐ.आ.५.३.२.७

५७३. आहरत्यध्वर्युरुक्थपात्रमतिग्राह्यांश्च-मसांश्च।-—अथैतदुक्थपात्रं होतोपसृष्टेन जपेन भक्षयति।— ऐ.आ.५.३.२

५७४. होतृशस्त्रेषूक्थशा यज सोमस्येत्येकः प्रैषः-— ऐ.आ.५.३.३

५७५. काम्यसामिधेनीयाज्यापुरोनुवाक्यानाम-भिधानम् : सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः। प्रप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना साऽसदिष्टिः।— तैत्तिरीय संहिता १.२.१४.३

५७६. उक्थ्यग्रहाभिधानम् : उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरिन्द्राय त्वोक्थायुवे।— तै.सं.१.४.१२.१

५७७. काम्ययाज्यापुरोनुवाक्या : - उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानम् सुतासः।— तै.सं.१.४.४६.१

५७८. द्वादशद्वंद्वसंपत्त्यभिधानम् : प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णसासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत्तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो-----— तै.सं.१.६.९.१

५७९. काम्ययाज्यापुरोनुवाक्याभिधानम्: नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः।— तै.सं.१.७.१३.३

५८०. त्रैधातवीयेष्टिविधि :- साम्नो वा एष वर्णो यद्धिरण्यं यजुषां तार्प्यमुक्थामदानां धेनुरेतानेव सर्वान्वर्णानवरुन्धे।— तै.सं.२.४.११.६

५८१. पितृयज्ञहविर्होत्रमन्त्राभिधानम् : शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन्।— तै.सं.२.६.१२.४

५८२. सोमोपस्थानयन्त्रोत्पादनम् : वायव्यं वै सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमः स्तोमस्य स्तोम उक्थानां----प्रत्येव सोमँ स्थापयति प्रति स्तोमं प्रत्युक्थानि-— तै.सं.३.१.२.४

५८३. अभिमर्शनविधीनां मन्त्रविशेषाणां चाभिधानम् : आग्रयणस्य पात्रमसीन्द्रो देवता ककुच्छन्द उक्थानां पात्रमसि पृथिवी देवता विराट्छन्दो ध्रुवस्य पात्रमसि।— तै.सं.३.१.६.३

५८४. परस्परमात्सर्यप्रवृत्तयजमानयोर्नैमित्तिकप्रयोगा-भिधानम् : यद्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वीत— तै.सं.३.१.७.३

५८५. प्रतिगरान्तरभाविमन्त्राभिधानम् : यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमनभि प्रवर्तयत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्य------उक्थं वाचीत्याह माध्यंदिनँ सवनं प्रतिगीर्य--------उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य----— तै.सं.३.२.९.१

५८६. उद्गीथ उद्गीथ एवोद्गातृणाम् ऋचः प्रणव उक्थशंसिनां प्रतिगरोऽध्वर्यूणां-— तै.सं.३.२.९.५

५८७. याज्यापुरोनुवाक्याभिधानम् : इदं वामास्येहविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते।— तै.सं.३.३.११.१

५८८. सीव्यत्वपः सूच्याऽच्छिद्यमानया ददातु वीरँ शतदायमुक्थ्यम्।— तै.सं.३.३.११.५

५८९. आसन्दीस्थापिताग्नेरुपस्थानम् : आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने।— तै.सं.४.२.२.४

५९०. आहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम् : बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे।— तै.सं.४.२.७.२

५९१. नाकसदाख्येष्टकाभिधानम् : राज्ञसि प्राची दिग्वसवस्ते देवा अधिपतयो-- -त्रिवृत्त्वा स्तोमः पृथिव्याँ श्रयत्वाज्यमुक्थमव्यथयत्स्तभ्नातु---- विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय---- पञ्चदशस्त्वा स्तोमः पृथिव्याँ श्रयतु प्रउगमुक्थमव्यथयत्स्तभ्नातु---- सम्राडसि प्रतीची दिक् आदित्यास्ते देवा अधिपतयः----सप्तदशस्त्वा स्तोमः पृथिव्याँ श्रयतु मरुत्वतीय-मुक्थमव्यथयत्स्तभ्नातु----स्वराडस्युदीची दिग्विश्वे ते देवा अधिपतयो---- -एकविँशस्त्वा स्तोमः पृथिव्याँ श्रयतु निष्कैवल्यमुक्थम-व्यथयत्स्तभ्नातु---- -बृहती दिङ्ग्रुतस्ते देवा अधिपतयः---- त्रिणवत्रयस्त्रिँशौ त्वा स्तोमौ पृथिव्याँ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथयन्ती स्तभ्नीताँ---— तै.सं.४.४.२.१

५९२. अग्निप्रणयनाभिधानम् : उक्थपत्र ईड्यो गृभीतस्तप्तं घर्मं परिगृह्यायजन्त।— तै.सं.४.६.३.२

५९३. अग्निसंयोजनाभिधानम्---यत्सर्वाभिः पञ्चभिः (देवरथं) युञ्ज्याद्युक्तोऽस्याग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः स्तोमा अप्रतिष्ठितान्युक्थानि-— तै.सं.५.४.१०.१

५९४. अन्वारोहणाद्यभिधानम् : सोमो विश्ववित्रेता नेषद् बृहस्पतिरुक्थामदानिशँसिषदित्याहैतद्वा अग्नेरुक्थं तेनैवैनमनु शँसति।— तै.सं.५.६.८.६

५९५. सोमोपावहरणकथनम् : यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ नि मार्ष्टि यद्यतिरात्रो यजुर्वदन्प्र पद्यते यज्ञक्रतूनां व्यावृत्त्यै।— तै.सं.६.४.३.४

५९६. उक्थ्यग्रहकथनम् : इन्द्रो बृत्राय वज्रमुदयत्छत्स-----तस्मा उक्थ्यं प्रायच्छत्तस्मै द्वितीयमुदयच्छत्---तस्मा उक्थ्यमेव प्रायच्छत् तस्मै तृतीयमुदयच्छत्-----तस्मा उक्थ्यमेव प्रायच्छत् तं निर्मायं भूतमहन्यज्ञो हि तस्य मायाऽऽसीद्यदुक्थ्यो गृह्यत इन्द्रियमेव तद्वीर्यं----- -चक्षुर्वा एतद्यज्ञस्य यदुक्थ्यस्तस्मादुक्थ्यँ हुतँ सोमा अन्वायन्ति— तै.सं. ६.५.१.१

५९७. ध्रुवग्रहकथनम् : पुरस्तादुक्थ-स्याहवनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते— तै.सं.६.५.२.३

५९८. सोमपात्रस्तुति : आज्यमित्युक्थं तद्वै ग्रहाणां निदानं— तै.सं.६.५.११.२

५९९. अतिग्राह्यग्रहकथनम् : यदुक्थ्ये गृह्णीयात्प्रत्यञ्चं यज्ञमतिग्राह्याः सँ शृणीयुः— तै.सं.६.६.८.१

६००. षोडशिग्रहकथनम् : वज्रो वै षोडशी पशवस्तृतीयसवनं वज्रेणैवास्मै तृतीयसवनात्पशूनव रुन्धे नोक्थ्ये गृह्णीयात्प्रजां पशूनस्य निर्दहेत्।— तै.सं.६.६.११.३

६०१. गर्गत्रिरात्राभिधानम् : सोऽग्निष्टोमेन वसूनयाजयत्त इमं लोकमजयन्तच्चाददुः स उक्थ्येन रुद्रानयाजयन्तेऽन्तरिक्षमजयन्तच्चाददुः— तै.सं.७.१.५.३

६०२. तस्मात्त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र एषां लोकानां विधृत्यै।— तै.सं.७.१.५.४

६०३. दशरात्रकथनम् : त्रिवृदग्निष्टोमो-ऽग्निष्टदाग्नेयीषु भवति तेज एवाव रुन्धे पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्धे------सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमो-ऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते एकविँश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते।-----त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रिँश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै--— तै.सं.७.२.५.६

६०४. द्वादशरात्रकथनम् : उक्थ्याग्रान्गृहीता-भिचर्यमाणः सर्वेषां वा एतत्पात्राणामिन्द्रियं यदुक्थ्यपात्रँ सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते— तै.सं.७.२.७.४

६०५. द्वादशरात्रकथनम् : यावग्निष्टोमौ तौ पक्षौ ये ऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिपक्षा य एवं वेद------- यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्त्सद्ध वै सत्रेण स्पृणाति— तै.सं.७.२.९.१

६०६. अश्वमेधगतमन्त्रकथनम् : आ माऽग्निष्टोमो विशतूक्थ्यश्चातिरात्रो माऽऽविशत्वा-पिशर्वरः।— तै.सं.७.३.१३.१

६०७. प्रायणीयाख्यप्रथमाहाभिधानम् : अतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रम्---- तै.सं.७.४.१०.१

६०८. मासगताहकथनम् : अग्निष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तत्तदेतत्परियद्देवचक्रं यदेतेन षडहेन यन्ति-— तै.सं.७.४.११.२

## उक्षा

१. नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते। दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः।।— ऋ.१.३६.१९

२. ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः। पावकासः शुचयः सूर्या इव सत्वानो नं द्रप्सिनो घोरवर्पसः।। — दे. मरुतः— ऋ.१.६४.२

३. त उक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः। अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः।। दे.मरुतः— ऋ.१.८५.२

४. उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित् पथा। श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते।। दे. मरुतः— ऋ. १.८७.२

५. अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः। देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी।। (पञ्च उक्षणः - इन्द्र, वरुण, अग्नि, अर्यमा, सविता अथवा अग्नि, वायु, सूर्य, चन्द्रमा, नक्षत्र-सायण)— ऋ.१.१०५.१०

६. मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। म नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।।— ऋ.१.११४.७

७. इमे ये ते सु वायो बाह्वोजसो ऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः। धन्वञ्चिद् ये अनाशवो जीराश्चिदगिरौकसः। सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः।— ऋ.१.१३५.९

८. होता यक्षद् वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः।— ऋ.१.१३९.१०

९. यद् युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम्। अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि।।— ऋ.१.१५७.२

१०. शकमयं धूममारादपश्यं विषूवता पर एनावरेण। उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन्।।— ऋ.१.१६४.४३

११. यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे। उक्षन्त्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः।।— ऋ.१.१६६.३

१२. सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः।।— ऋ.१.१६८.२

१३. तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः।। पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु।।— ऋ.२.२.४

१४. साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते। तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती।।— ऋ.२.३.६

१५. इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद् युवानमवसे हवामहे।। — ऋ. २.१६.१

१६. सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः। दे.इन्द्रः— ऋ.२.२१.३

१७. उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः। हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः।।— ऋ.२.३४.३

१८. अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः। प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः।।(सप्त विप्राः-सप्त वषट्कर्तारः- सायण)— ऋ.३.७.७

१९. त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्। औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त।।— ऋ.३.९.९

२०. आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू।— ऋ.३.६२.१६

२१. स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य। धिया यद् विश्वे अमृता अकृण्वन् द्यौष्पिता जनिता सत्यमुक्षन्।।— ऋ.४.१.१०

२२. अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य। ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद् वि भूम।।— ऋ.४.४२.४

२३. मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः। यत् सीं वरिष्ठे बृहतीविमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः।।— ऋ.४.५६.१

२४. देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे। ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः।।— ऋ.४.५६.२

२४. त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे। स वावृधान ओषधीभिरुक्षितो ऽभि ज्रयांसि पार्थिवा वि तिष्ठसे।।— ऋ.५.८.७

२५. यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः। अश्वमेधस्य दानाः सोमा इव त्र्याशिरः।।— ऋ.५.२७.५

२६. प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः। यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः।।— ऋ.५.४२.१४

२७. उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश। मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ।।— ऋ.५.४७.३

२८. ते स्पन्द्रासो नोक्षणो ऽति ष्कन्दन्ति शर्वरीः। मरुतामधा महो दिवि क्षमा च मन्महे।।— ऋ.५.५२.३

२९. साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः। विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत।।— ऋ.५.५५.३

३०. हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः। सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः।।— ऋ.५.५७.८,५.५८.८

३१. प्र वः स्पळक्रन् त्सुविताय दावने ऽर्चा दिवे प्र पृथिव्या ऋतं भरे। उक्षन्ते अश्वान् तरुषन्त आ रजो ऽनु स्वं भानुं श्रथयन्ते अर्णवैः।।— ऋ.५.५९.१

३२. रथं युञ्जते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु। रजांसि चित्रा वि चरन्ति तन्यवो दिवः सम्राजा पयसा न उक्षतम्।।— ऋ.५.६३.५

३३. आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि। ते ते भवन्तूक्षण ऋषभासो वशा उत।।— ऋ.६.१६.४७

३४. ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम्। महामनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम्।।— ऋ.६.१७.४

३५. यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद् धारयच्च। उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम्।।— ऋ.७.६४.४

३६. आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः। प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः।।— ऋ.७.६५.४

३७. अध प्लायोगिरति दासदन्यानासंगो अग्ने दशभिः सहस्रैः। अधोक्षणो दश मह्यं रुशन्तो नळा इव सरसो निरतिष्ठन्।।— ऋ.८.१.३३

३८. ता सुदेवाय दाशुषे सुमेधामवितारिणीम्। घृतैर्गव्यूतिमुक्षतम्।।— ऋ.८.५.६

३९. उशना यत् परावत उक्ष्णो रन्ध्रमयातन। द्यौर्न चक्रदद् भिया।।— ऋ.८.७.२६

४०. व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः। महो राये तमु त्वा समिधीमहि।।— ऋ.८.२३.१६

४१. ऋज्रमुक्षण्यायने रजतं हरयाणे। रथं युक्तमसनाम सुषामणि।।— ऋ.८.२५.२२

४२. वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत्। सुमतिभिरुप विप्राविहा गतम्।।— ऋ.८.२६.९

४३. उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये।।— ऋ.८.४३.११

४४. शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते। मह्ना दिवं न तस्तभुः।।— ऋ.७.५५.२

४५. उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम्। अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत।।— ऋ.९.६९.४

४६. नाभा पृथिव्या धरुणो महो दिवो ऽपामूर्मौ सिन्धुष्वन्तरुक्षितः। इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो ह्रदे पवते चारु मत्सरः।।— ऋ.९.७२.७

४७. अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः। मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः।।— ऋ.९.८३.३

४८. दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम्। अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ।।— ऋ.९.८५.१०

४९. अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते। सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते।।— ऋ.९.८६.४३

५०. सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम्। शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा।।— ऋ.९.८९.३

५१. तं मर्मजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम्। तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे।।— ऋ.९.९५.४

५२. तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम्। दूतं न पूर्वचित्तय आ शासते मनीषिणः।।— ऋ.९.९९.५

५३. अभूर्वौक्षीर्व्यु आयुरानड् दर्षन्नु पूर्वो अपरो नु दर्षत्। द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष।।— ऋ.१०.२७.७

५४. तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रतिपीयन्त्यन्नैः। सिम उक्ष्णो ऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः शृणानाः।।— ऋ.१०.२८.११

५५. नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति। त्वचं पवित्रं कृणुत स्वधावान् यदीं सूर्यं न हरितो वहन्ति।— ऋ.१०.३१.८

५६. त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्। औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त।।— ऋ.१०.५२.६

५७. वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे। घसत् त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः।।— ऋ.१०.८६.१३

५८. उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम्। उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः।।— ऋ.१०.८६.१४

५९. यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः। कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये।।— ऋ.१०.९१.१४

६०. यज्ञस्य केतुं प्रथमं पुरोहितं हविष्मन्त ईळते सप्त वाजिनम्। शृण्वन्तमग्निं घृतपृष्ठमुक्षणं पृणन्तं देवं पृणते सुवीर्यम्।।— ऋ.१०.१२२.४

६१. अभि त्वा जरिमाहित गामुक्षणमिव रज्ज्वा। यस्त्वा मृत्युरभ्यधत्त जायमानं सुपाशया। तं ते सत्यस्य हस्ताभ्यामुदमुञ्चद् बृहस्पतिः।।-अथर्ववेद ३.११.८

६२. इहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतमुक्षमाणा। तां त्वा शाले सर्ववीराः सुवीरा अरिष्टवीरा उप सं चरेम।— अ.३.१२.१

६३. इमां शालां सविता वायुरिन्द्रो बृहस्पतिर्नि मिनोतु प्रजानन्। उक्षन्तूद्ना मरुतो घृतेन भगो नो राजा नि कृषिं तनोतु।।— अ.३.१२.४

६४. उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्।।— अ.३.२१.६

६५. यस्य वशास ऋषभास उक्षणो यस्मै मीयन्ते स्वरवः स्वर्विदे। यस्मै शुक्रः पवते ब्रह्मशुम्भितः स नो मुञ्चत्वंहसः।।— अ.४.२४.४

६६. सिलाची नाम कानीनोऽजबभ्रु पिता तव। अश्वो यमस्य यः श्यावस्तस्य हास्नास्युक्षिता। — अ.५.५.८

६७. शकमयं धूममारादपश्यं विषूवता पर एनावरेण। उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन्।।— अ.९.१५.२५/९.१०.२५

६८. यस्यामापः परिचरा समानीरहोरात्रे अप्रमादं क्षरन्ति। सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।।— अ.१२.१.९

६९. उत् त्वा वहन्तु मरुत उदवाहा उदप्रुतः। अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति।।— अ.१८.२.२२

७०. अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते। सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृह्णते।। — अ. १८.३.१८

७१. उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये।।— अ.२०.१.३

७२. वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे। घसच इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः।।— अ.२०.१२६.१३

७३. उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम्। उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः।।— अ.२०.१२६.१४

७४. ते (असुराः) होचुः-हन्तेमां पृथिवीं विभजामहै, तां विभज्योपजीवामेति। तामौक्ष्णैश्चर्म्मभिः पश्चात् प्राञ्चो विभजमाना अभीयुः।-------ते (देवाः) यज्ञमेव विष्णुं पुरस्कृत्येयुः।-शतपथ ब्राह्मण १.२.५.२

७५. अनुबन्ध्यायागः - अथ यदा न कश्चन रसः पर्यशिष्यत्-तत एषा मैत्रावरुणी वशा समभवत्। तस्मादेषा न प्रजायते। रसाद्धिरेतः सम्भवति। रेतसः पशवः।----तस्माद्वाऽएषाऽत्र मैत्रावरुणी वशाऽवक्लृप्ततमा भवति। यदि वशां न विन्देदप्युक्षवश एव स्यात्।— श.ब्रा.४.५.१.९

७६. उक्षा वयः-इति। उक्षाणं वयसाऽऽप्नोत्। ककुप्छन्दः-इति। ककुब्भ भूत्वोक्षाण उच्चक्रमुः। — श.ब्रा.८.२.४.७

७७. उक्षा समुद्रो अरुणः सुपर्णः-इति। उक्षा ह्येष समुद्रोऽरुणः सुपर्णः। पूर्वस्य योनिं पितुराविवेश-इति। पूर्वस्य ह्येष एतं योनिं पितुराविशति। मध्ये दिवो निहितः पृश्निरश्मा -इति। मध्ये ह्येष दिवो निहितः पृश्निरश्मा।-- — श.ब्रा.९.२.३.१८

७८. स यथा ब्राह्मणमावसथवासिनं क्रुद्धं यंतमुक्षवे हतोपमन्त्रयेत। एवमेवैतत् विश्वान्देवानुपमन्त्रयते।— श.ब्रा.१२.४.४.६

७९. पुत्रमन्थकर्म ब्राह्मणम् : अथ य इच्छेत्। पुत्रो मे पंडितो विजिगीथः समितिङ्गमः शुश्रूषितां वाचं भाषिता जायेत। सर्वान् वेदाननुब्रुवीत। सर्वमायुरियात् इति। मांसौदनं पाचयित्वा। सर्पिष्मन्तमश्नीयाताम्। ईश्वरौ जनयितवै। औक्ष्णेन वा। आर्षभेण वा।— श.ब्रा.१४.९.४.१७

८०. उक्षान्नाय वशान्नाय इत्याग्नीध्रो यजति। सोमपृष्ठाय वेधसे इति। इन्द्रो वै वेधाः।-गोपथ ब्राह्मण २.२.२०

८१. त्वामग्ने प्रदिव आहुतं घृतेन। सुम्नायवः सुषमिधा समीधिरे। स वावृधान ओषधीभिरुक्षितः। उरु ज्रयाँसि पार्थिवा वितिष्ठसे।-तैत्तिरीय ब्राह्मण १.२.१.१२

८२. सुराया अनुमन्त्रणम् : यस्मिन्नश्वास ऋषभास उक्षणः। वशामेषा अवसृष्टास आहुताः। कीलालपे सोमपृष्ठाय वेधसे। हृदा मतिं जनय चारुमग्नये।— तै.ब्रा.१.४.१.२

८३. पञ्चन्तर विषये प्रयाजार्था मैत्रावरुण प्रैषाः - होता यक्षत्सुरेतसम्। त्वष्टारं पुष्टिवर्धनम्। रूपाणि बिभ्रतं पृथक्। पुष्टिमिन्द्रं वयोधसम्। द्विपदं छन्द इहेन्द्रियम्। उक्षाणं गां न वयो दधत्। वेत्वाज्यस्य होतर्यज।— तै.ब्रा.२.६.१७.६

८४. कौकिल सौत्रामणी : त्वष्टा तुरीपो अद्भुतः। इन्द्राग्नी पुष्टिवर्धना। द्विपाच्छन्द इहेन्द्रियम्। उक्षा गौर्न वयो दधुः।— तै.ब्रा.२.६.१८.४

८५. पञ्चशारदीये पशु विधिः - अगस्त्यो मरुद्भ्य उक्ष्णः प्रौक्षत्। तानिन्द्र आदत्त। त एनं वज्रमुद्यत्याभ्यायन्त। तानगस्त्यश्चैवेन्द्रश्च कयाशुभीयेनाशमयताम्।---तस्मादेत ऐन्द्रा मारुता उक्षाणः सवनीया भवन्ति। त्रयः प्रथमे ऽहन्नालभ्यन्ते। एवं द्वितीये। एवं तृतीये। एवं चतुर्थे। पञ्चोत्तमेऽहन्नालभ्यन्त। वर्षिष्ठमिव ह्येतदहः।----- पञ्चशारदीयो वा एष यज्ञः। आपञ्चमात्पुरुषादन्नमत्ति। य एतेन यजते।— तै.ब्रा.२.७.११.१

८६. अथाऽऽग्रयणस्य पुरोरुचम्:त्रीणि शता त्रीषहस्राण्यग्निम्। त्रिंशच्च देवा नव चासपर्यन्। औक्षन्घृतैरास्तृणन्बर्हिरस्मै। आदिद्धोतारं न्यषादयन्त।— तै.ब्रा.२.७.१२.२

८७. यद् आहवनीयम् अनुद्धृतम् अभ्य् अस्तम् इयात् किं तत्र कर्म का प्रायश्चित्तिर् इति।------ -तद् यथा वा अदवद आवथवासिनं क्रुद्धं यन्तम् उक्षवेहता वानुमन्त्रयेतान्येन वा प्रियेण धाम्नैवम् एव तद् विश्वान् देवान् अनुमन्त्रयते। ते हास्मै सर्व एवाक्रुद्धा भवन्ति।— जै.ब्रा.१.६२

८८. अथैष पञ्चशारदीयः।----तस्य पञ्च शरदः पञ्चोक्षाणः प्रोक्षिताश् चरन्ति। तद् यत् पञ्चशरदः पञ्चोक्षाणः प्रोक्षिताश् चरन्ति, तस्मात् पञ्चशारदीयः। त उ सर्वे पृश्नयो भवन्ति।— जै.ब्रा.२.१७६

८९. एतान्य् उ ह स्म वै तत् कुंस्थः कालाशभिर् उपगायति-अरुणान् सदम् उक्षन्न् अश्वान काष्ठातो यथा। पूर्णान् परिस्रुतः कुम्भाञ् जनमेजयसादन।। इति। यं ह वा एतैस् सामभिः कामं कामयते तम् एवावरुन्द्धे।— जै.ब्रा.२१।३३१

९०. यथा ह वै शारद उक्षैवं महाव्रतम्। स यथा शारदम् उक्षाणं वागराभिः परितत्यालभेरन् एवम् एवैतत् परिमाद्भिर् महाव्रतम् आलभन्ते व्रतस्याप्रक्षयाय।— जै.ब्रा.२.४०३

९१. सो (मनुः) ऽकामयताप रक्षांसि हनीयेति। स एतत् सामापश्यत्। तेनास्तुत। नि त्वाम् अग्ने मनुर् दधे ज्योतिर् जनाय शश्वते। दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः।— जै.ब्रा.३.९८

९२. अथौक्ष्णोरन्ध्रम्। उक्ष्णो वै रन्ध्रः काव्यो ऽकामयताद्भिः प्रतीपं स्वर्गं लोकम् आरोहेयम् अप्सु मे वर्त्मानि पश्येयं नियानम् इति। स एतत् सामापश्यत्। तेनास्तुत।----स एवोशना काव्यः। स ह स यमुनयैव प्रतीपं स्वर्गं लोकम् आरोहत्। तद् एतत् स्वर्ग्यं साम।— जै.ब्रा.३.१५०

९३. अथ ह वा इमानि वनानीमाश् च नद्यो ऽपरतार आस पुरा सिन्धोर् आसुः। तौ ह पश्चात् परीत्य प्राचीः प्ररुरुधतुः। ततो यान्य् उक्षशर्धतान्य् आसंस्, तानीमानि लवणानि।— जै.ब्रा.३.२३९

९४. उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीर् उप यन्ति निष्कृतम्। अत्य् अक्रमीद् अर्जुनं वारम् अव्ययम् अत्कं न निक्तं परि सोमो अव्यत।। इति परिवतीर् भवन्त्य् अन्तस्य रूपम्। अन्तो ह्य् एतद् अहः।— जै.ब्रा.३.२९८

९५. अष्टम अहः (माध्यंदिन पवमानः) - औक्ष्णोरन्ध्रे भवतः। उक्ष्णोरन्ध्रो वा एताभ्याङ्काव्योऽञ्जसा स्वर्गं लोकमपश्यत् स्वर्गस्य लोकस्यानुख्यात्यै स्वर्गात् लोकान्न च्यवते तुष्टुवानः।-ताण्ड्य ब्रा.१३.९.१८

९६. अगस्त्यो वै मरुद्भ्य उक्ष्नः प्रौक्षत्तानिन्द्रायावघ्नात्ते वज्रमादायाभ्यपतत्ता एतत्कयाशुभीयमपश्यत्तेनाशमयत्।----- सप्तदश पृश्नीनुक्ष्णः पञ्चवर्षात् सप्तदश पृश्नीस्त्रिवत्सा अप्रवीतास्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान्

सृजन्ति। ततः संवत्सरे नवनीतपृश्नीररुणा आनयन्ति ताँश्चैवोक्ष्णस्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ततः संवत्सरे राजीवा आनयन्ति ताँश्चैवोक्ष्णस्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ततः संवत्सरे पिशङ्गीरानयन्ति ताँश्चैवोक्ष्णस्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति ततः संवतत्सरे सारङ्गीरानयन्ति ताँश्चैवोक्ष्णस्तान् पर्यग्निकृतान् प्रोक्षितानेतरालभन्ते प्रेतरान् सृजन्ति। ततः संवत्सरे सोमा भवन्ति। त्रींस्त्रीनन्वहमालभन्ते पञ्चोत्तमेहनि। अजोग्नीषोमीयः। ऐन्द्रामारुता उक्षाणो मारुत्यो वत्सतर्य्यः।-ताण्ड्य ब्राह्मण२१.१४.७

९७. अग्निं मन्थन्ति सोमे राजन्यागते। तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन्वार्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत्क्षदन्ते यदग्निं मन्थन्त्यग्निर्हि देवानां पशुः।—ऐतरेय ब्राह्मण १.१५

९८. मही द्यावापृथिवी इह ज्येष्ठे इति द्यावापृथिवीयं रुवद्धोक्षेति पशुरूपं पञ्चमेऽहनि पञ्मस्याह्नो रूपम्।-ऐ.ब्रा.५.८

९९. प्रस्थित याज्या : आग्नीध्रस्य याज्याया ऐन्द्रत्वं संपादयति-उक्षान्नाय वशान्नायेत्याग्नीध्रो यजति सोमपृष्ठाय वेधस इतीन्द्रो वै वेधास्तदैन्द्रं रूपं तेनेन्द्रं प्रीणाति।-ऐ.ब्रा.६.१०

१००. काम्ययाज्यापुरोनुवाक्या :- उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये।-तैत्तिरीय संहिता १.३.१४.७

१०१. ब्रह्मवर्चसकामादीनां पशुविधिः - ते (देवाः) प्रजापतिमुपाधावन्त्स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत ते देवा वैष्णावरुणीं वशामाऽलभन्तैन्द्रमुक्षाणं ते वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तैन्द्रेणैवास्येन्द्रियमवृञ्जत यो भ्रातृव्यवान्त्स्यात्स स्पर्धमानो वैष्णावरुणीम् वशामा लभेतैन्द्रमुक्षाणं---- — तै.सं.२.१.४.४

१०२. वषट्कारो वै गायत्रियै शिरोऽच्छिनत्तस्यै रसः पराऽपतत्तं बृहस्पतिरुपागृह्णात्सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः परापतत्तं मित्रावरुणावुपागृह्णीताँ सा द्विरूपा वशाऽभवद्यस्तृतीयः परापतत्तं विश्वे देवा उपागृह्णन्त्सा बहुरूपा वशाऽभवद्यश्चतुर्थः परापतत्स पृथिवीं प्राविशत्तं बृहस्पतिरभि अगृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभवत्— तै.सं.२.१.७.१

१०३. छन्दसां वा एष रसो यद् वशा रस इव खलु वै सजाताश्छन्दसामेव रसेन रसँ सजातानव रुन्धे बार्हस्पत्यमुक्षवशमालभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन्ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति वशं वा एष चरति यदुक्षा वश एव खलु वै ब्रह्मवर्चसं— तै.सं.२.१.७.६

१०४. वयस्याख्येष्टकाभिधानम् . उक्षा वयः सतोबृहती छन्द — तै.सं.४.३.५.१

१०५. चित्याग्निहोमोक्तिः - मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवः रुद्र रीरिषः।— तै.सं.४.५.१०.२

१०६. अग्निप्रणयनाभिधानम् : उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश। मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ।— तै.सं.४.६.३.४

१०७. वसोर्धाराद्यभिधानम् :- उक्षा च मे वशा च म— तै.सं.४.७.१०.१

१०८. त्वामग्ने प्रदिव आहुतं घृतेन सुम्नायवः सुषमिधा समीधिरे। स वावृधान ओषधीभिरुक्षित उरु ज्रयांसि पार्थिवा वितिष्ठसे।।-आप.श्रौ.सू.५.६.३

१०९. अग्निहोत्री के प्रवास से गृह आगमन पर : इरां वहन्तो घृतमुक्षमाणास्तेष्वहं सुमना संविशामीति प्रविश्य जपति।— आप.श्रौ.सू.६.२७.५

११०. अग्निचयनम् : उक्षान्नाय वशान्नायेत्येताभिः षड्भिश्चितिंचितिमुपधाया-भिजुहोति।— आप.श्रौ.सू.१६.३५.१

१११. सोमस्याग्ने वीहीत्यनुयजति।----- यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः।---- आप.श्रौ.सू१९.३.२

११२. प्राशृङ्गो ऽवाशृङ्ग उक्षा वशा वेहद्धेनुर्वत्स ऋषभोऽनड्वान्पुनरुत्सृष्टो गोमृग इति गव्याः। अन्नाय वेहतमालभते---- आप.श्रौ.सू.१९.१६.१६

११३. पञ्चशारदीयेन बहोर्भूयान्भवति।-- -सप्तदश पृश्नीनुक्ष्णः पञ्चवर्षानानयन्ति।---- प्रोक्षितान्पर्यग्निकृतानुक्ष्ण उत्सृजन्ति।-- -एत उक्षाणः सवनीयाः। त्रींस्त्रीनन्वहमालभन्ते। पञ्चोत्तमे ऽहन्। ऐन्द्रमारुता उक्षाणः। मारुत्यो वत्सतर्यः। यद्युक्ष्णो रुद्रो ऽभिमन्येत।— आप.श्रौ.सू.२२.२०.९

११४. अग्निहोत्री के प्रवास से गृह आगमन पर : -- -- इरां वहन्तो घृतमुक्षमाणास्तेष्वहं सुमना संविशानीति -आश्वलायन श्रौ.सू.२.५.१७

११५.--उक्षान्नाय वशान्नायेति प्रातःसवनिक्यः प्रस्थितयाज्याः।-आश्वलायन श्रौ.सू.५.५.१९

११६. पञ्चशारदीयस्य तु सप्तदशोक्षाण ऐन्द्रामारुता मारुतीभिः सह वत्सतरीभिः सप्तदशभिः सप्तदशभिः पञ्चवर्षपर्यग्निकृताः सवनीयाः। तेषां त्रींस्त्रीश्चतुर्ष्वहस्वालभे-रन्परिशिष्टान्पञ्च पञ्चमे।— आश्वलायन श्रौ.सू.१०.२.२९

११७. वैश्यस्तोमदक्षिणालिङ्गान्। उक्ष्णो वत्सतरीवर्णानुपूर्व्येण।-- पर्यग्निकृतानुत्सृजन्त्युक्ष्णो वत्सतरीभिः संस्थापयन्ति। एवं पञ्च वर्षाण्युक्ष्णो नियुञ्जन्ति। षष्ठे सवनीया भवन्ति त्रयस्त्रयोऽन्वहमैन्द्रामारुताः। पञ्चोत्तमे।-कात्यायन श्रौ.सू.२३.४.५

११८. अग्निचयनम् : ----अथ विषुवत्याग्नीध्रस्य काले पृश्निमश्मानं निदधाति विमान एष दिव उक्षा समुद्र इति द्वाभ्यामथ चतसृभिः---बौ.श्रौ.सू.१०.५१

११९. इष्टिकल्पः - अग्नये ऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्न-वान्त्स्यामिति तस्या एते भवत उक्षान्नाय वशान्नाय— बौ.श्रौ.सू.१३.६

१२०. सौत्रामणी : यस्मिन्नश्वास ऋषभास उक्षण इत्यनुवषट्कृते हुत्वाश्विनस्य सँस्रावँ सारस्वते ऽवनयति---- बौ.श्रौ.सू.१७.३५

१२१. पञ्चशारदीयः - अथैतेषां पशूनां त्रयः प्रथमे ऽहन्नैन्द्रामारुता उक्षाणः सवनीया आलभ्यन्त एवं द्वितीय एवं तृतीय एवं चतुर्थे पञ्चोत्तमे ऽहन्नालभ्यन्ते वर्षिष्ठमिव ह्येतदहर्मन्यन्ते-बौ.श्रौ.सू.१८.११

१२२. वनिष्ठुसवः - स उपकल्पयते शतमुक्षवेहतः शतं दार्वाचितानि शतं सर्पिष्पात्राञ्छतं पयःपात्रान्---- -- -अथैतानि दार्वाचितानि प्रदोष एवाग्नावादधाति तेषु प्रज्योतिषूक्षवेहतो निघ्नन्ति----बौ.श्रौ.सू.१८.४०

१२३.---आज्ञा औक्षा भूरयः---- बौ.श्रौ.सू.प्रवर१७

१२४. अथ जायामानीय स्वान् गृहान् प्रपादयति-भद्रान् गृहान् सुमनसः प्रपद्येऽवीरघ्नी वीरवतस्सुवीरान्। इरां वहतो घृतमुक्षमाणास्तेष्वहं सुमनास्संविशानि इति।-बौधायन गृह्य सूत्र १.५.७

**उग्र** (केवल अनुद्धृत अंश)

१. शुभे यदुग्राः पृषतीरयुग्ध्वम्। (दे. मरुतः)।— ऋ.५.५७.३

२. सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ।— ऋ.७.४०.३

३. क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते।-ऋग्वेद ७.८२.५

४. तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः।— ऋ.८.२९.५

५. आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन।— ऋ.१०.४२.७

(ऋग्वेद के अन्य मन्त्र नहीं लिखे)

६. उग्रस्य मन्योरुदिमं नयामि— अ.१.१०.१

७. नमस्ते राजन् वरुणास्तु मन्यवे विश्वं ह्युग्र निचिकेषि दुग्धम्।— अ.१.१०.२

८. इन्द्रेण दत्तो वरुणेन शिष्टो मरुद्भिरुग्रः प्रहितो न आगन्।— अ.२.२९.४

९. पांच दिशाएं : वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व ततो न उग्रो वि भजा वसूनि।— अ.३.४.२

१०. जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः।— अ.३.४.३

११. अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि।— अ.३.४.४

१२. तास्त्वाः सर्वाः संविदाना ह्वयन्तु दशमीमुग्रः सुमना वशेह।— अ.३.४.७

१३. सोमस्य पर्णः सह उग्रमागन्निन्द्रेण दत्तो वरुणेन शिष्टः।— अ.३.५.४

१४. शाला निर्माण : ऋतेन स्थूणामधि रोह वंशोग्रो विराजन्नप वृङ्क्ष्व शत्रून्।-अथर्ववेद ३.१२.६

१५. यस्याञ्जन प्रसर्पस्यङ्गमङ्गं परुष्परुः। ततो यक्ष्मं विबाधस उग्रो मध्यमशीरिव।।— अ.४.९.४

१६. आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः। दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते।। (दे. चन्द्रमा)— अ.४.१३.५

१७. शतेन मा परि पाहि सहस्रेणाभि रक्ष मा। इन्द्रस्ते वीरुधां पत उग्र ओज्मानमा दधत्।। (दे. अपामार्ग)— अ.४.१९.८

१८. यः उग्रीणामुग्रबाहुर्ययुर्यो दानवानां बलमारुरोज। येन जिताः सिन्धवो येन गावः स नो मुञ्चत्वंहसः।। — अ.४.२४.२

१९. सहस्राक्षौ वृत्रहणा हुवेऽहं दूरे गव्यूति स्तुवन्नेम्युग्रौ।— अ.४.२८.३

२०. यं ग्राममाविशत इदमुग्रं सहो मम। पिशाचास्तस्मान्नश्यन्ति न पापमुप जानते।।— अ.४.३६.८

२१. तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः। (दे. वरुण)।— अ.५.२.१

२२. उग्रो राजा मन्यमानो ब्राह्मणं यो जिघत्सति। परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते।। (दे. ब्रह्मगवी)।— अ.५.१९.६

२३. उग्रस्य चेत्तुः संमनसः सजाताः— अ.६.७३.१

२४. यथादित्या वसुभिः संबभूवुर्मरुद्भिरुग्रा अहृणीयमानाः— अ.६.७४.३

२५. इमं वीरमनु हर्षध्वमुग्रं इन्द्रं सखायो अनु संरभध्वम्। ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा।। अ.६.९७.३

२६. ह्वयामि उग्रं चेत्तारं पुरुणामानमेकजम्— अ.६.९९.१

२७. इदमुग्राय बभ्रवे नमो यो अक्षेषु तनूवशी। घृतेन कलिं शिक्षामि स नो मृडातीदृशे।।— अ.७.१०९.१/७.११४.१

२८. अयं मणिः सपत्नहा सुवीरः सहस्वान् वाजी सहमान उग्रः।— अ.८.५.२

२९. ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नाति विध्यन्ति सर्वे।— अ.८.५.१९

३०. यस्ते गर्भं प्रतिमृशाज्जातं वा मारयाति ते। पिंगस्तमुग्रधन्वा कृणोतु हृदयाविधम्।— अ.८.६.१८

३१. गर्भं ते उग्रौ रक्षतां भेषजौ नीविभार्यौ— अ.८.६.२०

३२. वीरुधो वैश्वदेवीरुग्राः पुरुषजीवनीः— अ.८.७.४

३३. उन्मुंचन्तीर्विवरुणा उग्रा या विषदूषणीः— अ.८.७.१०

३४. सेदिरुग्रा व्यृद्धिरार्तिश्चानपवाचना— अ.८.८.९

३५. मधुविद्या : अग्नेर्वातान्मधुकशा हि जज्ञे मरुतामुग्रा नप्तिः।— अ.९.१.३

३६. स्तनयित्नुस्ते वाक् प्रजापते वृषा शुष्मं क्षिपसि भूम्यामधि। अग्नेर्वातान्मधुकशा हि जज्ञे मरुतामुग्रा नप्तिः।।— अ.९.१.१०

३७. काम : उग्र ईशानः प्रति मुंच तस्मिन् यो अस्मभ्यं अंहूरणा चिकित्सात्।— अ.९.२.३

३८. काम : अध्यक्षो वाजी मम काम उग्रः कृणोतु मह्यमसपत्नमेव।— अ.९.२.७

३९. काम : उत पृथिव्यां अव स्यन्ति विद्युत उग्रो वो देवः प्र मृणत् सपत्नान्।— अ.९.२.१४

४०. प्रियाप्रियाणि बहुला स्वप्नं सम्बाधतन्द्र्यः। आनन्दानुग्रो नन्दांश्च कस्माद् वहति पूरुषः।।— अ.१०.२.९

४१. उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम्।— अ.१०.४.३, १०.४.४

४२. यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे। तमग्निः प्रत्यमुंचत सो अस्मै दुह आज्यं-।--तमिन्द्रः प्रत्यमुंचत-।---- तं सोमः प्रत्यमुंचत-।- तं सूर्यः प्रत्यमुंचत---।— अ.१०.६.६

४३. अयं यज्ञो गातुवित्नाथवित् प्रजाविदुग्रः पशुविद् वीरविद् वो अस्तु।— अ.११.१.१५

४४. सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।— अ.१२.१.१

४५. यूयमुग्रा मरुतः पृश्निमातरः इन्द्रेण युजा प्र मृणीत शत्रून्।— अ.१३.१.३

४६. अष्टधा युक्तो वहति वह्निरुग्रः पिता देवानां जनिता मतीनाम्।— अ.१३.३.१९

४७. तस्मा उदीच्या दिशो अन्तर्देशादुग्रं देवमिष्वासमनुष्ठातारमकुर्वन्। उग्र एनं देव इष्वास उदीच्या दिशो----।— अ.१५.५.१०

४८. पितृमेधः - स्तुहि श्रुतं गर्तसदं जनानां राजानं भीममुपहत्नुमुग्रम्।— अ.१८.१.४०

४९. आ यूथेव क्षुमति पश्वो अख्यद् देवानां जनिमान्त्युग्रः। मर्तासश्चिदुर्वशीरकृप्रन् वृधे चिदर्य उपरस्यायोः।।— अ.१८.३.२३

५०. अप्रतिरथ सूक्तम् : उग्रधन्वा प्रतिहिताभिरस्ता— अ.१९.१३.४

५१. सहस्वान् वाजी सहमान उग्रः— अ.१९.१३.५

५२. अभि गोत्राणि सहसा गाहमानोऽदाय उग्रः शतमन्युरिन्द्रः।— अ.१९.१३.७

५३. इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्। — अ.१९.१३.१०

५४. उग्रा त इन्द्र स्थविरस्य बाहू उप क्षयेम शरणा बृहन्ता।— अ.१९.१५.४

५५. दर्भो य उग्र ओषधिस्तं ते बध्नाम्यायुषे।— अ.१९.३२.१

५६. ओजो देवानां बलमुग्रमेतत् तं ते बध्नामि जरसे स्वस्तये।— अ.१९.३३.४

५७. विबाध उग्रो जंगिडः परिपाणः सुमंगलः।— अ.१९.३४.७

५८. पुरा त उग्रा ग्रसत उपेन्द्रो वीर्यं ददौ।— अ.१९.३४.८

५९. उग्र इत् ते वनस्पत इन्द्र ओज्मानमा दधौ।— अ.१९.३४.९

६१. काम : त्वमुग्रः पृतनासु सासहिः सह ओजो यजमानाय धेहि।— अ.१९.५२.२

६२. अव तां जहि हरसा जातवेदोऽबिभ्यदुग्रोऽर्चिषा दिवमारोह सूर्य।— अ.१९.६५.१

६३. शुनं हुवेम मघवानमिन्द्रं अस्मिन्भरे नृतमं वाजसातौ। शृण्वन्तमुग्रं ऊतये समत्सु घ्नन्तं वृत्राणि संजित धनानां।।— अ.२०.११.११

६४. स नो युवोग्रश्चक्राम यो धृषत्— अ.२०.१४.२

६५. प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां— अ.२०.२५.७, २०.३३.२

६६. तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि।— अ.२०.५५.१

६७. य उग्रः सन्ननिष्टृत स्थिरो रणाय संस्कृतः।— अ.२०.५७.१३, २०.५३.३

६८. क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम्।— अ.२०.५४.१

६९. उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत्।— अ.२०.६२.२

७०. उग्रं तत् पत्यते शव इन्द्रो अंग।— अ.२०.६३.६

७१. इन्द्र वाजेषु नो अव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः।— अ.२०.७०.१०

७२. कस्ते मद इन्द्र रन्त्यो भूद् दुरो गिरो अभ्युग्रो वि धाव।— अ.२०.७६.३

७३. त्वामुग्रं अवसे चर्षणीसहं राजन् देवेषु हूमहे।— अ.२०.८०.२

७४. आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन।— अ.२०.८९.७

७५. अषाळहमुग्रं पृतनासु सासहिं यस्मिन् महीरुरुज्रयः।— अ.२०.९२.१९

७६. एन्द्रवाहो नृपतिं वज्रबाहुं उग्रमुग्रासस्तविषास एनम्।— अ.२०.९४.३

७७. तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेष नृम्णः।— अ.२०.१०७.४

७८. ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः।— अ.२०.१२७.११

७९. कुलायं कृणवादिति। उग्रं वनिषदाततम्।।— अ.२०.१३५.६

८०. तास्ते यक्ष्मं वि बाधन्तां उग्रो मध्यमशीरिव।।— ऋ.१०.९७.१२, तै.सं.४.२.६.४, अथर्ववेद

८१. राक्षसों द्वारा उग्र तप का उल्लेख। प्रजापति से आदित्य से युद्ध का वर प्राप्त करना।-तैत्तिरीय आरण्यक २.२.१

८२. मित्रावरुणौ : आदित्यानां प्रसितिर्हेतिः। उग्रा शतापाष्ठाघविषा परि णो वृणक्तु।-तैत्तिरीय आरयक ४.२०.३

८३. अग्नि के घोर तनु : स्निक्च स्नीहितिश्च स्निहितिश्च। उष्णा च शीता च। उग्रा च भीमा च। सदाम्नी सेदिरनिरा।— तै.आ.४.२३.१

८४. मरुद्गण : उग्रश्च धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयंश्च।--— तै.आ.४.२५.१

८५. उग्र प्रतिग्रह : अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात्। यन्मे वरुणो राजा पाणिना ह्यवमर्शतु।। तै.आ.१०.१.१३

८६. पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्सधस्थात्।— तै.आ.१०.१

८७. मृत्यु : मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः। प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम।।— तै.आ.१०.५.१

८८. जनिष्ठा उग्रः सहसे तुरायेति सूक्तम् (ऋ.१०.७३.१) उग्रवत्सहस्वत्तत्क्षत्रस्य रूपं।-ऐतरेय ब्राह्मण ८.२

८९. जनिष्ठा उग्रः--- -- से यजमान का देवयोनि में जन्म।-ऐ.ब्रा.३.१९

९०. ब्रह्म वै रथंतरं क्षत्रं बृहद् ब्रह्म खलु वै क्षत्रात्पूर्वं ब्रह्म पुरस्तान्म उग्रं राष्ट्रं अव्यथ्यमसद्---- ऐ.ब्रा.८.१, ८.४

९१. उग्रं सहोदामिह तं हुवेमेति (मरुत्वां इन्द्र वृषभो रणाय-सूक्त ३.४७.१) हववच्चतुर्थेऽहनि चतुर्थस्याह्नो रूपं-ऐ.ब्रा.५.४

९२. पिबा सोममभि यमुग्र तर्द इति सूक्तं (ऋ. ६.१७.१) ऊर्वं गव्यं महि गृणान इन्द्रेति महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपम्-ऐ.ब्रा.५.१८, ऐ.आ.१.२.२

९३. पिबा सोमं----होता यजति माध्यंदिने---- गोपथ ब्राह्मण २.२.२१

९४. होता की याज्या : पिबा सोममभि यमुग्र तर्द इति होता यजति-ऐ.ब्रा.६.११

९५. अषाळहमुग्रं सहमानमाभिरित्युग्रवत्सह-मानवत्तत्क्षत्रस्य रूपं-ऐ.ब्रा.८.३

९६. एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टिमौग्रसेन्यं अभिषिषिचतुः तस्माद् युधां

श्रौष्टिरौग्रसेन्यः समन्तं सर्वतः पृथिवीं जयन्परीयाश्वेन च मेध्येनेजे।-ऐ.ब्रा.८.२१

९७. यतो जज्ञ उग्रस्त्वेषनृम्ण इत्यतोह्येष जात उग्रस्त्वेषनृम्णः।-ऐ.आ.१.३.४

९८. एष स्तोमो सह उग्राय वाह इति महद्वत्या रूपसमृद्ध्या। ऐतरेय आरण्यक १.५.२

९९. सोमानयनम् : श्येनो भूत्वा परापत इति। वय एवैनमेतद्भूतं प्रपातयति। यद्वाऽउग्रं-तन्नाष्ट्रा रक्षांसि नान्वयन्ति। एतद्वै वयसामोजिष्ठं-यच्छ्येनः।-शतपथ ब्राह्मण ३.३.४.१५

१००. तृतीय उपयाम नामक मरुत्वतीय ग्रह ग्रहण मन्त्र : मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्। विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम।---- श.ब्रा.४.३.३.१४, तै.ब्रा.२.८.३.४

१०१. महाव्रतीय ब्राह्मणम् : विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्वम्। तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत्। उपयाम गृहीतोऽसि----।— श.ब्रा.४.६.४.६

१०२. मधु जो दध्यङ्ग अथर्वण ने अश्विनौ को कहा : तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम्। दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच (ऋग्वेद)।— श.ब्रा.१४.५.५.१६

१०३. ज्योति ब्राह्मणम् (देहांतर पर शरीर प्राप्ति के संदर्भ में टीका) - तद्यथा राजानमायन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्ते। अयमायाति। अयमागच्छतीति। एवं ह, एवं विदं सर्वाणि भूतानि प्रतिकल्पन्ते। इदं ब्रह्मायाति।।— श.ब्रा.१४.७.१.४३

१०४. तद्यथा राजानं प्रयियासन्तं उग्राः प्रत्येनसः सूतग्रामण्य उपसमायन्ति। एवं ह, एवं विदं सर्वे प्राणा उपसमायन्ति। यत्रैतदूर्ध्वोच्छ्वासी भवति।— श.ब्रा.१४.७.१.४४

१०५. इन्द्र वाजेषु नो अव। सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः।-तैत्तिरीय ब्राह्मण १.५.८.२

१०६. दिशा का अभिजय : उग्रा मा तिष्ठेत्याह। इन्द्रियमेवावरुन्धे।— तै.ब्रा.१.७.७.२

१०७. धूनुथ द्यां पर्वतान्दाशुषे वसु। नि वो वना जिहते धामनो भिया। कोपयथ पृथिवीं पृश्निमातरः। युधे यदुग्राः पृषतीरयुग्ध्वम्।।— तै.ब्रा.२.४.४.३

१०८. अग्निः क्षत्रभृदनिभृष्टमोजः। सहस्रियो दीप्यतामप्रयुच्छन्। विभ्राजमानः समिधान उग्रः। आऽन्तरिक्षमरुहदगन्द्याम्।।- तै.ब्रा.२.४.६.१२

१०९. उपांशु सवन में ग्रावा द्वारा सोम अंशुओं का सवन : वृषाऽस्यंशुर्वृषभाय गृह्यसे। वृषाऽयमुग्रो नृचक्षसे। दिव्य कर्मण्यो हितो बृहन्नाम। वृषभस्य या ककुत्।।— तै.ब्रा.२.४.७.१

११०. (हे इन्द्र!) इममाभज ग्रामे अश्वेषु गोषु। निरमुं भज यो मित्रो अस्य। वर्ष्मन्क्षत्रस्य ककुभि श्रयस्व। ततो न उग्रो वि भजा वसूनि।।— तै.ब्रा.२.४.७.७

१११. यूयमुग्रा मरुतः पृश्निमातरः। इन्द्रेण सयुजा प्रमृणीथ शत्रून्। आ वो रोहितो अशृणोदभिद्यवः। त्रिसप्तासो मरुतः स्वादुसंमुदः।।— तै.ब्रा.२.५.२.३

११२. सुब्रह्माणं वीरवन्तं बृहन्तम्। उरुं गभीरं पृथुबुध्नमिन्द्र। श्रुतर्षिमुग्रमभिमातिषाहम्। अस्मभ्यं चित्रं वृषणं रयिं दाः।।— तै.ब्रा.२.५.७.१

११३. तमिन्द्रं जोहवीमि मघवानमुग्रम्। सत्रा दधानमप्रतिष्कुतं शवांसि। मंहिष्ठो गीर्भिरा च यज्ञियोऽववर्तत्। राये नो विश्वा सुपथा कृणोतु वज्री।।— तै.ब्रा.२.५.८.९

११४. मरुत्वतीय ग्रहों में तीन पुरोरुक् में से प्रथम : अग्निश्रियो मरुतो विश्वकृष्टयः। आत्वेषमुग्रमव ईमहे वयम्। ते स्वामिनो रुद्रिया वर्षनिर्णिजः। सिंहा न हेषक्रतवः सुदानवः।।— तै.ब्रा.२.७.१२.३

११५. रथारोहण मन्त्राः: अभि प्रेहि वीरयस्व। उग्रश्चेत्ता सपत्नहा।— तै.ब्रा.२.७.१६.१

११६. यजमान का अभिषेक ?: अरुणं त्वा वृकमुग्रं खजंकरम्। रोचमानं मरुतामग्रे अर्चिषः। सूर्यवन्तं मघवानं

विषासहिम्। इन्द्रमुक्थेषु नामहूतमं हुवेम।।— तै.ब्रा.२.७.१५.६

११७. राजा द्वारा औदुम्बरी आसन्दी पर आरोहण मन्त्र : आरोह प्रोष्ठं विषहस्व शत्रून्। अवास्राग्दीक्षा वशिनी ह्युग्रा। देहि दक्षिणां प्रतिरस्वाऽऽयुः। अथा मुच्यस्व वरुणस्य पाशात्।।— तै.ब्रा.२.७.१७.१

११८. हवि की याज्या : आराच्छत्रुमपबाधस्व दूरम्। उग्रो यः शम्बः पुरुहूत तेन। अस्मे धेहि यवमद्गोमदिन्द्र। कृधी धियं जरित्रे वाजरत्नाम्।।— तै.ब्रा.२.८.२.७

११९. पशोः सूक्ते वपायाः पुरोनुवाक्या : मरुत्वन्तं वृषभं वावृधानम्। अकवारिं दिव्यं शासमिन्द्रम्। विश्वासाहमवसे नूतनाय। उग्रं सहोदामिह तं हुवेम।।— तै.ब्रा.२.८.३.४

१२०. वपा की याज्या : जनिष्ठा उग्रः सहसे तुराय। मन्द्र ओजिष्ठो बहुलाभिमानः। अवर्धन्निन्द्रं मरुतश्चिदत्र। माता यद्वीरं दधनद्धनिष्ठा।।— तै.ब्रा.२.८.३.५

१२१. पुरोडाश की पुरोनुवाक्या : क्व स्या वो मरुतः स्वधाऽऽसीत्। यन्मामेकं समधत्ताहिहत्ये। अहं ह्युग्रस्तविषस्तुविष्मान्। विश्वस्य शत्रोरनमं वधस्नैः।।— तै.ब्रा.२.८.३.५

१२२. इन्द्रायाभिमातिघ्ने ललामं प्राशृंगमालभेत इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्या : इन्द्रस्तरस्वानभिमातिहोग्रः। हिरण्यवाशीरिषिरः सुवर्षाः। तस्य वयं सुमतौ यज्ञियस्य। अपि भद्रे सौमनसे स्याम।।— तै.ब्रा.२.८.४.१

१२३. पुरोडाश की याज्या : तमु ष्टुहि यो अभिभूत्योजाः। वन्वन्नवातः पुरुहूत इन्द्रः। अषाड्हमुग्रं सहमानमाभिः। गीर्भिर्वर्ध वृषभं चर्षणीनाम्।।— तै.ब्रा.२.८.५.८

१२४. यथा देवा असुरेषु। श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वसु। अस्माकमुदितं कृधि।।— तै.ब्रा.२.८.८.७

१२५. वपा की याज्या : प्रातर्जितं भगमुग्रं हुवेम। वयं पुत्रमदितेर्यो विधर्ता। आध्रश्चिद्यं मन्यमानस्तुरश्चित्। राजाचिद्यं भगं भक्षीत्याह।।— तै.ब्रा.२.८.९.७

१२६. उप नो मित्रावरुणाविहावतम्। अन्वादीध्याथामिह नः सखाया। आदित्यानां प्रसितिर्हेतिः। उग्रा शतापाष्ठाघविषा परि णो वृणक्तु।।— तै.ब्रा.३.७.१३.४

१२७. ब्रह्मा द्वारा यजमान का प्रोक्षण : शतेनाराजभिरुग्रैः सह ब्रह्मा दक्षिणत उदङ्तिष्ठन्प्रोक्षति। अनेनाश्वेन मेध्येनेष्ट्वा। अयं राजाऽप्रतिधृष्योऽस्त्विति। बलं वै ब्रह्मा। बलमराजोग्रः। बलेनैवास्मिन्बलं दधाति।— तै.ब्रा.३.८.५.१

१२८. इरा पत्नी विश्वसृजाम्। आकूतिरपिनद्ध्वविः। इध्मं ह क्षुद्वैभ्य उग्रे। तृष्णा चाऽऽवहतामुभे।।— तै.ब्रा.३.१२.९.५

१२९. अहोरात्रे पशुपाल्यौ। मुहूर्ताः प्रेष्या अभवन्। मृत्युस्तदभवद्धाता। शमितोग्रो विशां पतिः।।— तै.ब्रा.३.१२.९.६

१३०. हविर्होमानुमन्त्रणम् (दक्षिण परिधिः): ध्रुवोऽसि ध्रुवोऽहं सजातेषु भूयासं धीरश्चेत्ता वसुविदुग्रोऽस्युग्रोऽहं सजातेषु भूयासमुग्रश्चेत्ता वसुविदभिभूरस्यभिभूरहं सजातेषु भूयासम्----- — तै.सं.१.६.२.१, १.६.१०.१, २.३.९.१

१३१. य उग्र इव शर्यहा तिग्मशृंगो न वंसगः। अग्ने पुरो रुरोजिथ।— तै.सं.२.६.११.४

१३२. अदाभ्य अंशु ग्रहापेक्षित मन्त्राः: आऽस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चत।— तै.सं.३.३.३.२, ३.३.४.१

१३३. वृषालम्भन कर्म : वर्ष्मन्क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो वि भजा वसूनि।— तै.सं.३.३.९.२

१३४. जय मन्त्र होमम् : इन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वा स उग्रः स हि हव्यो बभूव।— तै.सं.३.४.४.१

१३५. आप्री नामक प्रयाज याज्या : येन द्यौरुग्रा पृथिवी च दृढे येन सुवः स्तभितं येन नाकः। यो

अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।— तै.सं.४.१.८.५

१३६. आहवनीय चयनार्थ ओषधि वापन : याः त आतस्थुरात्मानं या आविविशुः परुः परुः। तास्ते यक्ष्मं वि बाधन्तां उग्रो मध्यमशीरिव।।— तै.सं.४.२.६.४, जै.ब्रा.२.४१०, ऋ१०.९७.१२

१३७. ऋतव्य इष्टका : उग्रा च भीमा च पितृणां यमस्य इन्द्रस्य — तै.सं.४.४.११.२

१३८. उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीनां। (द्र.: सायण टीका)— तै.सं.४.४.१२.१

१३९. सूक्ताभ्यां होमाः विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्वम्। तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत्।।— तै.सं.४.६.२.६

१४०. अप्रतिरथ सूक्तम् : बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः। अभि वीरो अभि सत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्।।— तै.सं.४.६.४.२

१४१. इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।।— तै.सं.४.६.४.३

१४२. आख्यान : गन्धर्वमुग्रं बलिनम् अश्मघातिनम् अंसलम्। भारद्वाजस्य हन्तारं विश्वज्योतिषम् आ वह।।— जै.ब्रा.२.२७०

१४३. उग्रो वा एष मध्यमशीवा यन् महाव्रतम्। यद् वा उग्रो मध्यमशीवा भवति, सर्वान् वै सो ऽन्यान् व्यकीर्याथैकश् शेते।— जै.ब्रा.२.४१०

१४४. बृहत्यां बृहद् भवति, बृहत्यां रथन्तरम्। यथोग्रगाधे संरभ्यातीयाद् एवम् एवैतं तृतीयं त्रियहं देवा अत्यायन्।— जै.ब्रा.३.३२९

१४५. एष ह वाव स देवानाम् अधि देवो य एष तपति। तस्यैतत् सहस्रस्थूणं विमितं दृढम् उग्रं यत् संवत्सर ऋतवो मासा अर्धमासा अहोरात्राणि उषसः। सहस्रस्थूणे विमिते दृढ उग्रे यत्र देवानाम् अधिदेव आस्ते।— जै.ब्रा.३.३८५

१४६. अग्निष्टोम प्रातः सवन में अंशु आदाभ्य पात्र : आस्मिन् उग्रा अचुच्यवुर्दिवो धारा असश्चत।— बौधायन श्रौत सूत्र १४.१२.१२; आपस्तम्ब श्रौत सूत्र १२.८.३

१४७. अश्वमेध में मुसल से श्वान को मारने के पश्चात् : अध्वर्यु सह शतेन तल्प्यानां राजपुत्राणां पुरस्तात्, ब्रह्मा सह शतेन अराज्ञां उग्राणां दक्षिणतः, होता सह शतेन सूतग्रामणीनां पश्चात्---- (अश्व का प्रोक्षण करते हैं)। — बौ.श्रौ.सू.१५.१, १५.५; आप.श्रौ.सू.२०.४.२, २०.५.१३

१४८. प्रवर्ग्य उपसद में य उग्र इव शर्यहा ऋक् का विनियोग— आश्वलायन श्रौ.सू.४.८.८

१४९. प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां इति (ऋक्) याज्या— आश्वलायन श्रौ.सू.६.४.१०

१५०. उग्रा दिशामभिभूतिर्वयोधाः --- (ऋक्)।— आश्व.श्रौ.सू.४.१२.२

१५१. विश्वेदेवाः सप्तदशेन वर्च इदं क्षत्रं सलिलवातमुग्रम्।--- — आश्व.श्रौ.सू.४.१२.२

**उच्चैःश्रवा** (अनुद्धृत अंश)

१. अग्ने तव श्रवो वयो-ऋग्वेद १०.१४०.१

२. धीभिरर्वद्भिरर्वतो वाजां इन्द्र श्रवाय्यान्। त्वया जेष्म हितं धनम्।।— ऋ.६.४५.१२

३. वाज को गोमन्त कहना — ऋ.३.२०.२व३

४. श्रव के साथ रयि का उल्लेख— ऋ.१.१२८.१,५.८६.६, ७.५.९, ८.१३.१२, ९.६३.१२

५. वाजयु श्रवः— ऋ.८.८०.५

६. श्रव के साथ द्युम्न का उल्लेख— ऋ.१.९.८, ३.३७.१०, ३.५९.६, ५.७.९, ६.५.५, ८.५.३२, ८.७४.९, ९.८०.२

७. ससर्परी वाक् व श्रव— ऋ.३.५३.१५,१६

८. सोम राजा के लिए पवित्र रथ आदि— ऋ.९.८३.५,९.८६.४०

९. पृथु श्रवः— ऋ.१.९.७, ७.५.८, ८.४६.२१, २४

१०. वाज और वाजी, गो, श्रव आदि— ऋ.८.५२.४

११. पवमान द्वारा महि श्रव, गौ व अश्व का रासन करना-९.९.९

१२. अभि वाजं सप्तिरिव श्रवस्य— ऋ.९.९६.१६

१३. श्रव द्वारा अक्षित जनपान का उत्स देना— ऋ.९.११०.५

१४. उषा का श्रव के लिए उदित होना— ऋ.१.९५.३

१५. गोमत व वाजवत श्रव— ऋ.१.९.७

१६. अश्विनौ द्वारा ३ श्रव देना— ऋ.१.३४.५

१७. महि श्रव— ऋ.१.४३.७

१८. ॐ सप्ति की भांति श्रव— ऋ.१.६१.५

१९. अमर्त्यों में श्रव हेतु ऋभवों द्वारा एक पात्र के चार करना— ऋ.१.११०.५

२०. आशु अश्व— ऋ.१.११७.९

२१. पूषा के वाहन अजाश्व से श्रव करने की प्रार्थना— ऋ.१.१३८.४

२२. श्रव के साथ इष— ऋ.१.१६५.१२,४.४०.२, ५.४.२, ६.६५.३

२३. मरुतों का श्रवस्यु रथ— ऋ.५.५६.८

२४. उरुगाय श्रव— ऋ.६.६५.६

२५. जैत्र श्रवस्य— ऋ.८.१५.३

२६. पृतनासु श्रवोजितम्— ऋ.८.३२.१४

२७. वाजासः श्रवस्यवः— ऋ.५.९.२

२८. कौकिल सौत्रामणी : श्रवस इति स्थाने जित्या इति क्षत्रियस्य पुष्ट्या इति वैश्यस्येत्येके। (संश्रवसे विश्रवसे सत्यश्रवसे श्रवस इति चत्वारि निधनानि-द्राह्यायण श्रौ.सू.१३.४.१३

२९. संश्रवसे विश्रवसे सत्यश्रवसे इति सर्वे निधनमुपयन्ति। संजित्यै विजित्यै सत्यजित्यै जित्या इति क्षत्रियस्य। सम्पुष्ट्यै विपुष्ट्यै सत्यपुष्ट्यै पुष्ट्या इति वैश्यस्य। यथाम्नातं वा सर्वेषाम् (श.ब्रा.१२.८.३.६)-कात्यायन श्रौ.सू.१९.५.३

३०. पुत्रकामेष्ट्यामग्निः पुत्री। यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमानः। अग्निस्तुविश्रवस्तममिति द्वे संयाज्ये।-आश्वलायन श्रौ.सू.२.१०.५

३१. उद्धारि खण्डिक तथा दार्भ्य केशी के विवाद में केशी की पराजय। केशी का उच्चैःश्रवस कौवयेय कौरव्य राजा मातुल के पास जाना।----ज्योति अग्निष्टोम, ज्योति उक्थ,ज्योति अतिरात्र से ब्रह्मवर्चस कामी यजन करता है। सप्तदश अग्निष्टोम आदि से प्रजननकामी तथा एकविंश अग्निष्टोम आदि से स्वर्गकामी— जै.ब्रा.२.२७९-२८०

३२. अर्वन्तो न श्रवस्यवः। सोमासो राये अक्रमुः। इति प्रायणीय रूपम् एवैतद् उपगच्छन्ति। प्रायणीयं हि एतद् अहः।— जै.ब्रा.३.१७५

३३. अभीमं महिना दिवं। मित्रो बभूव सप्रथाः। उत श्रवसा पृथिवीम्। मित्रस्य चर्षणीधृतः। श्रवो देवस्य सानसिम्। द्युम्नं चित्रश्रवस्तमम्।।-तैत्तिरीय आरण्यक ४.३.१

३४. उदु ब्रह्माण्यैरत श्रवस्या (ऋ.७.२३.१, अथर्व २०.१२.१)-इति विश्वामित्रः-गोपथ ब्रा.२.६.१

३५. उदु ब्रह्माण्यैरत श्रवस्या इति ब्राह्मणाच्छंसी। ब्रह्मण्वदेतत् सूक्तं समृद्धम्-गोपथ ब्रा.२.६.२

३६. उदु ब्रह्माण्यैरत श्रवस्या इति पर्यासः।-गो.ब्रा.२.४.३

३७. संश्रवसे विश्रवसे सत्यश्रवसे श्रवस इति-गो.ब्रा.२.५.७

३८. यो जातमस्य महतो महि ब्रवात्। सेदुः श्रवोभिर्युज्यंचिदभ्यसत्।— तै.ब्रा.२.४.३.९

३९. पदं देवस्य नमसा वियन्तः। श्रवस्यवः श्रव आपन्नमृक्तम्। नामानि चिद्दधिरे यज्ञियानि। भद्रायां ते रणयन्त संदृष्टौ।।— तै.ब्रा.३.६.१०.२

४०. श्रवण नक्षत्र : त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैति श्रव इच्छमाना। पुण्यं श्लोकं यजमानाय कृण्वती।। — तै.ब्रा.३.१.२.६

४१. हवि की पुरोनुवाक्याः अस्य श्रवो नद्यः सप्त बिभ्रति। द्यावा क्षामा पृथिवी दर्शतं वपुः।---- तै.ब्रा.२.८.९.२

४२. आदित्य ग्रह की तीन पुरोरुचाओं में द्वितीय : त्वे अग्ने सुमतिं भिक्षमाणाः। दिवि श्रवो दधिरे यज्ञियासः। नक्ता च चक्रुरुषसा विरूपे। कृष्णं च वर्णं अरुणं च संधुः।।— तै.ब्रा.२.७.१२.५

४३. नाराशंसी ऋचा : ये मे पंचाशतं ददुः। अश्वानां सधस्तुतिः। द्युमदग्ने महि श्रवः। बृहत्कृधि मघोनाम्। नृवदमृत नृणाम्।।— तै.ब्रा.२.७.५.२

४४. यास्ते पूषन्नावो अन्तः समुद्रे। हिरण्ययीरन्तरिक्षे चरन्ति। याभिर्यासि दूत्यां सूर्यस्य। कामेन कृतः श्रव इच्छमानः।।— तै.ब्रा.२.५.५१।५

४५. अधि श्रवो माहिनं यज्जरित्र इतीयं वै माहिनं यज्ञश्रवो यजमानो जरिता यजमाना-यैवैतामाशिषमाशास्ते।- ऐ.ब्रा.३.३८

४६. एतैर्वै सामभिर्देवा इन्द्रमिंद्रियाय वीर्याय समश्यन्। तथो एवैतमृत्विजो यजमानमेतैरेव सामभिरिन्द्रियाय वीर्याय संश्यन्ति। संश्रवसे विश्रवसे सत्यश्रवसे श्रवस इति सामानि भवन्ति। एष्वेवैनमेतल्लोकेषु श्रावयन्ति। चतुर्निधनं भवति। चतस्रो वै दिशः।---- श.ब्रा.१२.८.३.२६

४७. दिवि श्रवांस्युत्तमानि धिष्व इति। चन्द्रमा वाऽअस्य दिवि श्रव उत्तमम्। स ह्येनममुष्मिंल्लोके श्रावयति।— श.ब्रा.७.३.१.४६

४८. अग्ने तव श्रवो वयः इति। धूमो वाऽअस्य श्रवो वयः। स ह्येनममुष्मिन् लोके श्रावयति।---- श.ब्रा.७.३.१.२९

## उच्छिष्ट

१. उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज। नि धेहि गोरधि त्वचि।।— ऋ.१.२८.९

२. अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते। गच्छामित्रान् प्र पद्यस्व मामीषां कं चनोच्छिषः।।— ऋ.६.७५१।१६

३. शिष्टानशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषातै।।-अथर्ववेद २.३१.३

४. विसल्पकस्योषधे मोच्छिषः पिशितं चन।।— अ.६.१२७.१

५. अतिथीन् प्रति पश्यति हिङ्कृणोत्यभि वदति प्र स्तौत्युदकं याचत्युद्गायति। उप हरति प्रति हरत्युच्छिष्टं निधनम्।।— अ.९.१०.९/९.५.९

६. वात इव वृक्षान् नि मृणीहि पादय मा गामश्वं पुरुषमुच्छिष एषाम्।— अ.१०.१.१७

७. कृत्याकृतो वलगिनोऽभिनिष्कारिणः प्रजाम्। मृणीहि कृत्ये मोच्छिषोऽमून् कृत्याकृतो जहि।— अ.१०.१.३१

८. यस्य देवा अकल्पन्तोच्छिष्टे षडशीतयः। तं त्वौदनस्य पृच्छामि यो अस्य महिमा महान्।- दे.बार्हस्पत्य ओदनम्— अ.११.३.२१

९. उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः। उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम्।। दे.उच्छिष्ट ब्रह्म— अ.११.९.१/११.७.१

१०. मुह्यन्त्वेषां बाहवश्चित्ताकूतं च यद्धृदि। मैषामुच्छेषि किं चन रदिते अर्बुदे तव।।— अ.११.११.१३/११.९.१३

११. स यत् सायमस्तमिते जुहोति-अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि, यदेषामिदं सदुपजीवाम इति। स यत्ततो रात्र्याऽश्नाति, हुतोच्छिष्टमेव तन्निरवत्तबल्यश्नाति। हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता। -शतपथ ब्राह्मण २.३.१.११

१२. अथ यत् प्रातरनुदिते जुहोति-अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि-यदेषामिदं सदुपजीवाम इति। स यत्ततोऽह्नाऽश्नाति, हुतोच्छिष्टमेव तन्निरवत्तबल्यश्नाति। हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता।— श.ब्रा.२.३.१.१२

१३. ते होचुः-को न इदं होष्यति-इति। ब्राह्मण एवेति। ब्राह्मण! इदं नो जुहुधि इति, किं मे ततो भविष्यति इति, अग्निहोत्रोच्छिष्टमेव इति। स यत् स्रुचि परिशिनष्टि तद्, अग्निहोत्रोच्छिष्टम्।— श.ब्रा.२.३.१.३९

१४. अथेडामेवावद्यति, न प्राशित्रम्। उपहूय प्राश्नन्ति। यावन्तो गृह्या हविरुच्छिष्टाशाः स्युः-तावन्तः प्राश्नीयुः-अथो अप्यृत्विजः प्राश्नीयुः। अथो अप्यन्ये ब्राह्मणाः प्राश्नीयुः-यदि बहुरोदनः स्यात्।— श.ब्रा.२.५.३.१६

१५. साकमेधपर्वणि पितृयज्ञः : तद्धैके हविरुच्छिष्टमनुसमस्यन्ति। तदु तथा न कुर्यात्। हुतोच्छिष्टं वा एतत्-नेद्धुतोच्छिष्टमग्नौ जुहवामेति। — श.ब्रा.२.६.१.४८

१६. शुक्रामन्थिनौ ग्रहौ : अथ होत्राणां चमसानभ्युन्नयन्ति। हुतोच्छिष्टा वाऽएते संस्रवा भवन्ति-नालमाहुत्यै। तानेवैतत्पुनराप्याययन्ति-तथाऽलमाहुत्यै भवन्ति। — श.ब्रा.४.२.१.३१

१७. दधिग्रहः : यद्वेव दधि गृह्णाति। हुतोच्छिष्टा वाऽएते संस्रवा भवन्ति-नालमाहुत्यै। तानेवैतत्पुनराप्याययति। तथाऽलमाहुत्यै भवन्ति।— श.ब्रा.४.३.५.१४

१८. हारियोजन ग्रहः : ता नाग्नौ प्रकिरेयुः-नेदुच्छिष्टमग्नौ जुहवामेति। उत्तरवेदावेव निवपन्ति। तथा न बहिर्धा यज्ञाद्भवन्ति।— श.ब्रा.४.४.३.१२

१९. यत् स्थाल्यां परिशिष्टं स्यात्। तदस्मा उन्नीयाहरेयुः। तद्धैक उपवल्हन्ते। हुतोच्छिष्टं वा एतत्। यातयाम वा एतत्। नैतस्य होतव्यमिति।---- श.ब्रा.१२.४.२.८

२०. एकाकी हुतोच्छिष्टं भक्षयति। एकधैव श्रियमात्मन् धत्ते। श्रीर्हि पयः। स भक्षयति। इदं हविः प्रजननं मे अस्तु इति। प्रजननं हि। यदि पयो यदि सोमः। दशवीरम्-इति। प्राणा वै दश वीराः— श.ब्रा.१२.८.१.२२

२१. अश्वमेधः :- ब्रह्मौदनं पचति। रेत एव तद्धत्ते। यदाज्यमुच्छिष्यते। तेन रशनामभ्यज्यादत्ते। तेजो वा आज्यम्। प्राजापत्योऽश्वः।— श.ब्रा.१३.१.१.१

२२. अथ यजमानाय घर्मोच्छिष्टं प्रयच्छति। स उपहवमिष्ट्वा भक्षयति-मधु हुतमिन्द्रतमे अग्नौ-इति।---अश्याम ते देव घर्म नमस्ते अस्तु मा मा हिंसीः।— श.ब्रा.१४.२.२.४२

२३. अप्रतिरथसूक्ताभिधानम् : अवसृष्टा परा पत शरव्ये ब्रह्मसँशिता। गच्छामित्रान्प्र विश मैषां कं चनोच्छिषः।-तैत्तिरीय संहिता ४.६.४.४

२४. हिरण्येष्टकादेरभिधानम् : किं तत उच्छिँषतीति यद्धिरण्येष्टका उपदधात्यमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजं करोति— तै. सं. ५.५.५.२

२५. वज्रिणीष्टिकोपधानविधिः : यो वै वसोर्धारायै प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन्ब्रह्मौदनं पचेत्तं ब्राह्मणाश्चत्वार प्राश्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण-— तै.सं.५.७.३.४

२६. व्याघारणविधिः : यत्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरं तत्तेन शमयति— तै.सं.६.२.७.५

२७. आदित्यग्रहकथनम् : अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्तस्या उच्छेषणमददुस्तत्प्राश्नात्सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचत्सा-ऽमन्यतोच्छेषणान्म इमेऽज्ञत यदग्रे प्राशिष्यामीतो मे वसीयाँसो जनिष्यन्त इति साऽग्रे प्राश्नात्सा रेतोऽधत्त तस्यै व्यृद्धमाण्डमजायत-— तै.सं.६.५.६.१

२८. अश्वमेधगतमन्त्रकथनम् : शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सँशिष्टाय स्वाहोच्छिष्टाय स्वाहा- — तै.सं.७.३.२०.१

२९. अदितिर्वै प्रजाकामौदनमपचत्। तत उच्छिष्टमाश्नात्। सा गर्भमधत्त। तत आदित्या अजायन्त। य एष ओदनः पच्यत,आरम्भणमेवैतत् क्रियत आक्रमणमेव।------ -उच्छेषणभाजा वा आदित्याः। यदुच्छिष्टेन समिधो ऽनक्ति,तेभ्य एव प्रावोचत्। -गोपथ ब्राह्मण १.२.१५

३०. पवमानहविषां विस्तारः, हविरन्तराणां दक्षिणानां चोल्लेखाः : यदेकमेकमेतानि हवींषि निर्वपेत्। यथा त्रीण्यावपनानि पूरयेत्। तादृक्तत्। न प्रजननमुच्छिँषेत्। एकं निरुप्य। उत्तरे समस्येत्। तृतीयमेवास्मै लोकमुच्छिँषति। प्रजननाय।-तैत्तिरीय ब्राह्मण १.१.६.७

३१. ब्रह्मौदनाभिधानम् : अदितिः पुत्रकामा। साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्। तस्या उच्छेषणमददुः। तत्प्राऽऽश्नात्। सा रेतोऽधत्त। तस्यै धाता चार्यमा चाजायैताम्। सा द्वितीयमपचत्। तस्या उच्छेषणमददुः। तत्प्राऽऽश्नात्। सा रेतोऽधत्त। तस्यै मित्रश्च वरुणश्चाजायेताम्। सा तृतीयमपचत्। तस्या उच्छेषणमददुः। तत्प्राऽऽश्नात्। सा रेतोऽधत्त। तस्या अँशश्च भगश्चाजायेताम्। सा चतुर्थमपचत्। तस्या उच्छेषणमददुः। तत्प्राऽऽश्नात्। सा रेतोऽधत्त। तस्या इन्द्रश्च विवस्वाँश्चाजायेताम्। ब्रह्मौदनं पचति। रेत एव तद्दधाति। प्राश्नन्ति ब्राह्मणा ओदनम्। यदाज्यमुच्छिष्यते। तेन समिधोऽभ्यज्या-ऽऽदधाति। उच्छेषणाद्वा अदिती रेतोऽधत्त। उच्छेषणादेव तद्रेतो धत्ते। ----- तै.ब्रा.१.१.९.१

३२. महाव्रतनिरूपणम् : एकैकामुच्छिँषन्ति (स्तोत्रीयाम्)। आत्मन्ह्यङ्गानि बद्धानि।— तै.ब्रा.१.२.६.४

३३. चातुर्मास्य विशेष विधिः :- अथ वा अस्य वायुश्चानुवत्सरश्चाप्रीतावुच्छिष्येते। यच्छुनासीरीयेण यजते।— तै.ब्रा.१.४.१०.२

३४. राजसूयानुब्राह्मणम् -अभिषेक विधिः :- उच्छेषणेन जुहोति। उच्छेषणभागो वै रुद्रः। भागधेयेनैव रुद्रं निरवदयते।— तै.ब्रा.१.७.८.५

३५. सौत्रामणि विधिः :- ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारम्। ब्राह्मणो ह्याहुत्या उच्छेषणस्य पाता। यदि ब्राह्मणं न विन्देत्। वल्मीकवपायामवनयेत्। — तै.ब्रा.१.८.६.२

३६. द्वादशाहर्भागगत दशरात्रस्य दशमेऽहनि होत्रमन्त्र विधिः :- यद्दिवा वाचं विसृजेत्। अहर्भ्रातृव्यायोच्छिँषेत्। यन्नक्तं विसृजेत्। रात्रिं भ्रातृव्यायोच्छिँषेत्। अधिवृक्षसूर्ये वाचं विसृजति। एतावन्तमेवास्मै लोकमुच्छिँषति। यावदादित्योऽस्तमेति। — तै.ब्रा.२.२.६.४

३७. उपहोममन्त्राः : अग्ने यो नोऽभिदासति। समानो यश्च निष्ट्यः। इध्मस्येव प्रक्षायतः। मा तस्योच्छेषि किंचन।— तै.ब्रा. २.४.१.२

३८. दर्शपूर्णमासः :- यावतः स्तम्बान्परिदिशेत्। यत्तेषामुच्छिँष्यात्। अति तद्यज्ञस्य रेचयेत्।— तै.ब्रा.३.२.१.४

३९. दर्शपूर्णमासेष्टि मन्त्राः :- अग्ने यो नोऽभिदासति। समानो यश्च निष्ट्यः। इध्मस्येव प्रक्षायतः। मा तस्योच्छेषि किंचन।— तै.ब्रा.३.७.६.१७

४०. दर्शपूर्णमासे आदित्योपस्थानमन्त्राः - उपसमिन्धनादूर्ध्वमाहवनीयस्योपस्थाने मन्त्रम् : यो नः सपत्नो यो रणः। मर्तोऽभिदासति देवा। इध्मस्येव प्रक्षायतः। मा तस्योच्छेषि किंचन। - तै.ब्रा.३.७.६.२३

४१. अथाभिचरत उपवेषोद्वासने विकल्पितं मन्त्रम् : अवसृष्टः परापत। शरो ब्रह्मसँशितः। गच्छामित्रान्प्रविश। मैषां कंचनोच्छिषः।— तै.ब्रा.३.७.६.३

४२. ब्रह्मोदनाभिधानम् : यदाज्यमुच्छिष्यते। तस्मिन्रशनां न्युनत्ति। प्रजापतिर्वा ओदनः। रेत आज्यम्। यदाज्ये रशनां न्युनत्ति। प्रजापतिमेव रेतसा समर्धयति। दर्भमयी रशना भवति— तै.ब्रा.३.८.२.३

४३. यो नः सपत्नो यो रणो मर्तो ऽभिदासति देवाः। इध्मस्येव प्रक्षायतो मा तस्योच्छेषि किंचन।-तैत्तिरीय आरण्यक २.५.३

४४. संवत्सरं न माँसमश्नीयात्। न रामामुपेयात्। न मृन्मयेन पिबेत्। नास्य राम उच्छिष्टं पिबेत्। तेज एव तत्सँश्यति।— तै.आ.५.८.१३

४५. यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहँ स्वाहा।— तै.आ.१०.२३.१

४६. इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त पृथुरश्मिर्बृहद्रिरीरायोवाजस्तेऽब्रुवन् को न इमान् पुत्रान् भरिष्यतीत्यहमितीन्द्रोऽब्रवीत्----- ताण्ड्य ब्राह्मण ८.१.४,१२.४.१७

४७. अक्षरं त्र्यक्षरमुच्छिष्यते तदेवोत्तरं त्रिरात्रमनुविदधाति।— तां.ब्रा.१०.५.१०

४८. द्वादशाहः :- आप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि तृतीयेऽहन्येतदेव तत उच्छिष्यते वागित्येव तदेतदक्षरं त्र्यक्षरं वागित्येकमक्षरमक्षरमिति त्र्यक्षरम्। स एवैष उत्तरस्त्र्यहो वागेकं गौरेकं द्यौरेकम्। ततो वै वागेव चतुर्थमहर्वहति।-ऐतरेय ब्राह्मण ५.३

४९. बन्धनान्मुक्तस्य शुनःशेपस्योत्तरकालीनं वृत्तान्तम् : यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलशमभ्यवनिनायोच्छिष्टं चम्वोभरित्येतयर्चाऽथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः स स्वाहाकाराभिर्जुहवांचकार -ऐ.ब्रा.७.१७

५०. तद् उ हैक उपेव लभन्ते। अहुतं तस्य यस्याग्निहोत्रोच्छिष्टेन जुह्वति यातयामं ह्य् एतद् इति वदन्तः। तद् उ तथा न विद्यात्। यदा वा एतद् अयातयामं भवत्य् अथैतस्यापि हविरातञ्चनं कुर्वन्ति।- जैमिनीय ब्राह्मण १.५४

५१. द्वादशाहः :- यदाप्यते यज्ञ, आप्यन्ते छन्दांस्य्, आप्यन्ते देवता, आप्यन्त इमे लोका, अथ केन चतुर्थम् अहस् तायत इत्य् आहुः। वाचैवेति ब्रूयात्। वाग् एव तत उच्छिष्यते ऽक्षरम् एव त्र्यक्षरं परिशिष्यते। तद् एवोत्तरं त्र्यहम् अनुविदधाति।— जै.ब्रा.३.५७

५२. यद् अस्तम् इते विसृजेरन् अहर् भ्रातृव्यलोकम् उच्छिंष्युः। यद् अनस्तम् इते विसृजेरन् रात्रिं भ्रातृव्यलोकम् उच्छिंष्युः। अर्धास्तम् इत आहवनीय परेत्य विसृजन्ते। उभाभ्याम् एव तद् अहोरात्राभ्यां द्विषन्तं भ्रातृव्यम् अन्तर्यन्ति।— जै.ब्रा.३.३०७

५३. प्रवर्ग्यः :- गार्हपत्याहवनीया उत्तरेण खरौ निवपति दक्षिणतोऽनुभित्त्युच्छिष्टखरम्।-कात्यायन श्रौत सूत्र २६.२.१६

५४. प्रवर्ग्यः :- उच्छिष्ट खरे प्रक्षाल्योपयमनीं निदधाति अत्र वोपश्रितप्रहरणं संसाद्यमानायानुवाचयति।— का.श्रौ.सू.२६.६.२१

५५. उपसदन्ते प्रवर्ग्योत्सादनम्। अन्तःपात्ये परिघर्म्यं निधाय निर्हत्योच्छिष्टखरम्। — का.श्रौ.सू.२६.७.१

५६. खरा उत्तरतो दक्षिणतो मार्जालीयदेशं बहिर्वेद्युच्छिष्टखरम्। आसेचनवन्ति पयसः पूरयति घर्मैतत्त इति।— का.श्रौ.सू.२६.७.२२

५७. न सोमेनोच्छिष्टा भवन्तीत्युदाहरन्ति।- आश्वलायन श्रौत सूत्र ५.६.३

५८. मधुपर्कप्रकरणम्: ब्राह्मणायोच्छिष्टदानम्- शांखायन श्रौत सूत्र ४.२१.१६

५९. राजसूय प्रकरणम् : अथ हैनमञ्जःसवं शुनशेपो ददर्श। यच्चिद्धि त्वं गृहेगृह इति तमेताभिश्चतसृभिरभिषुत्य। उच्छिष्टं चम्वोभरिति द्रोणकलशे समवनिनाय। अथास्मिन्नन्वारब्ध एतस्यैव सूक्तस्य पूर्वाभिश्चतसृभिर्जुहवाञ्चकार।- शां.श्रौ.सू. १५.२३.१

६०. यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनुसंतनोमीत्यग्निहोत्रोच्छेषणमन्ववधायायं पयः सोमं कृत्वा स्वां योनिमपिगच्छतु। -आपस्तम्ब श्रौत सूत्र १.१३.१५

६१. अग्निष्टोम प्रातः सवनम् : आहवनीयाच्चीन्प्रतीचः प्रक्रमानुच्छिष्यात्र रमेथामिति नभ्यस्थे स्थापयित्वा- — आप.श्रौ.सू.११.७.३

६२. उत्तरपूर्वं द्वारं प्रत्युच्छिष्टखरं करोति बाह्यतो निषेचनवन्तम्।— आप.श्रौ.सू.१५.६.२२

६३. हुतं हविर्मधु हविरिति भक्षयित्वोपयमनं प्रतिप्रस्थात्रे प्रयच्छति। तदुच्छिष्टखरे प्रक्षाल्यान्तर्वेद्युपयमनं निधाय तस्मिन्नुक्मावधाय---- आप.श्रौ.सू.१५.११.१६

६४. प्रवर्ग्यमुद्वासयिष्यन्नजामग्नीधे ददाति। पष्ठौहीं ब्रह्मणे। धेनुं होत्रे। रुक्मावध्वर्यवे।अपरं खरं पूर्वस्मिन्खरे न्युप्योच्छिष्टखरं संकृष्योत्तरेणाहवनीयं सम्राडासन्दीं प्रतिष्ठाप्य-- आप.श्रौ.सू.१५.१३.२

६५. दक्षिणत उच्छिष्टखरं परिहरति।— आप.श्रौ.सू.१५.१३.८

६६. अप द्वेषो अप ह्वर इति मार्जालीय देश उच्छिष्टखरम्।— आप.श्रौ.सू.१५.१४.६

६७. सुमित्रा न आप ओषधय इति मार्जालीयदेश उच्छिष्टखरे मार्जयित्वा----- आप.श्रौ.सू.१५.१६.१०

६८. ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारम्।— आप.श्रौ.सू.१९.३.३

६९. प्रवर्ग्यः : अथोत्तरे शालाखण्डे स्फ्येनोद्धृत्यावोक्ष्य सिकता निवपति तं चतुरश्रं निष्यन्दनवन्तमुच्छिष्टखरं करोति-बौधायन श्रौत सूत्र ९.५

७०. अथैतमुच्छिष्टखरं परिकर्मी वाग्नीध्रो वा सते समुप्य दक्षिणया द्वारोपनिर्हत्य मार्जालीयदेशे निवपति-बौ.श्रौ.सू.९.१३

७१. सौत्रामणिः : ----ब्राह्मणमाहुत्या उच्छेषणस्य पातारं यदि ब्राह्मणं न विन्दति वल्मीकवपाम्-बौ.श्रौ.सू.१०.३१, १७३५

७२. पिण्डानामनुप्रहरण इति। सूत्रँ शालीकेरत्रो ह स्माह बौधायनो ऽत्रैवेते पिण्डा परिशयीरन्नुच्छिष्टा ह्येते भवन्ति पितृभिर्भक्षंकृता इति। अतिशिष्टस्य प्राशन इति। स्वयं यजमानः प्राश्नीयादिति बौधायनः---- बौ.श्रौ.सू.२०.२१

७३.--- द्विब्रह्मौदनमु हैके ब्रुवत उच्छेषणीयो हेतरः सान्त्वकरण उत्तरो -बौ.श्रौ.सू.२४.१५

७४. हरिद्रौदनभुक्तमुच्छिष्टानुच्छिष्टेना प्रपदात्प्रलिप्य मन्त्रोक्तानधस्तल्पे हरितसूत्रेण सव्यजङ्घासु बद्ध्वावस्नापयति।-कौशिक सूत्र२६.१८

७५. द्वादश्याः प्रातः क्षीरौदनं भोजयित्वोच्छिष्टानुच्छिष्टं बहुमत्स्ये प्रकिरति।-कौ.सू.४७.३७

७६. पितृज्येष्ठयोरन्येषामुच्छिष्टभोजने मधुमत्स्य-मांससूतकप्रेतकान्नाद्यभोज्यभोजने च पुनरुपनयनं करोति। -वैखानसगृह्यसूत्रम् ६.९

**उज्जयिनी** (अनुद्धृत अंश)

१. अग्नेरहमुज्जितिमनूज्जेषं सोमस्याह-मुज्जितिमनूज्जेषं--अग्नीषोमयोरहमुज्जितिमनूज्जेषं · इन्द्राग्नियोरहमुज्जितिमनूज्जेषं इन्द्रस्याहम् उज्जितिमनूज्जेषं महेन्द्रस्य--तैत्तिरीय सं १.६.४.१

२. दर्शपूर्णमासयोः वै देवा उज्जितिमनूदजयन्-- तै.सं.१.७.४.२

३. वाजपेय में आजि धावन में बृहस्पति की उज्जय। बृहस्पति ने वाजपेय का यजन किया। फिर बृहस्पति ने इन्द्र को यजन कराया।-तैत्तिरीय ब्रा. १.३.२.२

४. देवस्याहं सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषं इत्याह। सवितृप्रसूत एव ब्रह्मणा वाजमुज्जयति।---- तै.ब्रा.१.३.६.१

५. इन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयिदित्याह। एष वा एतर्हीन्द्रः। यो यजते। यजमान एव वाजमुज्जयति।— तै.ब्रा.१.३.६.३

६. यथा लोकं वा एत उज्जयन्ति। य आजिं धावन्ति।— तै.ब्रा.१.३.६.६

७. देवा वा ओषधीष्वाजिमयुः। ता बृहस्पतिरुदजयत्।---- तै.ब्रा.१.३.६.७

८. यमेव ते वाजं लोकमिन्द्रियं दुन्दुभय उज्जयन्ति।— तै.ब्रा.१.३.६.९

९. देवा वा ओषधीष्वाजिमयुः। ता इन्द्राग्नी उदजयताम्। तावेतमैन्द्राग्नं द्वादशकपालं निरवृणाताम्।---द्वादश मासाः संवत्सरः।— तै.ब्रा.१.६.१.१०

१०. मरुतां प्रसवेऽजेषमित्याह। मरुद्भिरेव प्रसूत उज्जयति।— तै.ब्रा.१.७.९.३

११. इन्द्र व वायु में सोम राजा के प्रथम पान के लिए आजि।------ ऐ.ब्रा.२.२५

१२.------अग्नेरेवाधि गृहपतेरादित्यं काष्ठामकुर्वत।-- -ऐ.ब्रा.४.७

१३. यदि दक्षिणाग्नि लुप्त हो जाए तो क्या भय होगा? क्षिप्रमस्य पत्नी प्रैति यो ऽविद्वान् जुहोति, विद्यया त्वेवाहमभि जुहोमीति।---यदि आहवनीय लुप्त होजाए तो क्या भय हो? क्षिप्रमस्य पुत्रः प्रैति--- गो.ब्रा.१.३.१३

१४. यावन्ति स्वेदायनानि तावन्ति क्षिप्रायणानि। यावन्ति क्षिप्रायणानि तावन्तो रोमकूपाः।---- गो.ब्रा.१.५.५

१५. देवा वा ओषधीषु पक्वास्वाजिमयुः। स इन्द्रो इवेद्-अग्निर्वावेमाः प्रथम उज्जेष्यतीति।---गोपथ ब्रा. २.१.१७

१६. नाकस्योज्जित्यै, वाजिनां संतत्यै।- गो.ब्रा.२.५.८

१७. आत्मानं कुत्स उदजयन् महिमानं लुशः।--- — जै.ब्रा.१.२२८

१८. रथन्तरेण वै दैव्यम् आजिम् उज्जयति, रथेन मानुषम्।— जै.ब्रा.२.१९३

१९. विश्वामित्र का रोहितकूलीय अनड्वाहौ द्वारा उज्जिति करना— जै.ब्रा.३.१८३

२०. तेजो वै यज्ञायज्ञीयम्, आत्मा मध्यंदिनः।--- आजि की उज्जय।— जै.ब्रा.३.२९०

२१. पितृमेधः :- तत् वै न क्षिप्रं कुर्यात्। नेत्रवमघं करवाणीति। चिर एव कुर्यात्। — श.ब्रा.१३.८.१.२

२२. अश्व आमन्त्रण : प्रतूर्तं वाजिन्ना द्रव इति। यद्वै क्षिप्रं तत्तूर्तम्।— श.ब्रा.६.३.२.२

२३. यावन्तो मुहूर्तास्तावन्ति पंचदश कृत्वः क्षिप्राणि। यावन्ति क्षिप्राणि तावन्ति पंचदशकृत्व एतर्हीणि।— श.ब्रा.१२.३.२.५

२४. ऐन्द्रवायव ग्रह : देवों ने वायु से कहा-त्वमिदं विद्धि-यदि हतो वा वृत्रो जीवति वा; त्वं वै न आशिष्ठोऽसि। यदि जीविष्यति-त्वमेव क्षिप्रं पुनरागमिष्यसि।— श.ब्रा.४.१.३.३

२५. सूक्तवाक्-शंयुवाक् कर्मारम्भः :- स वै स्रुचौ व्यूहति-अग्नीषोमयोः उज्जितिमनूज्जेषम्। वाजस्य मा प्रसवेन प्रोहामि इति जुहूं दक्षिणेन पाणिना।---- अग्नीषोमयोः उज्जितिमनूज्जयत्वयं यजमानो, वाजस्यैनं प्रसवेन प्रोहामि----। अथामावास्यायाम्- इन्द्राग्न्योरुज्जितिमनूज्जेषम्---- श.ब्रा.१.८.३.१

२६. अथ येन सत्रेण देवाः क्षिप्रऽएव पाप्मानमपाघ्नत। इमं जितिमजयन्-यैषामियं जितः।--- एकगृहपतिका वै देवा एकपुरोडाशा एकधिष्ण्याः क्षिप्र उ एव पाप्मानमपाघ्नत; क्षिप्रे प्राजायन्त।— श.ब्रा.४.६.८.१८

२७. वाजपेयः :- श.ब्रा.५.१.१.१

२८. सविता वै देवानां प्रसविता। इदं मे प्रसुव, त्वत्प्रसूत इदमुज्जयानीति।----तत्सवितृप्रसूत उदजयत्---- श.ब्रा.५.१.१.४,५.१.१.१५

२९. अथ षोडशिनं गृह्णाति। तद् यदेवैतेनेन्द्र उदजयत्, तदेवैष एतेनोज्जयति— श.ब्रा.५.१.२.३

३०. पांच वाजपेय ग्रहों का ग्रहण : पृथिवी, अन्तरिक्ष व देवलोक की जय का वर्णन— श.ब्रा.५.१.२.४

३१. पंच ऋतवः संवत्सरस्य। तत् प्रजापतिं उज्जयति।— श.ब्रा.५.१.२.९

३२. सप्तदश सोमग्रहान् गृह्णाति।-- -सत्यं श्रियं ज्योतिरुज्जयति।— श.ब्रा.५.१.२.११

३३. सप्तदश सुराग्रहान् गृह्णाति।---अनृतं पाप्मानं तम उज्जयति— श.ब्रा.५.१.२.१२

३४. त्रयस्त्रिंशद् वै देवाः। प्रजापतिश्चतुस्त्रिंश;। तत् प्रजापतिं उज्जयति।— श.ब्रा.५.१.२.१३

३५. अग्निर्वा अग्निष्टोमः। अग्निष्टोम-मेवैतेनोज्जयति। ऐन्द्राग्नमुक्थेभ्य आलभते। ऐन्द्राग्नानि वा ऽउक्थानि उक्थान्येवैतेनोज्जयति। इन्द्रो वै षोडशी। षोडशिनमेवैतेनोज्जयति।— श.ब्रा.५.१.३.१

३६. सारस्वतेन (सप्तदश स्तोत्रम्) रात्रिं उज्जयति।— श.ब्रा.५.१.३.२

३७. अन्नं वा एष उज्जयति-यो वाजपेयेन यजते। श.ब्रा.५.१.३.३

३८. अथ यदेतैः प्रचरति-तेन दैवीं विशमुज्जयति। अथार्द्धानि मानुष्यै विश उपहरति तेनो मानुषीं विशमुज्जयति।— श.ब्रा.५.१.३.५

३९. सोमो वै प्रजापतिः। पशुर्वै प्रत्यक्षं सोमः। तत् प्रत्यक्षं प्रजापतिं उज्जयति।— श.ब्रा.५.१.३.७

४०. तद् वाचमुज्जयति।— श.ब्रा.५.१.३.११

४१. अन्तो. वै प्रजापतिः। तदन्तत एवैतत् प्रजापतिं उज्जयति।— श.ब्रा.५.१.३.१३

४२. माध्यंदिने सवने आजिं धावन्ति।-- -तन्मध्यत एवैतत् प्रजापतिं उज्जयति।— श.ब्रा.५.१.४.१

४३. अन्नं वै वाजः तेनायमन्नमुज्जयतु।— श.ब्रा.५.१.४.३,६

४४. जवो यस्ते वाजिन्प्यन्यत्रापनिहितः तेन न इमं यज्ञं प्रजापतिं उज्जय।— श.ब्रा.५.१.४.१०

४५. अन्नं वा एष उज्जयति यो वाजपेयेन यजते— श.ब्रा.५.१.४.१२, ५.१.५.२५

४६. यदाजिं धावन्ति-इममेवैतेन लोकमुज्जयति। यद् ब्रह्मा रथचक्रे साम गायति-नाभिदघ्न उद्धिते-अन्तरिक्षलोकमेवैतेनोदजयति। अथ यद् यूपं रोहति-देवलोकमेवैतेनोज्जयति।— श.ब्रा.५.१.५.१

४७. एषा वै परमा वाग् या सप्तदशानां दुन्दुभीनां। परमामेवैतद्वाचं परमं प्रजापतिं उज्जयति।— श.ब्रा.५.१.५.६

४८. सवितृ प्रसूत उदजयत्— श.ब्रा.५.१.५.१६

४९. तिस्रो वाऽइमाः पृथिव्यः-इयमहैका। द्वे ऽअस्याः परे। ता एवैतदुज्जयति।— श.ब्रा.५.१.५.२१

५०. तद् यदश्वानवघ्रापयति-इममुज्जयानीति वाऽअग्रेऽवघ्रापयति।— श.ब्रा.५.१.५.२७

५१. सप्तदशभिर्वासोभिर्यूपो वेष्टितो भवति। सप्तदशो वै प्रजापतिः। प्रजापतिं उज्जयति।— श.ब्रा.५.२.१.५

५२. गौधूमं चषालं भवति।----- मनुष्यलोकमेवैतेनोज्जयति।— श.ब्रा.५.२.१.६

५३. गर्तन्वान् यूपोऽतीक्ष्णाग्रो भवति।---- - तत्प्रजापतिं उज्जयति।— श.ब्रा.५.२.१.७

५४. शीर्ष्णा यूपमत्युज्जिहीते-अमृता अभूम इति। देवलोकमेवैतेनोऽजयति।— श.ब्रा.५.२.१.१४

५५. विशो वै मरुतः। अन्नं विशः। तत्प्रजापतिं उज्जयति।— श.ब्रा.५.२.१.१७

५६. अन्नं वा एष उज्जयति यो वाजपेयेन यजते।— श.ब्रा.५.२.२.१

५७. वाजप्रसवीयानि जुहोति---- ताभिः प्रसूत उज्जयति।— श.ब्रा.५.२.२.४

५८. अग्निरेकाक्षरेण प्राणमुदजयत्-तमुज्जेषम् प्रजापतिः सप्तदशाक्षरेण सप्तदशं स्तोममुदजयत्-तमुज्जेषम्।-- — श.ब्रा.५.२.२.१७

## उत्कर

१. संलुप्योत्करेऽध्यस्यत्येषा वा अस्याँ शुक्छुच्येवास्य शुचं दधाति-काठक सं.२१.७

२. सर्प उपवेषो वल्मीक उत्करो यदुपवेषमुत्कर उपहन्ति तस्मात् सर्पाणां वल्मीको गृहाः।-काठक सं. ३१.१२

३. तद् यदादित्यं पुरस्तात् पर्यन्तं न पश्यन्ति, तस्मादज्योतिष्क उत्करो भवति।-गोपथ ब्रा.१.२.१०

४. वेदेर्वा उत्करमुत्किरन्ति यदेवोत्करे तिष्ठन्नाह्वयतीति ब्रूयात्तेनेति। तदाहुरथ कस्मादुत्करे तिष्ठन्सुब्रह्मण्यामाह्वायतीति----ऐ.ब्रा.६.३

५. त्र्यम्बकहविर्यागः :- अथ य एष एको अतिरिक्तो भवति-तमाखूत्कर उपकिरति। एष ते रुद्र भाग आखुस्ते पशुः।-शतपथ ब्रा.२.६.२.१०

६. नात्र मात्रास्ति, यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तद्यात्वालं परिलिखेत्।— श.ब्रा.३.५.१.२६

७. औदुम्बरी : अथ खनति। प्राञ्चमुत्करमुत्किरति। यजमानेन सम्मायौदुम्बरीं परिवासयति।---— श.ब्रा.३.६.१.६

८. अथ खनति। प्रांचमुत्करमुत्किरति उपरेण सम्मायावटं खनति।---— श.ब्रा.३.७.१.३

९. अनुबन्ध्या प्रायश्चित्तम् : आखूत्कर एवैनमुपकिरेयुः। इयं वास्य सर्वस्य प्रतिष्ठा।— श.ब्रा.४.५.२.१५

१०. लोकम्पृणेष्टकोपधानम् : ता भित्वोत्कर उत्किरेत्। उत्करो वा अतिरिक्तस्य प्रतिष्ठा।— श.ब्रा.८.७.२.१६

११. संवत्सरोग्निः। यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्विकर्षति। तं वंशमुत्कर न्यस्य।---- श.ब्रा.९.१.२.३१

१२. एष वै यज्ञस्य संधिर्यत्रैष उत्करः। तस्मादुत्करे तिष्ठन्त्सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति।---- -षड्विंश ब्रा.१.१.६

१३. अवभृथगमने गन्तृणां नियमम् :- तेनान्तरेण प्रतिपद्यन्ते चात्वालं चोत्करं च। एतद्वै देवानां तीर्थम्।- षड्विंश ब्रा.३.४.१

१४. तेषां कुरुक्षेत्रं वेदिरासीत्।-- -मरव उत्करः।- तैत्तिरीय आ. ५.१.१

१५. स्फ्येन वा एष वज्रेणास्यै पाप्मानं भ्रातृव्यमपहत्य उत्करेऽधि प्रवृश्चति।— तै.ब्रा.३.२.१०.१

१६. अद्भिर्मार्जयित्वा उत्करे न्यस्येत्। यद्वै यज्ञियस्य कर्मणोऽन्यत्राऽऽहुतीभ्यः संतिष्ठते। उत्करो वाव तस्य प्रतिष्ठा।— तै.ब्रा.३.३.२.३

१७. परिवेषो वा एष वनस्पतीनाम्। यदुपवेषः। य एवं वेद। विन्दते परिवेष्टारम्। तमुत्करे।— तै.ब्रा.३.३.११.१

१८.--- -कथं सुब्रह्मण्यो बहिर्वेदि करोतीति। स ब्रूयाद् एष वेद्या आत्मा यद् उत्कर, एतत् प्रत्यक्षं ब्रह्म यत् सुब्रह्मण्या। यद् उत्करम् आस्थाय सुब्रह्मण्याम् आह्वयति तेनास्यान्तर्वेदि कृतं भवतीति।— जै.ब्रा.२.७८

१९. अथ यां क्रीते राजनि सुब्रह्मण्याम् आह्वयति याम् एतां दक्षिणासु नीयमानासूत्करे तिष्ठन् सुब्रह्मण्याम् आह्वयति सैवेयम्।— जै.ब्रा.२.८०

## उत्तम

१. त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे।-ऋग्वेद १.३१.७

२. उद् वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।।— ऋ.१.५०.१०

३. आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व।।— ऋ.१.९१.१८

४. दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते।।— ऋ.१.१५६.४

५. अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः।— ऋ.१.१६३.७

६. त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः।— ऋ.२.१.१२

७. त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा।— ऋ.२.२३.१०

८. राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते।।— ऋ.२.४१.५

९. उदस्तम्भीत् समिधा नाकमृष्वो३ ऽग्निर्भवन्नुत्तमो रोचनानाम्।— ऋ.३.५.१०

१०. त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः।— ऋ.३.५६.८

११. अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य। वर्षिष्ठं द्यामिवोपरि।।— ऋ.४.३१.१५

१२. द्युमन्तं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः।।— ऋ.४.३६.८

१३. देवेभ्यो हि प्रथमं यज्ञियेभ्यो ऽमृतत्वं सुवसि भागमुत्तमम्।— ऋ.४.५४.२

१४. अग्निस्तुविश्रवस्तमं तुविब्रह्माण-मुत्तमम्।— ऋ.५.२५.५

१५. अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।— ऋ.५.२८.३

१६. गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने।— ऋ.५.५९.३

१७. युवं राधोभिरकवेभिरिन्द्राऽग्ने अस्मे भवतमुत्तमेभिः।— ऋ.६.६०.३

१८. यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रि-धातुमुत्तमे पदे।— ऋ.८.५१.४

१९. एते पृष्ठानि रोदसीर्विप्रयन्तो व्यानशुः। उतेदमुत्तमं रजः।।— ऋ.९.२२.५

२०. तन्तुं तन्वानमुत्तममनु प्रवत आशत। उतेदमुत्तमाय्यम्।।— ऋ.९.२२.६

२१. दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्।।— ऋ.९.५१.२

२२. अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे। सासह्याम पृतन्यतः।।— ऋ.९.६१.२९

२३. अपघ्नन् त्सोम रक्षसो ऽभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम्।।— ऋ.९.६३.२९

२४. त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम्।।— ऋ.९.६७.३

२५. प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः। देवेभ्य उत्तमं हविः।।— ऋ.९.६७.२८

२६. अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः।— ऋ.९.८५.३

२७. परीतो षिञ्चता सुतं सोमो य उत्तमं हविः।— ऋ.९.१०७.१

२८. जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः।।— ऋ.९.१०८.१६

२९. प्र सु व आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः।— ऋ.१०.७५.१

३०. या ओषधीः सोमराज्ञीर्बह्वी शतविचक्षणाः। तासां त्वमस्युत्तमारं कामाय शं हृदे।।— ऋ.१०.९७.१८

३१. त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः।— ऋ.१०.९७.२३

३२. उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः।।— ऋ.१०.१५९.३

३३. येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः।— ऋ.१०.१५९.४

३४. योगक्षेमं व आदायाऽहं भूयासमुत्तम आ वो मूर्धानमक्रमीम्।— ऋ.१०.१६६.५

३५. इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्।— ऋ.१०.१७०.३

३६. येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः।— ऋ.१०.१७४.४

३७. सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम्।।-अथर्ववेद१.९.२

३८. येनेन्द्राय समभरः पयांस्युत्तमेन ब्रह्मणा जातवेदः।— अ.१.९.३

३९. आदङ्गा कुविदङ्गा शतं या भेषजानि ते। तेषामसि त्वमुत्तममनास्रावमरोगणम्।।— अ.२.३.२

४०. मयि क्षत्रं पर्णमणे मयि धारयताद् रयिम्। अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः।।— अ.३.५.२

४१. तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम्।।— अ.४.१४.६

४२. स उत् तिष्ठेतो अभि नाकमुत्तमं पद्भिश्चतुर्भिः प्रति तिष्ठ दिक्षु।। दे.अज पञ्चौदनम्?। — अ.४.१४.९

४३. यस्त्वा करदेकवृषं जनानामुत राज्ञामुत्तमं मानवानाम्।।— अ.४.२२.५

४४. उदङ् जातो हिमवतः स प्राच्यां नीयसे जनम्। तत्र कुष्ठस्य नामान्युत्तमानि वि भेजिरे।।— अ.५.४.८

४५. उत्तमो नाम कुष्ठास्युत्तमो नाम ते पिता। यक्ष्मं च सर्वं नाशय तक्मानं चारसं कृधि।।— अ.५.४.९

४६. उत्तमो अस्योषधीनां तव वृक्षा उपस्तयः। उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति।। सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति। तेषां सा वृक्षाणामिवाहं भूयासमुत्तमः।। यथा सोम ओषधीनामुत्तमो हविषां कृतः। तलाशा वृक्षाणामिवाहं भूयासमुत्तमः।।— अ.६.१५.१

४७. इमा यास्तिस्रः पृथिवीस्तासां ह भूमिरुत्तमा। तासामधि त्वचो अहं भेषजं समु जग्रभम्।— अ.६.२१.१

४८. यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम्।।— अ.६.६३.३, ६.८४.४

४९. उद् वयं तमसस्परि रोहन्तो नाकमुत्तमम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।।— अ. ७.५५. ७/७.५३.७

५०. अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।— अ.७.७७.१०/७.७३.१०

५१. उत्तमो अस्योषधीनामनड्वान् जगतामिव व्याघ्रः श्वपदामिव।— अ.८.५.११

५२. अनुपूर्ववत्सां धेनुमनड्वाहमुपबर्हणम्। वासो हिरण्यं दत्त्वा ते यन्ति दिवमुत्तमाम्।। दे. पंचोदन अजः। — अ.९.५.२९

५३. तेभ्यो हविः श्रपयं जातवेद उत्तमं नाकमधि रोहयेमम्।। दे.ब्रह्मौदनम्। — अ.११.१.४

५४. येन रोहात् परमापद्य यद् वय उत्तमं नाकं परमं व्योम।।— अ.११.१.३०

५५. येन देवा ज्योतिषा द्यामुदायन् ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम्। तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम्।।— अ.११.१.३७

५६. प्राणो ह सत्यवादिमुत्तमे लोक आ दधत्।।— अ.११.६.११/११.४.११

५७. यस्ते प्राणेदं वेद यस्मिंश्चासि प्रतिष्ठितः। सर्वे तस्मै वलिं हरानमुष्मिल्लोक उत्तमे।।— अ.११.६.१८/११.४.१८

५८. सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे।।— अ.१२.१.८

५९. इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात् परमेष्ठी समाप।— अ.१२.३.४५

६०. स उत्तमां दिशमनु व्यचलत्। तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यचलन्।— अ.१५.६.७

६१. आ रोहत दिवमुत्तमामृषयो मा बिभीतन।— अ.१८.३.६४

६२. उपोत्तमेभ्यः स्वाहा। उत्तमेभ्यः स्वाहा।— अ.१९.२२.१२

६३. उत्तमो अस्योषधीनामनड्वान् जगतामिव व्याघ्रः श्वपदामिव। नद्यायं पुरुषो रिषत्। दे. कुष्ठ।— अ.१९.३९.४

६४. उत्तमां जनिमां जन्यानुत्तमां जनीन्वर्त्मन्यात्।।— अ.२०.१३५.२

६५. सामिधेन्यनुवचनम् : स वै त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्। त्रिवृत्प्रायणा हि यज्ञाः, त्रिवृदुदयनाः।- शतपथ ब्राह्मण १.३.५.६

६६. पञ्च प्रयाज यागाः :- त उद्गातारो नापव्याहरेयुः-आ उत्तमायाः। एषोत्तमा इत्येवोद्गातारो होत्रे यज्ञं सम्प्रयच्छन्ति।— श.ब्रा.१.५.२.१३

६७. --- तदग्निं स्विष्टकृतं समस्थापयन्,-----। तस्मादुत्तमे प्रयाजे स्वाहास्वाहेति यजति।— श.ब्रा.१.५.३.२३

६८. प्रयाज ब्राह्मणम् : अयातयाम ह्याज्यम्। तस्मादुत्तमं प्रयाजमिष्ट्वा — श.ब्रा.१.५.३.२५

६९. प्रयाजानामिष्टौ प्राथम्यम् : तदाहुः यद् उत्तमान् प्रयाजानावाहयन्ति-अथ कस्मादेनान् प्रथमान् यजन्ति इति। उत्तमान् ह्येनान् यज्ञेऽवाकल्पयन्-प्रथमान् वो यजाम-इत्यब्रुवन्-तस्मादुत्तमानावाहयन्ति, प्रथमान् यजन्ति।— श.ब्रा.१.६.१.९

७०. सान्नाय्य सम्पादनम् : अथोत्तमां दोहयित्वा येन दोहयति पात्रेण-तस्मिन्नुदस्तोकमानीय पल्यङ्ग्य, प्रत्यानयति।— श.ब्रा.१.७.१.१८

७१. अवदानक्लृप्तिः :- सो एव समृद्धा याज्या-यस्या उत्तमात् पदाद्देवताया अधिवषट् करोति।— श.ब्रा.१.७.२.२०

७२. अनुयाज कर्म : अथाग्निरुत्तमः। गायत्री वा अग्निः, तउद्गायत्रीमुत्तमामकुर्वन्।— श.ब्रा.१.८.२.१३

७३. अथोत्तममनुयाजमिष्ट्वा समानीय जुहोति।— श.ब्रा.१.८.२.१७

७४. पुनराधानम् : उच्चैरुत्तममनुयाजं यजति। कृतकर्मेव हि स तर्हि भवति।— श.ब्रा.२.२.३.१७

७५. दाक्षायण यज्ञो वसिष्ठ यज्ञः :- प्रथमो यजमानो भक्षयति। प्रथमो रेतः परिगृह्णानीति। अथो अप्युत्तमः। मय्युत्तमे रेतः प्रतितिष्ठादिति। — श.ब्रा.२.४.४.२५

७६. कृष्णाजिन दीक्षा : तस्मादु स्त्री पुमांसं ह्वयत एवोत्तमम्।— श.ब्रा.३.२.१.२१

७७. उपरवविधिः : ----एतं त्वेवोत्तमं परिलिखेत्। य एष पूर्वयोरुत्तरो भवति।— श.ब्रा.३.५.४.७

७८. स य उत्तरोऽग्निष्ठात्स्यात्-तमेवाग्रऽउच्छ्रयेत्। अथ दक्षिणम्। अथोत्तरम्। दक्षिणाद्धर्यमुत्तमम्।— श.ब्रा.३.७.२.५

७९. उत्तमो वाऽएष प्रयाजो भवति। इदं वै हविर्यज्ञ उत्तमे प्रयाजे ध्रुवामेवाग्रेऽभिघारयति।— श.ब्रा. ३.८.२.२५

८०. अथ पशुं विशास्ति। त्रिः प्रच्यावयतात् त्रिः प्रच्युतस्य हृदयमुत्तमं कुरुताद् इति। त्रिवृद्धि यज्ञः।— श.ब्रा.३.८.३.३

८१. निग्राभ्य प्रयोगः :- उत्तमेन पविना (वा.सं.६.३०) इति एष वाऽउत्तमः पविः-यत्सोमः। तस्मादाह उत्तमेन पविनेति।— श.ब्रा.३.९.४.५

८२. शुक्रामन्थिनौ ग्रहौ : स प्रथमायां वा होत्रायामिष्टायामुत्तमायां वाऽनुमन्त्रयते-तृम्पन्तु होत्रा मध्वो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहा (वा.सं.७.१५) इति। अग्नीद्धयत्र यजतामुत्तमः संयजति।— श.ब्रा.४.२.१.३३

८३. उक्थ ग्रहः :- तस्यासावेव ध्रुव आयुरात्मैव।--तद्वाऽअगृहीत एवैतस्मादच्छावाकायोत्तमो ग्रहो भवति।— श.ब्रा.४.२.३.३

८४. अथ राजानमुपावहरति। तृतीयं वसती-वरीणामवनयति। तत् पर्व समैति। प्रथममहोत्तरस्य सवनस्य करोति, उत्तमं पूर्वस्य। स यदुत्तरस्य सवनस्य तत्पूर्वं करोति, यत्पूर्वस्य तदुत्तमम्-तद्व्यतिषजति।— श.ब्रा.४.२.३.४

८५. ऋतुग्रहाः :- सहैव प्रथमौ ग्रहौ गृह्णीतः। सहोत्तमौ। इदमेवैतत्सर्वं संवत्सरेण परिगृह्णीतः।— श.ब्रा.४.३.१.८

८६. दक्षिणादानम्: अथ सुब्रह्मण्यायै प्रतिहर्त्रे उत्तमाय ददाति प्रतिहर्ता वाऽएषः।— श.ब्रा.४.३.४.२२

८७. पात्नीवतग्रहः :- यच्छालाकैर्धिष्ण्या-न्व्याघारयति-तानेतैरेव यजुर्भिर्य-थोपकीर्णं यथापूर्वं व्याघारयति। मार्जालीयऽएवोत्तमम्।— श.ब्रा.४.४.२.७

८८. तद्धैके आग्नीध्रीये पुनराघारयन्ति-उदग्नऽइदं कर्मानुसन्तिष्ठाताऽइति। तदु तथा न कुर्यात्। मार्जालीयऽएवोत्तमम्।— श.ब्रा.४.४.२.८

८९. समिष्टयजुः :- अथ यान्युत्तमानि त्रीणि जुहोति। यज्ञं वाऽएतदजीजनत-यदेनमतत। तं जनयित्वा, यत्रास्य प्रतिष्ठा-तत् प्रतिष्ठापयति।— श.ब्रा.४.४.४.६

९०. गर्ग त्रिरात्रमहीनम् : उत्तमे वैनामहन्नयेत्, पूर्वमहास्यै प्रजातमेति, पश्चादेषान्वेति। सोऽएषा मीमांसैव। उत्तमऽएवैनामहन्नयेत्।— श.ब्रा.४.५.८.४

९१. अपां रसस्य यो रसः, तं वो गृह्णाम्युत्तमम्-उपयामगृहीतोऽसि, इन्द्राय त्वा जुष्टं गृह्णामि, एष ते योनिः, इन्द्राय त्वा जुष्टतमम् इति सादयति।— श.ब्रा.५.१.२.७

९२. अथ ध्रुवम्। अथैतान्त्सोमग्रहान् उत्तमे स्तोत्रऽऋत्विजां चमसेषु व्यवनीय जुह्वति। तान्भक्षयन्ति।— श.ब्रा.५.१.२.१९

९३. तद्धैके वाचऽउत्तममालभन्ते। यदि वै प्रजापतेः परमस्ति-वागेव।— श.ब्रा.५.१.३.११

९४. स ब्रह्मा रथचक्रमधिरोहति-नाभिदघ्नऽउद्धितम्-देवस्याहं सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकं रुहेयम् इति। यदि ब्राह्मणो यजते। ब्रह्म हि बृहस्पतिः। ब्रह्म हि ब्राह्मणः।।— श.ब्रा.५.१.५.२

९५. यदि राजन्यो यजते-देवस्याहं सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकं रुहेयम् इति। क्षत्रं हीन्द्रः। क्षत्रं राजन्यः।— श.ब्रा.५.१.५.३

९६. त्रिः सामाभिगायति। त्रिरभिगीयावरोहति-देवस्याहं सवितुः सवे सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहम् इति।-— श.ब्रा.५.१.५.४

९७. यदि राजन्यो यजते-देवस्याहं सवितुः सवे सत्यप्रसवस इन्द्रस्योत्तमं नाकमरुहम् (वा.सं.९.१०) इति। क्षत्रं हीन्द्रः। क्षत्रं राजन्यः।— श.ब्रा.५.१.५.५

९८. स यानि पुरस्तादभिषेकस्य जुहोति-बृहस्पतिस्तेषामुत्तमो भवति। अथ यान्युपरिष्टादभिषेकस्य जुहोति-इन्द्रस्तेषां प्रथमो भवति। ब्रह्म वै बृहस्पतिः। इन्द्रियं वीर्यम्।— श.ब्रा.५.३.५.७

९९. एषा ह सम्वत्सरस्य प्रथमा रात्रिः-यत्फाल्गुनी पौर्णमासी-योत्तरा। एषोत्तमा-या पूर्वा। मुखत एव तत् संवत्सरमालभते।— श.ब्रा.६.२.२.१८

१००.-----अथ यानि चत्वार्युत्तमानि-दिशस्तानि। इमे च वै लोकाः, दिशश्च प्रजापतिः।— श.ब्रा.६.३.१.११

१०१. तद् यत्तद्वागित्येकमक्षरम्-यैवैषाऽनुष्टुबुत्तमा-सा सा अथ यदक्षरमिति त्र्यक्षरम्-एतानि तानि पूर्वाणि यजूंषि।— श.ब्रा.६.३.१.४३

१०२. स्वो रुहाणा अधि नाकमुत्तमम् (वा.सं.११.२२) इति। स्वर्गो वै लोको नाकः। स्वर्गं लोकं रोहन्तोऽधि नाकमुत्तममित्येतत्।— श. ब्रा. ६.३.३.१४

१०३. अथैषा बृहत्युत्तमा भवति। बृहतीं वाऽएष सञ्चितोऽभिसम्पद्यते।— श.ब्रा.६.४.२.८

१०४. नैर्ऋतीष्टकाचयनम् : उत्तमे नाके-ऽअधिरोहयैनम् (वा.सं.१२.६३) इति। स्वर्गो वै लोको नाकः। स्वर्गे लोके यजमानमधिरोहयेत्येतत्।— श.ब्रा.७.२.१.१०

१०५. लोगेष्टकोपधानम् : दिवि श्रवांस्युत्तमानि धिष्व इति। चन्द्रमा वाऽअस्य दिवि श्रव उत्तमम्। स ह्येनममुष्मिंल्लोके श्रावयति।— श.ब्रा.७.३.१.४६

१०६. कूर्मेष्टकोपधानम् : द्यावापृथिव्ययो-त्तमयोपदधाति। द्यावापृथिव्यो हि कूर्मः।- श. ब्रा ७.५.१.१०

१०७. एषा वै सा बृहती-यां तद्देवा अन्तरिक्षं बृहतीं तृतीयां चितिमपश्यन्। तस्याऽएतस्यै देवा उत्तमाः।— श.ब्रा.८.३.३.८

१०८. अष्टादशस्तोमेष्टकोपधानमः स वै वायुमेव प्रथममुपदधाति, वायुमुत्तमम्। वायुनैव तदेतानि सर्वाणि भूतान्युभयतः परिगृह्णाति।— श.ब्रा.८.४.१.२६

१०९. चत्वारिंशच्छन्दस्येष्टकोपधानम् : अथ योत्तमा दशद्-अयं स लोकः। तस्माद्यथैव प्रथमायै दशतः प्रभृतिः एवमुत्तमायै।— श.ब्रा.८.५.२.१६

११०. ता उ वै तिस्र एव। अयमेव लोकः प्रथमा चितिः, द्यौरुत्तमा, अथ या एतास्तिस्रः-तदन्तरिक्षम्।— श.ब्रा.८.५.४.१२

१११. पञ्चचूडेष्टकोपधानम्---ता हैता अग्नेराशिषः। ता उत्तमायां चिता उपदधाति। अन्त एषोऽग्नेः-यदुत्तमा चितिः।— श.ब्रा.८.६.१.२२

११२. एकत्रिंशच्छन्दस्येष्टकोपधानम् :----- एताः स्तोमभागाः। तस्मिन्नविशन्। तेषां विशतां प्रजापतिरुत्तमोऽविशत्। स यः स प्रजापतिः - एतास्ताश्छन्दस्याः।।— श.ब्रा.८.६.२.५

११३. बहिस्तोमभागम्। हृदयं वै स्तोमभागाः। हृदयमु वाऽउत्तमम्। अथोदरम्, अथ योनिः।— श.ब्रा.८.६.२.१५

११४. अर्को देवानां परमे व्योमन्, अर्कस्य देवाः परमे व्योमन् इति। एतद्वै देवानां विशतां प्रजापतिरुत्तमोऽविशत्। -----अयं वा अग्निरर्कः-तस्यैतदुत्तमायां चितौ सर्वे देवा विष्टाः। तस्मादाह-अर्कस्य देवाः परमे व्योमन्-इति।— श.ब्रा.८.६.२.१९

११५. द्वयोर्ऋतव्येष्टकयोरुपधानम् : स पुरस्तात्स्वयमातृण्णायै च विश्वज्योतिषश्चऽर्तव्येऽ-उपदधाति। द्यौर्वा उत्तमा स्वयमातृण्णा। आदित्य उत्तमा विश्वज्योतिः।— श.ब्रा.८.७.१.९

११६. अथ विश्वज्योतिषमुपदधाति। आदित्यो वा उत्तमा विश्वज्योतिः। आदित्यो ह्येवामुष्मिंल्लोके विश्वं ज्योतिः।— श.ब्रा.८.७.१.१५

११७. स पुरस्तात्स्वयमातृण्णायै विश्वज्योतिषमुपदधाति। द्यौर्वाऽउत्तमा स्वयमातृण्णा। आदित्य उत्तमा विश्वज्योतिः।— श.ब्रा.८.७.१.१७

११८. लोकम्पृणेष्टकोपधानम्: स यद्यत्रैव प्रथमे उपदधाति-तदुत्तमे अनूपदध्यात्। सकृद्धैवासावादित्य इमांल्लोकान्पर्येत्य नातिप्रच्यवेत। अतिहत्य पूर्वे उत्तमे अनूपदधाति। अमुं तदादित्यमिमांल्लोकानतिप्रच्यावयति।-----लोकं पृण च्छिद्रं पृण इति। अथो सीद ध्रुवा त्वम् इति।— श.ब्रा.८.७.२.५

११९. अथात इष्टकामात्राणामेव। पादमात्रीः प्रथमायां चोत्तमायां च चित्योरुपदध्यात्। प्रतिष्ठा वै पादः।— श.ब्रा.८.७.२.१७

१२०. पुरीष निवपनम्: अथ विकर्णीं च स्वयमातृण्णां चोपदधाति। वायुर्वै विकर्णी। द्यौरुत्तमा स्वयमातृण्णा। वायुं च तद्दिवं चोपदधाति। उत्तमे उपदधाति। उत्तमे हि वायुश्च द्यौश्च संस्पृष्टे।— श.ब्रा.८.७.३.९

१२१. आयुर्वै विकर्णी, प्राणः स्वयमातृण्णा। आयुश्च तत्प्राणं चोपदधाति। उत्तमे उपदधाति। उत्तमे ह्यायुश्च प्राणश्च।— श.ब्रा.८.७.३.११

१२२. तद् यैषोत्तमा स्यमातृण्णा-एतदस्य तदात्मनः। तद् यदेतामत्रोपदधाति-यदेवास्यैषाऽऽत्मनः-तदस्मिन्नेतत्प्रतिदधाति।— श.ब्रा.८.७.३.१७

१२३. अथैनं हिरण्यशकलैः प्रोक्षति। अत्रैष सर्वोऽग्निः संस्कृतः। तस्मिन्देवा एतदमृतं रूपमुत्तममदधुः। तथैवास्मिन्नयमेतदमृतं रूपमुत्तमं दधाति।— श.ब्रा.८.७.४.७

१२४. यजमानोऽग्निः। यावानग्निर्यावत्यस्य मात्रा-तावतैवास्मिन्नेतदमृतं रूपमुत्तमं दधाति।— श.ब्रा.८.७.४.९

१२५. अमृतमेव सप्तमी चितिः। तामुत्तमामुपदधाति। अमृतं तदस्य सर्वस्योत्तमं दधाति। तस्मादस्य सर्वस्यामृतमुत्तमम्।— श.ब्रा.८.७.४.१८

१२६. प्राणा एव सप्तमी चितिः। तामुत्तमामुपदधाति-प्राणांस्तदस्य सर्वस्योत्त-मान्दधाति। तस्मादस्य सर्वस्य प्राणा उत्तमाः।— श.ब्रा.८.७.४.२१

१२७. अथातः शतरुद्रियं जुहोति। अत्रैष सर्वोऽग्निः संस्कृतः। स एषोऽत्र रुद्रो देवता। तस्मिन्देवा एतदमृतं रूपमुत्तममदधुः।— श.ब्रा.९.१.१.१

१२८. शान्तदेवत्यं ह वै तच्छतरुद्रियमित्याचक्षते परोऽक्षम्। परोऽक्षकामा हि देवाः। तथैवास्मिन्नयमेतदमृतं रूपमुत्तमं दधाति।— श.ब्रा.९.१.१.२

१२९. प्राणा वै सामानि। अमृतमु वै प्राणाः। अमृतमेवास्मिन्नेतद्रूपमुत्तमं दधाति। सर्वतः परिगायति। सर्वत एवास्मिन्नेतदमृतं रूपमुत्तमं दधाति।— श.ब्रा.९.१.२.३२

१३०. ता हैता अमृतेष्टकाः। ता उत्तमा उपदधाति। अमृतं तदस्य सर्वस्योत्तमं दधाति। तस्मादस्य सर्वस्यामृतमुत्तमम्।— श.ब्रा.९.१.२.४३

१३१. अत्रैष सर्वोऽग्निः संस्कृतः। तस्मिन्देवा एतद्रूपमुत्तममदधुः। तथैवास्मिन्नयमेतद्रूपमुत्तमं दधाति। अन्नं वै रूपम्।-----अपि बाह्येन परिश्रितः। सर्वत एवास्मिन्नेतद्रूपमुत्तमं दधाति। दर्भैः।— श.ब्रा.९.२.१.१२

१३२. वैश्वानर होमः :- अथ यानि चत्वार्युत्मानि-सा चतुष्पदा त्रिष्टुप् याज्या।— श.ब्रा.९.३.१.१७

१३३. वाजप्रसवीय होमः :- अग्नेरुत्तमानि जुहोति। सर्वे हैते सवाः-यदग्निसवः।— श.ब्रा.९.३.४.९

१३४. अभिषेकः :- बृहस्पतिः पूर्वेषामुत्तमो भवति, इन्द्र उत्तरेषां प्रथमः। ब्रह्म वै बृहस्पतिः, क्षत्रमिन्द्रः।— श.ब्रा.९.३.४.१८

१३५. स्वर्ण सूर्यः स्वाहा इति। असौ वाऽआदित्यः सूर्यः। अमुं तदादित्यमस्य सर्वस्योत्तमं , दधाति। तस्मादेषोऽस्य सर्वस्योत्तमः।— श.ब्रा.९.४.२.२३

१३६. सुत्याह कर्माणि : स मध्यमं परिधिमुपस्पृश्यैतद्यजुर्जपति-अग्निं युनज्मि शवसा घृतेन इति।-----दिव्यं सुपर्णं वयसा बृहन्तम् इति।---तेन वयं गमेम ब्रध्नस्य विष्टपं स्वो रुहाणा अधि नाकमुत्तमम्। इति। स्वर्गो वै लोको नाकः। तेन वयं गमेम ब्रध्नस्य विष्टपं स्वर्गं लोकं रोहन्तोऽधि नाकमुत्तममित्येतत्।— श.ब्रा.९.४.४.३

१३७. चित्याग्नेरुपस्थानम् : ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि। तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव इति।— श.ब्रा.९.५.१.५३

१३८. अथ रूपमुत्तमं करोति। अत्रैष सर्वोऽग्निः संस्कृतः। तस्मिन्देवा एतद्रूपमुत्तममदधुः। तथैवास्मिन्नयमेतद्रूपमुत्तमं दधाति।— श.ब्रा.१०.२.१.८

१३९. तद् यानीमानि वयस उत्तरतो वक्राणि लोमानि तानि तत्करोति। सहस्रेण। सर्वं वै सहस्रम्। सर्वेणैवास्मिन्नेतद्रूपमुत्तमं दधाति। त्रिभिः सहस्रैः। त्रिवृदग्निः। यावानग्निर्यावत्यस्य मात्रा-तावतैवास्मिन्नेतद्रूपमुत्तमं दधाति।- श.ब्रा. १०.२.१.११

१४०. याः पञ्चाशत्प्रथमा इष्टकाः। याश्चोत्तमास्ताः शतं विधाः। अथ या एतदन्तरेणेष्टका उपधीयन्ते-सैवैकशततमी विधा।- श.ब्रा. १०.२.६.११

१४१. यजुरेकशतविधः। यानि पञ्चाशत्प्रथमानि यजूंषि, यानि चोत्तमानि-ताः शतं विधाः।— श.ब्रा.१०.२.६.१२

१४२. अथ ह स्माह श्रौमत्यो वा हालिङ्गवो वा-वायुरेवाग्निः। तस्माद्यदैवाध्वर्युरुत्तमं कर्म करोति-अथैतमेवाप्येतीति।— श.ब्रा.१०.४.५.१

१४३. त्रिर्ह वै पुरुषो जायते। एवमेवैनमेतद्यज्ञात् त्रिर्जनयति। तासामेकादशानां त्रिः प्रथमामन्वाह। त्रिरुत्तमाम्।— श.ब्रा.११.२.१.४

१४४. त्रिर्वैवोत्तमामन्वाह। स यत्प्रथममन्वाह। प्रतीचीं तेन दिशं जयति।---- श.ब्रा.११.२.७.८

१४५. यस्तद्दर्शपूर्णमासयोर्विद्यात्।-- -यस्मादासां पुनरुत्तमे वयसि सर्व एव (दन्ताः) प्रभिद्यंते।— श.ब्रा.११.४.१.५

१४६. यस्तद्दर्शपूर्णमासयोर्विद्यात्।----- यस्माच्छीर्षण्येवाग्रे पलितो भवति। अथ पुनरुत्तमे वयसि सर्व एव पलितो भवति।---- -यस्मात् कुमारस्य रेतः सिक्तं न संभवति। यस्मादस्य मध्यमे वयसि संभवति। यस्मादस्य पुनरुत्तमे वयसि न संभवति।— श.ब्रा.११.४.१.६

१४७. अथ यदपुरोऽनुवाक्यकं समिष्टयजुर्भवति, तस्मादासां पुनरुत्तमे वयसि सर्व एव प्रभिद्यंते।— श.ब्रा.११.४.१.१२

१४८. अथ यत्सर्वमेव बर्हिरनुप्रहरति, तस्मात्पुनरुत्तमे वयसि सर्व एव पलितो भवति।---- अथ यदाज्यहविष एवानुयाजा भवंति, तस्मादस्य

पुनरुत्तमे वयसि न संभवति, उदकमिवैव भवति, उदकमिव ह्याज्यम्।— श.ब्रा.११.४.१.१४

१४९. गवामयन ब्राह्मणम् : तेषां वा उन्नेतोत्तमो दीक्षते। प्रथमोऽवभृथादुदायतामुदैति। प्राणो वा उन्नेता।— श.ब्रा.१२.१.१.११

१५०. अभिप्लवः षडहः।-- -यद्ध्येव प्रथममहः। तदुत्तमम्।— श.ब्रा.१२.२.२.१२

१५१. प्रायश्चित्तसत्रम् : अथ यत्संवत्सरं सुत्याभिः। उत्तमार्द्धमेव तेन सहस्रसंवत्सरस्यावरुन्धे।— श.ब्रा.१२.३.३.१२

१५२. सौत्रामणी यागः :- ऐन्द्रः पशूनामुत्तमो भवति। ऐन्द्रः पुरोडाशानां प्रथमः। इन्द्रियं वै वीर्यम् इन्द्रः।— श.ब्रा.१२.७.२.१६

१५३. सौत्रामण्यां सोमसम्पत्तिः :- परीतो षिंचता सुतम्---- -सोमो य उत्तमं हविः इति। उत्तमं वा एतद्धविः। यत्सोमः। उत्तममेवैनं हविष्करोति।— श.ब्रा.१२.८.२.१२

१५४. (तस्मात् ऋतवः) सर्वाः प्रथमा भवन्ति। सर्वा मध्यमाः। सर्वा उत्तमाः। तस्मात् ऋतवः सर्वे प्रथमाः। सर्वे मध्यमाः। सर्व उत्तमाः।— श.ब्रा.१२.८.२.३५

१५५. सौत्रामणी यज्ञात् पुरुषोत्पत्तिः :- सर्वा (याज्यापुरोनुवाक्याः) प्रथमा भवंति। सर्वा मध्यमाः। सर्वा उत्तमाः। तस्मात् प्राणाः सर्वे प्रथमाः। सर्वे मध्यमाः। सर्व उत्तमाः।— श.ब्रा.१२.९.१.१०

१५६. सौत्रामण्यां अवभृथः :- देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् इति। स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमम्। स्वर्ग एव लोकेऽन्ततः प्रतितिष्ठति।— श.ब्रा.१२.९.२.८

१५७. पूर्णाहुतिमुत्तमां जुहोति। प्रत्युत्तब्ध्यै सयुक्त्वाय।— श.ब्रा.१३.१.७.४

१५८. विश्वो देवस्य नेतुः (वा.सं.२२.२१) इति पूर्णाहुतिमुत्तमां जुहोति। इयं वै पूर्णाहुतिः। अस्यामेवान्ततः प्रतितिष्ठति।— श.ब्रा.१३.१.८.८

१५९. अत्रहोमब्राह्मणम् : व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा (वा.सं.२२.२४) इत्युत्तमे आहुती जुहोति। रात्रिर्वै व्युष्टिः। अहः स्वर्गः।— श.ब्रा.१३.२.१.६

१६०. तदाहुः-नैते सर्वे पशवः। यदजाऽवयश्च आरण्याश्च। एते वै सर्वे पशवः। यद्गव्या इति। गव्यानुत्तमेऽहन्नालभते। एते वै सर्वे पशवः। यद्गव्याः। सर्वानेव पशूनालभते।वैश्वदेवा भवन्ति। वैश्वदेवो वा अश्वः। अश्वस्यैव सर्वत्वाय। बहुरूपा भवन्ति। तस्माद्बहुरूपाः पशवः।—श.ब्रा.१३.३.३.१

१६१. यद्यतुष्टोमः स्तोमो भवति। अश्वस्यैव सर्वत्वाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति।— श.ब्रा.१३.३.१.४

१६२. द्यावापृथिव्यामुत्तमामाहुतिं जुहोति। द्यावापृथिव्योर्वै सर्वा देवताः प्रतिष्ठिताः।— श.ब्रा.१३.३.४.१

१६३. यदक्रन्दः प्रथमं जायमानः (वा. सं. २९.१२,२२) इति त्रिः प्रथमया, त्रिरुत्तमया,ताः पंचदश संपद्यन्ते। पंचदशो वै वज्रः।— श.ब्रा.१३.५.१.१७

१६४. अश्वस्तोमीयद्विपदाहोम ब्राह्मणम् : पशूनेव मात्रया समर्द्धयति। नान्यामुत्तमामाहुतिं जुहोति। यदन्यामुत्तमामाहुतिं जुहुयात्। प्र प्रतिष्ठायै च्यवेत। द्विपदा उत्तमा जुहोति। प्रतिष्ठा वै द्विपदा। प्रत्येव तिष्ठति। जुंबकाय स्वाहा (वा.सं.२५.९) इत्यवभृथ उत्तमामाहुतिं जुहोति। वरुणो वै जुंबकः।— श.ब्रा.१३.३.६.५

१६५. उत्तरोमहिम ग्रहः :- सर्वस्तोमोऽतिरात्र उत्तममहर्भवति। सर्वं वै सर्वस्तोमोऽतिरात्रः।— श.ब्रा.१३.५.३.९

१६६. अष्टा उत्तमानालभते। अष्टाक्षरा गायत्री। ब्रह्म गायत्री। तत् ब्रह्मैवैतदस्य सर्वस्योत्तमं करोति। तस्मात् ब्रह्मास्य सर्वस्योत्तममित्याहुः।— श.ब्रा.१३.६.२.७

१६७. घर्मोद्वासनम् : देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् (वा.सं.३८.२४)इति। स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमम्।— श.ब्रा.१४.३.१.२८

१६८. घर्मभेदे प्रायश्चित्तम् : पूर्णाहुतिमुत्तमां जुहोति। सर्वं वै पूर्णम्।— श.ब्रा.१४.३.२.१८

१६९. यद् एतद् देवपात्रं प्रथमं युज्यत उत्तमं विमुच्यते तेनैवात्य् अन्यानि पात्राणि।-जैमिनीय ब्राह्मण १.७३

१७०. त एतद् आवद् उत्तमम् अक्षरम् अपश्यन्। तेनैनम् (आदित्यम्) अर्वाञ्चम् अकुर्वन्।---- -सदैव सर्वाभिस् स्तुयुर् अथोत्तमाम् अग्रे ब्रूयाद् अथावराम् अथावराम्।------यद् एवाद आवद् उत्तमम् अक्षरं भवति तेनास्माल् लोकान् नावच्छिद्यते।— जै.ब्रा.१.८७

१७१. रथन्तरवर्णाम् उत्तमां गायन्ति। इयं वै रथन्तरम्। अस्याम् एवैतत् प्रतितिष्ठति।— जै.ब्रा.१.८८

१७२. एकरूपासु स्तुवन्ति। तस्माद् आरण्याः पशव एकरूपाः। आवद् उत्तमम् अक्षरं भवति। तस्माद् एकैको ऽन्यो ऽचलो ग्रामे ऽधिगम्यते।— जै.ब्रा.१.८९

१७३. ओषम् एवैतद् उत्तमं तृचं गायति। प्रजननो वा एष तृचः।— जै.ब्रा.१.१०४

१७४. एते ह वै रसदिहौ ये एते गायत्र्या उत्तमे अक्षरे। यस् ते उद्गायन्न् आरभते रसदिहाव् उरसि निमृदते। य उ एने निर्हरति गायत्रीं छिद्रां करोति।— जै.ब्रा.१.११४

१७५. यद् यथापूर्वं छन्दांस्य् उपेयुर् अनुष्टुभ उत्तमाः कुर्युः। वाग् वा अनुष्टुप्।— जै.ब्रा.१.१६१

१७६. वाग् अनुष्टुप्। तेनानुष्टुभो न यन्ति। यैतासाम् उत्तमा सा प्रत्यक्षानुष्टुप्। तेनो वावानुष्टुभो न यन्ति।— जै.ब्रा.१.१८८

१७७. यत्रोद्वंशीयं क्रियत उत्तमं पदं पुनर् अभ्यस्यति। षोडश्य् एव तेन रूपेण क्रियते।— जै.ब्रा.१.१९०

१७८.----आत्मानम् एव पंक्त्या प्रत्युपदधाति। अथ यद् एतद् उत्तमं तृचं जन्मैव तत्।— जै.ब्रा.१.२५३

१७९.--- -सामि ह वै दुरुद्गातुर् वर्तन्यां गर्भाः पतन्ति। अथ यद् एतद् उत्तमं तृचं जन्मैव तत्। प्रैव तेन जनयति।— जै.ब्रा.१.२६१

१८०. गायत्रीषु रथन्तरसाम्नः कुर्यात् त्रिष्टुप्सु बृहत्साम्नस् त्रिणिधनं बृहत्याम् उत्तमं करोति।------ -गायत्रीषु रथन्तरसाम्नः कुर्याद् अनुष्टुप्सु बृहत्साम्न ऐळं मध्येनिधनम् अनुष्टुभ्य् उत्तमं करोति। यद् एवात्र यज्ञस्य विधुरं भवति तद् एव तेन शमयति।— जै.ब्रा.१.३१०

१८१. तस्य दशं कृत्वः प्ररोहति। षट् कृत्वः पूर्वयोश् चतुर् उत्तमायै। ते दश प्ररोहास्, संपद्यन्ते।— जै.ब्रा.१.३४०

१८२. अथ शीर्ष्णाग्रे स्तुते ऽथ दक्षिणेन पक्षेणाथोत्तरेणाथ पुच्छेनात्मनोत्तमेन। तत् सलोमाय।— जै.ब्रा.२.४६

१८३. उद् वयं तमसस् परि सुवः पश्यन्तो ज्योतिर् उत्तरम्। देवं देवत्रा सूर्यम् अगन्म ज्योतिर् उत्तमम्। इत्य् एतां जपन्न् उदैति। एतद् वै ज्योतिर् उत्तमं य एष तपति।— जै.ब्रा.२.६८

१८४. यद् यथापूर्वं पृष्ठान्य् उपेयू रेवतीर् उत्तमाः कुर्यू रेवतीनाम् एता रूपम् ऋचस्, तेनैव रेवतीनां रूपान् न यन्ति।— जै.ब्रा.२.१८१

१८५.--- -अथ बृहत्सामाथ वैरूपसामाथ वैराजसामाथ शक्वरीसामाथ रेवतीसामोत्तम स्याद् इति।- --- -अथ बृहत्सामाथ रथन्तरसामाथ बृहत्सामाथ रथन्तरसामाथ बृहत्सामोत्तम स्याद् इति।— जै.ब्रा.२.२१३

१८६.--- -अथ बृहत्सामाथ रथन्तरसामाथ बृहत्सामाथ रथन्तरसामा च बृहत्सामा चोत्तम स्याद् इति।— जै.ब्रा.२.२१५

१८७.--- -तस्माद् आत्मन्न् अङ्गानि प्रतिहितानि। आत्मन्ययोत्तमयोद्गायति। तस्माद् इदम् आत्मन उद् इव शेते।— जै.ब्रा.२.४०८

१८८. द्वादशस्य मास उत्तमे ऽहन् षट्त्रिंशं ह दध्रिरे व्यावृत्। एकं ततो युग्मभिर् व्युञ्जताध्य् अन्य आयन् सुवर् अन्ये परायन्। इति— जै.ब्रा.२.४३८

१८९. राजानाव् अनभिद्रुहा ध्रुवे सदस्य् उत्तमे। सहस्रस्थूण आसाते। इति सहस्ररूपं विराजाम् उपगच्छन्ति।— जै.ब्रा.३.६३

१९०. अथ यान्य् उत्तराणि त्रीणि पदानीमौ द्वौ शिरोग्रीवम्, एकम् अथ यद् उत्तमं पदम् उपश एव सः।

पश्चेव द्वितीय आगच्छत् तस्माद् उत्तमा द्व्युपशैवं प्रियस्य कुर्यात्।— जै.ब्रा.३.११२

१९१. शर्यातो वै मानवः प्राच्यां स्थल्याम् अयजत।---- तद् उभयैर् देवमनुष्यैर् उत्तमं सोमस् संपीतः। तस्मिंश् च्यवनो भार्गवो ऽश्विभ्यां ग्रहम् अगृह्णात्।— जै.ब्रा.३.१५९

१९२. प्रेति पवमानस्य प्रथमेत्य् उत्तमैवम् इव ह्य् एतद् अहः।—.जै.ब्रा.३.१७६

१९३. दिवः पीयूषम् उत्तमम् इत्य् उत्तमो ह्य् एष त्र्यहः क्रियते यच् छन्दोमाः। तासु गायत्रम् उक्तब्राह्मणम्।— जै.ब्रा.३.२०९

१९४. तद् यद् एतानि पञ्चर्च षड्चानि भवन्ति तेनैवर्तुमन्तश् छन्दोमाः क्रियन्ते। स वानुत्तमष् षड्चो भवति।----तस्मात् स वानुत्तमष् षड्चो भवति येन प्रयन्ति। तेनोद्यन्ति।— जै.ब्रा.३.२४२

१९५. परीतो षिंचता सुतम् इति परिवतीर् भवन्त्य् अन्तस्य रूपम्। अन्त्यो ह्य् एतद् अहः। सोमो य उत्तमं हविर् इत्य् उत्तमं ह्य एतद् धविः क्रियते यच् छन्दोमाः।— जै.ब्रा.३.२५२

१९६. अभ्य् अर्ष कनिक्रदत्। द्युमन्तं शुष्मम् उत्तमम्।। इत्य् उत्तमो ह्य् एष त्र्यहः क्रियते यश् छन्दोमाः।— जै.ब्रा.३.२६५

१९७. ऐन्द्राग्नम् उत्तमं पदं निराह छन्दसाम् अप्रणाशाय यज्ञस्यानुख्यात्यै।— जै.ब्रा.३.२८२

१९८. तस्माद् उष्णिह उत्तमान्य् अक्षराणि भूयिष्ठानि।— जै.ब्रा.३.२९५

१९९. अथ यस्माद् दवीयस् सन् ज्यायस्तोमम् उत्तमम् अहस् तस्माद् असाव् आदित्यो दवीयस् सन्न् ओजीयस् तपति।— जै.ब्रा.३.३१८

२००. श्व आधास्यमानो ब्रह्मौदनं पचति। आदित्या वा इत उत्तमाः सुवर्गं लोकमायन्। ते वा इतो यन्तं प्रतिनुदन्ते। एते खलु वावाऽऽदित्याः। यद्ब्राह्मणाः।- तैत्तिरीय ब्राह्मण १.१.९.८

२०१. विषुवद्दिने दिवाकीर्त्यनामानि सामानि : एकविँश एष भवति। एतेन वै देवा एकविँशेन। आदित्यमित उत्तमँ सुवर्गं लोकमारोहयन्। स वा एष इत एकविँशः।— तै.ब्रा.१.२.४.१

२०२. पुनराधेयम् : अग्निं प्रथमं विभक्तीनां यजति। अग्निमुत्तमं पत्नीसंयाजानाम्। तेनाऽऽग्नेयम्।— तै.ब्रा.१.३.१.६

२०३. सारस्वत्योत्तमया प्रचरति। वाग्वै सरस्वती। तस्मात्प्राणानां वागुत्तमा। अथो प्रजापतावेव यज्ञं प्रतिष्ठापयति। प्रजापतिर्हि वाक्।— तै.ब्रा.१.३.४.५

२०४. चात्वाले रथचक्रं निमित्तँ रोहति। अतो वा अङ्गिरस उत्तमाः सुवर्गं लोकमायन्।— तै.ब्रा.१.३.६.१

२०५. अग्निविनाशप्रायश्चित्तं :-- -अत एव पुनर्मन्थेत्। अत्र वाव स निलयते। यत्र खलु वै निलीनमुत्तमं पश्यन्ति। तदेनमिच्छन्ति।— तै.ब्रा.१.४.७.३

२०६. देवनक्षत्राणि वा अन्यानि। यमनक्षत्राण्यन्यानि। कृत्तिका प्रथमम्। विशाखे उत्तमम्। तानि देवनक्षत्राणि। अनूराधा प्रथमम्। अपभरणीरुत्तमम्। तानि यमनक्षत्राणि।— तै.ब्रा.१.५.२.७

२०७. यजमान उत्तमो भक्षयति। पशवो वै वाजिनम्। यजमान एव पशून्प्रतिष्ठापयन्ति।— तै.ब्रा.१.६.३.१०

२०८. यत्पार्थानि जुहोति। राष्ट्रमेव भवति। बार्हस्पत्यं पूर्वेषामुत्तमं भवति। ऐन्द्रमुत्तरेषां प्रथमम्। ब्रह्म चैवास्मै क्षत्रं च समीची दधाति।— तै.ब्रा.१.७.७.४

२०९. ऐन्द्रः पशूनामुत्तमो भवति। ऐन्द्रः पुरोडाशानां प्रथमः।— तै.ब्रा.१.८.६.२

२१०. अनुष्टुप्प्रथमा भवति। अनुष्टुगुत्तमा। वाग्वा अनुष्टुक्। वाचैव प्रयन्ति। वाचोद्यन्ति।----सौर्यनुष्टुगुत्तमा भवति। सुवर्गस्य लोकस्य संतत्यै।---- एकविँशोऽभिषेचनीयस्योत्तमो भवति। एकविँशः केशवपनीयस्य प्रथमः।— तै.ब्रा.१.८.८.२

२११. अग्निरग्रे प्रथमो देवतानाम्। संयातानामुत्तमो विष्णुरासीत्।---अग्निश्च विष्णो तप उत्तमं महः। दीक्षापालेभ्यो वनतँ हि शक्रा।---- — तै.ब्रा.२.४.३.४

२१२. उद्वयं तमसस्परि। पश्यन्तो ज्योतिरुत्तरम्। देवं देवत्रा सूर्यम्। अगन्म ज्योतिरुत्तमम्।— तै.ब्रा.२.४.४.९

२१३. युनज्मि त उत्तरावन्तमिन्द्रम्। येन जयासि न पराजयासै। स त्वाऽकरेकवृषभँ स्वानाम्। अथो राजन्नुत्तमं मानवानाम्।— तै.ब्रा.२.४.७.८

२१४. श्यामाकसक्तूंस्त्रेधा विभज्य तृतीयांशं सुरायामुपरि विकीर्य तदुपरि दुग्धपरिषेचनार्थो मन्त्रः :- परीतो षिञ्चता सुतम्। सोमो य उत्तमँ हविः। दधन्वा यो नर्यो अप्स्वन्तरा। सुषाव सोममद्रिभिः।— तै.ब्रा.२.६.१.१

२१५. होता यक्षत्प्रचेतसा। देवानामुत्तमं यशः। होतारा दैव्या कवी। सयुजेन्द्रं वयोधसम्।— तै.ब्रा.२.६.१७.५

२१६. पञ्च (उक्षाणः) उत्तमेऽहन्नालभ्यन्ते। वर्षिष्ठमिव ह्येतदहः।— तै.ब्रा.२.७.११.१

२१७. अवते हेड उदुत्तमम् इति।— तै.ब्रा.२.७.१६.४

२१८. पशोर्वपापुरोडाशहविःषु प्रत्येकं याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति-उदुत्तमं वरुणास्तभ्नाद्याम्।— तै.ब्रा.२.८.१.६

२१९. पौर्णमासीदेवतायाः पुरोनुवाक्या : पूर्णा पश्चादुत पूर्णा पुरस्तात्। उन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधिसंवसन्त। उत्तमे नाक इह मादयन्ताम्।— तै.ब्रा.३.१.११.२

२२०. वपापुरोडाशस्विष्टकृतां मैत्रावरुण-वक्तृकाः पुरोनुवाक्याः :- आ वृत्रहणा वृत्रहभिः शुष्मैः। इन्द्र यातं नमोभिरग्ने अर्वाक्। युवँ राधोभिरकवेभिरिन्द्र। अग्ने अस्मे भवतमुत्तमेभिः।— तै.ब्रा.३.६.८.१

२२१. ऽऽहवनीयेऽन्वाधीयमाने जप्यं मन्त्रत्रयम् : अग्निं गृह्णामि सुरथं यो मयोभूः। य उद्यन्तमारोहति सूर्यमह्ने। आदित्यं ज्योतिषां ज्योतिरुत्तमम्। श्वो यज्ञाय रमतां देवताभ्यः।— तै.ब्रा.३.७.४.३

२२२. वेदेर्मध्ये तिर्यक्त्वेन साद्यमानयोर्विधृत्याख्ययोर्दर्भयोरनुमन्त्रणे मन्त्रम् : ---- अहँ स्वानामुत्तमोऽसानि देवाः। विशो यन्त्रे नुदमाने अरातिम्।--- तै.ब्रा.३.७.६.७

२२३. पूर्णाहुतिमुत्तमां जुहोति। सर्वं वै पूर्णाहुतिः। सर्वमेवाऽप्नोति। अथो इयं वै पूर्णाहुतिः।— तै.ब्रा.३.८.१०.५

२२४. पूर्णाहुतिमुत्तमां जुहोति। प्रत्यत्तब्ध्यै सयत्वाय।— तै.ब्रा.३.८.११.२

२२५. गव्यान्पशूनुत्तमेऽहन्नालभते। तेनैवोभयान्पशूनवरुन्धे।— तै.ब्रा.३.९.९.२

२२६. जुम्बकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति। वरुणो वै जुम्बकः। अन्तत एव वरुणमवयजते।— तै.ब्रा.३.९.१५.२

२२७. सावित्र चयनाभिधानम् : अयमहँ सावित्रः। देवानामुत्तमो लोकः। गुह्यं महो बिभ्रदिति।— तै.ब्रा.३.१०.९.१२

२२८. हिरण्येष्टको भवति। यावदुत्तममङ्गुलिकाण्डं यज्ञपरुषा संमितम्। तेजो हिरण्यम्।— तै.ब्रा.३.१२.५.१२

२२९. अग्निर्मुखं प्रथमो देवतानामग्निश्च विष्णो तप उत्तमं मह इत्याग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवतः इति।-ऐतरेय ब्राह्मण १.४

२३०. ऊर्ध्वा दिशा : उत्तमामदितिं यजति - ऐ.ब्रा.१.७

२३१.------इयं ह्यदितिस्तदुत्तमामदितिं यजति यदुत्तमामदितिं यजति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै।-ऐ.ब्रा.१.८

२३२. आद्यन्तयोर्ऋचोरावृत्तिः :- तासां त्रिः प्रथमामन्वाह त्रिरुत्तमाम्। ता द्वादश संपद्यन्ते।- ऐ.ब्रा.१.१३

२३३. यज्ञेन यज्ञमयजन्त देवा इत्युत्तमया परिदधाति।-ऐ.ब्रा.१.१६

२३४. आद्यन्तयोर्ऋचारावृत्ति विधिः :- तासां त्रिः प्रथमामन्वाह :- त्रिरुत्तमां ताः सप्तदश संपद्यन्ते।---- -- त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्वर्सो नह्यति स्थेम्ने बलायाविस्रंसाय।-ऐ.ब्रा.१.१६

२३५. द्युभिरक्तुभिः परिपातमस्मानित्युत्तमया परिधाति।-ऐ.ब्रा.१.२१

२३६. अभिष्टवस्य समाप्तिः :- सूयवसाद्भगवती हि भूया इत्युत्तमया परिदधाति।-ऐ.ब्रा.१.२२

२३७. त्वं दूतस्त्वमु नः परस्पा इत्युत्तमया परिदधाति।-ऐ.ब्रा.१.२८

२३८. आद्यन्तयोर्ऋचोरावृत्तिः :- तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश संपद्यन्ते।-ऐ.ब्रा.१.२८

२३९. परि त्वा गिर्वणो गिर इत्युत्तमया परिदधाति।-ऐ.ब्रा.१.२९

२४०. एतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश संपद्यन्ते------- त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्वसौ नह्यति स्थेम्ने बलायाविस्रंसाय। -ऐ.ब्रा.१.२९

२४१. दाधार दक्षमुत्तममहर्विदं- ऐ.ब्रा. १.३०

२४२. तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां वा एकविंशतिः संपद्यन्त एकविंशो वै प्रजापतिः------- -उत्तमा प्रतिष्ठा तद्वैवं क्षत्रं सा श्रीस्तदाधिपत्यं तद्ब्रध्नस्य विष्टपं तत्प्रजापतेरायतनं तत्स्वाराज्यम्।-ऐ.ब्रा.१.३०

२४३. युवा सुवासाः परिवीत आगादित्युत्तमया परिदधाति। प्राणो वै युवा सुवासाः सोऽयं शरीरैः परिवृतः।-ऐ.ब्रा.२.२

२४४. तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता एकादश संपद्यन्त एकादशाक्षरा वै त्रिष्टुप् त्रिष्टुबिन्द्रस्य वज्र---- -ऐ.ब्रा.२.२

२४५. प्रातरनुवाकस्य समाप्तिमृचं : अभूदुषा रुशत्पशुरित्युत्तमया परिदधाति।-ऐ.ब्रा.२.१८

२४६. सप्तैता अनुष्टुभस्तास्त्रिः प्रथमया त्रिरुत्तमयेकादश भवन्ति----ऐ.ब्रा.२.३७

२४७. नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वस्वित्युत्तमया परिदधात्यात्मा वै समस्तः सहस्रवांस्तोकवान्पुष्टिमान्---ऐ.ब्रा.२.४०

२४८. नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वस्वित्युत्तमया परिदधाति संवत्सरो वै समस्तः सहस्रवांस्तोकवान्पुष्टिमान्-- -ऐ.ब्रा.२.४१

२४९. वयः सुपर्णा उपसेदुरिन्द्रमित्युत्तमया परिदधाति।-ऐ.ब्रा.३.१९

२५०.--- आहावश्च हिंकारश्च प्रस्तावश्च प्रथमा च ऋगुद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्च।-ऐ.ब्रा.३.२३

२५१. अदितिर्द्यौरदितिरन्तरिक्षमित्युत्तमया परिदधातीयं वा अदितिरियं द्यौरियमन्तरिक्षम्।-ऐ.ब्रा.३.३१

२५२. एवा न इन्द्रो मघवा विरप्शीत्युत्तमया परिदधातीयं वा इन्द्रो मघवा विरप्शी इति। ऐ.ब्रा.३.३८

२५३. तृतीय पर्यायः :- उत्तमेन पर्यायेण स्तुवत उत्तमान्वेव पदानि पुनराददते यदेवैषां वासो हिरण्यं मणिरध्यात्ममासीत्तदेवैषां तेनाऽऽददते।-ऐ.ब्रा.४.६

२५४. चतुस्त्रिंशो वै स्तोमानामुत्तमस्तेषु वा एष एतदध्याहितस्तपति।-ऐ.ब्रा.४.१८

२५५. द्वादशाहे तृतीयस्याह्नो रूपाणि :--- - यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते----एतानि वै तृतीयस्याह्नो रूपाणि।-ऐ.ब्रा.५.१

२५६. षष्ठमस्याह्नो रूपाणि :-- -यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोकोऽभ्युदितः-ऐ.ब्रा.५.१२

२५७. नवमस्याह्नो रूपाणि : यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोकोऽभ्युदितः-ऐ.ब्रा.५.२०

२५८. द्वयेवोत्तमे सूक्ते पर्यस्यति स एव तयोर्विहारः।-ऐ.ब्रा.६.२४, ६.२९

२५९. अपत्नीकोऽग्निहोत्रं : कथमग्निहोत्रं जुहोति श्रद्धा पत्नी सत्यं यजमानः श्रद्धा सत्यं तदित्युत्तमं मिथुनं-- -ऐ.ब्रा.७.१०

२६०. तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां वि पाशो मुमुचेऽगद ऐक्ष्वाक आस।-ऐ.ब्रा.७.१७

२६१. दीक्षा : इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तम्।- ऐ.ब्रा.७.२०

२६२. पात्रेषुरसग्रहणाय पूर्वमुपावहृतस्य सोमस्याभिषवः :- आ ददे ग्रावाऽस्यध्वरकृद्देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पविनेन्द्राय सोमँ सुषुतं---- -तैत्तिरीय संहिता १.४.१.१

२६३. पशुकामादीनां पशुविधिः :- इन्द्रो वलस्य बिलमपौर्णोत्स य उत्तमः पशुरासीत्तं पृष्ठं प्रति संगृह्योदक्खिदत्तँ सहस्रं पशवोऽनूदायन्त्स उन्नतोऽभवत्-----— तै.सं.२.१.४.१

२६४. आदित्यचर्वादीष्टिविधिः :- यया रज्ज्वोत्तमां गामाजेत्तां भ्रातृव्याय प्र हिणुयान्निर्ऋतिमेवास्मै प्रहिणोति।— तै.सं.२.२.६.५

२६५. भ्रातृव्यवतो विजितिसंज्ञकेष्टिविधिः :- तां वाव देवा विजितिमुत्तमामसुरैर्व्यजयन्त यो भ्रातृव्यवान्त्स्यात्स स्पर्धमान एतयेष्ट्या यजेत— तै.सं.२.४.२.३

२६६. सा वा एषा विजितिर्नामेष्टिर्य एवं विद्वानेतयेष्ट्या यजत उत्तमामेव विजितिं भ्रातृव्येण वि जयते।— तै.सं.२.४.२.४

२६७. हौत्रविवक्षया सामिधेनीव्याख्यानम् : त्रिः प्रथमामन्वाह त्रिरुत्तमां (आ जुहोत दुवस्यत इति)यज्ञस्यैव तद्वर्सम् नह्यत्यप्रस्रंसाय— तै.सं.२.५.७.१

२६८. बार्हतीम् (बृहच्छोचा यविष्ठ्येति) उत्तमामन्वाह बार्हतो वा असौ लोकोऽमुमेव लोकमभि जयति— तै.सं.२.५.७.२

२६९. चित्रायागविधिः :- वाग्वै सिनीवाली पुष्टिः खलु वै वाक्पुष्टिमेव वाचमपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनँ— तै.सं.२.४.५.२

२७०. प्रधानभूताग्नेयपुरोडाशाभिधानम् : अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन्तदृषयो यज्ञवास्त्वभ्यवायन्ते अपश्यन्पुरोडाशं कूर्मं भूतँ सर्पन्तं---— तै.सं.२.६.३.२

२७१. दर्शपूर्णमासेष्ट्यङ्गभूतान्वारम्भणीयेष्टि-विधिः :- पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्ताम्।— तै.सं.३.५.१.१

२७२. देविकाख्यपञ्चविधहविरुत्कर्षकरण-पूर्वक-बहुविधकाम्यप्रयोगाभिधानम् : यातयामानीव खलु वा एतस्य छन्दाँसि य ईजान उत्तमं धातारं करोति।— तै.सं.३.४.९.४

२७३. अतिमोक्षमन्त्राः :- येनेन्द्राय समभरः पयाँस्युत्तमेन हविषा जातवेदः। तेनाग्ने त्वमुत वर्धयेमँ सजातानाँ श्रैष्ठ्य आ धेह्येनम्।— तै.सं.३.५.४.२

२७४. मृदाक्रान्त्यभिधानम् : उदक्रमीद् द्रविणोदा वाज्यर्वाऽकः स लोकँ सुकृतं पृथिव्याः। ततः खनेम सुप्रतीकमग्निँ सुवी रुहाणा अधि नाक उत्तमे।— तै.सं.४.१.२.४

२७५. पञ्चपश्वङ्गभूताग्निकसाभिधानम् : उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तमम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।— तै.सं.४.१.७.४

२७६. आहवनीयचयनार्थं भूकर्षणाभिधानम् : अयस्मयं वि चृता बन्धमेतम्। यमेन त्वं यम्या संविदानोत्तमं नाकमधि रोहयेमम्।— तै.सं.४.२.५.३

२७७. आहवनीयचयनार्थौषधिवापाभिधानम् : याः ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु। तासां त्वमस्युत्तमा प्र णो जीवातवे सुव।— तै.सं.४.२.६.५

२७८. आहवनीयचयनार्थलोष्टक्षेपाद्याभिधानम् : सं त पयाँसि समु यन्तु वाजाः सं वृष्णियान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवाँस्युत्तमानि धिष्व।— तै.सं.४.२.७.४

२७९. याज्यानुवाक्याभिधानम् : अव ते हेड (पुरोनुवाक्या) उदुत्तमम् (याज्या)।— तै.सं.४.२.११.२

२८०. होमाभिधानम् : अत्रा ते (अश्वस्य) रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः।— तै.सं.४.६.७.३

२८१. अग्नियोगाभिधानम् : येना सहस्रं वहसि येनाग्ने सर्ववेदसम्। तेनेमं यज्ञं नो वह देवयानो यः उत्तमः।— तै.सं.४.७.१३.४

२८२. उख्यस्य जननम् : विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमा— तै.सं.५.१.८.१

२८३. वह्निपशवः :- अगन्म ज्योतिरुत्तमित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति-----ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुख्यात्यै।— तै.सं.५.१.८.६

२८४. उख्याग्निनयनम् : चत्वारि छन्दाँसि छन्दोभिरेवातिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा— तै.सं.५.२.१.५, ५.२.२.२

२८५. स्वयमातृण्णाद्यभिधानम् : ज्योतिष्मतीमुत्तमामुपदधाति तस्मात्प्राणानां वाग्ज्योतिरुत्तमा — तै.सं.५.३.२.३

२८६. असपत्नविराडाख्येष्टकाभिधानम् : पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात्पशुमानुत्तमां वाचं वदति— तै.सं.५.३.५.३

२८७. नाकसदादिपञ्चविधेष्टकाभिधानम् : पश्चात्प्राचीमुत्तमामुप दधाति तस्मात्पश्चात्प्राची-पत्न्यन्वास्ते स्वयमातृण्णां च विकर्णीं चोत्तमे उप दधाति प्राणो वै स्वयमातृण्णा ऽऽयुर्विकर्णी प्राणं चैवाऽऽयुश्च प्राणानामुत्तमौ धत्ते तस्मात्प्राणश्चाऽऽयुश्च प्राणानामुत्तमौ— तै.सं.५.३.७.३

२८८. परिषेचनाद्यभिधानम् : एता वै देवताः सुवर्ग्या या उत्तमास्ता यजमानं वाचयति ताभिरेवैनँ सुवर्गं लोकं गमयति — तै.सं.५.४.३.५

२८९. अश्वमेधीयस्तोत्रसंबन्ध्यृगाद्यभिधानम् : सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याऽऽप्त्यै सर्वस्य जित्यै— तै.सं.५.४.१२.३

२९०. रेतःसिगाद्यभिधानम् : यः सिक्तरेताः स्यात्प्रथमायां तस्य चित्यामन्यामुप दध्यादुत्तमायामन्याँ रेतं एवास्य सिक्तमाभ्यामुभयतः परिगृह्णाति— तै.सं.५.५.४.२

२९१. यूपैकत्वादीनामभिधानम् : येऽग्नयः पुरीष्याः प्रविष्टाः पृथिवीमनु। तेषां त्वमस्युत्तमः प्र णो जीवातवे सुव।— तै.सं.५.५.७.५

२९२. होमविशेषाणां राष्ट्रभृदिष्टकानां चाभिधानम् : अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु।— तै.सं.५.७.४.३

२९३. अवदानाभिधानम् :-----मध्यतो गुदस्यावद्यति मध्यतो हि प्राण उत्तमस्यावद्यति उत्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाजामि----- तै.सं.६.३.१०.४

२९४. ध्रुवग्रहकथनम् : आयुर्वा एतद्यज्ञस्य यद्ध्रुव उत्तमो ग्रहाणां गृह्यते तस्मादायुः प्राणानामुत्तमं— तै.सं.६.५.२.१

२९५. ---मध्यतोऽवनीय इत्याहुर्मध्यमेन ह्यायुषो भुङ्क्ते उत्तरार्धेऽवनीय इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदेव्यामृचि शस्यमानायामव नयति वैश्वदेव्यो वै प्रजाः प्रजास्वेवाऽऽयुर्दधाति।— तै.सं.६.५.३.३

२९६. पात्नीवतग्रहकथनम् : प्राणो वा एष यदुपाँशुर्यदुपाँशुपात्रेण प्रथमश्चोत्तमश्च ग्रहौ गृह्येते प्राणमेवानु प्रयन्ति प्राणमनूद्यन्ति— तै.सं.६.५.८.१

२९७. षोडशिग्रहकथनम् : अनुष्टुभमभि सं पादयन्ति वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमा— तै.सं.६.६.११.६

२९८. सहस्रतमीदानविधिः :- क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान्गच्छति— तै.सं.७.१.७.४

२९९. पृष्ठ्यषडहविषयविकल्पाभिधानम् : प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उपयन्त्युत्तम उप यन्ति तदाहुर्यां वै त्रिरेकस्याह्न उपसीदन्ति दह्रं वै सा-- — तै.सं.७.५.३.१

३००. सामविषेशकथनम् : अथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा भवन्ति— तै.सं.७.५.८.५

३०१. वैराजो वै पुरुषः सप्त ग्राम्याः पशवो यद्दशपुर्व्वा भवन्ति सप्तोत्तमा यजमानमेव तत् पशुषु प्रतिष्ठापयति।-ताण्ड्य ब्रा.२.७.८

३०२. यत्सप्तैव मध्ये समपद्यन्ते ते नो सा सप्त भजते य उत्तमो हिङ्कारः स उत्तमाया यत्तां सप्तभ्यो हिङ्करोति तेन सा सप्त भजते-— तां.ब्रा.२.९.३

३०३. सैषा त्रिवृत्प्रायणा त्रिवृदुदयना यत्त्रिवृद्वहिष्पवमानं भवति नवैता एकविंशस्योत्तमा भवन्ति प्राणा वै त्रिवृत्-- — तां.ब्रा.२.१५.३

३०४. य एव स्तोमा यज्ञं वहन्ति तानुत्तमे स्तोत्रे सन्तर्पयति यथानडुहो वाश्वान्वाश्वतरान्वोहुषः सन्तर्पयेदेवमेतदुत्तमे स्तोत्रे स्तोमान् सन्तर्पयति-- — तां.ब्रा.२.१६.३

३०५.----यदेताः सप्त त्रयस्त्रिंशस्योत्तमा भवन्ति-- — तां.ब्रा.३.७.२

३०६. यद्बहुदेवत्यमुत्तमं पदं तेन वैश्वदेवं सर्वेष्वेव रूपेषु प्रतितिष्ठति— तां.ब्रा.७.८.७

३०७.--- -तस्मादुष्णिहउत्तमं पदं भूयिष्ठाक्षरं पुरो गुरुरिव हि वज्रः।— तां.ब्रा.८.५.२

३०८. अनुष्टुभमुत्तमां सम्पादयतीयं वा अनुष्टुबस्यामेव प्रतितिष्ठति।— तां.ब्रा.८.७.२

३०९. स वानुत्तमः षड्ृचो भवत्युभयस्य परोक्षप्रत्यक्षस्यावरुध्यै। तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.१५.१.१२

## उत्तम-मध्यम-अधम

१. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम।— ऋ.१.२४.१५

२. उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत। अवाधमानि जीवसे।— ऋ.१.२ ५.२१

३. यदुत्तमे मरुतो मध्यमे वा यद् वावमे सुभगासो दिवि ष्ठ। अतो नो रुद्रा उत वा न्वस्याऽग्ने वित्ताद्धविषो यद् यजाम।।— ऋ.५.६०.६

४. उदगातां भगवती विचृतौ नाम तारके। वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम्।-अथर्ववेद२.८.१

५. अभू ये दिवि सुभगे विचृतौ नाम तारके। वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम्।।-अथर्व ३.७.४

६. यत् ते अपोदकं विषं तत् त एतास्वग्रभम्। गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा नेशदादु ते।।-अथर्व ५.१३.२

७. विषाणा पाशान् वि ष्याध्यस्मद् य उत्तमा अधमा वारुणा ये।-अथर्व६.१२१.१

८. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अधा वयमादित्य व्रते तवानागसो अदितये स्याम।। प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उत्तमा अधमा वारुणा ये। दुष्वप्न्यं दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम्।-अथर्व ७.८८.३/७.८३.३

९. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।- अथर्व १८.४.६९

१०. ये (असुराः) प्रथमरात्रेण छन्ना आसंस् तान् प्रथमेन पर्यायेणाघ्नन्।---- ये मध्यरात्रेण छन्ना आसंस् तान् मध्यमेन पर्यायेणाघ्नन्।---- -ये ऽपररात्रेण छन्ना आसंस् तान् उत्तमेन पर्यायेणाघ्नन्।------।-जैमिनीय ब्रा.१.२०८

११. प्रेति पवमानस्य प्रथमेत्य् उत्तमैवम् इव ह्य् एतद् अहः। तस्माद् वयस् सम्यक् पक्षाभ्याम् एवैते।— जै.ब्रा.३.१७६

१२. द्वादशाहः :- ऊर्ध्वो वै प्रथमास्त्र्यहस्तिर्यङ्मध्यमोऽहर्ऽउत्तमः स यदूर्ध्वः प्रथमस्त्र्यहस्तस्मादयमग्निरूर्ध्व उद्दीप्यत ऊर्ध्वा ह्येतस्य दिग्यत्तिर्यङ्मध्यमस्तस्मादयं वायुस्तिर्यङ्पवति------ ऐ.ब्रा.४.२५

१३. तान् (असुरान्) वै प्रथमैरेव पर्यायैः पूर्वरात्रादनुदन्त, मध्यमैर्मध्यरात्राद, उत्तमैरपररात्रात्।-गोपथ ब्रा.२.५.१

१४. प्रथमेषु पर्यायेषु स्तुवते, प्रथमान्येव पदानि पुनराददते। यदेवैषां मनोरथा आसन्, तदेवैषां तेनाददते।

मध्यमेषु पर्यायेषु स्तुवते, मध्यमान्येव पदानि पुनराददते। यदेवैषामश्वा गाव आसन्, तदेवैषां तेनाददत। उत्तमेषु पर्यायेषु स्तुवते, उत्तमान्येव पदानि पुनराददते। यदेवैषां वासो हिरण्यं मणिरध्यात्ममासीत्, तदेवैषां तेनाददते।- गो.ब्रा.२.५.२

१५. यज्ञो वै विष्णुः।----इदमेव प्रथमेन पदेन पस्पार, अथेदमन्तरिक्षं द्वितीयेन, दिवमुत्तमेन।-शतपथ ब्राह्मण १.१.२.१३

१६. याजमानो विष्णुक्रमः :- इदमेव प्रथमेन पदेन पस्पार स अथेदमन्तरिक्षं द्वितीयेन, दिवमुत्तमेन, एताम्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते।— श.ब्रा.१.९.३.९

१७. इदमेव प्रथमेन पदेन पस्पार, अथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेन।— श.ब्रा.३.६.३.३

१८. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय इति।— श.ब्रा.६.७.३.८

१९. कुलायिनी विष्टुतिः :- तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति या मध्यमा सा प्रथमा योत्तमा सा मध्यमा तिसृभ्यो हिङ्करोति योत्तमा सा प्रथमा या प्रथमा सा मध्यमा या मध्यमा सोत्तमा कुलायिनी त्रिवृतो विष्टुतिः।-ताण्ड्य ब्रा.२.३.१

२०. कुलायिनी विष्टुतिः :- एतामेव बहुभ्यो यजमानेभ्यः कुर्य्यात् यत्सर्व्वा अग्रिया भवन्ति सर्व्वा मध्ये सर्व्वा उत्तमाः सर्व्वानिवैनान् समावद्राजः करोति-- --- तां.ब्रा.२.३.४

२१. (स्तोत्रीय तृचस्य) ब्रह्मणो वा आयतनं प्रथमा क्षत्रस्य मध्यमा विश उत्तमा, यत् प्रथमा भूयिष्ठा भाजयति ब्रह्मण्येव तदोजोवीर्य्यन्दधाति ब्रह्मण एव तत् क्षत्रञ्च विशञ्चानुगे करोति क्षत्रस्येवास्य प्रकाशो भवति य एतया स्तुते।— तां.ब्रा.२.८.२

२२. यत् सप्त प्रथमास्सप्तोत्तमास्तिस्रो मध्ये त्र्यक्षरः पुरुषो लोकमेवास्मै तन्मध्यतः करोति तस्मिंल्लोके प्रतितिष्ठति।— तां.ब्रा.२.१०.२

२३. चतुश्चत्वारिंशस्य तिस्रो विष्टुतयः :- ब्रह्मणो वा आयतनं प्रथमा क्षत्रस्य मध्यमा विश उत्तमा यत् पञ्चदशिन्यौ पूर्वे भवतश्चतुर्दशोत्तमा ब्रह्मणि चैव तत् क्षत्रे चौजो वीर्य्यं दधाति ब्रह्मणे चैव तत् क्षत्राय च विशमनुगां करोति क्षत्रस्येवास्य प्रकाशो भवति य एतया स्तुते।— तां.ब्रा.३.९.२

२४. इमे वै लोका एते स्तोमा अयमेव ज्योतिरयम्मध्यमो गौरसावुत्तम आयुः।— तां.ब्रा.४.१.७

२५. इमे वै लोका एतानि छन्दांस्ययमेव गायत्ययं मध्यमो बृहत्यसावुत्तमस्त्रिष्टुब् यदेतैश्छन्दोभिः संहितैः स्तुवन्त्येषां लोकानामविच्छेदाय।— तां.ब्रा.७.३.९

२६. त्रीन् प्रथमायां रोहति भूतं भवद्भविष्यत्तानेवावरुन्धे त्रीन् मध्यमायां रोहत्यात्मानं प्रजां पशूंस्तानेवावरुन्धे त्रीनुत्तमायां रोहति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति।— तां.ब्रा.७.७.७

२७.-----मध्यमानि पदानि पुनरादीनि भवन्ति मध्यमस्य पर्य्यायस्य मध्यमैर्हि पदैः पुनरादायम्मध्यमरात्रात्प्राणुरुदन्त। त उत्तमं पर्य्यायमश्रयन्त तेषां घृतश्च्युन्निधनेन पशूनवृञ्जत पशवो वै घृतश्च्युतः।---- -उत्तमानि पदानि पुनरादीनि भवन्त्युत्तमस्य पर्य्यायस्योत्तमैर्हि पदैः पुनरादायमुत्तमरात्रात्प्राणुदन्त।— तां.ब्रा.९.१.१९

२८. तृच उत्तमो भंवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.१२.१.१०

२९. आर्भव पवमानस्याद्यस्तोत्रीयं तृचं : द्रवन्तीमिडामुत्तमामुपयन्ति चतुर्थस्याह्नः सन्तत्यै स्तोमः।— तां.ब्रा.१२.५.२५

३०. तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्त्येकविंश एव स्तोमो भवति प्रतिष्ठायै प्रतितिष्ठति।— तां.ब्रा.१२.७.१०, १३.१.१२

## उत्तरायण

१. मनोजवा अयमान आयसीमतरत् पुरम्।— ऋ.८.१००.८

२. नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमद्य यूथम्।— ऋ.४.३८.५

३. कृत्या : यस्ते परूंषि संदधौ रथस्येवर्भुर्धिया। तं गच्छ तत्र ते ऽयनमज्ञातस्तेऽयं जनः।।- अथर्ववेद१०.१.८७

४. ईर्माभ्यामयनं जातं सक्थिभ्यां च वशे तव।— अ.१०.१०.२१

५. अङ्गिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः।—अ.१८.४.८

६. पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात् तपतु गार्हपत्यः। दक्षिणाग्निष्टे तपतु शर्मवर्मोत्तरतो मध्यतो अन्तरिक्षाद्, दिशोदिशो अग्ने परि पाहि घोरात्।।— अ.१८.४.९

७. अग्निर्होताध्वर्युष्टे बृहस्पतिरिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु। हुतोऽयं संस्थितो यज्ञ एति यत्र पूर्वमयमनं हुतानाम्।।— अ.१८.४.१५

८. पुनर्वसू सूनृता चारु पुष्यो भानुराश्लेषा अयनं मघा मे।— अ.१९.७.२

९. तस्माद्धेनुर्दक्षिणा। एतन्वेकमयनम्।-शतपथ ब्राह्मण २.२.१.२१

१०. पिण्डपितृयज्ञः :- तस्माद्यो मनुष्याणां मेद्यति-अशुभे मेद्यति विहूर्च्छति हि न हि अयनाय चन भवति।— श.ब्रा.२.४.२.६

११. साकमेध पर्व : अथेडामेवावद्यति, न प्राशित्रम्। उपहूय, मार्जयन्ते। एतन्वेकमयनम्। अथेदं द्वितीयम्।-- — श.ब्रा.२.५.३.१०

१२. अवभृथ स्नानम् : ता वा एता षडाहुतयो भवन्ति। षड्वा ऋतवः संवत्सरस्य।---- एतदादित्यानामयनम्।--एतानेव चतुरः प्रयाजानपबर्हिषो यजेत्---एतदङ्गिसामयनम् (पुरोडाशाहुति)। अतोन्यतरत्कृत्वा--- श.ब्रा.४.४.५.१९

१३. या ह दीक्षा-सा निषत्, तत्सत्रम्, तदयनम्, तत्सत्रायणम्।— श.ब्रा.४.६.८.२

१४. राजानं प्रणयति। उद्यत एवैष आग्नीध्रीयोऽग्निर्भवति। तऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति। तैरेव तेषामुल्मुकैः प्रघ्नन्तीति ह स्माह----एतन्वेकमयनम्। अथेदं द्वितीयम्। अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति-यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति।-- -अथेदं तृतीयम्- गृहपतेरेवारण्यो सम्वदन्ते-य इतोग्निर्जनिष्यते-स नः सह,-- — श.ब्रा.४.६.८. ७

१५. रात्रि में भोजन करने का प्रश्न : तदाहुः किमयनमिति। स्वयं हैवैते रात्री अग्निहोत्रं जुहुयात्। स यद्धुत्वा प्राश्नाति, तेनापितृदेवत्यो भवति।— श.ब्रा.११.१.७.३

१६. समेन ह वा अस्या व्यृद्धेनान्यूनेना-नतिरिक्तेनायनेनेतं भवति।— श.ब्रा.१२.३.५.१३

१७. श्रीमन्थकर्मब्राह्मणम् : स यः कामयेत। महत्प्राप्नुयामिति। उदगयन आपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वा, औदुम्बरे कंसे चमसे वा सर्वौषधं फलानीति संभृत्य, परिसमुह्य----- श.ब्रा.१४.९.३.११

१८. विराट पुरुष : धाता पुरस्ताद्यमुदाजहार।-- - प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते।-तैत्तिरीय आरण्यक ३.१२.७

१९. वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय— तै.आ.३.१३.१

२०. हरिं हरन्तमनुयन्ति देवाः। विश्वस्येशानं वृषभं मतीनाम्। ब्रह्म सरूपमनु मेदमागात्। अयनं मा विवधीर्विक्रमस्व।— तै.आ.३.१५.१, ४९.१

२१. एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति---। तै.आ.१०.६४.१

२२. अयं पुरो भूस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्या गायत्रं-काठक सं.१६.१८

२३. गायों द्वारा संवत्सर सत्र के अनुष्ठान से शृंग व ऊर्ज आदि प्राप्त करना : दशसु मास्सूत्तिष्ठन्त ऋध्नुवन्ति द्वादशसु य एवं विदुस्तदेतदृद्धमयनं तस्मादेतेन यन्ति।---काठक सं.३३.१

२४. अथ हाप श्रेयसीर् मेनिरे। ताः प्रति त्वा वयम् आतपाम इति यात्रां च प्रयां च प्रायच्छन्। अद्भिर् ह वा एष आदित्यः एतद् एत्य् अपाम् एवायनेन।— जै.ब्रा.२.२६

२५. तद् आहुः किं संवत् किं सरं किम् अयनम् इति।---वाग् एव सरः। वाचा हि पुरुषस् सरति। प्राण एवायनम्। स ह्य् अस्मिन् सर्वस्मिन् एति।---- जै.ब्रा.२.२९

२६. संवत्सर दीक्षा : ततो यांश् चतुरो मासो यन्त्य् अग्नेर् एव तान् अयनेन यन्ति।---अथ यान् अपरांश् चतुरो मासो यन्ति वायोर् एव तान् अयनेन यन्ति।---- यान् अपरांश् चतुरो मासो यन्त्य् आदित्यस्यैव तान् अयनेन यन्ति।— जै.ब्रा.२.४३

२७. पौर्णमासेन हविषेष्ट्वा आदित्याय चरुं निर्वपति।-- -तस्यां अमावास्यायां दीक्षोपरिष्टात् सुत्या। तद् वा एतत् सूर्याचन्द्रमसोर् एवायनम्।— जै.ब्रा.२.९८

२८. स एष समानप्रायणस् समान संबन्धनस् संवत्सरः। तस्य मन एव प्रायणं, वाक् संबन्धनम्।-- - स एष संवत्सरोऽग्निष्टोमान् एवाभिसंपद्यते।— जै.ब्रा.२.५०

२९. इन्द्र द्वारा बल असुर का निग्रह करके गायों की रक्षा का वर्णन : ता हान्तर एव तस्थुर् अयनम् अविन्दमानाः। ता होत्सेधेनैवोत्सिषिधुः।— जै.ब्रा.२.९०

३०. पृथिवी वायुराकाश आपो ज्योतींषीत्येष वा आत्मोक्थं पंचविधमेतस्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येति। अयनं वै समानानां भवति य एवं वेद-ऐतरेय आरण्यक २.३.१

३१. गवामयनेन यन्ति गावो वा आदित्या आदित्यानामेव तदयनेन यन्ति।---- यथा वा प्रायणीयोतिरात्रश्चतुर्विंश उक्थ्यः सर्वेऽभिप्लवाः षडहा आक्ष्यन्त्यन्यान्यहानि तदादित्यानामयनम्। प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थः सर्वे पृष्ठ्याः षडहा अक्ष्यत्यन्याहानि तदङ्गिरसामयनम्।-ऐतरेय ब्राह्मण ४.१७

३२. षट्त्रिंशदहो वा एष यद् द्वादशाहः षट्त्रिंशदक्षरा वै बृहती बृहत्या वा एतदयनं यद् द्वादशाहो----ऐ.ब्रा.४.२४

३३. षट्पदान्यनुनिष्क्रामति षडहं वाङ्नाति वदत्युत संवत्सरस्यायने यावत्येव वाक्तामव रुन्धे-तैत्तिरीय सं.६.१.८.१

३४. गर्ग त्रिरात्रः :- अथाहुर्या द्विरूपोभयत एनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतत्सहस्रस्यायनं सहस्रं स्तोत्रीयाः ---- — तै.सं.७.१.५.७

३५. उदगयनस्याद्यन्तयोरैन्द्राग्नेन पशुना यजेत संवत्सरे संवत्सरे वा।-वाराह श्रौ.सू.१.६.१

३६. अथातो मुन्ययनमित्याचक्षते श्रमणः खारीविवधी-- -बौ.श्रौ.सू.१६.३०

३७. महाव्रतवान्विश्वजित्सर्वपृष्ठोऽतिरात्रः सारस्वतेनायनेनैष्यन्तो द्वयीर्गा उपकल्पयन्त---- बौ.श्रौ.सू.१६.२९

३८. ततो ह जज्ञे भुवनस्य गोपा इत्यग्निष्टोमैर्वाव ते तदीयुस्तदेतदृद्धमयनं प्रजननं यदग्निष्टोमाः।- बौ.श्रौ.सू.१७.१९

३९. कुण्डपायिनामयनेनैष्यन्तो दीक्षन्ते पञ्च सर्वतो धुराः----बौ.श्रौ.सू.१७.२०

४०. अग्निश्चतुर्होता वायुः पञ्चहोता चन्द्रमा षड्होता प्रजापतिः सप्तहोतासावादित्यो नवहोतैता वै देवता एतेनायनेनायंस्ततो वै ता आर्ध्नुवन्सुवर्गं लोकमायन्य एवं विद्वांस एतेनायनेन यन्त्यृध्नुवन्त्येव सुवर्गं लोकं यन्ति।- बौ.श्रौ.सू.१७.२१

४१. उत्सर्गिणामयनेनैष्यन्तो दीक्षन्ते।- बौ.श्रौ.सू. १७.२२

४२. तपश्चितामयनेनैष्यन्तो दीक्षन्ते तेषामियमेव प्रज्ञाता-- -बौ.श्रौ.सू.१७.२३

४३. अयुजां चैव युग्मानां चैव सायुज्यं सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति--- बौ.श्रौ.सू.१८.५१

४४. यथैतदग्निष्टोमायनं सारस्वतमयनं विश्वसृजा-मयनमिति कथमु खल्वेषां संनिवापः स्यादिति--- बौ.श्रौ.सू.२६.१२

४५. अथेदं संसदामयनमच्छन्दोमं भवतीति विज्ञायत---बौ.श्रौ.सू.२६.२१

४६. अथेदं सर्पाणामयनं स्तोमतो विकृतं भवत्यथेदं विश्वसृजामयनं कथमिदानीन्तनेषु स्याद्-बौ.श्रौ.सू.२६.२४

४७. अथेदं कुण्डपायिनामयनमग्निहोत्रपूर्वमेके ब्रुवते सोमपूर्वमुपयन्ति-बौ.श्रौ.सू.२६.२५

४८. व्रीह्याग्रयणस्य कालाच्छ्यामाकाग्रयणस्य कालो नातीयादा यवाग्रयणयस्य कालाद् व्रीह्याग्रयणस्य--- दक्षिणायन पशोः काला-दुत्तरायणपशोः कालो नातीयादोत्तरायण-पशोर्दक्षिणायनपशोः-बौ.श्रौ.सू२८.१२

४९. त्रिषंवत्सरं गवामयनमादित्या-नामङ्गिरसाम्।— आप.श्रौ.सू.२३.१४.१०

५०. उदगयनस्याद्यन्तयोरैन्द्राग्नो निरूढपशु-बन्धः।- शां.श्रौ.सू.६.१.१८

५१. खर्गला इव पत्वरीरपामुग्रमिवायनम्।- कौ.सू.१०७

५२. त्रिरयनमह्नामुपतिष्ठन्ते हविषा च यजन्ते- कौ.सू.१४०

५३. उत्तरे पक्षस्ययनविकल्पाः :- अभिप्लवपृष्ठ्यान् प्रतिलोमानुपयन्त्यहरा-वृत्तकारिणः।— द्रा.श्रौ.सू.८.३.२३

५४. समौ पक्षौ चिकीर्षन् पञ्चायनमासान् कृत्वा दशरात्रमिश्रं मासमुद्धरेत्।— द्रा.श्रौ.सू.८.३.३१

५५. तदेतदृद्धमयनं भूतोपसृष्टानां राष्ट्रभृतः-- --। तदेतदृद्धमयनं हुतप्रहुतानुकृतयोऽन्ये होमाः---- बौधा.गृह्य.सू.३.७.२७

५६. प्रायश्चित्तानि : अथ यत्रैतत् कालातीतासु क्रियास्वतीत उत्तरायणे आज्यभागान्ते----- अथर्ववेद परिशिष्ट ३७.१२.१

५७. शक्रः प्रविद्वान्प्रदिशश्चतस्रः तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते।-महावाक्योपनिषत्

५८. अयने दक्षिणे प्राप्ते प्रपञ्चाभिमुखं गतः। अहंकाराभिमानेन जीवः स्याद्धि सदाशिवः।---- ततः कालवशादेव ह्यात्मज्ञानविवेकतः। उत्तराभिमुखो भूत्वा स्थानात्स्थानान्तरं क्रमात्।---- त्रिशिखब्राह्मणोपनिषत् १६

५९. स्वयमेव तु संपश्येद् देहे बिन्दुं च निष्कलम्। अयने द्वे च विषुवे सदा पश्यति मार्गवित्।- ब्रह्मविद्योपनिषत् ५४

६०. ग्रहणे विषुवे चैवमयने संक्रमेपि च। दर्शेषु पूर्णमासे च पूर्णेषु दिवसेषु च।-रुद्राक्षजाबालोपनिषत् १८

६१. हंसस्य परमहंसस्य च न क्षौरम्। अस्ति चेदयनक्षौरम्-- -नारदपरिव्राजकोपनिषत् ७.३

६२. पादत्रयात्मकं ब्रह्म कैवल्यं शाश्वतं परमिति। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवंविद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय-त्रिपाद्विभूतिमहानारायणो-पनिषत् ४

६३. पक्षद्वयं मासो भवति मासद्वयमृतुर्भवति। ऋतुत्रयमयनं भवति। अयनद्वयं वत्सरो भवति।-- - त्रिपाद्विभूतिमहानारायणोपनिषत् ३.४

६४. अन्योऽसावन्योहमस्मीति ये विदुस्ते पशवो न स्वभावपशवस्तमेवं ज्ञात्वा विद्वान्मृत्युमुखात्प्रमुच्यते नान्यः पन्था विद्यतेऽयनाय।-नारदपरिव्राजकोपनिषत् ९.१

६५. वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।---श्वेताश्वतरोपनिषत् ३.८

६६. एको हंसो भुवनस्यास्य मध्ये स एवाग्निः सलिले संनिविष्टः। तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय-श्वेताश्वतरोपनिषत् ६.१५

६७. शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषामयनं न्यायो----सुबालोपनिषत् २

६८. सा गायत्री किं गोत्रा कत्यक्षरा कतिपादा। कति कुक्षयः। कानि शीर्षाणि। सांख्यायनगोत्रा सा चतुर्विंशत्यक्षरा---गायत्रीरहस्योपनिषत्

६९. कला काष्ठा मुहूर्ताश्च ऋतवोऽयनमेव च---- कफोणिर्मणिबन्धश्च तदूरुकटिबन्धनाः।-गुह्यकाल्युपनिषत् २०

## उत्तानपाद

१. सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति। सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा।।-ऋग्वेद १.१६४.१४

२. द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्म माता पृथिवी महीयम्। उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात्।।— ऋ.१.१६४.३३

३. उत्तानायामजनयन् त्सुषूतं भुवदग्निः पुरुपेशांसु गर्भः।— ऋ.२.१०.३

४. वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य। (अग्निः)— ऋ.३.१४.५

५. उत्तानायामव भरा चिकित्वान् त्सद्यः प्रवीता वृषणं जजान। अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट।।— ऋ.३.२९.३

६. अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न। कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम्।।— ऋ.४.१३.५, ४.१४.५

७. यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः। आद् दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः।।— ऋ.५.१.३

८. वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्। होतारं सत्यमजं रोदस्योरुत्तानहस्तो नमसा विवासेत्।।— ऋ.६.१६.४६

९. पत्तो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम्। आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम्।।— ऋ.१०.२७.१३

१०. देवानां युगे प्रथमे ऽसतः सदजायत। तदाशा अन्वजायन्त तदुत्तानपदस्परि।। भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त। अदितेर्दक्षो अजायत दक्षाद्वदितिः परि।।— ऋ.१०.७२.४

११. गुहा शिरो निहितमृधगक्षी असिन्वन्नत्ति जिह्वया वनानि। अत्राण्यस्मै पड्भिः सं भरन्त्युत्तानहस्ता नमसाधि विक्षु।।— ऋ.१०.७९.२

१२. प्रत्यस्य श्रेणयो ददृश्र एकं नियानं बहवो रथासः। बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वेषि भूमिम्।।— ऋ.१०.१४२.५

१३. उत्तानपर्ण सुभगे देवजूते सहस्वति। सपत्नीं मे परा धम पतिं मे केवलं कुरु।।— ऋ.१०.१४५.२, अथर्व३.१८.२

१४. ये पर्वताः सोमपृष्ठा आप उत्तानशीवरीः। वातः पर्जन्य आदग्निस्ते क्रव्यादमशीशमन्।।— अ.३.२१.११०

१५. उत्तानायै शयानायै तिष्ठन्ती वाव गूहसि। न वै कुमारि तत्तथा यथा कुमारि मन्यसे।।— अ.२०.१३३.४

१६. तस्य वा उत्तानस्याऽऽङ्गीरसस्या-प्राणत्प्रतिजग्रहुषः। अष्टममिन्द्रियस्यापाक्रामत्। तदेतेनैव प्रत्यगृह्णात्।---तैत्तिरीय ब्राह्मण २.३.४.५

१७. अथोत्तानं पशुं पर्यस्यन्ति। स तृणमन्तर्दधाति। ओषधे त्रायस्व---शतपथ ब्रा.३.८.२.१२

१८. अथोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्टि, पराञ्चमेवास्मिन्नेतत्प्राणं दधाति। देवेभ्यस्त्वा मरीचिपेभ्यः इति।— श.ब्रा.४.१.१.२४

१९. अथात्र नीचा पाणिना मध्यमे परिधौ प्रत्यगुपमार्ष्टि। इदं वाऽउपांशुं हुत्वोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्टि।---- श.ब्रा.४.१.२.२३

२०. मृदासम्भरण हेतु अवट खनन : सन्ते वायुर्मातरिश्वा दधातु इति। अयं वै वायुर्मातरिश्वा-योऽयं पवते। उत्तानाया हृदयं यद्विकस्तम् इति। उत्तानाया ह्यस्या एतद् हृदयं विकस्तम्।-- — श.ब्रा.६.४.३.४

२१. घर्म सन्दीपनं ब्राह्मणम् : अथ दक्षिणत उत्तानेन पाणिना निह्नुते-विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि इति।— श.ब्रा.१४.१.३.२४

२२. अन्नादनशक्तिकामस्येष्टि विधिः :- --- अन्नाद्यं दुह उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या---- तैत्तिरीय सं.२.३.६.२

२३. उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय द्वादशकपालः पुरोडाशः भवति वैश्वदेवत्वाय---- तै.सं.२.३.७.३

२४. राष्ट्रभृन्मन्त्राणां काम्यप्रयोगाभिधानम् : यस्य कामयेतान्नाद्यम् आ ददीयेति तस्य समायामुत्तानो निपद्य भुवनस्य पत इति तृणानि संगृह्णीयात् प्रजापतिर्वै भुवनस्य पतिः प्रजापतिनैवास्यान्नाद्यमा दत्त---- तै.सं.३.४.८.६

२५. मृदा हरणाभिधानम् : सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलिष्टम्। देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यम्।— तै.सं.४.१.४.१

२६. अन्तर्यामग्रहकथनम् : यदि कामयेतावर्षुकः स्यादित्युत्तानेन नि मृज्याद् वृष्टिमेवोद्यच्छति— तै.सं.६.४.५.६

२७. असौ वै स्वराडियं विराडुत्तानायां स्त्रियां पुमान् रेतस्सिञ्चत्या अस्यां रेतस्सिञ्चतीयं प्रजनयति---काठक सं. २०.६

२८. नोत्तानो दीक्षितश्शयीत यदुत्तानश्शयीत देवलोकमुपावर्तेत न न्यङ् शयीत यन्न्यङ् शयीत पितृलोकमुपावर्तेत।-काठक सं. २३.५

२९. ता उत्तानशय्याम् अपश्यत्। स शीर्ष्णैवमौ प्राञ्चाव् अगृह्णाद्, बाहुभ्याम् इमान् नाना,---- जै.ब्रा.३.३६७

३०. जाघन्या पत्नीसंयाजनम्। उत्तानायाः देवानां पत्नीभ्योऽवद्यति। इडां च।-कात्यायन श्रौ.सू.६.९.१५

३१. आतिथ्येष्टिः :- प्रस्तरे निह्नुवत उत्तानहस्ता दक्षिणोत्ताना वेष्टा राय इति।-कात्यायन श्रौ.सू.८.२.७

३२. दीक्षा संस्कारः :- कृष्णविषाणां त्रिवलिं पञ्चवलिं वोत्तानां दशायां बध्नीते। तया कण्डूयनम्। उपस्पृशत्यनया दक्षिणस्या ध्रुव उपरीन्द्रस्य योनिरिति।- कात्यायन श्रौ.सू. ७.३.२५

३३. अनुयाजेष्विष्टेषु व्यूहति----वाजस्य मा प्रसवेन प्रोहामीत्युत्तानेन दक्षिणेन जुहूं प्राचीमग्निरग्नीषोमौ तमपनुदन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मो---शांखायन श्रौ.सू.४.९.५

३४. अथास्या उत्तानमञ्जलिमधस्ताद्योक्त्रस्य निधायात्मनश्च सव्यं पूर्णपात्रं निनयन्वाचयेत्--- आश्वलायन श्रौ.सू.१.११.८

३५. तेषां दक्षिणत उत्ताना अङ्गुलीः करोति प्राचीनावीती तूष्णीम् स्वधा पितृभ्य इति वा।-आश्वलायन श्रौ.सू.२.३.२१

३६. स्पृष्ट्वोदकं निह्नवन्ते प्रस्तरे पाणीन्निधायोत्तानान्दक्षिणान्त्सव्यान्नीच एष्टा राय एष्टा वामानि प्रेषे भगाय।-आश्वलायन श्रौ. सू.४.५.८

३७. आपो देवीरग्रेपुव इत्यभिमन्त्र्योत्तानानि पात्राणि पर्यावर्त्य शुन्धध्वं दैव्याय कर्मण इति त्रिः प्रोक्ष्य प्रज्ञाते पवित्रे निदधाति।-आपस्तम्ब श्रौ.सू. १.११.१०

३८. उत्तानानि पात्राणि पर्यावर्त्य शुन्धध्वं दैव्याय कर्मण इति त्रिः प्रोक्ष्य---- आप.श्रौ.सू.१.१९.३

३९. दक्षिणेनाहवनीयं प्राङ् शेते न न्यङ् नोत्तानो नाग्नेरपपर्यावर्तत।— आप.श्रौ.सू.१०.१५.९

४०. यदिन्द्राय राथंतरायेति यथासमाम्नातं द्वादशसूत्तानेषु कपालेष्वधिश्रयति।— आप. श्रौ. सू. १९.२२.८

## उत्थान

१. कृष्णादुदस्थादर्या विहायाश्चिकित्सन्ती मानुषाय क्षयाय।। (उषा)-ऋग्वेद १.१२३.१

२. उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात्।— ऋ.२.३८.१

३. उत संहायास्थाद् व्यृतूंरदर्धररमतिः सविता देव आगात्।।— ऋ.२.३८.४

४. ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान्।— ऋ.४.६.१

५. स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात्।— ऋ.४.६.४

६. आ भात्यग्निरुषसामनीकमुद् विप्राणां देवया वाचो अस्थुः।। (अश्विनौ)— ऋ.५.७६.१

७. उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः। — ऋ.६.६४.१

८. उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात्।— ऋ.६.७१.४

९. उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः। उद् धूमासो अरुषासो दिविस्पृश समग्निमिन्धते नरः।।— ऋ.७.१६.३

१०. उद् वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः।— ऋ.७.६०.४

११. विश्वं प्रतीची सप्रथा उदस्थाद् रुशद् वासो बिभ्रती शुक्रमश्वैत्। (उषसः)— ऋ.७.७७.२

१२. उदु ष्य वः सविता सुप्रणीतयो ऽस्थादूर्ध्वो वरेण्यः।— ऋ.८.२७.१२

१३. उत् ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः।। (पवमान सोम)— ऋ.९.५३.१

१४. इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।।— ऋ.१०.१०३.९

१५. अतो भूरत आ उत्थितं रजो ऽतो द्यावापृथिवी अप्रथेताम्।।— ऋ.१०.१४९.२

१६. ये ऽमावास्यां रात्रिमुदस्थुर्व्राजमत्रिणः। अग्निस्तुरीयो यातुहा सो अस्मभ्यमधि ब्रवत्।।-अथर्ववेद १.१६.१

१७. इदं हव्यं संविदानौ जुषेथां शुनं नो अस्तु चरितमुत्थितं च।।— अ.३.१५.४

१८. आ पर्जन्यस्य वृष्टयोदस्थामामृता वयम्। व्यहं सर्वेण पाप्मना वि यक्ष्मेण समायुषा।।— अ.३.३१.११

१९. दर्भः पृथिव्या उत्थितो मन्युशमन उच्यते।— अ.६.४३.२

२०. विषाणका नाम वा असि पितृणां मूलादुत्थिता वातीकृतनाशनी— अ.६.४४.३

२१. मा घोषा उत् स्थुर्बहुले विनिर्हते मेषुः पप्तदिन्द्रस्याहन्यागते।— अ.७.५२.२/७.५४.२

२२. गुदा आसन्त्सिनीवाल्याः सूर्यायास्त्वचमब्रुवन्। उत्थातुरब्रुवन् पद ऋषभं यदकल्पयन्।। अ.९.४.१४

२३. अग्निरासीन उत्थितोऽश्विना। इन्द्रः प्राङ् तिष्ठन् दक्षिणा तिष्ठन् यमः। (गौ)— अ.९.७.१९

२४. अनागोहत्या वै भीमा कृत्ये मा नो गामश्वं पुरुषं वधीः। यत्रयत्रासि निहिता ततस्त्वोत्थापयामसि पर्णाल्लघीयसी भव।— अ. १०.१.२९

२५. उत्थापय सीदतो बुध्न एनानद्भिरात्मानमभि सं स्पृशन्ताम्। अमासि पात्रैरुदकं यदेतन्मितास्तण्डुलाः प्रदिशोयदीमाः।। (स्वर्गौदनः)— अ.१२.३.३०

२६. अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात्।।— अ.१३.१.१४

२७. महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।— अ.१९.१३.१०

२८. ग्रामणीरसि ग्रामणीरुत्थायाभिषिक्तो ऽभि मा सिञ्च वर्चसा। (औदुम्बर मणिः)— अ.१९.३१.१२

२९. महामत्स्य द्वारा प्रलय में मनु की सहायता : अथ इतिथीं समां तदौघ आगन्ता, तन्मा

नावमुपकल्प्योपासासै, स औघ उत्थिते नावमापद्यासै, ततस्त्वा पारयितास्मि।---- स औघ उत्थिते नावमापेदे।-शतपथ ब्रा.१.८.१.४

३०. इतो वाऽअयमूर्ध्वो मेध उत्थितः, यमस्या इमं रसं प्रजा उपजीवन्ति, अर्वाचीनं दिवः। रसो वै वसाहोमः। रसो मेधः। रसेनैवैदद्रसं तीव्रीकरोति।— श.ब्रा.३.८.३.३०

३१. सत्रोत्थानम्:--- -या ह दीक्षा-सा निषत्, तत्सत्रम्, तदयनम्, तत्सत्रायणम्। अथ यत्ततो यज्ञस्योदृचं गत्वोत्तिष्ठन्ति-तदुत्थानम्। तस्मादेनानुदस्थुरित्याहुः-इति नु पुरस्ताद्वदनम्।— श.ब्रा.४.६.८.२

३२. अथैनमादायोत्तिष्ठति। असौ वाऽआदित्यः एषोऽग्निः। अमुं तदादित्यमुत्थापयति। उदु तिष्ठ स्वध्वर। अध्वरो वै यज्ञः। उदु तिष्ठ सुयज्ञियेत्येतत्।— श.ब्रा.६.४.३.९

३३. अथैनां (उखां) उद्यच्छति-उत्थाय बृहती भव इति। उत्थाय हीमे लोका बृहन्तः। उदु तिष्ठ ध्रुवा त्वम् इति। उदु तिष्ठ स्थिरा त्वं प्रतिष्ठितेत्येतत्।— श.ब्रा.६.५.४.१३

३४. मण्डलपुरुषोपासनं ब्राह्मणम् : तमेतमग्निरित्यध्वर्यव उपासते यजुः-इति एष हीदं सर्वं युनक्ति। साम-इति छन्दोगाः---। उक्थमिति बह्वृचाः, एष हीदं सर्वमुत्थापयति।---- श.ब्रा.१०.५.२.२०

३५. द्वादश ब्रह्मौदनानुत्थाय निर्वपति। द्वादशभिर्वेष्टिभिर्यजते।---- प्रजापतिर्वा ओदनः। प्रजापतिः संवत्सरः।---- श.ब्रा.१३.३.६.६

३६. एतस्यां उक्तायां उत्थाय सदसो अधि प्राञ्चो यजमानमभ्यायेति।---- श.ब्रा.१३.५.२.१६

३७. अग्निहोत्र : अथ यद् एते प्रातराहुती जुहोत्य् उत्थापयत्य् एवैनं ताभ्याम्। स यथा हस्ती हरत्यासनम् उपर्य् आसीनम् आदायोत्तिष्ठेद् एवम् एवैषा देवतैतद् विद्वांसं जुह्वतम् आदायोदेति।— जै.ब्रा.१.११

३८. ते होत्थाय प्रवव्रजुर् नमो ऽस्मै ब्राह्मणायास्तु विदां वा अयम् इदं चकारेति— जै.ब्रा.१.७५

३९. अथ मैधातिथम्। काण्वायनास् सत्राद् उत्थायायन्त आयुञ्जानाः।---— जै.ब्रा.१.२२६

४०.--- स यद् ऊर्ध्वं प्रतिहाराद् उद्गृह्णाति तद् उत्थापयतीति।---- जै.ब्रा.१.३२२, १.३३६

४१. अग्निं देवतानां दीक्षमाणा अनुनिषीदन्त्य् आदित्यम् अनूत्तिष्ठन्तीति।---- — जै.ब्रा.२.२३

४२. तान् उक्थैर् उत्थापयति। तद् उक्थानां उक्थत्वम्— जै.ब्रा.२.२४

४३. स यद् एवास्मिन् दीक्षिते यशो भवति, तद् अस्मिन् उत्थिते यशो भवति।— जै.ब्रा.२.६८

४४. अथैष पुनस्तोमः। स हायम् ऋषिर् आगत्य न शशाकोत्थातुम् असुराशनेन। गरो हैनम् आविवेश,----— जै.ब्रा.२.८३

४५. पोषयिष्णुर् वैश्यो रयिमान्, उत्थाता शूद्रो दक्षः कर्मकर्ता---- जै.ब्रा.२.२६६

४६. तस्यै हायःकूटहस्तं गन्धर्वम् ईर्ष्युम् उत्थापयांचकार।— जै.ब्रा.२.२७०

४७. तद् आहुर् न दीक्षितेनासन्द्य् अधिरुह्येति। उत्थिता ह खलु वा एतद् अहर् आगच्छन्ति। यद् वावादो दशमम् अहस् तद् एवोक्थानि। ---- — जै.ब्रा.२.४१८

४८. ते य एवं विद्वांसो ऽभिप्लवम् उपयन्ति सहस्रसनयो हैवोत्थिता भवन्ति।— जै.ब्रा.२.४४२

४९. उद्या ते जातम् अन्धसेत्य् उद्वतीर् उत्थानीये ऽहन् भवन्त्य् अथो स्वर्गस्यैव लोकस्याभ्युत्क्रान्त्यै। स्वर्गो ह्य् एष लोको यद् दशमम् अहः।— जै.ब्रा.३.२८३

५०. अथैता भवन्ति आ जागृविर् विप्र ऋतं मतीनां इत्य् आवतीर् उत्थानीये ऽहन्। यत् प्रवतोः कुर्युः पराञ्चो अतिपद्येरन्। -----तद् आहुर् अपेव वा एते भ्रंशन्ते य आवतीर् उत्थानीये ऽहन् कुर्वन्तीति।--- जै.ब्रा.३.२९१

५१. उद् उ त्ये मधुमत्तमा इत्य् उद्वतीर् उत्थानीये ऽहन् भवन्त्य्, अथो स्वर्गस्यैव लोकस्याभ्युत्क्रान्त्यै। स्वर्गो ह्य् एष लोको यद् दशमम् अहः।— जै.ब्रा.३.२९३

५२. अथ यद् धा इत्य् एष हीदं सर्वं हरति। स एष एवोक्थम्। एष हीदं सर्वम् उत्थापयतीव।— जै.ब्रा.३.३७९

५३. ते होचुः-देवा म्लानो ऽयं पिता मयोऽभूः। पुनरिमं समीर्योत्थापयामेति-गोपथ ब्रा.२.४.१२

५४. छन्दोभिधेष्टकाभिधानम् : उदस्य शोचिरस्थादाजुह्वान मीळुषः।-तैत्तिरीय संहिता ४.४.४.५

५५. अप्रतिरथ सूक्ताभिधानम् : महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।— तै.सं.४.६.४.३

५६. अश्वमेध मन्त्रः :- उत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा-- तै.सं.७.१.१९.३

५७. षड्रात्रकथनम् : यदा दश शतं कुर्वन्त्यथैकमुत्थानं शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठन्ति यदा शतं सहस्रं कुर्वन्त्यथैकमुत्थानं सहस्रसंमितो वा असौ लोको ऽमुमेव लोकमभि जयन्ति यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम्।— तै.सं.७.२.१.४

५८. द्वादशरात्रः :- सर्वासां वा एते प्रजानां प्राणेरासते ये सत्रमासते तस्मात्पृच्छन्ति किमेते सत्रिण इति प्रियः प्रजानां उत्थितो भवति य एवं वेद।— तै.सं.७.२.९.३

५९. यो वै नः श्रेष्ठोऽभूत्। तमवधिष्म।---- उक्थैरुदस्थापयन्। तदुक्थानामुक्थत्वम्।---- तैत्तिरीय ब्राह्मण २.२.८.७

६०.--- अपूतायै वाचो वदितारो यच्छ्यापर्णा इमानुत्थापयतेमे मेऽन्तर्वेदि माऽऽसिषतेति तथेति तानुत्थापयांचक्रुः। ते होत्थाप्यमाना रुरुविरे ये तेभ्यो भूतवीरेभ्योऽसित मृगाः--। रामो हाऽऽस मार्गवेयो ऽनूचानः श्यापर्णीयस्तेषां होत्तिष्ठतामुवाचापि नु राजन्नित्थं विदं वेदेरुथापयन्तीति यस्त्वं कथं वेत्थ ब्रह्मबन्धविति।- ऐतरेय ब्राह्मण ७.२७

६१.---यः क्षत्रस्य सोमपीथेन व्यृद्धस्य येन क्षत्रं समृध्यते कथं तं वेदेरुत्थापयन्तीति।-ऐ.ब्रा.७.२८

६२. उक्थं प्राणो वा उक्थं प्राणो हीदं सर्वमुत्थापयति---बृहदारण्यक उपनिषद ५.१३.१

६३. बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवति अथोत्थाता भवति- छान्दोग्योपनिषद ७.८.१

६४. यथा फेनतरंगादि समुद्रादुत्थितं पुनः। समुद्रे लीयते तद्वज्जगन्मय्यनुलीयते।-जाबालदर्शनोपनिषद१०.६

६५. अपानमूर्ध्वमुत्थाप्य प्रणवेन शनैः शनैः।- जाबालदर्शनोपनिषद६.३३

६६. कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं विदुः- जाबलदर्शनोपनिषद६.१४

६७. सर्वभावपदातीतं ज्ञानरूपं निरञ्जनम्। वारिवत्स्फुरितं तस्मिंस्तत्राहंकृति उत्थिता।- योगतत्त्वोपनिषद१०

६८. अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति।-कौशीतकिब्राह्मणारण्यकोपनिषद ३.३

६९. चतुरो मासान्ध्रुवशीलतः स्यात्स यावत्सुप्तोऽन्तरात्मा पुरुषो विश्वरूपः। अन्यानथाष्टौ पुनरुत्थिते ऽस्मिन्स्वकर्मलिप्सुर्विहरेद्वा वसेद्वा।- शाट्यायनीयोपनिषद२०

७०. सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम्।- वराहोपनिषद् २.६४

७१. मुक्तयोः संभवत्येव तुर्यातीतपदाभिधा। व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ।- अन्नपूर्णोपनिषद१.२५

७२. प्रणम्य दण्डवद्भूमावुत्थाय सपुनर्मुनिः। आत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम्।- अन्नपूर्णोपनिषद१.१

७३. मोक्षो मेऽस्त्विति चिन्ताऽन्तर्जाता चेदुत्थितं मनः। मननोत्थे मनस्येष बन्धः सांसारिको दृढः।।- अन्नपूर्णोपनिषद२.२४

७४. अकर्तृकमरङ्गं च गगने चित्रमुत्थितम्। अद्रष्टृकं स्वानुभवमनिद्र स्वप्नदर्शनम्।-महोपनिषद५.५४

७५. उत्थितानुत्थितानेतानिन्द्रचारीन्पुनः पुनः। हन्याद्विवेक दण्डेन वज्रेणेव हरिर्गिरीन्।- महोपनिषद ६.२१

७६. सर्वात्मा समरूपात्मा शुद्धात्मा त्वहमुत्थितः।- तेजोबिन्दूपनिषद ४.३४

७७. उत्थाय प्रणिपत्येशं त्यक्त्वाशेष परिग्रहः। परब्रह्मपयोराशौ प्लवन्निव ययौ तदा।— शुकरहस्योपनिषद १९

७८. उत्थाप्य गां प्रयत्नेन गायत्र्या मूत्रमाहरेत्।- बृहज्जाबालोपनिषद३.६

७९. अपानमूर्ध्वमुत्थाप्य योनिबन्धोऽयमुच्यते। योगतत्त्वोपनिषद १२१

८०. गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य----हंसोपनिषद १

८१. आचारमाचरन्त्येव सुप्तबुद्धवदुत्थिताः।- महोपनिषद ५.३८

८२. उदुम्बराः प्रातरुत्थाय यां दिशमभि प्रेक्षन्ते तदाहृतोदुम्बर बदर नीवारश्यामाकैरग्निपरिचरणं कृत्वा---आश्रमोपनिषद ३

८३. नोत्थापयेत् सुखासीनं शयानं न प्रबोधयेत्। आसीनो गुरुमासीनमभिगच्छेत् प्रतिष्ठितम्।।-शिवोपनिषद ७.३१

८४. यदुत्थितं भवति तत्सर्वं शमय शमय स्वाहा।- वनदुर्गोपनिषद

## उत्पल

१. युवमेतं चक्रथुःसिन्धुषु प्लवमात्मन्वन्तं पक्षिणंतौग्र्यायकम्। — ऋ. १.१८२.५

२. अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम्। तदा रभस्वदुर्हणोतेन गच्छ परस्तरम्।।— ऋ.१०.१५५.३

३. उपप्रवद मण्डूकि वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरःपदः ।।- अथर्ववेद ४.१५.१४

४. अनड्वाहं प्लवमन्वारभध्वं स वो निर्वक्षद्दुरितादवद्यात्।- अथर्व १२.२.४८

५. प्लवो वा एषोऽग्नेर्यत्संयानीर्यत्संयानीरुपदधातिप्लवमेवैतमग्नय उप दधाति — तै.सं. ५.३.१०.२

६. अलज आन्तरिक्ष उद्रो मउद्गुःप्लवस्तेऽपाम्— तै.सं ५.५.२०.१

७. समुद्रं वै एतेऽनवारमपारं प्र प्लवन्ते ये संवत्सरमुपयन्तियद्बृहद्रथंतरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्व र्जेयुस्तादृक्तद्--- — तै.सं ७.५.३.२

८. बृहद्रथन्तरे वै देवानां प्लवस्तद्देवानां प्लवेन समुद्रमर्णवं तरन्ति यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुरेवं तद्----- -काठक सं ३३.५

९. बृहत् पृष्ठम्। प्लवं ब्रह्मसाम। बृहद्रथन्तराभ्यामेवैनमेभ्यो लोकेभ्य उद्धृत्य प्लवेन प्रप्लावयति। परां परावतमेति। न प्रतितिष्ठति।-षड् विंश ब्रा.४.२.१४

१०. यूपम् आप्लावयन्त्यलं कुर्वन्त्यहतेन वसनेनाच्छादयन्ति च।- षड्विंश ब्रा. ५.४.१४

११. अग्निदेवत्यान्यद्भुतानि प्रायश्चित्तानि :- अथ यदास्य पृथिवी तटति,स्फुटति,---- -- -प्लवन्न मज्जति, न निमग्नमुत्प्लवति,--- -षड्विंश ब्रा.६.७.२

१२. सूर्यदेवत्यान्यद्भुतानि प्रायश्चित्तानि : अथ यदास्य मानुषाणामतिधृतिमतिदुःखं वा पर्वता स्फुटन्ति, ----अश्मानःप्लवन्ति,----षड्विंश ब्रा.६.१२.२

१३. एतद्वै फेनस्तप्यते-यदप्स्वावेष्टमानः प्लवते।- श.ब्रा.६.१.३.३

१४. राष्ट्रभृद्भोमः :- आयुवो नाम (वा.सं.१८.३९)।। आयुवाना इव हि मरीचय प्लवन्ते। — श.ब्रा. ९.४.१.८

१५. शतातिरात्र संज्ञक सत्रम् : दुर्विज्ञानं काव्यं देवतानां सोमासोमैर्व्यतिषक्ता प्लवन्ते।।— श.ब्रा.११.५.५.१३

१६. गवामयनीय संवत्सरस्य पुरुषविधोपासनम् : प्लवन्त इव वा अभिप्लवाः। तिष्ठतीव पृष्ठ्य इति। प्लवतइव ह्ययमंगैः। तिष्ठतीवात्मनेति।।— श.ब्रा.१२.२.४.८

१७. कतिमात्र इति-आदेस्तिस्रो मात्रा :, अभ्यादाने हि प्लवते,मकारश्चतुर्थी।-— गोपथ ब्रा.१.१.२७

१८. स इतःस इतो ऽभिप्लवःस इत आत्मा पृष्ठ्यः। प्लवतीवाभिप्लवः। तिष्ठतीव पृष्ठ्यः। प्लवत इव ह्येवमङ्गैः। तिष्ठतीवात्मना।— गोपथ ब्रा.१.५.४

१९. स (गोश्ल) होवाच-होतः कथा ते शस्त्रं विचक्रं प्लवत इति।— गोपथ ब्रा २.६.९

२०. बृहद्रथंतरे सामनी भवत एते वै यज्ञस्य नावौ संपारिण्यौ यद्बृहद्रथंतरेताभ्यामेव तत्संवत्सरं तरति। पादौ वै बृहद्रथंतरे शिर एतदहःपादाभ्यामेव तच्छ्रियं शिरोऽभ्यायन्ति।----- ते उभे न समवसृज्ये य उभे समवसृज्येयुर्यथैव च्छिन्नानौर्बन्धनात्तीरं तीरमृच्छन्ती प्लवेतैवमेव सत्रिणस्तीरं तीरमृच्छन्तःप्लवेरन्य उभेसमवसृज्येयुः। -ऐ.ब्रा. ४.१३

२१. तद्ध तथा शस्यमाने गौश्ल आजगाम स होवाच होतःकथा ते शस्त्रं विचक्रं प्लवत इति- -- -।-ऐब्रा ६.३०

२२. नळं प्लवमारोहैतं नळेन पथोऽन्विहि। स त्वं नळप्लवो भूत्वा संतर प्रतरोत्तर। तै.आ.६.७.२

२३. एकत,द्वित व त्रित का आख्यान : स सम् इन्दुभिः इत्य् एव निधनम् उपैत्। तं पर्जन्योवृष्टयोर्ध्वम् उदप्लावयत्। अभि हि· तद् रथचक्रम् उत्प्लावयांचकार येनापिहित आस।— जै.ब्रा.१.१८४

२४. अग्निर् एष यद् रथन्तरम्।----अथ यो ऽक्षरेषु स्तोब्धि यथा नावा वा प्लवेन वा द्वीपाद् द्वीपं संक्रामेद् एवम् एवैतं समुद्रम् अतितरति।— जै.ब्रा. १.३३२

२५. तद् आहु प्लवम् इव वा एतच् छन्दो यज् जगती, न प्रायणाय।-----— जै.ब्रा.२.३७९

२६. अतिरिक्ता एव तद् अतिरिक्तं ब्रह्मणो रसं दधतो यन्ति। अन्वहं प्लवो भवति, स्वर्गस्यैव लोकस्य समष्ट्यै। ए इत्य् एवान्तरिक्षम् अतिप्लवन्ते।— जै.ब्रा. २.३८५

२७. अथ यद् वो ऽवोचं संवत्सरस्य स्म व्याप्तम् अतिप्लवध्वम् इत्य् अभीवर्तं वा स्म पवमाने कुरुध्वं प्लवं वेत्य् एव वस् तद् अवोचम् इति।-- --अहोरात्रे वाव संवत्सरस्य व्याप्तम् इति। तत् प्लवःकार्यः। अव वै गौःप्लवते, ऽव हस्त्य्, अव पुरुषः, प्लवो नावप्लवते। तद् एतेन प्लवेनानवप्लाविनैतत् संवत्सरस्य व्याप्तम् अतिप्लवामहा इति।---- -— जै.ब्रा. २.४२२

२८. सरमा देवशुनी द्वारा गौ के अन्वेषण हेतु समुद्र के प्लवन का उद्योग : तां होवाच प्लोष्ये त्वागाधा मे भविष्यसीति। प्लवस्व मेति होवाच न ते गाधा भविष्यामीति। सा हावाच्य कर्णौ प्लोष्यमाणा ससार सा हेक्षांचक्रे कथं नु मा शुनी प्लवेत हन्तास्यै गाधासानीति।-----— जै.ब्रा.२.४४१

२९. सो(शर्करस् शिंशुमारः)ऽब्रवीन्-नाहं त्वां स्तोष्यामि। समुद्रे वा ऽहम् अप्स्व् अन्तश्चराम्यउपनिमज्जन्न्, एतावतो ऽहं त्वां स्तुयाम् इति। तं पर्जन्यो वृष्टयोर्ध्वम् उदप्लावयद् धन्वाभि।---- --- — जै.ब्रा.३.१९३

३०. तासु प्लवम्। यो वै समुद्रम् अप्लवःप्रस्नाति नैनं स व्यशनुते, ऽथ यःप्लवी प्रस्नाति स व्यशनुते। समुद्रो वै छन्दोमाः। तद् यत् प्लवं प्लविन एवैतेन। --- - -ते ऽब्रुवन् स्वर्गं लोकं गत्वा- प्लवं वाव नो भूत्वेदं साम स्वर्गं लोकम् अवाक्षीद् इति। तद् एव प्लवस्य प्लवत्वम्।-----— जै.ब्रा.३.१९५

३१. नासद् आसीन् नो सद् आसीत् तदानीं ----। तस्मिन्न् असति सति न कस्मिंश् चन सत्य् ऋतं ज्योतिष्मद् उदप्लवत, सत्यं ज्योतिष्मज् उदप्लवत, तपो ज्योतिष्मद् उदप्लवत। तद् यद् ऋतम् इति वाक् सा, यत् सत्यम् इति प्राणस् सो, यत् तप इति मनस् तत्। — जै.ब्रा.३.३६०

३२. ततो (ऋजीषात्) यो भिन्दुरुत्प्लवते तमुपस्पृशेद्भक्षयेद्वाप्सु धौतस्य सोम देव त इति।– आप.श्रौ.सू.१३.२०.११

३३. उत्प्लुतमृजीषमप्सु धौतस्य ते देव सोमेत्यवघ्रेण भक्षयन्ति।–मानव श्रौ. सू.२.५.४.३१

३४. यस्माद्भीत उदप्रोष्टेत्युत्प्लवमाने जुहुयात्। – मानव श्रौ.सू.३.५.१०

३५.-----स्रुचमृजीषेण पूरयित्वा समुद्रे ते हृदयमप्स्वन्तरित्यप्सूपमारयति देवीराप इत्युपतिष्ठते यो बिन्दुरुत्प्लुतस्तमप्सु धौतस्येत्युपस्पृशे–दवजिघ्रेद्वा----- –वैखानस श्रौत सूत्र १६.२६

३६. शयनपादमुत्पले च। –कौशिक सूत्र ३६.७

३७. प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। –मुण्डकोपनिषद १.२.७

३८. वक्त्रेणोत्पलनालेन वायुं कृत्वा निराश्रयम्। एवं वायुर्ग्रहीतव्य कुम्भकस्येति लक्षणम्।–अमृतनादोपनिषत् १४

३९. योगयुक्त्या तु तद्भस्म प्लाव्यमानं समंततः। शाक्तेनामृतवर्षेण ह्यधिकारान्निवर्तते। अतो मृत्युंजयायेत्थममृतप्लावनं सताम्।--- –शिवाग्निना तनुं दग्ध्वा शक्तिसोमामृतेन यः। प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते---।–बृहज्जाबालोपनिषत् २.१३

४०. छिद्यमानोऽपि न कुप्येत न कम्पेतोत्पलमिव तिष्ठासेत्–।– सुबालोपनिषत् १३

४१. परब्रह्मपयोराशौ प्लवन्निव ययौ तदा। – शुकरहस्योपनिषत् ३.२०

४२. यथैवोत्पलनालेन तोयमाकर्षयेन्नरः। तथैवोत्कर्षयेद्वायुं योगी योगपथे स्थितः।–ध्यानबिन्दु उपनिषत् ३८

४३. यथा च दर्दुरो भाव उत्प्लुत्योत्प्लुत्य गच्छति।। पद्मासनस्थितो योगी तथा गच्छति भूतले। – योगतत्त्वोपनिषत् ५३

४४. मोक्षःपरं ब्रह्म। प्लववदाचरणम्।– निर्वाणोपनिषत्

४५. यत्र निशितासिशतपातन–मुत्पलताडनवत्सोढ–व्यमग्निना दाहो हिमसेचनमिव---महोपनिषत् ४.२६

४६. कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम्। अभ्यासवासना शक्त्या तरन्ति भवसागरम्।– योगशिखोपनिषत् ६.७९

४७. य एतदभिपद्येव गृहीयादथो विस्फुरन्तीव धावन्तीवोत्प्लवंतीवोपश्लिष्यन्तीव न हैवाभिपद्यन्ते।– आर्षेयोपनिषत्

४८. यथैवोपसृत्वरो वार्धिस्तिर्यगुल्ललन्तीभिरिव वीचिभिःशफाभिरेवोप स्कन्दन्नुत्प्लवेदेवं हैवैषोभि–सृत्त्वराणामेव धुर्याणां चंक्रमतामरीणामुत्प्लवतीति।– छागलेयोपनिषत्

४९. दशमेन तु पिण्डेन भावनं प्लावनं तथा।– पिण्डोपनिषत्

**उदक** (अनुद्धृत अंश)

१. अश्विनौ द्वारा समुद्र में भुज्यु की रक्षा : तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः।।– ऋग्वेद १.११६.३

२. इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुञ्जनेजनम्।– ऋ.१.१६१.८

३. श्रोणामेक उदकं गामवाजति।– ऋ.१.१६१.१०

४. अद्भि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती।– ऋ.१.१६४.४०

५. समानमेतदुकमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः।।– ऋ. १.१६४.५१

६. उदप्रुतो मन्दिनो मन्दिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः। दे. अश्विनौ।– ऋ. ४.४५.४

७. पौरं चिद्धयुदप्रुतं पौर पौराय जिन्वथ। दे. अश्विनौ।– ऋ. ५.७४.४

८. अहन् दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च।।– ऋ ६.४७.२१

९. प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः।– ऋ.७.४२.१

१०. तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः।। ऋ.९.१०६.८

११. आ सोता परि षिंचताऽश्वं न स्तोममप्तुरं। वनक्रक्षमुदप्रुतम्।।— ऋ.९.१०८.७

१२. उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः। दे. बृहस्पतिः।— ऋ.१०.६८.१

१३. अधस्पदान्म उद्वदत मण्डूका इवोदकान्मण्डूका उदकादिव।।— ऋ.१०.१६६.५

१४. ये सर्पिषः संस्रवन्ति क्षीरस्य चोदकस्य च।— अथर्ववेद १.१५.४

१५. एको वो देवोऽप्यतिष्ठत् स्यन्दमाना यथावशम्। उदानिषुर्महीरिति तस्मादुदकमुच्यते।।— अ.३.१३.४

१६. चतुरः कुम्भांश्चतुर्धा ददामि क्षीरेण पूर्णां उदकेन दध्ना।— अ.४.३४.६

१७. अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम्। सुखो रथ इव वर्ततां कृत्या कृत्याकृतं पुनः।।— अ.५.१४.१३

१८. तद् वै राष्ट्रमा स्रवति नावं भिन्नामिवोदकम्। ब्रह्माणं यत्र हिंसन्ति तद् राष्ट्रं हन्ति दुच्छुना।— अ.५.१९.८

१९. उदप्रुतो मरुतस्तां इयर्त वृष्टिर्या विश्वा निवतस्पृणाति।— अ.६.२२.३

२०. श्मश्रु वपनम् : आयमगन्त्सविता क्षुरेणोष्णेन वाय उदकेनेहि। आदित्या रुद्रा वसव उन्दन्तु सचेतसः सोमस्य राज्ञो वपत प्रचेतसः।— अ.६.६८.१

२१. यद् वो देवा उपजीका आसिंचन् धन्वन्युदकम्। तेन देव प्रसूतेनेदं दूषयता विषम्।। ऋ. गरुत्मान, दे. वनस्पतिः।— अ.६.१००.२

२२. यथोदकमपपुषोऽपशुष्यत्यास्यम्। एवा नि शुष्य मां कामेनाथो शुष्कास्या चर।।— अ.६.१३९.४।

२३. अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती।।— अ.७.७७.११

२४. अवकोल्बा उदकात्मान ओषधयः। व्यृषन्तु दुरितं तीक्ष्णशृङ्गयः।। अ.८.७.९

२५. अग्निर्होत्रेण प्र णुदे सपत्नांछम्बीव नावमुदकेषु धीरः।। दे.कामः।— अ.९.२.६

२६. ऋचा कुम्भीमध्यग्नौ श्रयाम्या सिंचोदकमव धेह्येनम्। दे.पञ्चोदनो अजः। अ.९.५.५

२७. अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती।— अ.९.१५.२०

२८. प्रजानां प्रजननाय गच्छति प्रतिष्ठां प्रियः प्रजानां भवति य एवं विद्वानुदकमुपसिच्योपहरति।।— अ. ९.९.१०

२९. अव श्वेत पदा जहि पूर्वेण चापरेण च। उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम्।। ऋ. गरुत्मान, दे.तक्षक।— अ.१०.४.४

३०. उत्थापय सीदतो बुध्न एनानद्भिरात्मानमभि संस्पृशन्ताम्। अमासि पात्रैरुदकं यदेतन्मितास्तण्डुलाः प्रदिशो यदीमाः।। दे. ओदनः।— अ.१२.३.३०

३१. यदेनमाह व्रात्योदकमित्यप एव तेनाव रुन्द्धे।।— अ.१५.११.४

३२. अस्यै देवतायै उदकं याचामीमां देवतां वासय --।— अ.१५.१३.१३

३३. उत् त्वा वहन्तु मरुत उदवाहा उदप्रुतः। अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति।।— अ.१८.२.२२

३४. उदप्रुतो न वयो रक्षमाणा----।— अ.२०.१६.१

३५. ऋषियों द्वारा कवष ऐलूष के लिए सरस्वती का उदक पान करने से प्रतिषेध करना, कवष द्वारा अपो नप्त्रीय सूक्त से सरस्वती का आवाहन।-ऐतरेय ब्राह्मण २.१९

३६. गार्हपत्य और आहवनीय के बीच रथ व श्वान के आ जाने पर प्रायश्चित्त कथन : गार्हपत्यादविच्छन्नामुदक धारां हरेत्तन्तुं तन्वन्नजसो भानुमन्विहीत्याहवनीयात्।- ऐतरेय ब्राह्मण ७.१२

३७. प्रह्लादो ह वै कायाधवः। विरोचनं स्वं पुत्रमुदास्यत्। स प्रदरोऽभवत्। तस्मात्प्रदरादुदकं नाऽऽचामेत्।- तैत्तिरीय ब्राह्मण १.५.१०.७

३८. आ वो यन्तूदवाहासो अद्य। वृष्टिं ये विश्वे मरुतो जुनन्ति।— तै.ब्रा.२.५.५.३

३९. स्तोकानामिन्दुं प्रति शूर इन्द्रः। वृषायमाणो वृषभस्तुराषाट्। घृतप्रुषा मधुना हव्यमुन्दन्। मूर्धन्यज्ञस्य जुषतां स्वाहा।।— तै.ब्रा.२.६.८.४

४०. यन्मृन्मयेनापिदध्यात्। पितृदेवत्यं स्यात्। अयस्पात्रेण वा दारुपात्रेण वाऽपिदधाति। तद्धि सदेवम्। उदन्वद्भवति।— तै.ब्रा.३.२.३.१२

४१. एतां ह वै मुण्डिभा औदन्यवः। भ्रूणहत्यायै प्रायश्चित्तिं विदांचकार।— तै.ब्रा.३.९.१५.२

४२. भृगु द्वारा षष्ठम् लोक का दर्शन : पंच नदीः पुष्करिणीः पुण्डरीकिणीर् मधूदकास् स्यन्दमानाः।— जै.ब्रा.१.४२,१.४४

४३. उदपात्रं वैवोदकमण्डलुं वादाय गार्हपत्याद् आहवनीयान् निनयन्न इयात् इदं विष्णुर् विचक्रमे इत्य् एतयैवर्चा।----। जै.ब्रा.१.५२

४४. अथो यत्रैतद् विभिन्नं तद् उदपात्रं वैवोदकमण्डलुं वोपनिनयेत् भूर् भुवस् स्वः इत्य् एताभिर् व्याहृतिभिः।— जै.ब्रा.१.५३

४५. उपावहायोदकम् आचामेद्, उपावहाय तृणान्य् आछिन्द्यात्।---अनडुहो ह लोकं जयति।— जै.ब्रा.२.११३

४६. तेन हैतेन मौण्डिभ उदन्युर् ईज उदन्यूनां राजा।---- अथ ह मौण्डिभ उदन्युस् त्रय्यै विद्यायै कस्सवित आस।— जै.ब्रा.२.२६९

४७. तस्माद् अश्व एकैकं पादम् उदंकन/उदकन् तिष्ठति।— जै.ब्रा.२.२७२

४८. यस्मिन्न एव मे संवत्सरे समाना दास्य् उदकं चौदनं चाहरत् तस्मिन् एव मे संवत्सरे----। जै.ब्रा.२.३५२

४९. सुप्त्वोदकम् आचामेत्। पाप्मानम् एव तद् धते।— जै.ब्रा.२.३७०

५०. स यथा प्र स्पष्टं तृणोदकम् अन्ववस्येत् तादृक् तत्।— जै.ब्रा.३.१७

५१. तम् अब्रवीद् आद्रवन्तं दृष्ट्वा-इमां मे भस्त्राम् उदके प्रास्यत, इमम् अहं तं पश्यामि यो मां प्रत्युच्याति-प्रक्ष्यतीति।— जै.ब्रा.३.१०१

५२. एतेनैव साम्ना च्यवनो भार्गवो यद् यद् अशनं चकमे तत् तद् ध स्म सरस्वत्यै शैशवाद् उदचति।— जै.ब्रा.३.१२८

५३. तम् उ ह स्वयम् एवोपोत्थाय संवृश्योदके प्रचकार।— जै.ब्रा.३.२०१

५४. कुत्सो ह वै म औरवः पुत्रं संवृश्योदके प्राकारीद् इति।— जै.ब्रा.३.२०२

५५. ममता के गर्भ में दीर्घतमा का कथन :---- कथोदन्वः पणायसि।— जै.ब्रा.३.२३९

५६. तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुर् इति वृद्धं ह्य् एतद् अहः।— जै.ब्रा.३.२६६

५७. अथ होवाचामलक-उदस्तोकम् अहं मन्य।-- ---उदकाध्य् एवेदं सर्वं जायते।--।— जै.ब्रा. ३.३५०

५८. ततो य उदस्तोक इमां स प्रविशत्य्, ओषधीर् घृतस्तोको, वनस्पतीन् मधुस्तोकः।— जै.ब्रा.३.३५०

५९.----ताभ्यो अवर्षत्। तत ओदनो ऽजायत। तम् अशित्वोदानन्। स उदनो ऽभवत्। तद् उदनस्योदनत्वम्।--- जै.ब्रा.३.३४६

६०. उपोदको नाम लोको अत्रे विष्टो, मनुष्या गोप्तारो, अग्निर् अधिपतिर्, यद् अर्चिषो रूपं तद् रूपं, अप्सु प्रतिष्ठितः।---- -।— जै.ब्रा.३.३४८

६१. अथो दक्षिणासंस्थो वै पितृयज्ञः तमेवैतदुदक्संस्थं कुर्वन्ति। (दो बार)-गोपथ ब्राह्मण २.१.२५

६२. यदप्रक्षालितयोदकं स्रुचा न्यनैषं सर्पेतरजनांस्तेनाप्रैषं, यत् प्रक्षालितया सर्पपुण्यजनांस्तेन।

यदपरेणाहवनीयमुदकं स्रुचा न्यनैषं गन्धर्वाप्सरसस्तेनाप्रैषम्।— गो.ब्रा.१.३.१२

६३. अथ तमश्मानं उदहरणे अवधाय एतां दिशं हरन्ति। एषा वै नैर्ऋती दिक्।— शतपथ ब्राह्मण ९.१.२.९

६४. सान्नाय्य संपादनम् : अथोत्तमां दोहयित्वा येन दोहयति पात्रेण-तस्मिन्नुदस्तोकमानीय पल्यङ्ग्य, प्रत्यानयति।— श.ब्रा.१.७.१.१८

६५. अथोदकवतोत्तानेन पात्रेणापिदधाति। नेदेनदुपरिष्टान्नाष्ट्रा रक्षांस्यवमृशानिति।— श.ब्रा.१.७.१.२०

६६. मत्स्य द्वारा मनु को निर्देश : तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीत्, यावद् यावदुदकं समवायात् तावत् तावदन्ववसर्पासि।— श.ब्रा.१.८.१.६

६७. मनु द्वारा अवनेजन व मत्स्य को पाना : स होवाच-अपीपरं वै त्वा, वृक्षे नावं प्रतिबध्नीष्व, तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीत्, यावद् यावदुदकं समावायात् तावत् तावदन्ववसर्पासि।— श.ब्रा.१.८.१.६

६८. तस्माद् यद्येनं क्षीरं केवलं पानेऽभ्याभवेत्-उदस्तोकमाश्रोतयितवै ब्रूयात्-शान्त्यै न्वेव रसस्यो चैव सर्वत्वाय।— श.ब्रा.२.३.१.१६

६९. तद्दुग्ध्वाऽधिश्रयति। श्रृतमसदिति। तदाहु : यर्ह्युदन्तं तर्हि श्रृतं तर्हि जुहुयादिति। तद्वै नोदन्तं कुर्यात्, उप ह दहेद् यदुदन्तं कुर्यात्-अप्रजज्ञि वै रेत उपदग्धम्-तस्मान्नोदन्तं कुर्यात्।— श.ब्रा.२.३.१.१४

७०. पितरों के हाथ धुलाना : अथोदपात्रमादायावनेजयति-असाववनेनिक्ष्य इत्येव यजमानस्य पितरम्। असाववनेनिक्ष्वेति पितामहम्। असावनेनिक्ष्वेति प्रपितामहम्। तद् यथा ऽशिष्यते अभिषिञ्चेदेवं तत्।— श.ब्रा.२.४.२.१६, २.४.२.२३

७१. स उदपात्रमादाय अपसलवि त्रिः परिषिञ्चन्पर्येति। स यजमानस्य पितरमवनेजयति-असाववनेनिक्ष्व इति। असाववनेनिक्ष्व इति पितामहम्। असाववनेनिक्ष्व इति प्रपितामहम्।— श.ब्रा.२.६.१.३४

७२. पितृयज्ञः :- अथोदपात्रमादाय पुनः प्रसलवि (प्रदक्षिणा पूर्वक) त्रिः परिषिञ्चन् पर्येति। स यजमानस्य पितरमवनेजयति-असाववनेनिक्ष्व इति। असाववनेनिक्ष्व इति पितामहम्। असाववनेनिक्ष्व इति प्रपितामहम्।--।— श.ब्रा.२.६.१.४१

७३. दीक्षासंस्काराः - अथोत्तरेण शालां परिश्रयन्ति। तदुदकुम्भमुपनिदधाति। तन्नापित उपतिष्ठते। तत्केशश्मश्रु च वपते, नखानि च निकृन्तते।— श.ब्रा.३.१.२.२

७४. (दर्भाणि) प्रच्छिद्योदपात्रे प्रास्यति। तूष्णीमेवोत्तरं गोदानमभ्युनत्ति।---तूष्णीं क्षुरेणाभिनिधाय प्रच्छिद्योदपात्रे प्रास्यति।— श.ब्रा.३.१.२.८

७५. अथाग्रेण राजानं विचिन्वन्ति। तदुदकुम्भ उपनिहितो भवति। तद् ब्राह्मण उपास्ते।— श.ब्रा.३.३.२.५

७६. सोमानयनम् : अथ हैके उदपात्रमुपनिनयन्ति। यथा राज्ञऽआगतायोदकमाहरे-देवमेतदिति वदन्तः। तदु तथा न कुर्यात्। मानुषं ह ते यज्ञे कुर्वन्ति।— श.ब्रा.३.३.४.३१

७७. सोम राजा हेतु आतिथ्येष्टिः - यथा वै देवानां चरणम्। तद्वाऽनुमनुष्याणाम्। तस्मान्मानुषे यावन्न विमुञ्चते (यान आदि को त्यागता है) -नैवास्मै तावदुदकं हरन्ति नापचितिं कुर्वन्ति। अनागतो हि स तावद्भवति। अथ यदैव विमुञ्चते-अथास्माऽउदकं हरन्ति, अथापचितिं कुर्वन्ति। तर्हि हि स आगतो भवति। तस्माद्विमुच्यैव प्रपाद्य (शाला में प्रवेश के पश्चात्) गृह्णीयात्।— श.ब्रा.३.४.१.५

७८. पशु के हृदय शूल का उपगूहनः अथ एवाभ्यवेत्य यत्र शुष्कस्य चार्द्रस्य च सन्धिः स्यात् - तदुपगूहेत्। यद्यु ऽअभ्यवायनाय ग्लायेद्-अग्रेण यूपमुदपात्रं निनीय यत्र शुष्कस्य चार्द्रस्य च सन्धिर्भवति-तदुपगूहति।— श.ब्रा. ३.८.५.१०

७९. नैर्ऋतीष्टका चयनम् : अथान्तरेणोदचमसं (स्वयं व इष्टकाओं के बीच) निनयति। वज्रो वा आपः। वज्रेणैव तत् पाप्मानं निर्ऋतिमन्तर्धत्ते।— श.ब्रा. ७.२.१.१७

८०. अपां निनयनं: अथोदचमसान्निनयति। एतद्वै देवा अब्रुवन्-चेतयध्वमिति।----।- श.ब्रा.७.२.४.१

८१. कृष्ट और अकृष्ट के निषेचन का वर्णन: त्रीन्कृष्टे चाकृष्टे च निनयति----यद्वेवोदचमसान्निनयति। एतद्वाऽअस्मिन्देवा: संस्करिष्यन्त: पुरस्तादपोऽदधु:।---त्रीनुदचमसान्निनयति। त्रिवृदग्नि:।----। श.ब्रा.७.२.४.७

८२. द्वादशोदचमसान्कृष्टे निनयति। द्वादश मासा: संवत्सर:। संवत्सरोऽग्नि:।----स व कृष्टे निनयति। प्राणेषु तदपो दधाति। स यत् कृष्टे ऽएव निनयेत्-नाकृष्टे प्राणेष्वेवाप: स्यु:-नेतरस्मिन्नात्मन्। अथ यदकृष्टऽएव निनयेत्-न कृष्टे, आत्मन्नेवाप: स्यु:-न प्राणेषु। कृष्टे चाकृष्टे च निनयति।---- -पञ्चदशोदचमसान्निनयति। पंचदशो वै वज्र:।— श.ब्रा.७.२.४.९

८३. पञ्चदशोदचमसान्निनयति, पञ्चदशभिर्ऋग्भिर्वपति-तत्त्रिंशत्। त्रिंशदक्षरा विराट्। विराडु कृत्स्नमन्नम्।— श.ब्रा.७.२.४.२५

८४. अथातो निरुक्तानिरुक्तानामेव।----तूष्णीमुदचमसान्निनयति, यजुषा वपति।— श.ब्रा. ७.२.४.२९

८५. निधायोदहरणं त्रिर्विपल्ययते (प्रदक्षिणा करता है)।---— श.ब्रा.९.१.२.६

८६. आठ धिष्ण्याओं का चयन :----क्षत्रं हैता अपां-या: खातेन यन्ति। अथ हैता विशो-यानीमानि वृथोदकानि। स यदमुं खातेन परिश्रयति-क्षत्रे तत् क्षत्रं दधाति।— श.ब्रा. ९.४.३.९

८७. यथा शुष्कं स्थाणुमुदकेनाभिषिञ्चेत्-तादृक्तत्। — श.ब्रा.९.५.२.१४

८८. दर्शपूर्णमास: :- अथ यदाज्यहविष: प्रयाजा भवन्ति, तस्मात्कुमारस्य रेत: सिक्तं न संभवति, उदकमिव भवति; उदकमिव ह्याज्यम्। अथ यन्मध्ये यज्ञस्य दध्ना पुरोडाशेनेति चरन्ति, तस्मादस्य मध्यमे वयसि सम्भवति, द्रप्सीवैव भवति, द्रप्सीव हि रेत:। अथ यदाज्यहविष एवानुयाजा भवन्ति, तस्मादस्य पुनरुत्तमे वयसि न सम्भवति, उदकमिव भवति, उदकमिव ह्याज्यम्।— श.ब्रा.११.४.१.१५

८९. पञ्च महायज्ञ ब्राह्मणम् : अहरहर्भूतेभ्यो बलिं हरेत्।---- अहरहर्दद्यादोदपात्रात्। तथैतं मनुष्य यज्ञं समाप्नोति। अहरह: स्वधा कुर्यादोदपात्रात्। तथैतं पितृयज्ञं समाप्नोति।— श.ब्रा.११.५.६.२

९०. अथ यत्रावभिन्नं स्यात्। तदुदस्थालीं वै वा उदकमण्डलुं वा निनयेत्। यद्वै यज्ञस्य रिष्टम्। यदशान्तम्। आपो वै तस्य सर्वस्य शान्ति:।— श.ब्रा.१२.४.१.८

९१. उदस्थालीं वैवोदकमण्डलुं वाऽऽदाय। गार्हपत्यादंग्र आहवनीयान्निनयन्नियात्। इदं विष्णुर्विचक्रमे इत्येतयैवर्चा।— श.ब्रा.१२.४.१.५

९२. एतां ह वै मुण्डिभ औदन्यो ब्रह्महत्यायै प्रायश्चित्तिं विदाञ्चकार।-— श.ब्रा.१३.३.५.४

९३. अश्वमेधीय प्रायश्चित्तम् : अथ यद्युदके म्रियेत। वारुणं यवमयं चरुमनुनिर्वपेत्। वरुणो वा एतं गृह्णाति। यो ऽप्सु म्रियते।— श.ब्रा.१३.३.८.५

९४. अथाष्टमऽहन्नेवमेव।----मत्स्य: साम्मदो राजेत्याह। तस्योदकेचरा विश:। त इम आसत इति। मत्स्याश्च मत्स्यहनश्चोपसमेता भवन्ति। तानुपदिशति। इतिहासो वेद: सोऽयमिति।— श.ब्रा.१३.४.३.१२

९५. प्रजापतौ त्वा देवतायामुपोदके लोके निदधामि, असौ इति नाम गृह्णाति। अयं वै लोक उपोदक:।---श.ब्रा.१३.८.३.३

९६. यत्रोदकं भवति। तत् स्नान्ति। सुमित्रिया न आप ओषधय: सन्तु, इत्यञ्जलिना ऽपउपाचति----श.ब्रा.१३.८.४.५

९७. अथ यन्मनुष्यान् वासयते। यदेभ्योऽशनं ददाति। तेन मनुष्याणाम्। अथ यत्पशुभ्यस्तृणोदकं विन्दति। तेन पशूनाम्।- — श.ब्रा.१४.४.२.२९

९८. स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत। न हास्य उद्ग्रहणायेव स्यात्।----(इसी प्रकार विज्ञान घन है)।— श.ब्रा.१४.५.४.१२

९९. पुत्रमन्थकर्मब्राह्मणम् : अथ यदि उदक आत्मानं पश्येत्। तदभिमन्त्रयेत्-मयि तेज इन्द्रियं यशो द्रविणं सुकृतं।— श.ब्रा.१४.९.४.६

१००. अथ य इच्छेत। पुत्रो मे श्यामो लोहिताक्षो जायेत।---उदौदनं पाचयित्वा। सर्पिष्मन्तमश्नीयात्।--- अथ य इच्छेत। दुहिता मे पण्डिता जायेत।---- तिलौदनं पाचयित्वा। सर्पिष्मन्तमश्नीयाताम्---- श.ब्रा.१४.९.४.१५

१०१. अथैनमुप्तकेशश्मश्रुं निकृत्तनखमुद-कुम्भेनाभ्यवनयन्वाचयतीमा म आपः शिवाः सन्तु दुष्कृतं प्रवहन्तु मे।---बौधायन श्रौत सूत्र २.८

१०२.--- -अस्मिन्नेव चर्मण्युलूखलमुसले निधायावहन्त्यथैतेनैव पात्रेण चतुर उदपात्रानानयदि यदि वीडिता स्थाली भवति यद्यु वा अवीडिता पञ्च वा भूयसो वा स समोदकः संपद्यते।-बौ.श्रौ.सू.२.१३

१०३. अथ प्रतिप्रस्थाता पत्नीमुदानयत्युदक-मण्डलुमुत्थाप्य अथैनमादित्यमुदीक्षयति-— बौ.श्रौ.सू.४.६

१०४. मण्डलेष्टकामुपदधाति पृथिव्युदपुरमन्त्रेन विष्टेति---— बौ.श्रौ.सू.१०.३१

१०५. अथ प्रतिप्रस्थाता पत्नीमुदानयत्युदक-मण्डलुमुत्थाप्य सानुपूर्वं पशूनां प्राणानाप्याययति--- बौ.श्रौ.सू.११.५

१०६. यूपस्य प्रोक्षण इति।----हिरण्यमुदपात्र-मित्येतत्संनिधाय यूपं प्रोक्षेत्-बौ.श्रौ.सू.२०.२६

१०७. संसव इति। यत्र क्वच नाव्या वा नदी स्यादन्तरेणोदयक्ष्मवती वासंसवस्तत्रेति बौधायनो---- बौ.श्रौ.सू.२३.५

१०८. आख्यातमुदकान्तस्य प्रत्यसनम्।-बौ.श्रौ.सू. २३.१६

१०९. उदपात्रेणावनेजयत्यपसव्यं सव्येन वोद्धरणसामर्थ्यात्। असाववनेनिक्ष्वेति यजमानस्य पितृप्रभृत्रीन्।-- -कात्यायन श्रौत्र सूत्र ४.१.९

११०. आहवनीयं पर्युक्ष्योदधारां निनयत्या-गार्हपत्यात्।— का.श्रौ.सू.४.१३.१६

१११. मांसस्त्र्यनृतानि वर्जयेदुदकाश्यवायञ्च (उदकप्रवेशञ्च) प्रागवभृथात्।—का.श्रौ.सू.५.२.२२

११२. आ मुष्टिविसर्गादुदकार्यस्ततः।— का.श्रौ.सू. ८.१.९

११३. प्रत्यगेकनानयुग्मानुदहरणांस्त्रिप्रभृत्या-पञ्चदशभ्यः— का.श्रौ.सू.९.२.२३

११४.------चतुर्थे अरणिभ्यां मन्थनं चोद्गातुरूरौ होमश्च। पञ्चमे सावकयोदपात्र्या।— कात्यायन श्रौ.सू. १२.३.११

११५. कृषि कर्म : या ओषधीरिति तृचैर्वपत्युदपात्रवत्।— का.श्रौ.सू. १७.३.७

११६. आशूलाभिमन्त्रणात्कृत्वोदकाधिष्ठान-प्रभृत्यावभृथेष्टेः।— का.श्रौ.सू. १९.५.१२

११७. वडवाभ्यो वारणम्। प्रस्नेयाद्योदकात्।— का.श्रौ.सू. २०.२.१३

११८. दक्षिणतः कुटिले कर्षू खात्वा क्षीरोदकाभ्यां पूरयन्ति सप्तोत्तरतः प्राचीरुदकस्य।— का.श्रौ.सू. २१.४.२१

११९. नावभृथं सरस्वत्याम्। परिपार्श्वेषूदकेषु।— का.श्रौ.सू. २४.६.२३

१२०. त्रिरुद्धृतश्चेदाहवनीयो ऽनुगच्छेदुदक् स्थानान्युपलिप्य निर्मथ्य सकृदुद्धृते तस्मिन्त्सायम्प्रातर्होममेके।— का.श्रौ.सू. २५.३.३

१२१. स्पृष्ट्वोदकं होतृषदनमभिमन्त्रये ताहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत्पाकतरः इति।— आश्वलायन श्रौत सू. १.३.३०

१२२. पिता वा एषो ऽग्नीनां यद्दक्षिणः पुत्रो गार्हपत्यः पौत्र आहवनीयः तस्मादेवं पर्युक्षेत्।— आ.श्रौ.सू. २.२.१३

१२३. मेक्षणमनुप्रहृत्य प्राचीनावीती लेखां त्रिरुदकेनोपनयेच्छुन्धन्तां पितरः शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहा इति।— आ.श्रौ.सू. २.६.१४

१२४. अथास्या ऊधसि च मुखे चोदपात्रमुपोद्गृह्य दुग्ध्वा ब्राह्मणं पाययेत्---।— आ.श्रौ.सू. ३.११.३

१२५. संस्थितायां पादानुदकान्ते ऽवदध्युर्नमो वरुणायाभिष्ठितो वरुणस्य पाश इति।— आ.श्रौ.सू. ६.१३.८

१२६. अनुवक्ष्यमाणेऽपराजितायां दिश्यग्निं प्रतिष्ठाप्यासिमुदकमण्डलुमश्मानम् इत्युत्तरतोऽग्नेः कृत्वा वत्सतरीं प्रत्यगुदगसंश्रवणे बद्ध्वा।— आ.श्रौ.सू. ८.१४.१२

१२७. अष्टमे अहनि मत्स्यः साम्मदस्तस्योदकचरा विशस्त इम आसत।— आ.श्रौ.सू १०.७.८

१२८. तल्पे वोदके वा विवाहे वा मीमांस्यमाना द्वितीयम् — आ.श्रौ.सू. ११.२.६

१२९. ऋत सत्याभ्यां त्वा पर्युक्षामीति जपित्वा पर्युक्षेत्त्रिस्त्रिरेकैकं पुनः पुनरुदकमादाय— आ.श्रौ.सू. २.२.११

१३०. यज्ञस्य सन्ततिरसि यज्ञस्य त्वा सन्तत्यै नयानीति गार्हपत्यात्सन्ततामुदधारामाहवनीयात्।— शांखायन श्रौतसूत्र २.६.१२

१३१. ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत न पितृनित्युदशेषं निनीय।— शां.श्रौ.सू. ४.५.३

१३२. आपो हि ष्ठा सना च सोमेत्युदकं स्पृशन्ति-----।— शां.श्रौ.सू.४.१५.३

१३३. असावेतत्त इत्येकमुदकांजलिं प्रदाय।— शां.श्रौ.सू. ४.१५.४

१३४. मदन्तीभिरुदकार्थोऽत ऊर्ध्वमाग्नीषोम-प्रणयनात्।— शां.श्रौ.सू. ५.६.९

१३५. उदप्रुत इति शस्त्वा।—शां.श्रौ.सू. ९.३.४

१३६. उदप्रुत इति चतुर्थे अहनि।— शां.श्रौ.सू. १२.१२.९

१३७. अवभृथ : कृष्णाजिनस्य दक्षिणं पूर्वपादमुदकेऽवधाय प्रत्याहरन्ति वसनस्य वा दशाम्।— शां.श्रौ.सू. १५.१३.१५

१३८. अथैनमुदकेऽभिप्रगाह्य यदास्योदकं मुखमास्यन्देताथास्मा अध्वर्युर्मूर्धन्यश्वतेदनिं जुहोति भ्रूणहत्यायै स्वाहेति।— शां.श्रौ.सू. १६.१८.१९

१३९. दुर्भिक्षं देवलोकेषु। मनूनामुदकं गृहे। एता वाचः प्रवदन्तीः। वैद्युतो यान्ति शैशिरीः।— तैत्तिरीय आरण्यक १.४.३

१४०. समानमेतदुदकम्। उच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति। दिवं जिन्वन्त्यग्नयः।।— तै.आ. १.९.५

१४१. त्युग्रो ह भुज्युं-------अन्तरिक्ष-प्रुद्भिरपोदकाभिः।— तै.आ. १.१०.२

१४२. बृहस्पतिश्च सविता च। विश्वरूपैरिहाऽगताम्। रथेनोदकवर्त्मना। अप्सुषा इति तद्वयोः।।— तै.आ. १.१२.५

१४३. न कूर्मस्याश्नीयात्। नोदकस्याघातुकान्येन-मोदकानि भवन्ति। अघातुका आपः।----।— तै.आ. १.२६.७

१४४. त्रिषवणमुदकोपस्पर्शी। चतुर्थकालपान-भक्तः स्यात्— तै.आ. १.३२.१

१४५. (हे प्रेत शरीर!) यं ते अग्निममन्थाम वृषभायेव पक्तवे। इमं तं शमयामसि क्षीरेण चोदकेन च।— तै.आ.६.४.१

१४६. उद्वनावुदकानीवापास्मत्स्यन्दतामघम्। अप नः शोशुचदघम्।— तै.आ. ६.११.२

१४७. (गौ के लिए) पिबतूदकं तृणान्यत्तु। ओमुत्सृजत।— तै.आ. ६.१२.१

१४८. तद् यत्रैव विरिष्टिं स्यात् तत्राग्नीनुपसमाधाय शान्त्युदकं कृत्वा पृथिव्यै श्रोत्राय इति त्रिरेवाग्नीन् संप्रोक्षति-— गोपथ ब्राह्मण १.१.१४

१४९. निरंगुष्ठे पाणावमृतमस्यमृतोपस्तरण-स्यमृताय त्वोपस्तृणामीति पाणावुदकमानीय जीवा स्थ इति सूक्तेन त्रिराचामति।— गो.ब्रा.१.१.३९

१५०. न श्मशानमातिष्ठेत्। चेदभितिष्ठेदुदकं हस्ते कृत्वा यदीदमृतुकाम्येत्यभिमन्त्र्य जपन् संप्रोक्ष्य परिक्रामेत्, समयायोपरिव्रजेत्।— गो.ब्रा.१.२.७

१५१. स (शंयुः आथर्वणः)खलु शान्त्युदकं चकार (अश्वस्य) आथर्वणीभिश्चाङ्गिरसीभिश्च चातनैर्मातृनामभिर्वास्तोष्पत्यैरिति शमयति।-- गो.ब्रा.१.२.१८

१५२. यथा भिन्ना नौरगाधे महत्युदके संप्लवेद्-----एवं खल्वपि यज्ञश्छिन्नभिन्नो ऽपध्वस्त-----— गो.ब्रा.२.२.५

१५३. उदप्रुतो न वयो रक्षमाणाः इति बार्हस्पत्यं सांशंसिकम्।— गो.ब्रा.२.४.१६

१५४. दक्षिणतः कशिपूपबर्हणमाञ्जनमभ्यञ्जनमुदकुम्भमित्येकैकश आसादयति।— आप. श्रौ. सू. १.८.२

१५५. मार्जयन्तां मम पितरो मार्जयन्तां मम पितामहा मार्जयन्तां मम प्रपितामहा इत्येकस्म्यायां त्रीनुदकाञ्जलीन्निनयति।— आप.श्रौ.सू.१.८.१०

१५६. आज्यलेपान्प्रक्षाल्य सस्रुवे जुहूपभृतावध्वर्युरादत्ते वेदं होता स्म्यमाज्यस्थालीं उदकमण्डलुं चाग्नीध्रः।— आप.श्रौ.सू. ३.८.५

१५७. चतुर्षूदपात्रेषु (ब्रह्मोदनं) पचति। न प्रक्षालयति न प्रस्रावयति। क्षीरे भवतीत्येके। जीवतण्डुलमिव श्रपयतीति विज्ञायते।— आप.श्रौ.सू.५.५.४

१५८. उदकुम्भः प्रोक्षणीभाजनं भवति (कुम्भे एव प्रोक्षण्यः संस्क्रियन्ते स्थाप्यन्ते च)। — आप.श्रौ.सू. ८.१३.१७

१५९. दक्षिणतः कशिपूपबर्हणमाञ्जनमभ्यञ्जनमुदकुम्भमित्येकैकश आसाद्य वेदं निधाय सामिधेनीभ्यः प्रतिपद्यते।— आप.श्रौ.सू.८.१४.१६

१६०. उदकुम्भमादाय यजमानः शुन्धन्तां पितर इति त्रिः प्रसव्यं वेदिं परिषिंचन्पर्येति।— आप.श्रौ.सू.८:१६.४

१६१. जघनेन वेदिकमन्तर्वेदि वोदकशुल्बं संनहनं स्तृणीयात्।— आप.श्रौ.सू.९.२.२

१६२. उदकुम्भं राजानं सोमविक्रयिणमिति सर्वतः परिश्रित्योत्तरेण द्वारं कृत्वा विचित्यः सोमा३ इत्युक्तम्।— आप.श्रौ.सू.१०.२०.१४

१६३.---दक्षिणतो दर्भेषु निषाद्योत्तरत उदपात्रमुपनिधाय तस्मिन्नेकविंशतिं यवान्दर्भ-पुञ्जीलांश्चावधाय जीवा नाम स्थ— आप.श्रौ.सू. १४.२०.८

१६४. यत्किंच प्रवर्ग्य उदककृत्यं मदन्तीभिरेक तत्क्रियते। नैनं स्त्री प्रेक्षते न शूद्रः। आप.श्रौ.सू. १५.२.९

१६५. उदकुम्भमादायाध्वर्युर्वल्गुरसि शंयुधाया इति त्रिः प्रदक्षिणमुत्तरवेदिं परिषिंचन्पर्येति।— आप.श्रौ.सू. १५.१४.४

१६६. अवान्तरदीक्षा :- पर्वण्युदगयन आपूर्यमाणपक्षस्य वा पुण्ये नक्षत्रे केशश्मश्रु वापयित्वा----— आप.श्रौ.सू.१५.२०.२

१६७. अग्निचयनम् : पञ्चदशोदपात्रान्निनयति। द्वादश कृष्टे त्रीनकृष्टे।-----— आप.श्रौ.सू. १६.१९.१०

१६८. अग्निचयनम् : उदकुम्भमादायाध्वर्युरश्मन्नूर्जमिति त्रिः प्रदक्षिणमग्निं परिषिंचन्पर्येति।— आप.श्रौ.सू.१७.१२.४

१६९. प्रतियुतो वरुणस्य पाश इत्युदकान्तं प्रत्यस्यति।— आप.श्रौ.सू.१९.१०.५

१७०. मार्जालीयन्यन्ते अष्टौ दासकुमार्य उदकुम्भैर्निकल्पन्ते।— आप.श्रौ.सू. २१.१८.७

१७१. अत्रैता दासकुमार्य उदकुम्भानधि निधाय त्रिः प्रदक्षिणं मार्जालीयं परिनृत्यन्ति।--- — आप.श्रौ.सू.२१.१९.१८

१७२. अत्रैता दासकुमार्य उदकुम्भानुपनिनीय यथार्थं गच्छन्ति।— आप.श्रौ.सू.२१.२०.५

१७३. आज्यमन्थं ब्राह्मणः पयोमन्थं राजन्यो दधिमन्थं वैश्य उदमन्थं शूद्रः।— आप.श्रौ.सू.२२.२६.१

१७४. द्वितीयं यांस्तल्प उदके विवाहे वा मीमांसेरन्।— आप.श्रौ.सू.२३.१.१ ५

१७५. अथ सपिण्डीकरणम्।---- - चत्वार्युदपात्राणि सतिलगन्धोदकानि कृत्वा। त्रीणि पितृणामेकं प्रेतस्य।----शाङ्खायन गृह्यसूत्र ४.३.१

१७६. सीमन्तोन्नयनम्: उदपात्रे ऽक्षतानवनिनीय विष्णुर्योनिं कल्पयतु, राकामहमिति। षड्ऋचेन पाययेत्।-शाङ्खायन गृह्यसूत्र १.२२.१२

## उदय

१. एषायुक्त परावतः सूर्यस्योदयनादधि। शतं रथभिः सुभगोषा इयं व यात्यभि मानुषान्।।— ऋ.१.४८.७

२. यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य।।— ऋ.१.१०८.१२

३. प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ् विश्वं स्वर्दृशे।।— ऋ.१.५०.५

४. अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्।— ऋ.१.११५.६

५. उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत्। देवो नो अत्र सविता न्वर्थं प्रासावीद् द्विपत् प्र चतुष्पदित्यै।।— ऋ.१.१२४.१

६. अबोध्यग्निर्ज्म उदेति सूर्यो व्युषाश्चन्द्रा मह्यावो अर्चिषा।— ऋ.१.१५७.१

७. यदक्रन्दः प्रथमं जायमान उद्यन् त्समुद्रादुत वा पुरीषात्। (अश्व)— ऋ.१.१६३.१

८. समानमेतदुकमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः।।— ऋ.१.१६४.५१

९. उत् पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा। अदृष्टान् त्सर्वाञ्जम्भयन् त्सर्वाश्च यातुधान्यः।।— ऋ.१.१९१.८

१०. ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन् तदुदीयुराविशम्।।— ऋ.२.२४.६

११. त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः।— ऋ.३.१५.२

१२. तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः।।— ऋ.३.३१.४

१३. यातमश्विना सुकृतो दुरोणमुत् सूर्यो ज्योतिषा देव एति।।— ऋ.४.१३.१

१४. यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः।— ऋ.५.५४.१०

१५. हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य।— ऋ.५.६२.८

१६. प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य।— ऋ.५.६९.३

१७. उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य। (अश्विनौ)— ऋ.५.७६.३

१८. यज्ञस्य वा निशितिं वोदितिं वा तमित् पृणक्षि शवसोत राया।। (अग्नि)— ऋ.६.१५.११

१९. उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम्।— ऋ.६.५१.१

२०. आ देवो ददे बुध्न्या वसूनि वैश्वानर उदिता सूर्यस्य।— ऋ.७.६.७

२१. सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम्। ततो ह मान उदियाय मध्यात् ततो जातमृषिमाहुर्वसिष्ठम्।।— ऋ.७.३३.१३

२२. शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु।— ऋ.७.३५.८

२३. उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्। उतोदिता मघवन् त्सूर्यस्य वयं देवानां सुमतौ स्याम।।— ऋ.७.४१.४

२४. यदद्य सूर्य ब्रवोऽनागा उद्यन् मित्राय वरुणाय सत्यम्। वयं देवत्रादिते स्याम तव प्रियासो अर्यमन् गृणन्तः।।— ऋ.७.६०.१

२५. एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन्। विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन्।।— ऋ.७.६०.२

२६. उद् वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान्। अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत।।— ऋ.७.६१.१

२७. उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम्। चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक् तमांसि।।— ऋ.७.६३.१

२८. उद्वेति प्रसवीता जनानां महान् केतुरर्णवः सूर्यस्य।— ऋ.७.६३.२

२९. विभ्राजमानः उषसामुपस्थाद् रेभैरुदेत्यनुमद्यमानः।— ऋ.७.६३.३

३०. दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः।— ऋ.७.६३.४

३१. प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः।।— ऋ.७.६३.५

३२. प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम्।— ऋ.७.६५.१

३३. यदद्य सूर उदिते ऽनागा मित्रो अर्यमा। सुवाति सविता भगः।।— ऋ.७.६६.४

३४. प्रति वां सूर उदिते मित्रं गृणीषे वरुणम्। अर्यमणं रिशादसम्।।— ऋ.७.६६.७

३५. तद् वो अद्य मनामहे सूक्तैः सूर उदिते।— ऋ.७.६६.१२

३६. उदु त्यद् दर्शतं वपुर्दिव एति प्रतिह्वरे। यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम्।।— ऋ.७.६६.१४

३७. तानीदहानि बहुलान्यासन् या प्राचीनमुदिता सूर्यस्य।— ऋ.७.७६.३

३८. उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत्। तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि।।— ऋ.७.८८.२

३९. इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम्। यथा नातः पुनरेकश्चनोदयत् तद् वामस्तु सहसे मन्युमच्छवः।।— ऋ.७.१०४.३

४०. मम त्वा सूर उदिते मम मध्यंदिने दिवः। मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत।।— ऋ. ८.१.२९

४१. हवे त्वा सूर उदिते हवे मध्यंदिने दिवः। जुषाण इन्द्र सप्तिभिर्न आ गहि।।— ऋ.८.१३.१३

४२. यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध। यन्निम्रुचि प्रबुधि विश्ववेदसो यद् वा मध्यंदिने दिवः।।— ऋ.८.२७.१९

४३. यदद्य सूर उदिते यन्मध्यंदिन आतुचि। वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे।।— ऋ. ८.२७.२१

४४. नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे।।— ऋ. ८.४१.२

४५. सोमस्य मित्रावरुणादिता सूर आ ददे। तदातुरस्य भेषजम्।।— ऋ.८.७२.१७

४६. उद्धेदभि श्रुतामघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य।।— ऋ.८.९३.१

४७. उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति।— ऋ.८.१०३.११

४८. सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात् समजग्मिरन्ते। नव पश्चातात् स्थिविमन्त आयन् दश प्राक् सानु वि तिरन्त्यश्नः।।— ऋ.१०.२७.१५

४९. देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन्।— ऋ.१०.२७.२३

५०. विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्यग्निं समिधानमीमहे।।— ऋ.१०.३५.८

५१. विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः।।— ऋ.१०.३७.२

५२. मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्। मायामू तु यज्ञियानामेतामपो यत् तूर्णिश्चरति प्रजानन्।।— ऋ.१०.८८.६

५३. त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत् साशनानशने अभि।— ऋ.१०.९०.४

५४. उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः।।— ऋ.१०.१०३.१०

५५. दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन।— ऋ.१०.१०८.११

५६. यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम।।— ऋ.१०.१२१.६

५७. अनु सूर्यमुदयतां हृद्द्योतो हरिमा च ते। गो रोहितस्य वर्णेन तेन त्वा परि दध्मसि।।-अथर्व १.२२.१

५८. उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः। ये अन्तः क्रिमयो गवि।।— अ.२.३२.१

५९. आ त्वा गन् राष्ट्रं सह वर्चसोदिहि प्राङ् विशां पतिरेकराट् त्वं वि राज।— अ.३.४.१

६०. उतोदितौ मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम।।— अ.३.१६.४

६१. उद्धर्षन्तां मघवन् वाजिनान्युद् वीराणां जयतामेतु घोषः।— अ.३.१९.६

६२. तव व्रते नि विशन्ते जनासस्त्वय्युदिते प्रेरते चित्रभानो।— अ.४.२५.३

६३. अहं तमस्य नृभिरग्रभं रसं तमस इव ज्योतिरुदेतु सूर्यः।।— अ.५.१३.३

६४. उत् पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा।— अ.५.२३.६

६५. उत् सूर्यो दिव एति पुरो रक्षांसि निजूर्वन्। आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा।।— अ.६.५२.१

६६. संप्रेद्धो अग्निर्जिह्वाभिरुदेतु हृदयादधि।।— अ.६.७६.१

६७. यद् देवा देवान् हविषायजन्तामर्त्यान् मनसामर्त्येन। मदेम तत्र परमे व्योमन् पश्येम तदुदितौ सूर्यस्य।।— अ.७.५.३

६८. यथा सूर्यो नक्षत्राणामुद्यंस्तेजांस्याददे। एवा स्त्रीणां च पुंसां च द्विषतां वर्च आ ददे।। यावन्तो मा सपत्नानामायन्तं प्रतिपश्यथ। उद्यन्त्सूर्य इव सुप्तानां द्विषतां वर्च आ ददे।।— अ.७.१४.१

६९. अस्मै मृत्यो अधि ब्रूहीमं दयस्वोदितोयमेतु।— अ.८.२.८

७०. इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम्। यतो नैषां पुनरेकश्चनोदयत् तद् वामस्तु सहसे मन्युमच्छवः।।— अ.८.४.३

७१. वत्सौ विराजः सलिलादुदैतां तौ त्वा पृच्छामि कतरेण दुग्धा।।— अ.८.९.१

७२. ततः षष्ठादामुतो यन्ति स्तोमा उदितो यन्त्यभि षष्ठमह्नः।।— अ.८.९.६

७३. उद्यन्नादित्यो द्रविणेन तेजसा नीचैः सपत्नान् नुदतां मे सहस्वान्।।— अ.९.२.१५

७४. यो वा उद्यन्तं नामर्तुं वेद। उद्यतीमुद्यतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते। एष वा उद्यन्नामर्तुर्यदजः पञ्चौदनः।।— अ.९.५.३५

७५. तस्मा उद्यन्त्सूर्यो हिङ्कृणोति संगवः प्र स्तौति। मध्यंदिन उद्गायत्यपराह्णः प्रति हरत्यस्तंयन् निधनम्।— अ.९.१०.४

७६. उद्यन्नादित्य रश्मिभिः शीर्ष्णो रोगमनीनशोऽङ्गभेदमशीशमः।।— अ.९.१३.२२

७७. यस्त्वोवाच परेहीति प्रतिकूलमुदाय्यम्। तं कृत्येऽभिनिवर्तस्व मास्मानिच्छो अनागसः।।— अ. १०.१.७

७८. राद्धिः समृद्धिर्व्यृद्धिर्मतिरुदितयः कुतः।।— अ.१०.२.१०

७९. यतः सूर्य उदेत्यस्तं यत्र च गच्छति। तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किं चन।।— अ.१०.८.१६

८०. येन देवा ज्योतिषा द्यामुदायन् ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम्। तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम्।।— अ.११.१.३७

८१. तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति।।— अ.१२.१.१५

८२. उद्यंस्त्वं देव सूर्य सपत्नानव मे जहि। अवैनानश्मना जहि ते यन्त्वधमं तमः।।— अ.१३.१.३२

८३. प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः। प्रत्यङ् विश्वं स्वर्दृशे।।— अ.१२.२.२०

८४. केतुमानुद्यन्त्सहमानो रजांसि विश्वा आदित्य प्रवतो वि भासि।।— अ.१३.२.२८

८५. चित्रं देवानां केतुरनीकं ज्योतिष्मान् प्रदिशः सूर्य उद्यन्।— अ.१३.२.३४

८६. स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन्।— अ.१३.३.१३

८७. पश्चात् प्राञ्च आ तन्वन्ति यदुदेति वि भासति। रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः।।— अ.१३.४.७

८८. उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि। द्विषंश्च मह्यं रध्यतु मा चाहं द्विषते रधं तवेद् विष्णो बहुधा वीर्याणि।— अ.१७.१.६

८९. उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि। यांश्च पश्यामि यांश्च न तेषु मा सुमतिं कृधि तवेद् विष्णो बहुधा वीर्याणि।— अ.१७.१.७

९०. उद्यते नम उदायते नम उदिताय नमः। विराजे नमः स्वराजे नमः सम्राजे नमः।।— अ.१७.१.२२

९१. अग्निर्मा गोप्ता परि पातु विश्वत उद्यन्त्सूर्यो नुदतां मृत्युपाशान्। व्युच्छन्तीरुषसः पर्वता ध्रुवाः सहस्रं प्राणा मय्या यतन्ताम्।।— अ.१७.१.३०

९१. ये अग्रवः शशमानाः परेयुर्हित्वा द्वेषांस्यनपत्यवन्तः। ते द्यामुदित्याविदन्त लोकं नाकस्य पृष्ठे अधि दीध्यानाः।।— अ.१८.२.४७

९२. शं नः सूर्य उरुचक्षा उदेतु शं नो भवन्तु प्रदिशश्चतस्रः।— अ.१९.१०.८

९३. भिन्द्धि दर्भ सपत्नानां हृदयं द्विषतां मणे। उद्यन्त्वचमिव भूम्याः शिर एषां वि पातय।।— अ.१९.२८.४

९४. कालेनोदेति सूर्यः काले नि विशते पुनः।।— अ.१९.५४.१

९५. उद् घेदभि श्रुतमघं वृषभं नर्यापसम्। अस्तारमेषि सूर्य।— अ.२०.७.१

९६. प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः।— अ.२०.४७.१७

९७. चित्रं देवानां केतुरनीकं ज्योतिष्मान् प्रदिशः सूर्य उद्यन्।— अ.२०.१०७.१३

९८. पूर्णिमा : तद्धैके दृष्ट्वोपवसन्ति। श्वो नोदेतेति। अदो हैव देवानामविक्षीणमन्नं भवति,----- शतपथ१.६.४.१४

९९. तद्वा एष एवेन्द्रो य एष तपति। अथैष एव वृत्रो यच्चन्द्रमाः। ---तस्माद् यद्यपि पुरा विदूरमिवोदितः, अथैनमेतां रात्रिमुपैव न्याप्लवते।— श.१.६.४.१८

१००. दर्शोपचारः :- तं (चन्द्रमसं) ग्रसित्वोदेति। स न पुरस्तान्न पश्चाद् ददृशे।---- — श.१.६.४.१९

१०१. हवनक्लृप्तिः :- तद्वा एष एव वषट्कारः-य एष तपति। स उद्यन्नेवामूमधिद्रवति, अस्तं यन्निमामधिद्रवति।— श.१.७.२.११

१०२. नक्षत्रब्राह्मणम् : अमी ह्युत्तराहि सप्तर्षय उद्यन्ति, पुर एताः (कृत्तिकाः)।— श.२.१.२.४

१०३. नाना ह वा एतान्यग्रे क्षत्राण्यासुः-यथैवासौ सूर्य, एवम्। तेषामेष उद्यन्नेव वीर्य्यं क्षत्रमादत्त। तस्मादादित्यो नाम-यदेषां वीर्य्यं क्षत्रमादत्त।— श.२.१.२.१८

१०४. ऋतुब्राह्मणम् : सूर्य एवैषां पाप्मनोऽपहन्ता। उद्यन्नेवैषामुभयेषां पाप्मानमपहन्ति।— श.२.१.३.९

१०५. अग्निमन्थनब्राह्मणम् : तद्धैकेऽनुदिते मथित्वा, तमुदिते प्राञ्चमुद्धरन्ति।------तदु तथा न कुर्यात्-उभौ हैवास्य तथाऽनुदित आहितौ भवतः। अनुदिते हि मथित्वा तमुदिते प्राञ्चमुद्धरन्ति। स य उदित आहवनीयं मन्थेत्-स ह तत्पर्याप्नुयात्।— श.२.१.४.८

१०६. पुरा हायुषो म्रियते-योऽनुदिते मन्थति।---- यशो ह भवति, य एवं विद्वानुदिते मन्थति।— श.२.१.४.९

१०७. स स्वाहेत्येवाजुहोत्-तस्मादु स्वाहेत्येव हूयते। तत एष उदियाय-य एष तपति।— श.२.२.४.६

१०८. सूर्यो ह वा अग्निहोत्रम्। तद्यदेतस्या अग्रे आहुतेरुदैत्, तस्मात्सूर्योऽग्निहोत्रम्।— श.२.३.१.१

१०९. अथ यत् प्रातरनुदिते जुहोति-प्रजनयत्येवैनमेतत्सोऽयं तेजो भूत्वा विभ्राजमान उदेति। शश्वद्ध वै नोदियाद्-यदस्मिन्नेतामाहुतिं न जुहुयात्।— श.२.३.१.५

११०. अथ यत्प्रातरनुदिते जुहोति-अप्रेतेभ्य एवैभ्य एतज्जुहोति। तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामह-इति ह स्माहासुरिः।— श.२.३.१.९

१११. यदा ह्येव सूर्योऽस्तमेति-अथाग्निर्ज्योतिः। यदा सूर्य उदेति-अथ सूर्यो ज्योतिः। — श.२.३.१.३०

११२. अग्नावेवैतत्सायं सूर्यं जुहोति, सूर्ये प्रातरग्निमिति। तद्वै तदुदितहोमिनामेव। यदा ह्येव सूर्योऽस्तमेति-अथाग्निर्ज्योतिः। यदा सूर्य उदेति-अथ सूर्यो ज्योतिः।— श.२.३.१.३६

११३. स यस्य कामयते-तस्य प्राणमादायोदेति-स म्रियते। — श.२.३.३.८

११४. अथ यत् प्रातरनुदिते द्वे आहुती जुहोति-तदेताभ्यामपराभ्यां पद्भ्यामेतस्मिन् मृत्यौ प्रतितिष्ठति। स एनमेष उद्यन्नेवादायोदेति। तदेतं मृत्युमतिमुच्यते। — श.२.३.३.९

११५. अथ प्राङिवोदङ्ङुत्क्रामति-उदिदाभ्यः शुचिरापूत एमि इति।— श.३.१.२.१२

११६. पुरास्तमयादाह-दीक्षित वाचं यच्छति।---- पुरोदयादाह-दीक्षितं वाचं यच्छति। तामुदिते वाचं विसृजते-सन्तत्या एव।— श.३.२.२.२६

११७. ----अमृतमायुर्हिरण्यम्। तद् अमृतऽआयुषि प्रतितिष्ठति। तथा त उदेति। तथा सञ्जीवति।— श. ३.८.२.२७, ३.८.३.२६

११८. घ्नन्ति वाऽएनमेतद्, यदभिषुण्वन्ति। तमेतेन घ्नन्ति। तथा त उदेति, तथा सञ्जीवति। तस्मादश्ममया ग्रावाणो भवन्ति।— श.३.९.४.२, ३.९.४.८, ३.९.४.१७

११९. अन्तर्यामग्रहः :- प्राणोदानौ ह वाऽअस्यैतौ ग्रहौ। तयोरुदितेऽन्यतरं जुहोति-अनुदितेऽन्यतरम्। — श.४.१.२.११

१२०. अहोरात्रे ह वाऽअस्यैतौ ग्रहौ। तयोरुदितेऽन्यतरं जुहोति, अनुदितेऽन्यतरम्। अहोरात्रयोर्व्याकृत्यै। — श.४.१.२.१२

१२१. रात्रिं सन्तमन्तर्यामं, तमुदिते जुहोति। रात्रिमेवैतदहन्दधाति। तेनो हासावादित्य उद्यन्नेवेमाः प्रजा न प्रदहति।— श.४.१.२.१४

१२२. शुक्रामन्थिनौ ग्रहौ : एतौ ह वाऽआसां प्रजानां चक्षुषी। स यद्धैतौ नोदियाताम्-न हैवेह स्वौ चन पाणी निर्जानीयुः।— श.४.२.१.२

१२३. ग्रहोपासनाब्राह्मणम् : स य एष सोमग्रहः।---- स उद्यन्तं वाऽऽदित्यमुपतिष्ठते, अस्तं यन्तं वा ---- ---।— श.४.६.५.५

१२४. इदं वाऽअसावादित्य उद्यन्नेव-यथाऽयमग्निर्निर्दहेद् एवमोषधीरन्नाद्यं निर्दहति। तदेता आपोऽभ्यवयत्यः शमयन्ति।— श.५.३.४.१६

१२५. अथ बाहूऽउद्गृह्णाति-हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्राऽउदिथः सूर्यश्च। आरोहतं वरुण मित्र गर्तम्, ततश्चाक्षाथाम्-अदितिम्, दितिं च इति।— श.५.४.१.१५

१२६. यथाग्निर्धूम उदयते-एवमेषामूष्मोदयते (पशूनाम्)।— श.६.२.१.५

१२७. अथोऽएषैव हव्यम्। अरिष्टा त्वमुदिहि यज्ञेऽअस्मिन् इति। यथैवारिष्टाऽनार्तैतस्मिन्यज्ञ-ऽउदियादेवमेतदाह।— श. ६.६.२.६

१२८. अथ प्रातरुदितऽआदित्ये भस्मैव प्रथममुद्वपति। एतद्वाऽएनमेतेनान्नेन प्रीणाति-एतया समिधा, यच्च रात्र्योपसमादधाति। तस्यान्नस्य जग्धस्यैष पाप्मा सीदति-भस्म। श.६.६.४.२

१२९. प्रासावीद्भद्रं द्विपदे चतुष्पदे इति। उद्यन्वाऽएष द्विपदे चतुष्पदे च भद्रं प्रसौति। वि नाकमख्यत् सविता वरेण्य इति। स्वर्गो वै लोको नाकः। तमेष उद्यन्नेवानुविपश्यति।— श.६.७.२.४

१३०. स यदहः सन्निवप्स्यन्त्स्यात्-तदहः प्रातरुदित ऽआदित्ये भस्मैव प्रथममुद्वपति।— श.६.७.४.१४

१३१. दर्भस्तम्बोपधानम् : या वै वृत्राद्बीभत्समाना आपो धन्व दृभन्त्य उदायन्-ते दर्भा अभवन्। यद्दृभन्त्य उदायन्-तस्माद्दर्भाः।— श.७.२.३.२

१३२. ब्रह्म जज्ञानं प्रथमं पुरस्ताद् इति।----वि सीमतः सुरुचो वेन आवः इति।----तानेष सीमतो मध्यतो विवृण्वन्नुदेति।— श.७.४.१.१४

१३३. असौ वाऽआदित्यो विश्वव्यचाः। यदा ह्येवैष उदेति-अथेदं सर्वं व्यचो भवति।— श.८.१.२.१

१३४. उपवसथीयेऽहन्प्रातरुदित ऽआदित्ये वाचं विसृजते।— श.९.२.१.१

१३५. आपप्रिवान्रोदसी अन्तरिक्षम् इति। उद्यन्वा एष इमांल्लोकानापूरयति।— श.९.२.३.१७

१३६. अग्निरेव पुरः।----आदित्य एव चरणम्। यदा ह्येवैष उदेति-अथेदं सर्वं चरति। तदेतद्यजुः सपुरश्चरणमधिदेवतम्।— श.१०.३.५.३

१३७. अश्वावयवेषु विराडवयवोपासनं ब्राह्मणम् : उषा वा अश्वस्य मेध्यस्य शिरः,-.--- -उद्यन्पूर्वार्धः, निम्लोचञ्जघनार्धः, यद्विजृम्भते-तद् विद्योतते।— श.१०.६.४.१

१३८. नैमित्तिकी त्रिहविष्का अभ्युदयेष्टिः :- तद्धैके दृष्ट्वोपवसंति। श्वोनोदेतेति। अभ्रस्य वा हेतोः।--। श. ११.१.४.१

१३९. नैमित्तिकी दर्शयागे पुरस्ताच्चन्द्रदर्शने त्रिहविष्का अभ्युदयेष्टिसंज्ञिका प्रायश्चित्तेष्टिः :- अथ यदैव नोदियात्। अथोपवसेत्।- श.११.१.४.४

१४०. दर्शयागे पश्चाच्चंद्रदर्शने त्रिहविष्का अभ्युदितेष्टिः :--न ह्यन्यदपक्रमणं भवति। श्वःश्वऽएवैष ज्यायानुदेति।— श.११.१.५.४

१४१. अश्वमेधीयप्रायश्चित्तानि : सूर्यो वै प्रजानां चक्षुः। यदा ह्येवैष उदेति। अथैतं सर्वं चरति। चक्षुषैवास्मिंस्तच्चक्षुर्दधाति।— श.१३.३.८.४

१४२. अत्रहोमब्राह्मणम् :व्युष्ट्यै स्वाहेत्यनुदित आदित्ये जुहाति। स्वर्गाय स्वाहेत्युदिते। अहोरात्रयोरव्यतिमोहाय। श.१३.२.१.७

१४३. अथ ह एनं निवपति। इयं वै पृथिवी प्रतिष्ठा। अस्यामेवैनमेतत् प्रतिष्ठायां प्रतिष्ठापयति। पुराऽऽदित्यस्योदयात्।— श.१३.८.३.२

१४४. त्र्यन्नब्राह्मणं वा अविद्या विषयसंसारतत्त्वप्रदर्शकं ब्राह्मणं : अथैष श्लोको भवति-यतश्चोदेति सूर्यः। अस्तं यत्र च गच्छति-इति। प्राणाद्वा एष उदेति। प्राणे अस्तमेति।— श.१४.४.३.३४

१४५. तम् (यूपं) अवाचीनाग्रं निमित्योर्ध्वा उदायंस्ततो वै मनुषाश्च ऋषयश्च देवानां यज्ञवास्तभ्यायन्-----।— ऐतरेय ब्रा. २.१

१४६. तम् (कवषं ऐलूषं) आपोऽनूदायंस्तं सरस्वती समन्तं पर्यधावत्। ऐ.२.१९

१४७. अग्निष्टोमः :- तस्य संस्तुतस्य नवतिशतं स्तोत्रियाः सा या नवतिस्ते दश त्रिवृतोऽथ या नवतिस्ते दशाथ या दश तासामेका स्तोत्रियोदेति त्रिवृत्परिशिष्यते-------मध्य एष एकविंश उभयतोऽध्याहितस्तपति तद्याऽसौ स्तोत्रियोदेति सैतस्मिन्नध्यूह्ळा स यजमानस्तद्दैवं क्षत्रं सहो बलम्।— ऐ.३.४१

१४८. स एतमेव शस्त्रेणानु पर्यावर्तेत यदा वा एष प्रातरुदेत्यथ मन्द्रं तपति तस्मान्मन्द्रया वाचा प्रातःसवने शंसेत्---।— ऐ.३.४४

१४९. अथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव तदन्तमित्वाऽथाऽऽत्मानं विपर्यस्यते-ऽहरेवावस्तात्कुरुते रात्रिं परस्तात्।— ऐ.३.४४

१५०. चित्रं देवानामुदगादनीकमिति त्रैष्टुभमसौ वाव चित्रं देवानामुदेति तस्मादेतच्छंसति।— ऐ.४.९

१५१. उदित आदित्ये प्रातरनुवाकमनुब्रूयात्सर्वं ह्येवैतदहर्दिवाकीर्त्यं भवति।— ऐ.४.१९

१५२. अब्जा इत्येष व अब्जा अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति।— ऐ.४.२०

१५३. प्रति वां सूर उदिते सूक्तैः- प्रउगं प्रतिवदन् अष्टमेऽहन्यष्टमस्याह्नो रूपम्।— ऐ.५.१८

१५४. एतद्वा अग्निहोत्रमन्येद्युर्हूयते यदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्निहोत्रमुभयेद्युर्हूयते यदस्तमिते सायं जुहोत्युदिते प्रातः। तस्मादुदिते होतव्यम्। चतुर्विंशे ह वै संवत्सरेऽनुदितहोमी गायत्रीलोकमाप्नोति द्वादश उदितहोमी स यदा द्वौ संवत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवत्यथ य उदिते जुहोति संवत्सरेणैव संवत्सरमाप्नोति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्। एष ह वा अहोरात्रयोस्तेजसि जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातरग्निना वै तेजसा रात्रिस्तेजस्वत्यादित्येन तेजसाऽहस्तेजस्वत्। अहोरात्रयोर्हास्य तेजसि हुतं भवति य एवं विद्वानुदिते जुहोति। तस्मादुदिते होतव्यम्।— ऐ.५.३०

१५५. एते ह वा एनं देवते ब्रध्नस्य विष्टपं स्वर्गं लोकं गमयतो य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्।- एवं यन्ति ते बहवो जनासः पुरोदयाज्जुह्वति येऽग्निहोत्रमिति।— ऐ.५.३०

१५६. एतद्ध स्म वै तद्विद्वान्नगरी जानश्रुतेय उदितहोमिनमैकादशाक्षं मानुतन्तव्यमुवाच---- तस्यो हैकादशाक्षे राष्ट्रमिव प्रजा बभूव राष्ट्रमिव ह वा अस्य प्रजा भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्।— ऐ.५.३०

१५६. उद्यन्नु खलु वा आदित्य आहवनीयेन रश्मीन्संदधाति स योऽनुदिते जुहोति यथा कुमाराय वा वत्साय वाऽजाताय स्तनं प्रतिदध्यात्तादृक्तदथ य उदिते जुहोति यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रतिदध्यात्तादृक्तत्त---- ----स योऽनुदिते जुहोति यथा पुरुषाय वा हस्तिने वाऽप्रयते हस्त आदध्यात्तादृक्तदथ य उदिते जुहोति यथा पुरुषाय वा हस्तिने वा प्रयते हस्त आदध्यात्तादृक्तत्तमेष एतेनैव हस्तेनोर्ध्वं हत्वा स्वर्गे लोक आदधाति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्। उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति तस्मादेनं प्राण इत्याचक्षते प्राणे हास्य संप्रति हुतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्। एष ह वै सत्यं वदन्सत्ये जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातर्भूर्भुव स्वरोम---- ऐ.ब्रा. ५.३१

१५७. तदाहुर्यस्याग्निहोत्रमधिश्रितममेध्यमा-पद्येत का तत्र प्रायश्चित्तिरिति सर्वमेवैनत्स्रुच्यभिपर्यासिच्य प्राङुदेत्याऽऽहवनीये हैतां समिधमभ्यादधाति---।— ऐ. ७.५

१५८. प्राजापत्योऽश्वः। यदश्वं पुरस्तान्नयति। स्वमेव चक्षुः पश्यन्प्रजापतिरनूदेति।— तैत्तिरीय ब्राह्मणम् १.१.५.५

१५९. नि वा एतस्याऽऽहवनीयो गार्हपत्यं कामयते। नि गार्हपत्य आहवनीयम्। यस्याग्निमनुद्धृतँ सूर्योऽभ्युदेति। — तै.ब्रा.१.४.४.३

१६०. पराची वा एतस्मै व्युच्छन्ती व्युच्छति। यस्याग्निमनुद्धृतँ सूर्योऽभ्युदेति।— तै.ब्रा.१.४.४.५

१६१. अन्तमेष यज्ञस्य गच्छति। यस्याग्निमनुद्धृतँ सूर्योऽभ्युदेति।।— तै.ब्रा.१.४.४.६

१६२. यस्याग्निमनुद्धृतँ सूर्योऽभ्युदेति। मैत्रं चरुं निर्वपेत् तेनैव यज्ञं निष्क्रीणीते।— तै.ब्रा.१.४.४.६

१६३. यदा वै सूर्य उदेति। अथ नक्षत्रं नैति।— तै.ब्रा.१.५.२.१

१६४. यावद्वा अग्नेर्दहतो धूम उदेत्यानुव्येति। तावती त्रिवृतो मात्रा।— तै.ब्रा.१.५.१०.४

१६५. स यदादित्य उदेति। एतामेव तत्सुवर्णां कुशीमनुसमेति। अथ यदस्तमेति। एतामेव तद्रजतां कुशीमनुसंविशति।— तै.ब्रा.१.५.१०.७

१६६. यन्मरुद्भ्यः क्रीडिभ्यः प्रथमँ हविर्निरुप्यते विजित्यै। साकँ सूर्येणोद्यता निर्वपति।— तै.ब्रा.१.६.७.५

१६७. यदनुदिते सूर्ये प्रातर्जुहुयात्। उभयमेवाऽऽग्नेयँ स्यात्। उदिते सूर्ये प्रातर्जुहोति। तथाऽग्नये सायँ हूयते। सूर्याय प्रातः।— तै.ब्रा.२.१.२.७

१६८. उदिते सूर्ये प्रातर्जुहोति। प्रत्येव तेन तिष्ठति। प्रजापतिरकामयत प्रजायेयेति। स एतदग्निहोत्रं मिथुनमपश्यत्। तदुदिते सूर्येऽजुहोत्। यजुषाऽन्यत्। तूष्णीमन्यत्। ततो वै स प्राजायत। यस्यैवंविदुष उदिते सूर्येऽग्निहोत्रं जुह्वति प्रैव जायते।— तै.ब्रा.२.१.२.८

१६९. उद्यन्तं वावाऽऽदित्यमग्निरनुसमारोहति। तस्माद्धूम एवाग्नेर्दिवा ददृशे।— तै.ब्रा.२.१.२.१०

१७०. यदुदिते सूर्ये प्रातर्जुहुयात्। यथाऽतिथये प्रदुताय शून्यायाऽऽवसथायाऽऽहार्यँ हरन्ति। तादृगेव तत्।— तै.ब्रा.२.१.२.१२

१७१. रेतो वा एतस्य हितं न प्रजायते। यस्याग्निहोत्रमहुतँ सूर्योऽभ्युदेति।— तै.ब्रा.२.१.९.२

१७२. अङ्गारा भवन्ति। तेभ्योऽङ्गारेभ्योऽर्चिरुदेति। प्रजापतिस्तर्ह्यग्निः।— तै.ब्रा.२.१.१०.३

१७३. स (इन्द्रः) प्रजापतिरेव भूत्वा प्रजा आवयत्।----मुखं पश्चात्। मुखमुत्तरतः। ऊर्ध्वा उदायन्।— तै.ब्रा.२.२.१०.७

१७४. उद्यता सूर्येण कार्यः। उद्यन्तं वा एतँ सर्वाः प्रजाः प्रतिनन्दन्ति।— तै.ब्रा.२.७.९.४

१७५. उदसावेतु सूर्यः। उदिदं मामकं वचः। उदिहि देव सूर्य। सह वग्नुना मम।— तै.ब्रा.२.७.१६.४

१७६. हविषो याज्या : दिवो रुक्म उरुचक्षा उदेति। दूरे अर्थस्तरणिर्भ्राजमानः। नूनं जनाः सूर्येण प्रसूताः। आयन्नर्थानि कृणवन्नपाँसि।— तै.ब्रा.२.८.७.३

१७७. पुरोडाशस्य याज्या :---उतोदिता मघवन्सूर्यस्य। वयं देवानाँ सुमतौ स्याम।— तै.ब्रा.२.८.९.८

१७८. उषोदेवताके यागे याज्या : तमो ज्योतिष्कृणोति सूनरी। उदुस्रियाः सचते सूर्यः सचा। उद्यन्नक्षत्रमर्चिमत्। तवेदुषो व्युषि सूर्यस्य च— तै.ब्रा.३.१.३.२

१७९. नक्षत्रदेवताया इष्टिः :- नक्षत्राय स्वाहोदेष्यते स्वाहा। उद्यते स्वाहोदिताय स्वाहा।— तै.ब्रा.३.१.६.४

१८०. आहवनीयेऽन्वाधीयमाने जप्यं मन्त्रत्रयम् : अग्निं गृह्णामि सुरथं यो मयोभूः। य उद्यन्तमारोहति सूर्यमह्ने।------।— तै.ब्रा.३.७.४.३

१८१. उद्यन्नद्य मित्रमहः। सपत्नान्मे अनीनशः। दिवैनान्विद्युता जहि। निम्रोचन्नधरान्कृधि। उद्यन्नद्य वि नो भज। पिता पुत्रेभ्यो यथा। दीर्घायुत्वस्य हेशिषे। तस्य नो देहि सूर्य। उद्यन्नद्य मित्रमहः। आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य। हरिमाणं च नाशय।— तै.ब्रा.३.७.६.२१

१८२. उषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहेत्यनुदिते जुहोति। उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते जुहोति अहोरात्रयोरव्यतिमोहाय।— तै.ब्रा.३.८.१६.४

१८३. निष्पन्नायाश्चितेरध्वर्योरुपस्थानम् : सर्वेषां ज्योतिषां ज्योतिर्यददावुदेति।— तै.ब्रा.३.१०.३.१

१८४. सा (आग्ला) पृथिवीमुदैत्। सा पृथिवीं व्यदहत्।— गोपथ ब्रा.१.२.२१

१८५. एषा ह वै सुमना नामेष्टिः। यमद्येजानं पश्चाच्चन्द्रमा अभ्युदियाद्, अस्मा अस्मिँल्लोक आर्धुकं भवति।— गो.ब्रा.२.१.११

१८६. तेषामेतदायतनं चोदयनं च यदाग्नीध्रं च सदश्च। तद् योऽविद्वान् संचरति, आर्तिमार्छति।— गो.ब्रा.२.२.१७

१८७. यद् वेव मैत्रावरुणानि शंसति-प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः।— गो.ब्रा.२.३.१३

१८८. ते ये नक्तं जुह्वति रात्रिम् एव ते समुद्रं प्रविशन्ति। अथ य उदिते जुह्वत्य् अहर् एव ते समुद्रं प्रविशन्ति।— जै.ब्रा.१.५

१८९. ते ये नक्तं जुह्वति रात्रिम् एव ते श्यामं प्रविशन्ति। अथ य उदिते जुह्वत्य् अहर् एव ते शबलं प्रविशन्ति। तयोर् एतद् एवात्ययनम्-अस्तम् इते पुरा तमिस्रायै सुव्युष्टायां पुरोदयात्।— जै.ब्रा.१.६

१९०. स यथा हस्ती हरत्यासनम् उपर्य् आसीनम् आदायोत्तिष्ठेद् एवम् एवैषा देवतैतद् विद्वांसं जुह्वतम् आदायोदेति।— जै.ब्रा.१.११

१९१. अथो खल्व् आहुर् यद् आहवनीयम् अनुद्धृतम् अभ्युदियात् किं तत्र कर्म का प्रायश्चित्तिर् इति। एतस्माद् ध वै विश्वे देवा अपक्रामन्त यस्याहवनीयम् अनुद्धृतम् अभ्युदेति।---- -स यो वा त्वै गतश्रीस् स्याद् यो वास्माल् लोकात् क्षिप्रे प्रजिगांसेत् स उदितहोमी स्यात्।— जै.ब्रा.१.६३

१९२. प्रतिकूलम् इव वा इतस् स्वर्गो लोकः। तद् यथा वा अदः प्रतिकूलम् उद्यन् प्रावभ्र इव भवत्य् एवम् एवैतत्।— जै.ब्रा.१.८५

१९३. तन् नासृजत। तद् ऊर्ध्वम् उदैषद् यथा पृष्ठं यथा ककुद् एवम्। तद् देवास् संगृह्योर्ध्वा उदायन्।— जै.ब्रा.१.१४४

१९४. ताव् अकामयेताम् उद् इत इयाव गातुं नाथं विन्देवहि सम् अयं कुमारो जीवद् इति।— जै.ब्रा.१.१५१

१९५. गायत्री वा एषा वयो भूत्वोदेति।— जै.ब्रा.१.१६९

१९६. सो ऽकामयतोद् इत इयां गातुं नाथं विन्देय न मायम् अग्निर् दहेद् इति। स एतत् सामापश्यत्।— जै.ब्रा.१.१७१, १.१८४

१९७. आ सूर्यस्योदेतोर् आश्विनम् अनुशस्यते ऽहोरात्रयोर् एव संतत्या अहोरात्रयोस् समारम्भाय।— जै.ब्रा.१.२०९

१९८. तस्माद् आहुर् नोदिते सूर्य आश्विनम् अनुशस्यम् इति।— जै.ब्रा.१.२१२

१९९. अनुदिते सूर्ये परिदध्याद् यं कामयेत पापीयान् स्याद् इति। पापीयान् एव भवति।--- उदिते परिदध्याद् यं कामयेत श्रेयान् स्याद् रुचम् अश्नुवीतेति।— जै.ब्रा.१.२१३

२००. तेभ्यस् संतप्तेभ्यस् त्रीणि शुक्राण्य् उदायन् अग्निः पृथिव्या वायुर् अन्तरिक्षाद् आदित्यो दिवः।---- तेभ्यस् संतप्तेभ्यस् त्रीण्य् एव शुक्राण्य् उदायन् ऋग्वेद एवाग्नेर् यजुर्वेद वायोस् सामवेद आदित्यात्।---तेभ्यस् संतप्तेभ्यस् त्रीण्य् एव शुक्राण्य् उदायन् भूः इत्य् एवर्ग्वेदात् भुवः इति यजुर्वेदात् स्वः इति सामवेदात्।— जै.ब्रा. १.३५७

२०१. राजसूयः :- सेयं प्राची दिक् प्रायच्छन् मद् उदयेत्य् अहश् च सत्यं च। माम् अभ्य् उदयेत्य् ऊर्ध्वा दिक् प्रायच्छत् क्षत्रं च राष्ट्रं च।— जै.ब्रा.२.२५

२०२. अस्यै प्राच्यै दिश उदेति। अभ्य् उदेतीमाम् ऊर्ध्वां दिशम्।-— जै.ब्रा.२.२६

२०३. तस्यैष श्लोकः-- मद् एवोदेति सूर्यो ऽस्तं मद् उ च गच्छति। मां सर्वे देवा अन्वायत्ता माम् उ नात्येति किं चन।। इति। मद् एवोदेति सूर्य इत्य् एवंविदो ह वाव सूर्य उदेति।— जै.ब्रा.२.२८

२०४. जागतो ऽसाव् आदित्यः। यदा ह्य् एष उदेत्य् अथ जगद् एतस्यैव प्रयाणम् अनु प्रैति।— जै.ब्रा.२.३६

२०५. तद् धैतद् एक उदित एवाज्यग्रहान् गृह्णन्ति। उदिते प्रातरनुवाकम् उपाकुर्वन्ति।— जै.ब्रा.२.३७

२०६. प्राणापानाव् उपाश्वन्तर्यामौ। उदिते ऽन्यं जुह्वत्य् अनुदिते ऽन्यम्।---- तद् यद् उदिते ऽन्यं जुह्वत्य् अनुदिते ऽन्यं, बहिस् सन्तं प्राणम् उपजीवामान्तस् सन्तम् अपानम् इति। अथ य एताव् उदिते जुह्वति, प्राणापानाव् उत्खिदन्ति।— जै.ब्रा.२.३७

२०७. यद् उपाश्वन्तर्यामाव् उदिते ऽन्यं जुह्वत्य् अनुदिते ऽन्यं, तेन सुत्यायाम्।— जै.ब्रा. २.३८

षड् वा एतयोर् इति ऊर्ध्वा स्तोमा उद्यन्ति।— जै.ब्रा.२.१०६

२०८. उदेयायेन्द्रः। स हविर्धानयोर् एव द्रोणकलशे सोमं राजानं संपवितुम् उपेयाय।------सहस्रेषु मात्रमूर्ध्वमुददिति।- — जै.ब्रा.२.१५५

२०९. क्रतवः पुनर् ऊर्ध्वा उद्यन्ति यथा निह्नवानं ब्रूयाद् व्यहि मापक्रमीर् इति तादृक् तत्।— जै.ब्रा.२.२०४

२१०. ताम् अब्रुवन् -- सोमायोदेहि तृतीयेन चात्मनस् तृतीयेन च सहस्रस्येति। सा बभ्रुः पिंगाक्ष्य् उदैत्, तृतीयेन चात्मनस् तृतीयेन च सहस्रस्य। सैषा सोमक्रयणी।---- -ताम् अब्रुवन् -- इन्द्रायोदेहि तृतीयेन चात्मनस् तृतीयेन च सहस्रस्येति। सा शबली

पष्ठौह्य् उदैत् तृतीयेन चात्मनस् तृतीयेन च सहस्रस्य।-- -- -ताम् अब्रुवन् -- यमायोदहि तृतीयेन चात्मनस् तृतीयेन च सहस्रस्येति। सा धूम्रा दित्यौह्य् उदैद्--- जै.ब्रा.२.२५०

२११. यद् एव ते किं च पितु स्वं, तस्य सर्वस्य पुरा सूर्यस्योदेतोश् शिरश् छिन्द्धि।------ -घ्नन्तम् एवैनं सूर्यो ऽभ्युदियाय। तस्योदिते स एव गन्धर्वः प्रजघानेत्य् एके।— जै.ब्रा.२.२७१

२१२. तस्माद् असाव् आदित्य आ च परा च संचरति। यत एवाद्योदगात् तत श्च उदेता।— जै.ब्रा.३.७१

२१३. सो ऽकामयतोद् इत इयां, गातुं नाथं विन्देय।— जै.ब्रा.३.९५

२१४. सोऽकामयतोद् इत इयां गातुं प्रतिष्ठां विन्देयेति।— जै.ब्रा.३.९९

२१५. सोऽकामयतोद् इत इयां, गातुं प्रतिवचनं विन्देयेति।— जै.ब्रा.३.१०१

२१६. तद् या ह वै प्राचीर् आपो धावन्त्य् एतम् एव ता उद्यन्तम् अभीप्सतीर् धावन्ति।-- जै.ब्रा.३.११४

२१७. च्यवन-सुकन्या-अश्विनौ आख्यानम् : स (च्यवनः) होवाच -- कुमारि, सर्वे वै सदृशा उदेष्यामो, ऽनेन मा लक्ष्मकेण जानीताद् इति। ते ह सर्व एव सदृशा उदेयुर् यत् कल्याणतमं रूपाणां तेन रूपेण।— जै.ब्रा.३.१२५

२१८. तिसृभ्योहिङ्करोति सप्रथमया, तिसृभ्योहिङ्करोति समध्यमया, तिसृभ्योहिङ्करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिः।— ताण्ड्य ब्राह्मण २.१.१

२१९.-------नवभ्यो हिङ्करोति स तिसृभिस्स तिसृभिस्स तिसृभिरुद्यती सप्तदशस्य विष्टुतिः।— तां.ब्रा.२.१२.१

२२०.--- -स पञ्चभिरेकादशभ्यो हिङ्करोति स पञ्चभिः स तिसृभिः स तिसृभिरुद्यती त्रिणवस्य विष्टुतिः।— तां.ब्रा.३.२.१

२२१.----- -स सप्तभिस्त्रयोदशभ्यो हिङ्करोति स सप्तभिस्स तिसृभिस्स तिसृभिरुद्यती त्रयस्त्रिंशस्य विष्टुतिः।— तां.ब्रा.३.५.१

२२२. समुद्रं वा एते प्रस्नान्ति ये संवत्सरमुपयन्ति यो वा अप्लवः समुद्रं प्रस्नाति न स तत उदेति यत् प्लवो भवति स्वर्गस्य लोकस्य समष्ट्यै।— तां.ब्रा.५.८.५

२२३. गायत्र्यास्त्रिरात्रत्रयव्याप्तिः :- तेजसा वा एते प्रयन्ति तेजो मध्ये दधति तेजोऽभ्युद्यन्ति, ज्योतिषा वा एते प्रयन्ति ज्योतिर्म्मध्ये दधति ज्योतिरभ्युद्यन्ति, चक्षुषा वा एते प्रयन्ति चक्षुर्मध्ये दधति चक्षुरभ्युद्यन्ति, प्राणेन वा एते प्रयन्ति प्राणम्मध्ये दधति प्राणमभ्युद्यन्ति, ये गायत्र्या प्रयन्ति गायत्रीम्मध्ये दधति गायत्रीमभ्युद्यन्ति।— तां.ब्रा.१०.५.५

२२४. आर्भव पवमानः :- समुद्रं वा एते प्रस्नान्तीत्याहुर्य्ये द्वादशाहमुपयन्तीति यो वा अप्लवः समुद्रं प्रस्नाति न स तत उदेति यत् प्लवो भवति स्वर्गस्य लोकस्य समष्ट्यै।— तां.ब्रा.१४.५.१७

२२५. यदद्य सूर उदित इति सूरवन्मैत्रावरुणमन्तो वै सूरोऽन्त एतद्दशममह्नाम् — तां.ब्रा.१५.८.३

२२६. वारवन्तीयमग्निष्टोमसाम : तस्य यदपूतं तदग्निः क्षापयत्यथेतरः शुचिः पूत उदेति।— तां.ब्रा.१७.५.७

२२७. एष वा उदेति न वा एनमन्यत् ज्योतिषां ज्योतिः प्रत्युदेति। नैनमन्यः स्वेषु प्रत्युदेति य एवं वेद।— तां.ब्रा.२०.५.४

२२८. यदेवासावुदेति तन्मुखं ये अभितोऽहनी तौ पक्षौ यन्मध्यममहः स आत्माग्निः पुच्छं। यदेवासावुदेति तन्मुखं ये अभितोहनी तौ पक्षौ यन्मध्यममहः स आत्मा यदस्तमेति तत्पुच्छं।— तां.ब्रा.२०.१६.३

२२९.----तेऽब्रुवन्नंशानाहरामहै यस्मै न इयं प्रथमायोदेष्यति इति ते अंशानाहरन्त सोमस्य प्रथम ऐदथेन्द्रस्याथ यमस्य।— तां.ब्रा.२१.१.२

२३०. तेऽब्रुवन् सोमाय राज्ञ उदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा बभ्रुः

पिङ्गाक्ष्येकवर्षोदैत्तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस सा या सोमक्रयणी सैव सा।-------- तेऽब्रुवन्निन्द्रायोदेहि तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयस इति सा शबलीपष्ठौह्युदैत् तृतीयेन चात्मनस्तृतीयेन च सहस्रस्य पयसः सा येन्द्रियैष्पा सैव सा।— तां.ब्रा.२१.१.५

२३१. ऋतुमण्डल इष्टकाः हेतोः द्वितीयम्मन्त्रम्: अन्योन्यं तु न हिँस्रातः। सतस्तद्देवलक्षणम्। लोहितोऽक्षिण शार शीर्ष्णिः। सूर्यस्योद्यनं प्रति।-तैत्तिरीय आरण्यकम् १.६.१

२३२. निरयवतीः हेतोः द्वितीयम्मन्त्रम् : कश्यपादुदिताः सूर्याः। पापान्निर्घ्नन्ति सर्वदा। रोदस्योरन्तर्देशेषु। तत्र न्यस्यन्ते वासवैः।— तै.आ.१.८.६

२३३. निगदव्याख्याता : समानमेतदुदकम्। उद्यैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति। दिवं जिन्वन्त्यग्नयः।।— तै.आ.१.९.५

२३४. प्रजयिष्णुः प्रजया च पशुभिश्च भवति। य एवं वेद। एतमुद्यन्तमपियन्तं चेति। आदित्यः पुण्यस्य वत्सः।— तै.आ.१.११.७

२३५. योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति। मा मे प्रजाया मा पशूनाम्। मा मम प्राणानादायोदगाः।— तै.आ.१.१४.१

२३६. ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादछदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्ये दक्षिणत उपवीयोपविश्य हस्तावनिज्य त्रिराचामेत्।- तै.आ.२.११.१

२३७. य एवं विद्वान्महारात्र उषस्युदिते व्रजँस्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा।— तै.आ.२.१५.१

ॐत्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहा-ऽऽभवत्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि।— तै.आ.३.१२.२

२३८.-----यावदितः पुरस्तादुदयाति सूर्यः। तावदितोऽमुं नाशय। योऽस्मान्द्वेष्टि। यं च वयं द्विष्मः।— तै.आ.४.३९.१

२३९. शमुषा नो व्युच्छतु शमादित्य उदेतु नः। शिवा नः शंतमा भव सुमृडीका सरस्वति।— तै.आ.४.४२.१

२४०. शिरो वो एतद्यज्ञस्य। यत्प्रवर्ग्यः। असौ खलु वा आदित्यः प्रवर्ग्यः।---प्राञ्चमुद्वासयति। तस्मादसा-वादित्यः पुरस्तादुतेति।— तै.आ.५.९.२

२४१. पुरो वा पश्चाद्वोद्वासयेत्। पुरस्ताद्वा एतज्ज्योतिरुदेति। तत्पश्चान्निम्रोचति।— तै.आ.५.१०.६

२४२. भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः।— तै.आ. ८.८.१

२४३. यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति। तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन, एतद्वै तत्।— कठोपनिषद २.१.९

२४४. इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्। पृथगुत्पद्यमानानां मत्वा धीरो न शोचति।— कठोपनिषद २.३.७

२४५. अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान्रश्मिषु संनिधत्ते यद्दक्षिणां यत्प्रतीचीं----- -----। स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते। तदेतदृचाभ्युक्तम्। विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्। सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः।- प्रश्नोपनिषद १.६

२४६. आदित्यो ह वै बाह्यः प्राणं उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः।— प्रश्नोपनिषद ३.८

२४७. यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति।— प्रश्नोपनिषद ४.२

२४८. भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः।--- — तैत्तिरीयोपनिषद २.८.१

२४९. अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति उद्यँस्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद।— छान्दोग्योपनिषद१.३.१

२५०. तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद।— छा.उ.१.६.७

२५१. तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्ः हिंकारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिंकुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्ताः— छां.उ.२.९.२

२५२. उद्यन्हिंकार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेतद्बृहदादित्ये प्रोतम्।— छां.उ.२.१४.१

२५३. त (वसवः) एतदेव रूपमभिसंविशन्त्येत-स्मादूपादुद्यन्ति।----स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यँ स्वाराज्यं पर्येता।— छां.उ.३.६.२

२५४. त (रुद्राः) एतदेव रूपमभिसंविशन्त्येत-स्मादूपादुद्यन्ति।--- स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यँ स्वाराज्यं पर्येता।— छां.उ.३.७.३

२५५. त (आदित्याः) एतदेव रूपमभिसं-विशन्त्येतस्मादूपादुद्यन्ति। स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेता-ऽऽदित्यानामेव तावदाधिपत्यँ स्वाराज्यं पर्येता।— छां.उ.३.८.२

२५६. त (मरुतः) एतदेव रूपमभिसंविशन्त्येत-स्मादूपादुद्यन्ति।---स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यँ स्वाराज्यं पर्येता।— छां.उ.३.९.३

२५७. त (साध्याः) एतदेव रूपमभिसंविशन्त्येतस्मादूपादुद्यन्ति।---स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्व उदेताऽर्वाङस्तमेता साध्यानामेव तावदाधिपत्यँ स्वाराज्यं पर्येता।— छां.उ.३.१०.२

२५८. अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदेष श्लोकः।-----न ह वा अस्मा उदेति न निम्लोचति सकृद्दिव हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद।— छां.उ.३.११.१

२५९. प्रातसवनं :----माऽहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति।----। माध्यंदिनं सवनः--- माऽहं प्राणानाँ रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति----। तृतीयसवनं : माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति।— छा.उ.३.१६.२

२६०. अथ यत्तदजायत सोऽसावादित्यः------ तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे चैव कामाः।— छां.उ.३.१९.३

२६१. उषा वा अश्वस्य मेध्यस्य शिरः।-------- उद्यन् पूर्वार्धो निम्लोचञ्जघनार्धो यद्विजृम्भते तद्विद्योतते--— बृहदारण्यकोपनिषद १.१.१

२६२. सैषाऽनस्तमिता देवता यद्वायुः। अथैष श्लोको भवति यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति-— बृह.उ.१.५.२३

२६३. अतः खानीमानि भित्त्वोदितः पञ्चभी रश्मिभिर्विषयानत्तीति बुद्धीन्द्रियाणि यानीमान्येता-न्यस्य रश्मयः कर्मेन्द्रियाण्यस्य हया--- मैत्रायण्युपनिषद २.६

२६४. सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः।— मैत्रा.उ.६.८

२६५. अग्निर्गायत्रं त्रिवृद्रथंतरं वसन्तः प्राणो नक्षत्राणि वसवः पुरस्तादुद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति--इन्द्रस्त्रिष्टुप्पञ्चदशो बृहद्ग्रीष्मो व्यानः सोमो रुद्रा दक्षिणत उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति---विश्वे देवा अनुष्टुबेकविंशो वैराजः शरत्समानो वरुणः साध्या उत्तरत उद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति----- शनिराहुकेतू-रगरक्षोयक्षनर-विहगशरभेभादयोऽधस्तादुद्यन्ति तपन्ति वर्षन्ति स्तुवन्ति--- मैत्रा.उ.७.१

२६६. अनेनैव तदुद्बुध्यत्युदयत्युच्छ्वसित्यजस्रं ब्रह्मधीयालग्बं वात्रैव।— मैत्रा.उ.७.११

२६७. यो वेद गहनं गुह्यं पावनं च तथोदितम्। अग्नीषोमपुटं कृत्वा न स भूयोऽभिजायते।— बृहज्जाबालोपनिषद २.१५

२६८. वाग्वा अनुष्टुब्वाचैव प्रयन्ति वाचैवोद्यन्ति-— नृसिंहपूर्वतापनीयोपनिषद १

२६९. हृदाकाशे चिदादित्यः सदा भासति भासति। नास्तमेति न चोदेति कथं संध्यामुपास्महे।— मैत्रेय्युपनिषत् २.१४

२७०. अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम्। उदेति शुद्धचित्तानां वृत्तिज्ञानं तत परम्।— तेजोबन्दूपनिषद १.४९

२७१. ततः परतरं शुद्धं व्यापकं निर्मलं शिवम्। सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः।-— नादबिन्दूपनिषत् १७

२७२. तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते।— नादबिन्दूपनिषतद् २२

२७३. संख्यारूपेण संकल्प्य वैखानसऋषेः पुरा। उदितो यादृशः पूर्वं तादृशं शृणु मेऽखिलम्।— सीतोपनिषत् ५

२७४. अनवरतसहाश्रयिण्युदितानुदिताकारा---- (क्रियाशक्तिः)— सीतोपनिषत् ६

२७५. रवेरुदयास्तमययोः किल कर्म कर्तव्यम्। एवंविधश्चिदादित्यस्योदयास्तमया-
भावात्सर्वकर्माभावः।— मण्डलब्राह्मणोपनिषत् २.२

२७६. प्रबोधपूर्णपात्रे तु ज्ञप्तिदीपं विलोकयेत्। मोहान्धकारे निःसारे उदेति स्वयमेव हि।— दक्षिणामूर्त्युपनिषत् १६

२७७.---आदिनारायणस्योन्मेषनिमेषाभ्यां मूला-विद्योदयस्थितिलया जायन्ते।-त्रिपाद्विभूति-महानारायणो-पनिषत् २.१५

२७८. स चानन्तकोटिब्रह्माण्डानामुदय-स्थिति-लयाद्यखिलकार्यकारणजालपरमकारणकारणभूतो महा-मायातीतस्तुरीयः परमेश्वरो जयति।— त्रिपाद्विभूति-महानारायणोपनिषत् २.१५

२७९. त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहा-भवत्पुनः।— त्रिपाद्विभूतिमहानारायणो- पनिषत् ४.९

२८०. यथा उन्मेषो जायते तथा चिरंतनातिसूक्ष्मवासनाबलात्पुनरविद्याया उदयो भवति।— त्रिपाद्विभूतिमहानारायणोपनिषत् ४.१२

२८१. भगवन् सर्वात्मना नष्टाया अविद्यायाः पुनरुदयः कथम्।------प्रावृट्कालप्रारम्भे यथा मण्डूकादीनां प्रादुर्भावस्तद्वत्सर्वात्मना नष्टाया अविद्याया उन्मेषकाले पुनरुदयो भवति।— त्रिपाद्विभूति-महानारायणोपनिषत् ५.१

२८२. ततो दृढतरा वैष्णवी भक्तिर्जायते। ततो वैराग्यमुदेति।—त्रिपाद्विभूतिमहानारायणोपनिषत् ५.९

२८३. कुक्कुटाण्डाकारं महदादिसमष्ट्या-कारमण्डं तपनीयमयं तप्तजाम्बूनदप्रभमुद्यत्कोटि-दिवाकराभं— त्रिपाद्विभूतिमहानारायणोपनिषत् ६.३

२८४. कारणेन विना कार्यं नोदेति। भक्त्या विना ब्रह्मज्ञानं कदापि न जायते।— त्रिपाद्विभूतिमहानारायणो-पनिषत् ८.१२

२८५. उद्वेगानन्दरहितः समया स्वच्छया धिया। न शोचति न चोदेति स जीवन्मुक्त उच्यते।— महोपनिषत् २.५७

२८६. रमते धीर्यथाप्राप्ते साध्वीवाऽन्तः-पुराजिरे। सा जीवन्मुक्ततोदेति स्वरूपानन्ददायिनी।— महोपनिषद ४.३८

२८७. सर्वात्मवेदनं शुद्धं यदोदेति तवात्मकम्। भाति प्रसृतिदिक्कालबाह्यं चिद्रूपदेहकम्।— महोपनिषत् ४.४२

२८८. उदितौदार्यसौन्दर्यवैराग्यरसगर्भिणी। आनन्द-स्यन्दिनी यैषा समाधिरभिधीयते।— महोपनिषत् ४.६१

२८९. या योदेति मनोनाम्नी वासना वासितान्तरा। तां तां परिहरेत्प्राज्ञस्ततोऽविद्या क्षयो भवेत्।— महोपनिषत् ४.१०८

२९०. अयं सोऽहमिदं तन्म इति जन्मान्तरोदितः। पीवरः प्रत्ययः प्रोक्तो महाजाग्रदिति स्फुटम्।— महोपनिषत् ५.१३

२९१. अल्पकालं मया दृष्टमेतन्नोदेति यत्र हि। परामर्शः प्रबुद्धस्य स स्वप्न इति कथ्यते। चिरं संदर्शनाभावादप्रफुल्लं बृहद्वचः। चिरकालानुवृत्तिस्तु स्वप्नो जाग्रदिवोदितः।— महोपनिषत् ५.१६

२९१.--सकलामलसंसारस्वरूपैकात्मदर्शिनी। नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति। न च याति न चायाति न च नेह न चेह चित्।— महोपनिषत् ५.१०२

२९२. ग्राह्यग्राहकसंबन्धे क्षीणे शान्तिरुदेत्यलम्।— संन्यासोपनिषत् २.४२

२९३. आनन्दितोपशमता सदा प्रमुदितोदिता। पूर्णतोदारता सत्या कान्तिसत्ता सदैकता। इत्येवं चिन्तयन्भिक्षुः स्वरूपस्थितिमञ्जसा।— संन्यासो-पनिषत् २.५७

२९४. भीषणमित्याह भीषा वा अस्मादादित्य उदेति भीतश्चन्द्रमा भीतो वायुर्वाति----अव्यक्तोपनिषत् २

२९५. धीरधीरुदितानन्दः पेशलः पुण्यकीर्तनः। प्राज्ञः प्रसन्नमधुरो दैन्यादपगताशयः।— अन्नपूर्णोपनिषत् २.३१

२९६. ज्वालाजालपरिस्पन्दो दग्धेन्धन इवानलः। उदितोऽस्तं गत इव ह्यस्तंगत इवोदितः।— अन्नपूर्णोपनिषत् ३.११

२९७. न चोदयो नास्तमयो न हर्षामर्षसंविदः। न तेजो न तमः किंचिन्न संध्यादिनरात्रयः।— अन्नपूर्णोपनिषत् ४.२२

२९८. अवासनत्वात्सततं यदा न मनुते मनः। अमनस्ता तदोदेति परमोपशमप्रदा।— अन्नपूर्णोपनिषत् ४.४८

२९९. यत्र नाभ्युदितं चित्तं तद्वै सुखमकृत्रिमम्। क्षयातिशयनिर्मुक्तं नोदेति न च शाम्यति।— अन्नपूर्णोपनिषत् ५.४५

३००. सहस्ररश्मिः शतधा वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः।— अक्ष्युपनिषत् १

३०१. संतोषामोदमधुरा प्रथमोदेति भूमिका। भूमिप्रोदितमात्रोऽन्तरमृताङ्कुरिकेव सा।— अक्ष्युपनिषत् २८

३०२. सत्त्वावशेष एवास्ते पञ्चमीं भूमिकां गतः। जगद्विकल्पो नोदेति चित्तस्यात्र विलापनात्।— अक्ष्युपनिषत् ३५

३०३. मध्यमायां मुकुलिता वैखर्यां विकसीकृता। पूर्वं यथोदिता या वाग्विलोमेनास्तगा भवेत्।— योगकुण्डल्युपनिषत् ३.१९

३०४.---प्रमथान्सुरानपि सोऽन्वीक्ष्य पूतं प्रातरुदयाद्गोमयं ब्रह्मपर्णे निधाय त्र्यम्बकमिति मन्त्रेण शोषयेत्।— भस्मजाबालोपनिषत् १

३०५. प्रागुदयान्निर्वर्त्य शौचादिकं ततः स्नायात्।---उद्यन्तमादित्यमभिध्यायन्नुद्धूलिताङ्गं कृत्वा यथास्थानं भस्मना त्रिपुण्ड्रं श्वेतेनैव रुद्राक्षाञ्छ्वेतान्बिभृयात्।— भस्मजाबालोपनिषत् २

३०६. नोदेति नास्तमायाति सुखे दुःखे मनःप्रभा। यथाप्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते।— वराहोपनिषत् ४.२२

३०७. द्रागभ्यासवशाद्याति यदा ते वासनोदयम्। तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन।— मुक्तिकोपनिषत् २.८

३०८. अवासनत्वात्सततं यदा न मनुते मनः। अमनस्ता तदोदेति परमोपशमप्रदा।— मुक्तिकोपनिषत् २.२९

३०९. यदिदमितश्चेतश्चाण्डकोशा उदयन्ति नापद्यन्त इव न विस्रंसन्त इव न स्खलंतीव न पर्यावर्तन्त इव।— आर्षेयोपनिषत्

३१०. न ह वा एष परमतीवोदेति। यस्त्वेनं परमतीवोद्यन्तं पश्यन्नुपास्ते पापीयान् भवति वीवपद्यत आर्तिमृच्छति। यस्त्वेनं परमनूद्यन्तं वेदाथ तथोपास्ते परं ज्योतिरुपसंपद्यते सर्वमायुरेति वसीयान् भवति।— आर्षेयोपनिषत्

३११. विश्वस्य योनिं प्रतपन्तमुग्रं पुरः प्रजानामुदयत्येष सूर्यः।— चाक्षुषोपनिषत्

३१२. ततो हासुरा पुनरेवोदयन्ति। ते ह माध्यंदिनस्यैव सवनस्य पवमानेषु यज्ञवास्त्वभ्यायन्।— शौनकोपनिषत्

३१३. कश्यपः पश्यको भवति। यत्सर्वं परिपश्यतीति सौक्ष्म्यात्। कश्यपादुदिताः सूर्याः पापान्निर्घ्नन्ति सर्वदा।— सूर्यतापिन्युपनिषत् १.८

३१४. योऽसौ तपन्नुदेति। असौ योऽस्तमेति।— सूर्यतापिन्युपनिषत् १.९

३१५.----उदयाद्रिसमारूढमुदयन्तं पद्मकरं पद्मासनं-— सूर्यतापिन्युपनिषत् १.२६

३१६. उद्यन्नद्यमित्र महः। आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय।— उद्यन्नद्येत्ययं तृचो रोगघ्नः— सूर्यतापिन्युपनिषत् २.६

३१७. उद्यन्नद्य मित्रमहः। सपत्नान्मे अनीनशः। दिवैनान्विद्युता जहि।— सूर्यतापिन्युपनिषत् ३

३१८. पुण्यां च पुण्यः पुरुषे पुरग्रे तां राजिमन्तां निशि चोदितानां निदधाति पुष्ट्यै हरन् पराय स्वाहा।— पारमात्मिकोपनिषत् ९.८

३१९. अञ्जनागर्भसंभूत उदयभास्कर-बिम्बानलग्रासक देवदानव ऋषिमुनिवन्द्य---- लाङ्गूलोपनिषत्

३२०.- पीतचन्द्रार्धमनुबिभ्रतीमुद्यद्दिवाकरोद्योतां स्वर्णसिंहासनमध्यकमलसंस्थां- पीताम्बरोपनिषत्

३२१. उद्यद्भास्वत्समाभां विधृतनवजपा-मिन्दुखण्डावबद्धां— वनदुर्गोपनिषत् ४

३२२. यावदितः पुरस्तादुदयाति सूर्यः। तावदितोऽमुं नाशय। योऽस्मान् द्वेष्टि। यं च वयं द्विष्मः।— वनदुर्गोपनिषत्

३२३. दर्शपूर्णमासः :- अग्निं गृहामि सुरथं यो मयोभूर्य उद्यन्तमारोहति सूर्यमह्ने। आदित्यं ज्योतिषां ज्योतिरुत्तमं श्वोयज्ञाय रमतां देवताभ्यः।।— आपस्तम्ब श्रौत सूत्र ४.१.८

३२४. उद्यन्नद्य मित्रमहः सपत्नान्मे अनीनशः। दिवैनान्विद्युता जहि निम्रोचन्नधरान्कृधि। उद्यन्नद्य वि नो भज पिता पुत्रेभ्यो यथा। दीर्घायुत्वस्य हेशिषे तस्य नो देहि सूर्य। उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय।— आप.श्रौ.सू.४.१ ५.१

३२५. उद्यत्सु रश्मिषु दशहोत्रारणी समवदधाति।— आप.श्रौ.सू.५.१०.८

३२६.- ----हरस्ते मा विगादुद्यन्सुवर्गो लोकस्त्रिषु लोकेषु रोचयेति।— आप.श्रौ.सू.६.६.८

३२७. अङ्गारा भवन्ति तेभ्यो ऽङ्गारेभ्यो ऽर्चिरुदेति प्रजापतावेव। शरो ऽङ्गारा अध्यूहन्ते ततो नीलोपकाशो ऽर्चिरुदेति ब्रह्मणि हुतं भवति।— आप.श्रौ.सू.६.९.१

३२८. अग्नये ऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकं सूर्येणोद्यता। साकं वा रश्मिभिः प्रचरन्ति।— आप.श्रौ.सू.८.९.२

३२९. मरुद्भ्यः क्रीडिभ्यः स्वतवद्भ्यो वा पुरोडाशं सप्तकपालं निर्वपति। साकं सूर्येणोद्यता साकं वा रश्मिभिः प्रचरन्ति।— आप.श्रौ.सू.८.११.२२

३३०. अग्निष्टोम प्रातःसवनम् : उदाभ्यः शुचिरापूत एमीत्युद्गाहमानो जपति। अपो ऽश्नाति।— आप.श्रौ.सू.१०.६.२

३३१. उदितेषु नक्षत्रेषु पूर्ववद्वाचो विसर्गः। एवमुपोदयं यमयति। उदित आदित्ये विसृजते।— आप.श्रौ.सू.१०.१७.१

३३२. उदेत प्रजामायुर्वर्चो दधाना अध स्यामसुरुभयोर्गृहेषु।-------अहते वसानावुदितः — आप.श्रौ.सू. १३.२२.१

३३३. यदा पुरस्तादरुणा स्यादथ प्रवृज्यः। उपकाश उपव्युषं समयाविषित उदितानुदित उदिते वा।— आप.श्रौ.सू. १५.१८.१३

३३४. आग्निचयनम् : येन देवा ज्योतिषोर्ध्वा उदायन्निति प्रादेशमात्रैः काष्ठैरुख्यमुपसमिन्द्धे।— आप.श्रौ.सू. १६.११.१

३३५. अग्निचयनम् : दिवो रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः।— आप. श्रौ. सू. १६.१२.१

३३६. एकविधः प्रथमो ऽग्निः। द्विविधो द्वितीयः। त्रिविधस्तृतीयः। त एवमेवोद्यन्त्यैकशत-विधात्।— आप.श्रौ.सू.१६.१७.१५

३३७. उद्वदस्युदितिरस्युद्यत्यस्याक्रममाणास्या-क्रामन्त्यस्याक्रान्तिरसि- — आप.श्रौ.सू. १६.३०.१

३३८. उदेष्यते स्वाहेत्युपोदयम्। उद्यते स्वाहेत्युद्यति। उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते हुत्वा प्रज्ञातानन्नपरिशेषान्नि दधाति।— आप.श्रौ.सू. २०.१२.१०

३३९. तेभ्यो यन्नवनीतमुदियात्तदाज्ये ऽवनयेत्।— आप.श्रौ.सू.२२.२.१ ९

३४०. परि मा सेन्या इति द्वे वाचयित्वोत्तराभिस्तिसृभिरभिमन्त्र्योदसावेत्वित्यादित्यमुदीक्षयति।— आप.श्रौ.सू.२२.२८.२३

३४१. अग्निष्टोम प्रातसवनम् : तेन तथा कृतेनादित्यस्योदयमाकाङ्क्षन्त उदित आदित्ये ऽन्तर्यामं गृह्णाति--- बौधायन श्रौत सूत्र ७.६

३४२. अग्निचयनम्: अथोख्यमुपसमिन्द्धे येन देवा ज्योतिषोर्ध्वा उदायन्निति----- -अथ प्रातरुदित आदित्ये विसृष्टायां वाचि वात्सप्रेणोपतिष्ठते दिवस्परि प्रथमं जज्ञे अग्निरिति— बौ.श्रौ.सू.१०.१६

३४३. राजसूयः :- चार्मपक्ष्यावुपानहौ प्रप्लाव्य वाराही चार्मपक्षीभ्यामुदेति सो ऽपामन्ते जुहोति--- बौ.श्रौ.सू.१२.१६

३४४. अश्वमेधः :- इन्द्राणसमधिद्रुत्य चतस्रः स्रुवाहुतीर्जुहोत्युषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहेति प्रसिद्धो ऽभिषवः— बौ.श्रौ.सू. १५.२२

३४५. गवामयनम् : तद्धैतदेके दिवैवैतेनाह्ना प्रतिपद्यन्त उदित आदित्ये दिवाकीर्त्यमहरिति वदन्तो— बौ.श्रौ.सू. १६.१३

३४६. अग्निष्टोमा एवैते चतुर्विंशाः पवमाना उद्यत्स्तोमाः स्युरित्येतदेकम्— बौ.श्रौ.सू.१६.२८

३४७. अथादित्यमुद्यन्तमुपतिष्ठत उदसावेतु सूर्य उदिदं मामकं वचः।— बौ.श्रौ.सू.१८.१८

३४८. आनीकवतस्य निर्वपण इति। पाणिसंमर्शनेनादित्यस्योदयमाकाङ्क्षेतेत्याचार्योर्मुष्टिमेव ग्रहीष्यन्नित्यौपमन्यव साकँ रश्मिभि प्रचरेदित्यौपमन्यवीपुत्रः।— बौ.श्रौ.सू.२१.३

३४९. उद्यत्स्तोमेष्विति। पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः।— बौ.श्रौ.सू.२३.१२

३५०. ऽथोद्यत्स्तोमेषु त्रिवृत्प्रथममहः स्यात्पञ्चदशं द्वितीयँ सप्तदशं तृतीयमेकविँशं चतुर्थमिति ------ बौ.श्रौ.सू.२६.२०

३५१. उदयास्तमयावभ्याश्रावणं च बहिर्वेदि प्रसृते वर्जयेयुः।— द्राह्यायण श्रौत सूत्र ७.३.२८

३५२. अत ऊर्ध्वमाहिताग्निर्व्रतचार्याऽऽहोमात्। अनुदितहोमी चोदयात्। अस्तमिते होमः।— आश्वलायन श्रौ.सू.२.२.८

३५३. उपोदयं व्युषित उदिते वा।— आ.श्रौ.सू. २.४.२४

३५४. प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेत्— आ.श्रौ.सू.६.५.८

३५५. यां पर्यस्तमयं पूर्ण उदियाद्यां चास्तमिते ते पौर्णमास्यौ।— शांखायन श्रौत सूत्र१.३.५

३५६. ज्योतिष्टोमे आश्विनशस्त्रप्रकरणम् : उत्तमेन पाङ्क्तेन पादेनोदयं काङ्क्षेत्। उदिते सौर्याणि।--- शां.श्रौ.सू.९.२०.१९

३५७. होत्रशस्त्रप्रकरणम् : उद्वेदभीति ब्राह्मणाच्छंसिनः— शां.श्रौ.सू.१२.२.७

## उदयन

१. अनुहूतः पुनरेहि विद्वानुदयनं पथः। आरोहणमाक्रमणं जीवतोजीवतोऽयनम्।।— अथर्ववेद ५.३०.७

२. तथेति देवा अब्रुवन्। तवैव प्रायणीयस्तवोदयनीय इति। तस्मादेष आदित्य एव प्रायणीयो भवति -- आदित्य उदयनीयः। इयं ह्येवादितिः।— शतपथ ब्राह्मण ३.२.३.६

३. स यदादित्यं चरुं प्रायणीयं निर्वपति। यज्ञस्यैव दृष्ट्यै।--- अथैभ्यः पथ्या स्वस्तिः प्रारोचत। तामयजन्। वाग् वै पथ्या स्वस्तिः। ------अथैभ्योऽग्निः प्रारोचत। तमयजन्।---यद्वै शुष्कं यज्ञस्य तदाग्नेयम्।-- -- --अथैभ्यः सोम प्रारोचत। तमयजन्।- -- -- अथैभ्यः सविता प्रारोचत। तमयजन्। पशवो वै सविता।- -- -(विभिन्न दिशाओं में पांच देवताओं के यजन का वर्णन)।— श.ब्रा.३.२.३.७

४. शिरो वै यज्ञस्यातिथ्यम्। बाहू प्रायणीयोदयनीयौ। अभितो वै शिरो बाहू भवतः। तस्मादभित आतिथ्यमेते हविषी भवतः प्रायणीयश्चोदयनीयश्च। तदाहुः-यदेव प्रायणीये क्रियेत-तद् उदयनीये क्रियेत। यदेव प्रायणीयस्य बर्हिर्भवति-तदुदयनीयस्य बर्हिर्भवतीति।— श.ब्रा.३.२.३.२०

५. य एव प्रायणीयस्यर्त्विजो भवन्ति-त उदयनीयस्यर्त्विजो भवन्ति।---- स वै पञ्च प्रायणीये देवता यजति, पञ्चोदयनीये। तस्मात् पञ्चेत्थादङ्गुलयः, पञ्चेत्थात्।— श.ब्रा.३.२.३.२२

६. आतिथ्येष्टिः :- शिरो वै यज्ञस्यातिथ्यम्-बाहू प्रायणीयोदयनीयौ। अभितो वै शिरो बाहू भवतः। तस्मादभितः आतिथ्यमेते हविषी भवतः- प्रायणीयश्चोदयनीयश्च।— श.ब्रा.३.४.१.१

७. उदयनीयेष्टिः :- आदित्येन चरुणोदयनीयेन प्रचरति। तद् यदादित्यश्चरुर्भवति-यदेवैनामदो देवा अब्रुवन्-तवैव प्रायणीयः, तवोदयनीय इति।---स यदमुत्र राजानं क्रेष्यन्नुपप्रैष्यन्यजते-तस्मात्प्रायणीयं नाम। अथ यदत्रावभृथादुदेत्य यजते-तस्मादेतदुदयनीयं नाम। तद्वाऽएतत् समानमेव हविः-अदित्याऽएव प्रायणीयम्- अदित्या-ऽउदयनीयम्। इयं ह्येवादितिः। स वै पथ्यामेवाग्रे स्वस्तिं यजति।---- -सोऽग्निमेव प्रथमं यजति, अथ सोमम्, अथ सवितारम्, अथ पथ्यां स्वस्तिम्, अथादितिम्।— श.ब्रा.४.५.१.१

८. चित्रं देवानामुदगादनीकम्-इति। असौ वा आदित्य एष पुरुषः। तदेतच्चित्रं देवानामुदेत्यनीकम्। चक्षुर्मित्रस्य वरुणस्याग्नेः-इति।--- श.ब्रा.७.५.२.२७

९. सुत्याह कर्म : तं हैके-प्रायणीय एवातिरात्रे युञ्जन्ति, उदयनीये विमुञ्चन्ति। संस्थारूपं वा एतत्- यद्विमोचनम्।— श.ब्रा.९.४.४.१५

१०. अथो यथा प्रायणीयेऽतिरात्रे सामिधेनीरनूच्य ब्रूयात्-उदयनीयऽएवातोऽनुवक्ता-ऽस्मीति-तादृक् तत्।— श.ब्रा.९.४.४.१६

११. देविकाहवींषि : समिष्टयजूंषि हुत्वा, अवभृथं यन्ति। अवभृथादुदेत्य, उदयनीयेन चरित्वा, अनूबन्ध्यस्य पशुपुरोडाशमनु देविकानां हवींषि निर्वपति।— श.ब्रा.९.५.१.३४

१२. वैश्वकर्मणहोमः - यद्वेव वैश्वकर्मणानि जुहोति। प्रायणं च ह्यग्नेरुदयनं च। सावित्राणि प्रायणम्, वैश्वकर्मणान्युदयनम्। स यत्सावित्राण्येव जुहुयात्, न वैश्वकर्मणानि, यथा प्रायणमेव कुर्यान्नोदयनं-तादृक् तत्। अथ यद्वैश्वकर्मणान्येव जुहुयात्, न सावित्राणि, यथोदयनमेव कुर्यात्, न प्रायणम्-तादृक् तत्। उभयानि जुहोति-प्रायणं च तदुदयनं च करोति। अष्टावमूनि भवन्ति। एवमिमानि। तद्यथा प्रायणं तथोदयनं करोति। स्वाहाकारोऽमीषां नवमो भवति। एवमेषाम्। तद् यथा प्रायणं तथोदयनं करोति। आहुतिरमीषां दशमी भवति। एवमेषाम्। तद् यथा प्रायणं तथोदयनं करोति— श.ब्रा.९.५.१.४४

१३. दीर्घसत्रं वा एष उपैति। यो ब्रह्मचर्यमुपैति। स यामुपयन् समिधमादधाति,सा प्रायणीया। यां स्नास्यन्,

सोदयनीया। अथ या अंतरेण सत्र्या एवास्य ताः।— श.ब्रा. ११.३.३.२

१४. अथ ब्रह्मयज्ञः।-- -मेधा स्रुवः। सत्यमवभृथः। स्वर्गो लोक उदयनम्।— श.ब्रा.११.५.६.३

१५. तेषां वा उन्नेतोत्तमो दीक्षते। प्रथमोऽवभृथादुदायतामुदैति। प्राणो वा उन्नेता। प्राणमेवैष्वेतदुभयतो दधाति।— श.ब्रा.१२.१.१.११

१६. श्रद्धाया वै देवा दीक्षां निरमिमत। अदित्यै प्रायणीयम्।---- संवत्सराद्दशममहः। प्रजापतेर्महाव्रतम्। स्वर्गाल्लोकादुदयनीयमतिरात्रम्। तदेतत्संवत्सरस्य जन्म।— श.ब्रा.१२.१.२.१

१७. अथ यदुदयनीयमतिरात्रमुपयन्ति। संवत्सरमेव तदाप्त्वा स्वर्गे लोके प्रतितिष्ठन्ति।— श.ब्रा.१२.१.३.२२

१८. अध्यात्मविद्ब्राह्मणम्: पुरुषो वै संवत्सरः। तस्य पादावेव प्रायणीयोऽतिरात्रः।------अङ्गानि दशरात्रः। मुखं महाव्रतम्। हस्तावेवोदयनीयो-ऽतिरात्रः। हस्ताभ्यां ह्युद्यन्ति।— श.ब्रा.१२.१.४.३

१९. सम्वत्सरे समुद्रप्रतरणोपासनम् : तस्य तीर्थमेव प्रायणीयोऽतिरात्रः। तीर्थेन हि प्रस्नांति।---- - तीर्थमेवोदयनीयोऽतिरात्रः। तीर्थेन ह्युत्स्नान्ति। तद्यदुदयनीयमतिरात्रमुपयन्ति। यथा तीर्थेन समुद्रं प्रस्नाय तीर्थेनोत्स्नायुः। तादृक्तत्।— श. ब्रा. १२.२.१.५

२०. अथ वा अतोऽह्नामभ्यारोहः। प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमभ्यारोहन्ति।— श. ब्रा. १२.२.३.१०

२१. अथ वा अतोऽह्नां निवाहः। प्रायणीयोऽतिरात्रश्चतुर्विंशायाह्ने निवहति।----दशरात्रो महाव्रताय। महाव्रतमुदयनीयायातिरात्राय। उदय-नीयोऽतिरात्रः स्वर्गाय लोकाय प्रतिष्ठायाऽ अन्नाद्याय।— श.ब्रा.१२.२.३.११

२२. गवामयनीय संवत्सरस्य पुरुषविधोपासनम् : मुखं महाव्रतम्। उदान एवोदयनीयोऽतिरात्रः। उदानेन ह्युद्यंति। स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः।— श.ब्रा.१२.२.४.१६

२३. उदयनीयायां संस्थितायाम्, एकविंशतिं वशा अनूबन्ध्या आलभते।-— श.ब्रा.१३.५.४.२५

२४. पुरुषमेधः :- उदयनीयायां संस्थितायाम्, एकादश वशा अनूबंध्या आलभते-मैत्रावरुणीः, वैश्वदेवीः, बार्हस्पत्याः।— श.ब्रा.१३.६.२.१६

२५. एषा उ ह जीवानां दिगंतरेण। सप्तर्षीणां चोदयनम्। आदित्यस्य चास्तमयनम्। अमृतमेव तज्जीवेषु दधाति।— श.ब्रा.१३.८.१.९

२६. स्वर्गं वा एतेन लोकमुपप्रयन्ति यत्प्रायणीयस्तत्प्रायणीयस्य प्रायणीयत्वम्। प्राणो वै प्रायणीय उदान उदयनीयः समानो होता भवति समानौ हि प्राणोदानौ प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै।— ऐतरेय ब्राह्मण १.७

२७. ते (देवाः) ऽब्रुवन्नदितिं त्वयेमं यज्ञं प्रजानामेति सा तथेत्यब्रवीत्सा वै वो वरं वृणा इति वृणीष्वेति सैतमेव वरमवृणीत मत्प्रायणा यज्ञाः सन्तु मदुदयना इति तथेति तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो वरवृतो ह्यस्याः। अथो एतं वरमवृणीत मयैव प्राची दिशं प्रजानाथाग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमिति। (पथ्यास्वस्ति आदि देवताओं का वर्णन)— ऐ. ब्रा. १.७

२८. प्रायणीयस्य निष्कासं निदध्यात्तमुदयनी-येनाभिनिर्वपेद्यज्ञस्य संतत्यै यज्ञस्याव्यवच्छेदाय। अथो खलु यस्यामेव स्थाल्यां प्रायणीयं निर्वपेत्तस्यामुदयनीयं निर्वपेत्तावतैव यज्ञः संततोऽव्यवच्छिन्नो भवति।------ --याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः कुर्याद्या उदयनीयस्य पुरोनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात्तद्व्यतिषजत्युभयोर्लोकयोर्ऋद्ध्या------ आदित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो यज्ञस्य धृत्यै यज्ञस्य बर्सनद्ध्यै यज्ञस्याप्रस्रंसाय---- एवमेवैतद्यज्ञस्योभयतोऽन्ततोरप्रस्रंसाय बर्सौ नह्यति यदादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयः। पथ्ययैवेतः स्वस्त्या प्रयन्ति पथ्यां स्वस्तिमभ्युद्यन्ति

स्वस्त्येवेतः प्रयन्ति स्वस्त्युद्यन्ति स्वस्त्युद्यन्ति।— ऐ.ब्रा.१.११

२९. स वा एषोऽपूर्वोऽनपरो यज्ञक्रतुर्यथा रथचक्रमनन्तमेवं यदग्निष्टोमस्तस्य यथैव प्रायणं तथोदयनम्।--- ऐ.ब्रा.३.४३

३०. यथा ह्येवास्य प्रायणमेवमुदयनमसदिति। तदाहुर्यत्त्रिवृत्प्रायणमेकविंशमुदयनं केन ते समे इति।— ऐ.ब्रा.३.४३

३१. यो वै संवत्सरस्यावारं च पारं च वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य प्रायणीयोऽवारमुदयनीयः— ऐ.ब्रा.४.१४

३२. यो वै संवत्सरस्यावरोधनं चोद्रोधनं च वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य प्रायणीयोऽवरोधनमुदयनीय उद्रोधनम्।— ऐ. ब्रा. ४.१४

३३. यो वै संवत्सरस्य प्राणोदानौ वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य प्रायणीयः प्राण उदान उदयनीयः— ऐ.ब्रा.४.१४

३४. तद्यद्यतुर्विंशेऽहन्युज्यन्ते सा युक्तिरथ यत्पुरस्तादुदयनीयस्यातिरात्रस्य विमुच्यन्ते सा विमुक्तिः।— ऐ.ब्रा.६.२३

३५. सूयते ह वा अस्य क्षत्त्रं यो दीक्षते क्षत्त्रियः सन्स यदाऽवभृथादुदेत्यानूबन्ध्ययेष्ट्वोद-वस्यत्यथैनमुद-वसानीयायां संस्थितायां पुनरभिषिञ्चन्ति।— ऐ.ब्रा.८.५

३६.-आदित्येभ्यस्तृतीयसवनं, वरुणादवभृथम्, अदितेरुदयनीयां, मित्रावरुणाभ्यामनूबन्ध्यां,- — गोपथ ब्राह्मण१.४.७

३७. अथ यदुदयनीयया यजन्ते, अदितिमेव तद् देवीं देवता यजन्ते।— गो.ब्रा.१.४.८

३८. अहोरात्राभ्यां वै देवा प्रायणीयमतिरात्रं निरमिमत,---- -प्रजापतेर्महाव्रतं, स्वर्गाल्लोकादु-दयनीयमतिरात्रम्। तद् वा एतत् संवत्सरस्य जन्म।— गो.ब्रा.१.४.९

३९. अथ यत् प्रायणीयमतिरात्रमुपयन्ति, अहोरात्रावेव तद् देवौ देवते यजन्ते।------अथ यदुदयनीयमतिरात्रमुपयन्ति, स्वर्गमेव तल्लोकं देवं देवतां यजन्ते।— गो.ब्रा.१.४.१०

४०.--- -महाव्रतादुदयनीयो ऽतिरात्रः। उदयनीयो ऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै।— गो.ब्रा.१.४.१४, १.४.२२

४१. समुद्रं वा एते प्रतरन्ति ये संवत्सराय दीक्षन्ते। तेषां तीर्थमेव प्रायणीयोऽतिरात्रः। तीर्थेन हि प्रतरन्ति।-- तेषां तीर्थमेवोदयनीयोऽतिरात्रः। तीर्थेन ह्युद्यन्ति। तद् यथा समुद्रं तीर्थेनोदेयुस्तादृक् तत्।— गो.ब्रा.१.५.२

४२. पुरुषो वाव संवत्सरः। तस्य पादावेव प्रायणीयो ऽतिरात्रः।-----तस्य हस्तावेवोदयनीयो ऽतिरात्रः। हस्ताभ्यां ह्युद्यन्ति।— गो.ब्रा.१.५.३

४३. पुरुषो वाव संवत्सरः। तस्य प्राण एव प्रायणीयो ऽतिरात्रः। प्राणेन हि प्रयन्ति।-----मुखं महाव्रतम्। तस्योदान एवोदयनीयोऽतिरात्रः। उदानेन ह्युद्यन्ति।— गो.ब्रा.१.५.४

४४. सकृद् ध्य् एव परस्तात् त्रिवृते हिंकुवन्ति यत् प्रायणं तद् उदयनम् असद् इति।— जैमिनीय ब्रा. १.२३१

४५. यदि द्वयह उभयोर् अह्नोर् अहिंकृतां गायेत्। प्रायणं हि तयोर् अन्यतरद् उदयनम् अन्यतरत्।------ -- -अथो अन्नं वै हिंकारः -- अन्नेन वै गर्भो ऽभिवर्धते -- अभिवृद्ध्या एवेति। ताम् उदयने गायेद् यत् प्रायणं तद् उदयनम् असद् इति।— जै.ब्रा.१.३१५

४६. अस्मिन्न् एव लोके प्रायणीयेनातिरात्रेण प्रतिष्ठाय प्रयन्ति। अमुष्मिन् लोक उदयनीयेनातिरात्रेण प्रतिष्ठायोद्यन्ति।— जै.ब्रा.२.४४

४७. इम एव दश प्राणा दशरात्रः। मन एव महाव्रतीयम् अहः। उदान एवोदयनीयो ऽतिरात्रः।— जै.ब्रा.२.५८

४८. अथ यां क्रीते राजनि सुब्रह्मण्याम् आह्वयति -- ------ -। अथो यत् प्रायणं तद् उदयनम् असद् इति।— जै.ब्रा.२.८०

४९. अवभृथाद् उदेत्य श्मश्रूण्य् एव वपते न केशान्।— जै.ब्रा.२.२०४

५०. वैश्वानरः प्रायणीयोऽतिरात्रो भवति। वैश्वानरप्रायणा ह्य् अहीनास् सोमाः।-----अथैष पृष्ठ्यष् षडहो भवति।------तत् त्व् एतस्य परिचक्षते यद् आरभमाणा एवं पृष्ठ्यं षडहम् आरभन्ते वैश्वानर उदयनीयो ऽतिरात्रो भवति। वैश्वानरोदयना ह्य् अहीनास् सोमाः।— जै.ब्रा.२.३३६, ३३७

५१. त्रिर् एवाश्विनं शस्तव्यम् इति, प्रायणतो, मध्यत उदयनतः। एतद् ध वै समृद्धम् आश्विनं यद् रथन्तरेण संपद्यते। यद्य् एकेन संपद्येत रथन्तरम् एव प्रायणतो मध्यत उदयनतो, यदि द्वाभ्यां रथन्तरम् एव प्रायणतो मध्यत उदयनतो, यदि त्रिभी रथन्तरम् एव प्रायणतो मध्यत उदयनतो, न चतुर्भिस् संपद्यते, नो एव पञ्चभिः।— जै.ब्रा.२.३६८

५२. पुरुषं वावैतद् आसते यत् संवत्सरम्।---- -इमे त्रय स्वरसामान इमे त्रयो ऽयं विषुवान् इदं महाव्रतीयम् अहर् अयम् उदयनीयो ऽतिरात्रः।— जै.ब्रा.२.४२७

५३. अयम् एव लोकः प्रायणीयो ऽतिरात्रः।-----प्रजापतिर् एव महाव्रतीयम् अहर्, असाव् एव लोक उदयनीयो ऽतिरात्रः।— जै.ब्रा.२.४२९

५४. ते यां प्रायणीयम् अतिरात्रम् उपेत्य वसन्त्य् अस्मिन् एव तां लोके वसन्ति। तद् यद् अस्मिन् लोके ऽन्नाद्यं तद् एव तेनावरुन्धते।---- -अथ याम् उदयनीयम् अतिरात्रम् उपेत्य वसन्त्य् अमुष्मिन् एव ता लोके वसन्ति। तद् यद् अमुष्मिन् लोक ऽन्नाद्यं तद् एव तेनावरुन्धते।— जै.ब्रा.२.४३०

५५. इयम् एव दिक् प्रायणम्, इयम् उदयनम्। तस्माद् असाव् आदित्य इतो ऽस्तम् एतीत उदेति। एतद् एव प्रायणं चोदयनं चानुसंचरति।— जै.ब्रा.३.३०८

५६. इदम् एव प्रायणम्, इदम् उदयनम्। तस्माद् इत एव प्रयन्त्य् अत उद्यन्ति। अग्निर् एव प्रायणम्, आदित्य उदयनम्।— जै.ब्रा.३.३०९

५७. --- -नाक एव दशमम् अहः। इदम् एव प्रायणम् अद उदयनम्। ते हैते लोका एवैतानि द्वादशाहस्याहानि।— जै.ब्रा.३.३४७

५८. प्रायणीयेनातिरात्रेण त्रयोदशं मासम् उपाप्नुवन्त्य्, उदयनीयेन संवत्सरं चतुर्दशम्।------- -माघो द्वादशं, प्रायणीय एवातिरात्रस् त्रयोदशो मास, उदयनीयस् संवत्सरश् चतुर्दशः।— जै.ब्रा.३.३८६

५९. असौ वा आदित्योऽग्निरनीकवान्। तस्य रश्मयोऽनीकानि। साकँ सूर्येणोद्यता निर्वपति। साक्षादेवास्मा अनीकानि जनयति।— तै. ब्रा. १.६.६.२

६०. हविषः याज्या : चित्रं देवानामुदगादनीकम्। चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षम्। सूर्य आत्मा जगतस्तस्थुषश्च।— तै.ब्रा.२.८.७.३

६१. तयोरेतौ वत्सौ। अग्निश्चाऽऽदित्यश्च। रात्रेर्वत्सः। श्वेत आदित्यः। अह्नोऽग्निः। ताम्रो अरुणः। ता अविसृष्टौ। दंपती एव भवतः।---- -प्रजयिष्णुः प्रजया च पशुभिश्चत भवति। य एवं वेद। एतमुद्यन्तमपियन्तं चेति। आदित्यः पुण्यस्य वत्सः।— तैत्तिरीय आरण्यक १.१०.५

६२. पृष्ठ्यषडहस्य प्रथमे-षष्ठे अहनि : त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत् प्राणेनैव प्रैति प्राणमभ्युदेति सर्वमायुरेति न पुरायुषः प्रमीयते य एतया स्तुते।-ताण्ड्य ब्रा.३.६.३

६३. षडहे विभक्तेर्नानात्वं : येनैव रूपेण प्रयन्ति तदभ्युद्यन्ति यस्मादेषा समाना सतीन्द्रविभक्तिर्नानारूपा तस्माद्यथर्त्वोषधयः पच्यन्ते।— तां.ब्रा.१०.८.१

६४. पवमानस्य ते वयमिति बहिष्पवमानस्यान्त्यं तृचं : तृच उत्तमो भवति। येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.११.६.९

६५. तृतीयेऽहनि बहिष्पवमाने : तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा. १२.१.१०

६६. तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्त्येकविंश एव स्तोमो भवति प्रतिष्ठायै प्रतितिष्ठति।— तां.ब्रा.१२.७.१०

६७. माध्यन्दिन पवमानः :- (पुनानो अक्रमीदिति) गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.१२.९.२३

६८. बहिष्पवमानस्य स्तोत्रम् (यास्ते धाना मधुश्चुत इति) :- तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति त्रिणव एव स्तोमो भवति प्रतिष्ठायै पुष्ट्यै त्रिवृद्वा एष पुष्टः।— तां.ब्रा.१३.१.१२

६९. माध्यन्दिनस्य पवमानस्य स्तोत्रीयास्तृचः :- गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.१३.३.२५

७०. बहिष्पवमानस्यान्त्यं तृचं : तृच उत्तमो भवति येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.१३.७.१५

७१. माध्यन्दिन पवमानः :- इहवद्वामदेव्यं भवति---- गायत्रीषु स्तुवन्ति प्रतिष्ठायै ब्रह्मवर्चसाय येनैव प्राणेन प्रयन्ति तमभ्युद्यन्ति।— तां.ब्रा.१३.९.२८

७२. सप्तमम् अहःसु उक्थस्तोत्रेषु : ब्रह्मवादिनो वदन्ति प्रायणतो द्विपदाः कार्य्या उदयनता इति। उदयनत एव कार्य्याः पुरुषो वै द्विपदाः प्रतिष्ठायै।— तां.ब्रा.१३.१.२२

७३. सप्तमे अहनि माध्यन्दिन पवमाने : प्रवद्भार्गवं भवति। प्रवता वै देवाः स्वर्गं लोकं प्रायन्नुद्वतोदायन्।— तां.ब्रा.१४.३.२४

७४. माध्यन्दिनस्य पवमानस्य स्तोम क्लृप्तिः :- उद्वद्भार्गवं भवति। प्रवता वै देवा स्वर्गं लोकं प्रायन्नुद्वतोदायन्।— तां.ब्रा.१४.९.३९

७५. माध्यन्दिन पवमानः :- तदु संवदित्याहुः संवता वै देवाः स्वर्गं लोकं प्रायन्नुद्वतोदायन्।— तां.ब्रा.१५.३.३६

७६. दशमे अहनि तृतीयस्य पृष्ठस्तोत्रीयं तृचं : उदुत्ये मधुमत्तमा इत्युद्वत्य उदयनीयेऽहन्येतदाशिषोह्येवैतर्हि।— तां.ब्रा. १५.१०.३

७७. सप्तदशस्तोमकमग्निष्टोमसंस्थमेकाहम् : चतुःषष्टिमष्टाविंशतिशतमानान्युदयनीयायामिष्टौ-— तां.ब्रा. १८.३.२

७८. पक्षाख्यः क्रतुः (आद्यन्तौ स्तोमौ) :- त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति।— तां.ब्रा.१९.१०.१४

७९. बहिष्पवमानस्य सन्धिस्तोत्रगतौ स्तोमौ : त्रिवृता प्रैति त्रिवृतोदेति प्राणो वै त्रिवृत्प्राणेनैव प्रैति प्राणमभ्युदेति।— तां.ब्रा.२०.१.६

८०. अवभृथ प्रकरणम् : प्रागुदयनीयादतिरात्रादप्सुषोमान्तमहः सत्रेषु— द्राह्यायण श्रौत सूत्र ६.४.१३

८१. दीक्षणीया इष्टिः :- नेदमादिषु मार्जनमर्वागुदयनीयायाः।— आश्वलायन श्रौ.सू. ४.२.६

८२. अयमेवैकाहोऽतिरात्र आदौ प्रायणीयः। एषोऽन्त्य उदयनीयः। अव्यक्तो मध्ये।— आश्व.श्रौ.सू. ११.१.२

८३. दृतिवातवतोरयनम् (सत्रम्) :- प्रायणीयोऽतिरात्रः।- उदयनीयोऽतिरात्रः।— आश्व.श्रौ.सू. १२.३.६

८४. प्रायणीयोदयनीययोरतिरात्रयोः समस्तानालभेरन्नैन्द्राग्नमन्तर्धौ वा।-------वैश्वकर्मणमृषभं महाव्रते आग्नेयमुदयनीयातिरात्रे।— आश्व.श्रौ.सू.१२.७.७

८५. ज्योतिष्टोमेऽवभृथकर्मप्रकरणम् :- प्रायणीययोदयनीया व्याख्याता। विपर्यासो याज्यापुरोनुवाक्यानां स्विष्टकृतः परिहाप्य। पथ्यां स्वस्तिं चतुर्थीं यजति। तृतीयं सवितारम्।-— शांखायन श्रौत सूत्र ८.१२.१

८६. पुरस्तादेव कतिपयाहेन होता प्रेयफलकमुत्पाटयति। तिष्ठत एवोदुम्बरस्य। पुरस्तादादित्यस्योदयनत।-शांखायन श्रौत सूत्र १७.१.४

८७. महाव्रत प्रकरणे अवभृथ कर्म : अथ प्रातरुदयनीयमतिरात्रमुपयन्ति। य एवासौ प्रायणीयः स उदयनीयः। तत्र सर्वान्करस्नान्संबाध्य प्रेष्यति मैत्रावरुणः।-— शां.श्रौ.सू.१८.२४.२

८८. आज्यग्रहणकाले ऽननूयाजे प्रायणीये चतुर्जुह्वां गृह्णाति चतुरुपभृति समानयनार्थम्। अप्रयाज उदयनीये न

जुह्वां गृह्णाति। चतुरुपभृत्यनूयाजार्थम्।-------- पत्नीस्तु न संयाजयेत्। ता उदयनीये संयाजयेत्। समे वा कार्ये। धारयति ध्रौवमाज्यम्। प्राग्वंशे बर्हिः स्थालीमनिष्कसितां मेक्षणमित्युदयनीयार्थं निदधाति। — आप.श्रौ.सू.१०.२१.८

८९. उदेत प्रजामायुर्वर्चो दधाना अध स्यामसुरुभयोर्गृहेषु- अहते वसानावुदितः।— आप.श्रौ.सू. १३.२२.१

९०. प्रायणीयवदुदयनीया।— आप. श्रौ. सू. १३.२३.१

९१. वीणागणकिनो देवैरिमं यजमानं संगायतेति। एवं सदौपवसथात्। प्रजापतिना सुत्यास्व-वभृथोदयनीयानूबन्ध्योदवसानीयास्विति। देवैरन्ततः।— आप.श्रौ.सू.२०.८.१६

९२. प्रायणीयवदुदयनीयमुपयन्ति। नात्राहीनसंततयो भवन्ति। यत्पूर्वस्मिन्नहन्युत्तरस्मा अह्ने क्रियते ता अहीनसंततयः।----- अथ ग्रहक्लृप्तिः। प्रायणी-योदयनीययोर्दशमे ऽहन्निति पृश्निप्राणग्रहान्गृह्णाति। — आप.श्रौ.सू.२१.१३.१

९३. त्र्यनीकां व्याख्यास्यामः। ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः।---व्यूढे त्वैन्द्रवायवाग्रौ प्रायणीयोदयनीयौ।----आग्नेयमुदयनीये। ऐन्द्राग्नं वा।--अग्निष्ठ उदयनीये पशुमुपाकरोति।— आप.श्रौ.सू. २१.१४.१

९४. व्याख्यात उदयनीय : पृष्ठ्यशमनीयश्च। अथ ग्रहक्लृप्तिः।— आप.श्रौ.सू.२१.२१.१

९५. उपालम्भनम् : प्राजापत्यमृषभं तूपरं महाव्रते। आग्नेयमुदयनीये। इति पालिङ्गायनिकाः। अथ काठकाः। ऐकादशिनान्प्रतिविभज्याप्रतिविभज्य वा प्रायणीयोदयनीययोरालभन्ते।— आप. श्रौ. सू. २१.२३.४

९६. हिरण्यस्रजमुद्गात्रे षट्पुष्करां द्वादशपुष्करां वा यज्ञायज्ञीयस्य स्तोत्रेऽवभृथेष्ट्यामुदयनीयायामनू-बन्ध्यायामुदवसानीयायां च।— आप. श्रौ. सू. २२.१०.१

९७. अमावास्यायां प्रायणीयो ऽष्टम्यां महाव्रतं पौर्णमास्यामुदयनीयः। एतद्वा विपरीतम्।— आप. श्रौ. सू. २३.२.३

९८. आदित्यानामयनम् : महाव्रतोदयनीयाभ्यामिति द्व्यूनो मासः पूर्यते। एतेनाङ्गिरसामयनं व्याख्यातम्। ---------महाव्रतोदयनीयाभ्यामिति द्व्यूनो मासः पूर्यते।— आप.श्रौ.सू.२३.९.९

९९. अग्निष्टोम प्रातसवनम् : अथ परिकर्मिणः सँशास्त्यनुच्छिष्टीकुर्वन्त एतं चरुं व्युद्धृत्य प्राश्नीताथैतां चरुस्थालीं सक्षामकाषामेतन्मेक्षणमेतं वेदमेतद्बर्हिश्चतुष्टय-मुदयनीयाय निधत्तादिति--- -बौधायन श्रौत सूत्र ६.१२

१००. अग्निचयने अवभृथं कर्म : समुद्राय वयुनाय सिन्धूनां पतये नम इति प्रसिद्धो ऽवभृथ उदयनीयेष्ट्येष्ट्वा मैत्रावरुणीं वशामुपाकरोति------बौ.श्रौ.सू.१०.५९

१०१. राजसूयः :- ----प्रसिद्धो ऽवभृथ उदयनीयेष्ट्येष्ट्वा मैत्रावरुणीं वशामुपाकरोति।-बौ.श्रौ.सू. १२.१६

१०२. राजसूयः :- शालामध्यवसाय मथित्वाग्नीन्विहृत्योदयनीयायाग्निष्टोमाय दीक्षते तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः संतिष्ठत एष उदयनीयो ऽग्निष्टोमश्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तो— बौ.श्रौ.सू.१२.२०

१०३. औपानुवाक्यम् : उक्तमादित्य-ग्रहस्योद्धूननमुक्ता प्रायणीयस्य स्रुवाहुतिरुक्तो-दयनीयस्योक्तं यूपस्योपस्थानम्।-बौ. श्रौ. सू. १४.२१

१०४. गवामयनम् : प्रायणीयोदयनीयावभितो मध्ये ऽग्निष्टोमास्तद्द्वितीयं प्रजापतेरयनँ— बौ. श्रौ. सू. १६.१६

१०५. गवामयनम् : तद्धैतदेके सारस्वतवैष्णवौ ग्रहौ गृहन्ति प्रायणीयादेवाग्रे ऽतिरात्रादोदयनीयाद्वाग्वै सरस्वती यज्ञो विष्णुः-— बौ.श्रौ.सू.१६.१६

१०६. आ समुदितादिहावभृथेन प्रचरत्यथा-मुत्रेहोदयनीयामिष्टिं निर्वपति-बौ. श्रौ. सू. १८.५०

१०७. प्रायश्चित्तानि : उदयनीयस्य बर्हिषः सँस्कार इति। असिदादानप्रभृतीन्मन्त्रान्साधयेदिति बौधायनः शुल्बप्रभृतीनिति शालीकिः संभरणप्रभृतीनित्यौपमन्यवः। उदयनीयस्य निर्वपण इति। स्रुचि वावधाय क्षामकाषँ स्थाल्यां वा सक्षामकाषायां निर्वपेदिति। पूर्वः कल्पो बौधायनस्योत्तरः शालीकेः। उदयनीयस्य श्रपण इति। पयसि श्रपयेदिति बौधायनो ऽप्स्विति शालीकिः।---- उदयनीयस्यासादन इति। षड्डौत्रासादयेदिति बौधायनस्तूष्णीमिति शालीकिः। उदयनीयस्य चर्याया इति। सूत्रं बौधायनस्याहवनीय एवोदयनीयेन चरेदिति शालीकिः।-बौ. श्रौ. सू. २१.२५

१०८.---तस्यै सह सवनीयैर्वत्सापाकरणँ सह सायंदोहमुदयनीयेन चरित्वा पाणी संमृशीत----बौ. श्रौ. सू. २५.२६

१०९. अथ मथित्वाग्नीन्विहृत्योदयनीया-याग्निष्टोमाय दीक्षते तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः संतिष्ठत एष उदयनीयो अग्निष्टोमः सहस्रदक्षिणो--- बौ. श्रौ. सू. २६.२

## उदर

१. उत यो मानुषेष्वा यशस्चक्रे असाम्या। अस्माकमुदरेष्वा।। (ऋ.शुनःशेप; दे.वरुण)— ऋ १.२५.१५

२. शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम्। पूषन्निह क्रतुं विदः।।— ऋ.१.४२.९

३. यदूवध्यमुदररस्यापवाति य आमस्य क्रविषो गन्धो अस्ति। सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकः पचन्तु।।— ऋ.१.१६२.१०

४. एन्द्र याहि मत्स्व चित्रेण देव राधसा। सरो न प्रास्युदरं सपीतिभि रा सोमेभिरुरु स्फिरम्।। — ऋ.८.१.२३

५. इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम्। अनाभयिन् ररिमा ते।।— ऋ.८.२.१

६. क्रत्व इत् पूर्णमुदरं तुरस्यास्ति विधतः। वृत्रघ्नः सोमपाव्नः।।— ऋ.८.७८.७

७. इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय। शिरस्ततस्योर्वरामादिदं म उपोदरे।।— ऋ.८.९१.५

८. पर्शुर्ह नाम मानवी साकं ससूव विंशतिम्। भद्रं भल त्यस्या अभूद् यस्या उदरमामयद् विश्वस्मादिन्द्र उत्तरः।।— ऋ.१०.८६.२३

९. आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि। यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या वि वृहामि ते।।-अथर्ववेद २.३३.४

१०. शतेन पाशैरभि धेहि वरुणैनं मा ते मोच्यनृतवाङ् नृचक्षः। आस्तां जाल्म उदरं श्रंसयित्वा कोश इवाबन्धः परिकृत्यमानः।— अ.४.१६.७

११. ब्रह्मास्य शीर्षं बृहदस्य पृष्ठं वामदेव्यमुदरमोदनस्य। छन्दांसि पक्षौ मुखमस्य सत्यं विष्टारी जातस्तपसोऽधि यज्ञः।।— अ.४.३४.१

१२. यदन्तरिक्षं रजसो विमानं तत् कृण्वेऽहमुदरं शेवधिभ्यः। तेन शालां प्रति गृह्णामि तस्मै।।— अ.९.३.१५

१३. देवजना गुदा मनुष्या आन्त्राण्यत्रा उदरम्।— अ.९.१२.१६

१४. हरिमाणं ते अङ्गेभ्योऽप्वामन्तरोदरात्। यक्ष्मोधामन्तरात्मनो बहिर्निर्मन्त्रयामहे।।— अ.९.१३.९

१५. बहिर्बिलं निर्द्रवतु काहाबाहं तवोदरात्। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत्।।— अ.९.१३.११

१६. उदरात् ते क्लोम्नो नाभ्या हृदयादधि। यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत्।।— अ.९.१३.१२

१७. यस्य भूमिः प्रमान्तरिक्षमुतोदरम्। दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।— अ.१०.७.३२

१८. ईर्माभ्यामयनं जातं सक्थिभ्यां च वशे तव। आन्त्रेभ्यो जज्ञिरे अत्रा उदरादधि वीरुधः।।— अ.१०.१०.२१

१९. यदुदरं वरुणस्यानुप्राविशथा वशे। ततस्त्वा ब्रह्मोदह्वयत् स हि नेत्रमवेत् तव।।— अ.१०.१०.२२

२०. अङ्गेभ्यस्त उदराय जिह्वाया आस्याय ते। दद्भ्यो गन्धाय ते नमः।।— अ.११.२.६

२१. ततश्चैनमन्येनोदरेण प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन्। उदरदारस्त्वा हनिष्यतीत्येनमाह।। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्। सत्येनोदरेण। तेनैनं प्राशिषं तेनैनमजीगमम्।।— अ.११.४.११

२२. आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः। तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।— अ.११.५.३

२३. चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम्।।— अ.११.७.२५

२४. स एकव्रात्योऽभवत् स धनुरादत्त तदेवेन्द्रधनुः। नीलमस्योदरं लोहितं पृष्ठम्। नीलेनैवाप्रियं भ्रातृव्यं प्रोर्णोति लोहितेन द्विषन्तं विध्यतीति ब्रह्मवादिनो वदन्ति।— अ.१५.१.७

२५. आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि। यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या वि वृहामि ते।।— अ.२०.९६.२०

२६. पर्शुर्ह नाम मानवी साकं ससूव विंशतिम्। भद्रं भल त्यस्या अभूद् यस्या उदरमामयद् विश्वस्मादिन्द्र उत्तरः।।— अ.२०.१२६.२३

२७. अथ हैक्ष्वाकं वरुणो जग्राह तस्य होदरं जज्ञे तदु ह रोहितः शुश्राव सोऽरण्याद् ग्राममेयाय तमिन्द्र पुरुषरूपेण पर्येत्योवाच— ऐ.ब्रा.७.१५

२८. तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां वि पाशो मुमुचेऽगद ऐक्ष्वाक आस।— ऐ.ब्रा.७.१६

२९. वशं शंसति वशे म इदं सर्वमसदिति। ता एकविंशतिर्भवन्त्येकविंशतिर्हि ता अन्तरुदरे विकृतयः। अथो एकविंशो वै हीमानां प्रतिष्ठोदरमन्नाद्यानाम्।— ऐ.आ.१.५.१

३०. उरू गृणीहीत्यब्रवीत्तदुदरमभवत्। उर्वेव मे कुर्वित्यब्रवीत्तदुरोऽभवत्। उदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मेत्यारुणयो— ऐ.आ.२.१.४

३१. आन्त्राणि स्थाली मधु पिन्वमाना। गुदा पात्राणि सुदुघा न धेनुः। श्येनस्य पत्रं न प्लीहा शचीभिः। आसन्दी नाभिरुदरं न माता।— तै.ब्रा. २.६.४.३

३२. पृष्टीर्म राष्ट्रमुदरमंसौ।— तै.ब्रा.२.६.५.५

३३. ये द्विपादश्चतुष्पादः। अपाद उदरसर्पिणः। सर्वास्ताः।— तै.ब्रा.३.१ २.६.४

३४. अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। अहस्तदवलुम्पतु।— तै.आ.१०.२४

३५. सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यद्रात्रिया पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुम्पतु।— तै.आ.१०.२५.१

३६. यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति।— तै.आ.८.७.१

३७. तदाहुरुदरं वा एष स्तोमानां यत् सप्तदशो यत् सप्तदशम्मध्यतो निर्हरियुरशनायवः प्रजाः स्युरशनायवः सत्रिणः।— तां.ब्रा.४.५.१५

३८. प्रजापतेर्वा एतदुदरं यत्सद ऊर्गुदुम्बरो यदौदुम्बरी मध्ये सदसो मीयते। मध्यत एव तत्प्रजाभ्योऽन्नमूर्जन्दधाति— तां.ब्रा.६.४.११

३९. अथैतां चितां चिन्वन्ति।----कर्णयोः प्राशित्रहरणे उदरे पात्रीं संवर्तधानीम् आण्डयोर् दृषदउपले— जै.ब्रा.१.४८

४०. स उदराद् एव मध्यतस् सप्तदशं स्तोमम् असृजत् जगतीं छन्दो वामदेव्यं साम विश्वान् देवान् देवतां वैश्यं मनुष्यं गां पशुम्।— जै.ब्रा.१.६९

४१. प्रजापतेर वा एतद् उदरं यत् सदः। ऊर्ग् उदुम्बरः। यन् मध्यतस् सदस औदुम्बरीम् ईयते मध्यत एवैतत् प्रजानाम् अन्नम् ऊर्जं दधाति— जै.ब्रा.१.७१

४२. सा (अपाला) अब्रवीत् : इमानि त्रीणि विष्टपा तानीन्द्र विरोहय। शिरस् ततस्योर्वराम् आद् इदं म उपोदरे। सर्वा ता रोमशा कृधि।।— जै.ब्रा.१.२२१

४३. त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्य् अनुष्टुप्। अत्र ह्य एवावपन्त्य अत उद्धरन्ति। तद उ यथायं मध्येन पुरुषस् सुहितो वा स्याद् अशनायेद् वा तथा तत्। अथ यथेतराण्य-- — जै.ब्रा.१.३११

४४. इदम् एवोदरम् एकविंशम् अहः। सर्वे वै स्तोमा एकविंशम् अभिसंपन्नाः। सर्वम् अन्नाद्यम् उदरे प्रतिष्ठितम्।— जै.ब्रा.२.५७

४५. अथ उदरेण पापं कृत्वा मन्येत, सप्तदशेनाग्निष्टुता यजेत। एष ह वा उदरेण पापं करोति। यो ऽनाश्यान्नस्यान्नम् अत्ति। उदरं वै सप्तदश स्तोमानाम्। उदराद् एव तेन पाप्मानम् अपघ्नते। जै.ब्रा.२.१३५

४६. तस्य वा एतस्य ललाटाद् एव सिंहो ऽजायतोरसो ऽधि शार्दूल, उदराद् द्वीपी— जै.ब्रा.२.२६७

४७ .स खलु पादाभ्यामेव पृथिवीं निरमिमीत, उदरादन्तरिक्षं मूर्ध्नो दिवम्।— गोपथ ब्रा.१.१.६

४८. उदरमेकविंशः। विंशतिर्ह्येवैतस्यान्तर उदरे कुन्तापानि भवन्त्युदरमेकविंशम्। तस्मादुदर-मेकविंशः।— गोपथ ब्रा.१.५.३

४९. इन्द्रस्य त्वा जठरे सादयामि इत्यब्रवीत्।--- वरुणस्योदर इति। न हि वरुणस्योदरं किं चन हिनस्तीति। २। अथो आहुः ब्राह्मणस्योदर इति।— गोपथ ब्रा.२.१.२

५०. पुरुषो वै यज्ञः। तस्य शिर एव हविर्धानम्, मुखमाहवनीयः, उदरं सदः, अन्नमुक्थानि,----।— गोपथ ब्रा.२.५.४

५१. तं (वृत्रं) द्वेधाऽन्वभिनत्, तस्य यत् सौम्यं न्यक्तमास तं चन्द्रमसं चकार। अथ यदस्यासुर्मास तेनेमाः प्रजा उदरेणाविध्यत्। अथ यदिमाः प्रजा अशनमिच्छन्ते अस्मा एवैतद् वृत्रायोदराय बलिं हरन्ति।— शत. ब्रा.१.६.३.१७

५२. स वै पौर्णमासेनोपवत्स्यन्न सत्रा सुहित इव स्यात् तेनेदमुदरमसुर्यं व्लिनात्याहुतिभिः प्रातर्दैवम्। एष उ पौर्णमासस्योपचारः।— श.ब्रा.१.६.३.३१

५३. अथ व्रतं व्रतयित्वा नाभिमुपस्पृशति - श्वात्राः पीता भवत यूयमापोअस्माकमन्तरुदरे सुशेवाः।— श.ब्रा.३.२.२.१९

५४. अंहस इव ह्येता मुञ्चन्ति यदुदरे गुष्ठितं भवति।-- — श.ब्रा.३.२.२.२०

५५. हविर्धान कर्म : उदरमेवास्य सदः। तस्माद् सदसि भक्षयन्ति। यद्धीदं किञ्चाश्नन्ति उदरऽएवेदं सर्वं प्रतितिष्ठति। अथ यदस्मिन् विश्वेदेवाऽअसीदन् तस्मात्सदो नाम।— श.ब्रा.३.५.३.६

५६. औदुम्बरी : उदरमेवास्य सदः। तस्मात् सदसि भक्षयन्ति। यद्धीदं किञ्चाश्नन्ति उदर एवेदं सर्वं प्रतितिष्ठति। अथ यदस्मिन् विश्वे देवा असीदन् तस्मात् सदो नाम।— श.ब्रा.३.६.१.१

५७. स आह अध्वर्युर्निरूहैतं गर्भम् इति। तं नोदरतो निरूहेद्। आर्ताया वै मृताया उदरतो निरूहन्ति। यदा वै गर्भः समृद्धो भवति प्रजननेन वै स तर्हि प्रत्यङ्डैति।— श.ब्रा.४.५.२.३

५८. गार्हपत्याग्निचयनम्: अपेत वीत वि च सर्पतात इति। अप चैवेत, वि चेत, व्यु च सर्पतात इत्येतत्। य उदरसर्पिणस्तानेतदाह।— श. ब्रा. ७.१.१.२

५९. उखोपरि होमः :- उदरमुखा। योनिरुलूखलम्। उत्तरोखा भवति अधरमुलूखलम्। उत्तरं ह्युदरम् अधरा योनिः। शिश्नं मुसलम्।--— श.ब्रा.७.५.१.३८

६०. पञ्चपशुशीर्षेष्टकोपधानम्: उदरं वाऽउखा। उदरे तदन्नं दधाति।— श.ब्रा.७.५.२.७

६१. एकत्रिंशत्छन्दस्येष्टकोपधानम् : उदरमतिच्छन्दाः। पशवो वै च्छन्दांसि। अन्नं पशवः। उदरं वाऽन्नमत्ति। उदरं हि वाऽअन्नमत्ति। तस्माद्यदोदरमन्नं प्राप्नोति अथ तज्जग्धं यातयामरूपं भवति।— श.ब्रा.८.६.२.१३

६२. प्राङ् ह्येषोऽग्निश्चीयते। अथो प्राग्वै प्राचऽउदरम्, प्राची योनिः। बहिस्तोमभागम्। हृदयं वै स्तोमभागाः। हृदयमु वाऽउत्तमम्। अथोदरम्, अथ योनिः।— श.ब्रा.८.६.२.१५

६३. अथ प्रथमायां चिता उत्तरतः स्वयमातृण्णाया उदरं च योनिं चोपदधाति। यो वाऽअयं मध्ये प्राणः तदेषा स्वयमातृण्णा। एतस्य तत्प्राणस्योभयत उदरं च योनिं च दधाति। तस्मादेतस्य प्राणस्योभयत उदरं च योनिश्च।— श.ब्रा.८.६.२.१६

६४. लोकम्पृणेष्टकोपधानम् : अथो अन्नं वै यजुष्मत्य इष्टकाः, उदरं मध्यमा चितिः। उदरे तदन्नं दधाति।— श.ब्रा.८.७.२.१८

६५. अश्वस्य मेध्यस्य द्यौष्पृष्ठम्, अन्तरिक्षमुदरम्, पृथिवी पाजस्यम्।-— श. ब्रा. १०.६.४.१

६६. दक्षिणा चोदीची च पार्श्वे। द्यौष्पृष्ठम्। अन्तरिक्षमुदरम्। इयमुरः।— श.ब्रा.१०.६.५.३

६७. उदरमेवास्येडा। तद्यथैवाद इडायां समवद्यंति। एवमेवेदं विश्वरूपमन्नमुदरे समवधीयते।— श.ब्रा.११.२.६.८

६८. उदरं गृहमेधीया। प्रतिष्ठा वा उदरम्। प्रतिष्ठित्या एव।— श.ब्रा.११.५.२.४

६९. अथ यदिदमन्तरुदरे। तत्पितृयज्ञः। तद्वा अनिरुक्तं भवति। तस्मात्तदनिरुक्तम्।— श. ब्रा. ११.५.२.५

७०. गवामयनीय संवत्सरस्य पुरुषविधोपासनम् : उदरमेकविंशः। विंशतिर्वा अन्तरुदरे कुन्तापानि। उदरमेकविंशम्। तस्मादुदरमेकविंशः।— श.ब्रा. १२.२.४.१२

७१. एकविंशमुदरं कल्पयन्ति पार्श्वे पर्शूस्त्रिणवेनाभिक्लृप्ते।— श.ब्रा.१२.३.१.६

७२. उदरे पात्रीं समवत्तधानीं पृषदाज्यवतीम्। शिश्नस्यांते शम्याम्।— श.ब्रा.१२.५.२.७

७३. अन्तरिक्षं वै मध्यममहः।--उदरं मध्यममहः। उदरे तदन्नं दधाति।— श. ब्रा. १३.६.१.२

७४. वाजपेयोऽवसेचनं ब्राह्मणम् : अन्तरिक्षं वा उपयमनी। अथो उदरं वा उपयमनी। उदरेण हीदं सर्वमन्नाद्यमुपयतम्।— श.ब्रा.१४.२.१.१७

७५. घर्मोद्वासनं : अथैतद्रज्जुसंदानम्। उपयमन्यामाधाय पश्चात्प्राचीमासादयति। उदरमेवास्मिन्नेतद्दधाति।— श.ब्रा.१४.३.१.२२

७६. उदरं वै वृत्रः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो य एवं वेद हन्ति क्षुधं भ्रातृव्यं---- तै.सं.२.४.१२.६

७७. इडाप्राशित्रभक्षयोरभिधानम् : सोऽबिभेत् प्राशितं मा हिंसिष्यतीति ब्राह्मणस्योदरेणेत्यब्रवीन्न हि ब्राह्मणस्योदरं किंचन हिनस्ति--— तै.सं.२.६.८.७

७८. अश्वस्तोमीय मन्त्राः :- यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति।— तै.सं.४.६.८.४

७९.----नभ उदर्येणेन्द्राणीं प्लीहना वल्मीकान्क्लोम्ना गिरीन्प्लाशिभिः समुद्रमुदरेण वैश्वानरं भस्मना।— तै.सं.५.७.१६.१

८०. सदोभिधानम् : उदरं वै सद ऊर्गुदुम्बरो मध्यत औदुम्बरीं मिनोति----। तै.सं.६.२.१०.६

८१. उपरवाभिधानम् : उदरं सदो यदा खलु वै जिह्वया दत्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्धाने--— तै.सं.६.२.११.४

८२. अश्वमेधांग मन्त्रः :- समुद्र उदरमन्तरिक्षं--- — तै.सं.७.५.२५.२

८३. अग्नेस्त्वास्येन प्राश्नामि ब्राह्मणस्योदरेण बृहस्पतेर्ब्रह्मणेन्द्रस्य त्वा जठरे सादयामि--— आप.श्रौ.सू.३.१९.७

८४. प्रवर्ग्यः :- मध्य उपयमनमुदरस्य रूपम्। तस्मिन् सर्वं रज्जुमयं समवदधात्यान्त्राणां रूपम्।— आप.श्रौ.सू.१५.१५.१

८५. इह धृतिरिह स्वधृतिरिह रन्तिरिह रमतिरित्यौदुम्बरीं परिष्वज्योदरैरुपस्पृशन्तो वाग्यतास्तिष्ठन्ति।— आप.श्रौ.सू.२१.१२.७

८६. उदरे समवत्तधानीम्।— शां. श्रौ. सू. ४.१४.२७

८७. स एतमुशनस्तोमं यज्ञक्रतुमपश्यत्। तेनेष्ट्वा पाप्मानमपाहत तेन पाप्मानमजिघांसमानो यजेत। उदरव्याधितश्च।— शां.श्रौ.सू.१४.२७.१

८८. अथ हैक्ष्वाकं राजानं वरुणो जग्राह। तस्य होदरं जज्ञे।— शां.श्रौ.सू.१५.१८.१

८९. तस्य शुनःशेपस्य ह स्मर्च्यृच्युक्तायां नितरां पाशो मुमुचे। कनीय ऐक्ष्वाकस्योदरं बभूव।— शां.श्रौ.सू.१५.२२.१

९०. उदरमेदोऽवशिष्टं गुदे प्रास्यति कृशश्चेत्।— का.श्रौ.सू.६.७.१२

९१. ग्रीवा वक्षो हृदयं स्तनस्तृतीयान्युदरप्रभृतीनि चतुर्थानि--। ----— वैखानस श्रौ.सू.१.१

९२. यद्ग्रीवायां वेपनो ऽयं निर्मन्थेद्यदुदरे ऽनारब्धो ऽस्य यज्ञो भवति।— वैखानस.श्रौ.सू.१.१

९३.--- --- मध्य उपयमनमुदरो ऽभितो ऽभ्रः श्रोणी----तस्मिन्सर्वं रज्जुमयं दधाति तान्यन्त्राणि।— वैखानस श्रौ.सू.१३.१७

## उदान

१. अथ पिनष्टि-प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषे धाम्-इति।---शतपथ ब्राह्मण १.२.१.१९

२. स यदाह-प्राणाय त्वोदानाय त्वेति, तत्प्राणोदानौ दधाति।---- श.ब्रा.१.२.१.२१

३. द्रव्य संस्कारः। स्रुचां वेदेन सम्मार्जनं : स वा इत्यग्रैरन्तरतः सम्मार्ष्टि, इति मूलैर्बाह्यतः। इतीव वा अयं प्राणः, इतीवोदानः। प्राणोदानावेवैतद्दधाति। तस्मादितीवेमानि लोमानि, इतीवेमानि।— श.ब्रा.१.३.१.७

४. यद्वेवेति च प्रेति चान्वाह। प्रेति वै प्राणः, एत्युदानः; प्राणोदानावेवैतद्दधाति।----प्रेति वै रेतः सिच्यते, एति प्रजायते। ---— श.ब्रा.१.४.१.५

५. शान्ति कर्म : प्राणो वै प्रवान्,----- -अपानो वा एतवान्,----। बृहच्छोचा यविष्ठ्य इति। उदानो वै बृहच्छोचाः, उदानमेवैतया समिन्धे।— श.ब्रा.१.४.३.३

६. यदि तृतीयस्यामनुव्याहरेत्, तं (शत्रुं)प्रति ब्रूयात्-उदानं वा एतदात्मनोऽग्नावाधाः, उदानेनात्मन आर्तिमारिष्यसि इति।— श. ब्रा. १.४.३.१३

७. स होतुरिह निलिम्पति। तद्धोतौष्ठयोर्निलिम्पते-मनसस्पतिना ते हुतस्याश्नामीषे प्राणायेति। अथ होतुरिह निलिम्पति। तद्धोतौष्ठयोर्निलिम्पते-वाचस्पतिना ते हुतस्याश्नामि-ऊर्जे उदानाय इति।— श.ब्रा.१.८.१.१५

८. सोऽयं पुरुषेऽन्तः प्रविष्टस्त्रेधा विहितः-प्राण उदानो व्यान इति।— श.ब्रा.३.१.३.२०

९. ऐन्द्रः प्राणोऽअङ्गेऽअङ्गे निदीध्यद्। ऐन्द्र उदानोऽअङ्गेऽअङ्गे निधीतः इति। यदङ्गशो विकृत्तो भवति-तत् प्राणोदानाभ्यां सन्दधाति।— श.ब्रा. ३.८.३.३७

१०. दश पाण्या अंगुलयः, दश पाद्याः, दश प्राणाः, प्राण उदानो व्यानः-इत्येतावान्वै पुरुषो-यः पराद्धर्यः पशूनाम्-सर्वेऽनु पशवः।— श.ब्रा.३.८.४.१

११. अथ ग्रहयागाः :- ----तत्रायमुपांशुग्रहः। प्राणो ह वाऽअस्योपांशुः, व्यान उपांशुसवनः, उदान एवान्तर्यामः।— श. ब्रा. ४.१.१.१

१२. अन्तर्यामग्रहः :- प्राणो ह वाऽअस्योपांशुः, व्यान उपांशुसवनः, उदान एवान्तर्यामः। अथ यस्मादन्तर्यामो नाम। यो वै प्राणः स उदानः स व्यानः। तमेवास्मिन्नेतत्पराञ्चं प्राणं दधाति; यदुपांशुं गृह्णाति-तमेवास्मिन्ने-तत्प्रत्यञ्चमुदानं दधाति यदन्तर्यामं गृह्णाति। सोऽ-स्यायमुदानोऽन्तरात्मन्-यतस्तद्यदस्यैषोऽन्तरात्मन्-यतः। यद्वाएनेनेमाः प्रजा यताः। तस्मादन्तर्यामो नाम। तमन्तः पवित्राद् गृह्णाति। प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति सोस्यायमुदानो-ऽन्तरात्मन् हितः। एतेनो हास्याप्युपांशुरन्तः पवित्राद्गृहीतो भवति। समानं ह्येतद्-यदुपाश्वन्तर्यामौ-प्राणोदानौ हि।— श. ब्रा. ४.१.२.१

१३. प्राणोदानौ ह वाऽअस्यैतौ ग्रहौ। तयोरुदितेऽन्यतरं जुहोति-अनुदितेऽन्यतरम्। प्राणोदानयोर्व्याकृत्यै। प्राणोदानावेवैतद् व्याकरोति। तस्मादेतौ समानावेव सन्तौ नानेवाचक्षते-प्राण इति चोदान इति च।— श.ब्रा.४.१.२.११

१४. तद् यदेनेनेमाः प्रजाः प्राणत्यश्चोदनत्यश्चान्तरिक्षमनुचरन्ति-तेन वैश्वदेवः।— श.ब्रा.४.१.२.१६

१५. तं गृहीत्वा परिमार्ष्टि। नेद्व्यवश्चोतदिति। तं न सादयति। उदानो ह्यस्यैषः। तस्मादयमसन्न उदानः संचरति। यदीत्त्वभिचरेद्-अथैनं सादयेद्। अमुष्य त्वोदानं सादयामीति।— श.ब्रा.४.१.२.१७

१६. समानं ह्येतद्-यदुपांश्वन्तर्यामौ-प्राणोदानौ हि।— श.ब्रा.४.१.२.१८

१७. ताऽउ ह चरकाः-नानैव मन्त्राभ्यां जुह्वति। प्राणोदानौ वा अस्यैतौ नानावीर्यौ। प्राणोदानौ कुर्म इति वदन्तः। तदु तथा न कुर्यात्। मोहयन्ति ह ते यजमानस्य प्राणोदानौ।— श.ब्रा.४.१.२.१९

१८. किमु तत्तूष्णीं जुहुयात्। समानं ह्येतद्-यदुपांश्वन्तर्यामौ-प्राणोदानौ हि।— श.ब्रा.४.१.२.२०

१९. अथात्र नीचा पाणिना मध्यमे परिधौ प्रत्यगुपमार्ष्टि। प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति।— श.ब्रा.४.१.२.२३

२०. तं प्रत्याक्रम्य सादयति। उदानाय त्वा इति। उदानो ह्यस्यैषः। तानि वै संस्पृष्टानि सादयति। प्राणोदानानेवैतत्संस्पर्शयति। प्राणोदानान्त्सन्दधाति।— श.ब्रा.४.१.२.२४

२१. इयं ह वाऽउपांशुः। प्राणो ह्युपांशुः। इमां ह्येव प्राणन्नभिप्राणिति। असावेवान्तर्यामः। उदानो ह्यन्तर्यामः। अमुं ह्येव लोकमुदनन्नभ्युदनिति।— श.ब्रा.४.१.२.२७

२२. यदि सावित्रमन्तर्यामपात्रेण गृह्णीयाद्-उपांशुपात्रेणैतम्। समानं ह्येतत्-यदुपांश्वन्तर्यामौ। प्राणो हि। यो वै प्राणः स उदानः। वृषा वै प्राणः, योषा पत्नी। मिथुनमेवैतत्प्रजननं क्रियते।— श.ब्रा.४.४.२.१०

२३. पात्रावकाशमन्त्राः :- अथान्तर्यामम्-उदानाय मे वर्चोदा वर्चसे पवस्व इति।— श.ब्रा.४.५.६.२

२४. प्राणो वै वायुः। नियुत्वते भवति। उदानो वै नियुतः। प्राणोदानावेवास्मिन्नेतद्दधाति।— श. ब्रा. ६.२.२.६,७

२५. त्रयो वै प्राणाः-प्राण उदानो व्यानः। तानेवास्मिन्नेतद्दधाति।— श.ब्रा.६.४.२.५

२६. सैषा त्रेधा विहिता वागनुष्टुप्। तामेषोऽग्निः प्राणो भूत्वाऽनुसञ्चरति। य आहवनीयेऽग्निः-स प्राणः, सोऽसावादित्यः।----अथ यो गार्हपत्येऽग्निः-स उदानः।— श. ब्रा. ७.१.२.२१

२७. स्वयमातृण्णेष्टकोपधानम् : विश्वस्मै प्राणायापानाय व्यानायोदानाय इति। प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः।— श.ब्रा.७.४.२.८

२८. तद्याः पुस्तादुपदधाति-ताः प्राणभृतः।---- अथ याः उत्तरतः-ताः श्रोत्रभृतः, ता उदानभृतः। श.ब्रा.८.१.३.६

२९. तदु ह चरकाध्यर्यवः-अन्या एवापानभृतो व्यानभृत उदानभृतः समानभृतः, चक्षुर्भृतो मनोभृतः श्रोत्रभृतो वाग्भृत-इत्युपदधाति। न तथा कुर्यात्। — श.ब्रा. ८.१.३.७

३०. अथ दक्षिणत उपधायोत्तरत उपदधाति। व्यानो होदानो भूत्वाऽऽङ्गुल्यग्रेभ्य इति संचरति। उदान उ ह व्यानो भूत्वाऽऽङ्गुल्यग्रेभ्य इति सञ्चरति।— श.ब्रा.८.१.३.९

३१. स्वयमातृण्णेष्टकोपधानम् : विश्वस्मै प्राणायापानाय व्यानायोदानाय इति। प्राणो वै स्वयमातृण्णा।— श.ब्रा.८.३.१.१०

३२. तिसृभिरस्तुवत-इति। त्रयो वै प्राणाः-प्राणः, उदानः, व्यानः।— श.ब्रा.८.४.३.४

३३. चत्वारिंशच्छन्दस्येष्टकोपधानम् : ककुप्छन्दः-इति। प्राणो वै ककुप्छन्दः। त्रिककुप्छन्द इति। उदानो वै त्रिककुप्छन्दः।— श.ब्रा.८.५.२.४

३४. तद्याः पुरस्तादुपदधाति-प्राणस्तासां प्रथमा, व्यानो द्वितीया, उदानस्तृतीया। उदानश्चतुर्थी, व्यानः पञ्चमी, प्राणः षष्ठी। प्राणः सप्तमी, व्यानोऽष्टमी, उदानो नवमी। यजमान एवात्र दशमी।— श.ब्रा.८.५.२.७

३५. पुरीष निवपनम्:विश्वस्मै प्राणायापानाय व्यानायोदानाय इति। प्राणो वै स्वयमातृण्णा।— श.ब्रा.८.७.३.१९

३६. वातहोमः :- त्रयो वै प्राणाः-प्राण उदानो व्यानः। तैरेवैनमेतद्युनक्ति।— श.ब्रा.९.४.२.१०

३७. चतुर्थीं चितिं चिनोति-सा हास्यैषोदान एव। तद्वै तदमृतम्। अमृतं ह्युदानः।— श. ब्रा. १०.१.४.५

३८. अथाध्यात्मम्। उदान एव पूर्णमाः। उदानेन ह्ययं पुरुषः पूर्यत इव। प्राण एव दर्शः। ददृश इव ह्यं प्राणः। तदेतावन्नादश्चान्नप्रदश्च दर्शपूर्णमासौ। प्राण एवान्नादः। प्राणेन हीदमन्नमद्यते। उदान एवान्नप्रदः। उदानेन हीदमन्नं प्रदीयते।— श. ब्रा. १०.२.४.६

३९. प्राण उदानमप्यगात्-इति गार्हपत्य आहुतिं जुहुयाम्। सैव प्रायश्चित्तिः।— श.ब्रा.११.५.३.८

४०. उदानः प्राणमप्यगात्-इत्याहवनीय आहुतिं जुहुयाम्। सैव प्रायश्चित्तिः।— श.ब्रा.११.५.३.९

४१. उपनयनधर्माभिधायकं ब्राह्मणम् : त्रयो वै प्राणाः। प्राण उदानो व्यानः। तानेवास्मिंस्तद्दधाति। अथार्द्धर्चशः। द्वौ वा इमौ प्राणौ। प्राणोदानावेव। प्राणोदानावेवास्मिंस्तद्दधाति। अथ कृत्स्नाम्। एको वा अयं प्राणः कृत्स्न एव।— श.ब्रा.११.५.४.१५

४२. सर्वप्राश्चित्तविधायकं ब्राह्मणं : अथ मनो ह वा अंशुः, वागदाभ्यः। प्राण एवांशुः, उदानोऽदाभ्यः।— श.ब्रा.११.५.९.२

४३. पशुदेवताविकल्पाभिधायकं ब्राह्मणम् : तं प्राची दिक् प्राणेत्यनुप्राणत्,----- -तमुदीची दिगुदानेत्यनुप्राणत् उदानमेवास्मिंस्तददधात्।— श. ब्रा. ११.८.३.६

४४. गवामयनीय संवत्सरस्य पुरुषविधोपासनम् : उदान एवोदयनीयोऽतिरात्रः। उदानेन ह्युद्यंति। स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः।— श.ब्रा.१२.२.४.१६

४५. तिसृभिस्तिसृभिः पावयन्ति। त्रयो वै प्राणाः। प्राण उदानो व्यानः।— श.ब्रा.१२.८.१.११

४६. सौत्रामण्यां सोमसम्पत्तिः :- त्रेधाविहितो वा अयं प्राणः। प्राण उदानो व्यान इति। यथारूपमेवास्मिन् प्राणं दधाति।— श. ब्रा. १२.८.२.२७

४७. घर्मसन्दीपनं ब्राह्मणम् : प्राणो वै मधु। प्राणमेवास्मिन्नेतद्दधाति। त्रीणि भवंति। त्रयो वै प्राणाः। प्राण उदानो व्यानः। तानेवास्मिन्नेतद्दधाति।— श.ब्रा. १४.१.३.३०

४८. प्रवर्ग्येऽवकाशोपस्थानं ब्राह्मणम्: ते वा एते त्रयोऽवकाशा भवंति। त्रयो वै प्राणाः-प्राण उदानो व्यानः।— श.ब्रा.१४.१.४.७

४९. घर्मोद्वासनं : प्राणा वै धवित्राणि-- -त्रयो वै प्राणाः। प्राण उदानो व्यानः।— श.ब्रा.१४.३.१.२१

५०. सप्तान्नब्राह्मणं वा संवर्गविद्याब्राह्मणम्: यः कश्च शब्दः। वागेव सा। एषा हि अंतमायत्ता। एषा हि न प्राणोऽपानो व्यान उदानः समानः। अन इति एतत्सर्वं प्राण एव।— श.ब्रा.१४.४.३.१०

५१. उषस्तब्राह्मणं वा निर्गुणात्मविद्याब्राह्मण् :--- ---- -स त आत्मा सर्वांतरः। य उदानेनोदनिति, स त आत्मा सर्वांतरः। यः समानेन समानिति-- -। श.ब्रा. १४.६.५.१

५२. शाकल्यब्राह्मणग्रन्थो वा शाकल्यब्राह्मणम् : कस्मिन्नु व्यानः प्रतिष्ठित इति। उदान इति। कस्मिन्नूदानः प्रतिष्ठित इति। समान इति।— श.ब्रा.१४.६.९.२७

५३. अथ यद् द्वितीयं प्राश्नाति तेनोदानापानौ तृप्यतः। तम् उदानापानाव् आहतुश् श्रद्धा ते मा विगात् सर्वैः कामैस् तृप्य स्वर्गं लोकम् आप्नुहीति।— जैमिनीय ब्राह्मण १.४१

५४. तस्माद् एतेनैकम् एव प्राणेन करोति यद् एव प्राणान् उदन्तो ऽनूदनिति।— जै.ब्रा.१.१२७

५५. स यथाक्रमणाद् आक्रमणम् आक्रम्योदन्यात् तादृक् तत्।— जै.ब्रा.१.१३९

५६. प्राणव्यानोदाना ह खलु वा एतानि सामानि। प्राण एव रथन्तरं व्यानो वामदेव्यम् उदानो बृहत्। तस्माद् एवम् एव कार्यं प्राणव्यानोदानानां संतत्या अव्यवच्छेदायेति।— जै.ब्रा.१.२२९

५७. तस्माद् एतेनैकम् एव प्राणेन करोति यद् एव प्राणान् उदनतो ऽनूदनिति।— जै.ब्रा.१.२५४

५८. मन एव महाव्रतीयम् अहः। उदान एवोदयनीयो ऽतिरात्रः।— जै.ब्रा.२.५८

५९. अथ यद् ऊर्ध्वं श्रोत्राभ्यां तद् उत्तरो ऽतिरात्रः। प्राण एव पूर्वो ऽतिरात्र, उदान उत्तरः। तौ प्रायणीयोदयनीयाव् इति परोक्षम् आचक्षते।— जै.ब्रा.३.३१९

६०.-----ताभ्यो ऽवर्षत्। तत ओदनो ऽजायत। तम् अशित्वोदानन्। स उदनो ऽभवत्। तद् उदनस्योदनत्वम्। उदनो ह वै नामैष। तम् ओदन इति परोक्षम् आचक्षते।— जै.ब्रा.३.३४६

६१. प्राणो वै संवत्सर उदाना मासा यदुत्सृजन्ति प्राण एवोदानान्दधति यो दीक्षितः प्रमीयते या संवत्सरस्यानुत्सृष्टस्य शुक्सा तमृच्छति।— ताण्ड्य ब्राह्मण ५.१०.३

६२. प्राणो वै प्रायणीय उदान उदयनीयः समानो होता भवति समानौ हि प्राणोदानौ प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै।— ऐतरेय ब्राह्मण १.७

६३. यो वै संवत्सरस्य प्राणोदानौ वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य प्रायणीयः प्राण उदान उदयनीयः।— ऐ.ब्रा.४.१४

६४. मुखं महाव्रतम्। तस्योदान एवोदयनीयोऽतिरात्रः। उदानेन ह्युद्यन्ति।— गोपथ ब्राह्मण १.५.४

६५. यावन्तः समाना पञ्चदशकृत्वस्तावन्त उदानाः। यावन्त उदानाः पञ्चदशकृत्वस्तावन्त्येतादीनि।--- गो.ब्रा.१.५.५

६६. ओदन प्रकरणम् :------ प्राणापानौ मे पाहि, समानव्यानौ मे पाह्युदानरूपे मे पाहि।— गो.ब्रा.२.१.७

६७. छन्दसामु ह षष्ठेनाह्नाक्तानां रसो ऽत्यनेदत्। तं प्रजापतिरुदानाद् नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभा परिक्षित्या जगत्या गाथयानुष्टुभा।— गो.ब्रा.२.६.११

६८. वाचे पुरुषमालभते। प्राणमपानं व्यानमुदानँ समानं तान्वायवे।— तैत्तिरीय ब्राह्मण ३.४.१८.१

६९. अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं मनो वाक्त्वक्। चर्म माँसँ स्नावास्थि मज्जा-— तैत्तिरीय आरण्यक ७.७.१

प्राणाहुति मन्त्राः :- ---उदाने निविष्टोऽमृतं जुहोमि। उदानाय स्वाहा।- — तै.आ.१०.३३.१

७०. प्राणाहुतिषु विकल्पितानि मन्त्रान्तराणि : उदाने निविष्टोऽमृतं जुहोमि। शिवो मा विशाप्रदाहाय। उदानाय स्वाहा।— तै.आ.१०.३४.१

७१. भुक्तस्यानुमन्त्रणे मन्त्रम् :-- -उदाने निविश्यामृतँ हुतम्। उदानमन्नेनाऽऽप्यायस्व। — तै. आ. १०.३६.१

७२. प्राणाहुति मन्त्राः :- श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि।— तै.आ.१०.६९.१

७३. स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः।-ऐ.आ.२.३.३

७४. अन्वाहार्य पचनम् :- ---प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यक्षितोऽसि---। तैत्तिरीय संहिता १.६.३.३

७५. स्वयमातृण्णादीष्टकोपधानम् :--पृथिवीं मा हिँसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय---तै. सं. ४.२.९.१

७६. तृतीय चितौ स्वयमातृण्णादीष्टकाभिधानम् : अन्तरिक्षं मा हिँसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय-।— तै. सं. ४.३.६.१

७७. चोडाख्येष्टकाभिधानम् :----दिवं मा हिँसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय---।— तै.सं.४.४.३.३

७८. गवामयनस्य गुणविकाररूप उत्सर्गः :- यत्पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधति— तै.सं.७.५.६.२

७९. अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्।-----तेजो ह वा उदानस्तस्मादुपशान्ततेजाः।— प्रश्नोपनिषद ३.७

८०. मनो ह वाव यजमान इष्टफलमेवोदानः स एनं यजमानमहरह गमयति।— प्रश्नोपनिषद ४.४

८१. अथाध्यात्मम्। प्राणो व्यानोऽपान उदानः समानः। चक्षुः श्रोत्रं मनो वाक् त्वक्। चर्म माँसँ स्नावास्थि मज्जा।— तैत्तिरीयोपनिषद ९.७.१

८२. अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद।-छान्दोग्योपनिषद ३.१३.४

८३. अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति। उदाने तृप्यति त्वक् तृप्यति त्वचि तृप्यन्त्यां वायुस्तृप्यति-— छान्दोग्योपनिषद ५.२३.१

८४. यः कश्च शब्दो वागेव सैषा ह्यन्तमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एव।— बृहदारण्यकोपनिषद१.५.३

८५. -- -स त आत्मा सर्वान्तरो य उदानेनोदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः।— बृहदारयक उपनिषद ३.४.१

८६.--- -कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति स एष नेति नेति- ---।— बृहदारण्यक उपनिषद ३.९.२६

८७. प्राण आद्यो हृदि स्थाने अपानस्तु पुनर्गुदे। समानो नाभिदेशे तु उदानः कण्ठमाश्रितः।------ अपाण्डुर उदानश्च व्यानो ह्यर्चिःसमप्रभः।— अमृतनादोपनिषद ३५

८८. स एको नाशकत्स पञ्चधात्मानं विभज्योच्यते यः प्राणोऽपानः समान उदानो व्यान इति।---- -उत्तरं व्यानस्य रूपं चैतेषामन्तरा प्रसूतिरेवोदानस्याथ योऽयं पीताशितमुद्गिरति निगिरतीति वैष वाव स उदानः।— मैत्रायण्युपनिषद २.६

८९. प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहेति पञ्चभिरभिजुहोति।— मैत्रायण्युपनिषद ६.९

९०. प्राणोऽग्निस्तस्येमा इष्टका यः प्राणो व्यानोऽपानः समान उदान स शिरः पक्षसीपृष्ठपुच्छवानेषोऽग्निः पुरुषविदः।— मैत्रायण्युपनिषद ६.३३

९१. मित्रावरुणौ पंक्तिस्त्रिणवत्रयस्त्रिंशौ शाक्वररैवते हेमन्तशिशिरा उदानोऽङ्गिरसश्चन्द्रमा ऊर्ध्वा उद्यन्ति तृपन्ति वर्षन्ति— मैत्रायण्युपनिषद ७.५

९२.---यो वरुणमेवास्तमेति सौम्यामेवाप्येति यः सौम्यामेवास्तमेत्युदानमेवाप्येति य उदानमेवस्तमेति विज्ञानमेवाप्येति तदमृत ० होवाच।— सुबालोपनिषद ९

९३. योऽयं विज्ञानघन उत्क्रामन्प्राणं दहत्यपानं व्यानमुदानं समानं वैरम्भं मुख्यमन्तर्यामं--- सुबालोपनिषद १५

९४. सुषुम्ना मध्यदेशे तु प्राणमार्गास्त्रयः स्मृताः। प्राणोऽपान समानश्चोदानो व्यानस्तथैव च।--।— ध्यानबिन्दूपनिषद ५६

९५. वकारं जीवबीजं च उदानं शङ्खवर्णकम्।— ध्यानबिन्दूपनिषद ९६

९६. प्राणोऽपान समानश्चोदानव्यानौ च वायवः। पञ्चकर्मेन्द्रियैर्युक्ताः क्रिया-शक्तिबलोद्यताः।— ब्रह्मविद्योपनिषद ६७

९७. प्राणापानौ समानश्च उदानो व्यान एव च। नागः कूर्मश्च कृकरो देवदत्तो धनंजयः। चरन्ति दशनाडीषु दश प्राणादिवायवः।— त्रिशिखब्राह्मणोपनिषद २.७६

९८. समानः सर्वगात्रेषु सर्वव्यापी व्यवस्थितः। उदानः सर्वसन्धिस्थः पादयोर्हस्तयोरपि। व्यान— त्रिशिखब्राह्मणोपनिषद २.८०

९९. प्राणापानादिचेष्टादि क्रियते व्यानवायुना। उज्जीर्यते शरीरस्थमुदानेन नभस्वता।— त्रिशिखब्राह्मणोपनिषद २.८४

१००. समानो नाभिदेशे तु उदानः कण्ठमध्यगः। व्यानः सर्वशरीरे तु प्रधानाः पञ्च वायवः।— योगचूडामण्युपनिषद२४

१०१. आदित्यो वै व्यानः समानोदानोऽपानः प्राणः।— सूर्योपनिषद

१०२. प्राणोऽपानस्तथा व्यानः समानोदान एव च। नागः कूर्मश्च कृकरो देवदत्तो धनंजयः। एते नाडीषु सर्वासु चरन्ति दश वायवः।— जाबालदर्शनोपनिषद ४.२३

१०३.---- उदानसंज्ञो विज्ञेयः पादयोर्हस्तयोरपि। समानः सर्वदेहेषु व्याप्य तिष्ठत्यसंशयः।— जाबालदर्शनोपनिषद ४.२९

१०४. समान सर्वसामीप्यं करोति मुनिपुङ्गव। उदान ऊर्ध्वगमनं करोत्येव न संशयः। व्यानो विवादकृत्प्रोक्तो मुने वेदान्तवेदिभिः।— जाबालदर्शनोपनिषद ४.३२

१०५. प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा। समानाय स्वाहा। उदानाय स्वाहा इति कनिष्ठिकाङ्गुल्याङ्गुष्ठेन च प्राणे जुहोमि। अनामिकयाऽपाने। मध्यमया व्याने। सर्वाभिरुदाने।— प्राणाग्निहोत्रोपनिषद १.१

१०६. अस्य शारीरयज्ञस्य---- -समानो मैत्रावरुणः। उदान उद्गाता। शरीरं वेदिः।---- - प्राणाग्निहोत्रोपनिषद ४.१

१०७. उदानमूर्ध्वगं कृत्वा प्राणेन सह वेगतः। बन्धोऽयं सर्वनाडीनामूर्ध्वं याति निरोधकः।— वराहोपनिषद ५.४४

१०८. प्रायश्चित्तम् : अथापरं प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वान्। अक्षितोऽस्यक्षित्यै त्वा। प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानरूपे मे पाहि।— द्राह्यायण श्रौत सूत्र १२.३.२२

१०९. प्रातः-सायं कर्म : होम्यमुपसाद्य। प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहोदानरूपाभ्यां स्वाहेत्यात्मन्येव जुहुयात्।— कौशिक सूत्र ७२.४२

११०. इळोपह्वानम् : वाचस्पतिना ते हुतस्य प्राश्नामीषे प्राणायेति पूर्वमञ्जनमधरौष्ठे निलिम्पति। मनसस्पतिना ते हुतस्य प्राश्नाम्यूर्ज उदानायेत्युत्तरौष्ठ उत्तरम्।— शांखायन श्रौत सूत्र१.१०.२

१११. यदि होमकाले प्राण उदानमप्यगादिति गार्हपत्ये जुहुयात्। यदि गार्हपत्य उदानः प्राणमप्यगादित्याहवनीये। यदि दक्षिणाग्निर्व्यान उदानमप्यगादित गार्हपत्ये।— आपस्तम्ब श्रौत सूत्र ९.१०.४

११२. दर्शपूर्ण मासः- अन्वाहार्य-मभिघार्योद्वास्यान्तरा प्रजापतेर्भागोऽस्यूर्जवान् पयस्वान् प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यूर्गस्यूर्जं मयि धेहि-— कात्यायन श्रौत सूत्र ३.४.२७

११३. सत्राणि : अग्निहोत्र आसन्नेषु चेत्पात्रेष्वाहवनीयोऽनुगच्छेद्गार्हपत्ये जुहुयात्प्राण उदानमप्यगादिति। गार्हपत्यश्चेदाहवनीय उदानः प्राणमप्यगादिति। दक्षिणाग्निश्चेद्गार्हपत्ये व्यान उदानमप्यगादिति।— कात्यायन श्रौत सूत्र २५.१०.१७

११४. सोमयागः - अभिचरन्त्सादयेद-विसृजन्नमुष्य त्वा प्राणं सादयामीति। उदानमित्यन्तर्याम्। पाणिना चापिदधात्यमुष्य त्वा प्राणमपिदधामीति उदानमित्यन्तर्यामम्।— कात्यायन श्रौत सूत्र ९.४.२७

## उद्गाता

१. उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि। वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद।।— ऋ. २.४३.२

२. बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत्।— ऋ. १०.६७.३

३. तस्मा उषा हिङ्कृणोति सविता प्र स्तौति बृहस्पतिरूर्जयोद्गायति त्वष्टा पुष्ट्या प्रति हरति विश्वे देवा निधनम्।-------तस्मा उद्यन्त्सूर्यो हिङ्कृणोति संगवः प्र स्तौति मध्यंदिन उद्गायत्यपराह्णः प्रति हरत्यस्तंयन् निधनम्।-- -तस्मा अभ्रो भवन् हिङ्कृणोति स्तनयन् प्र स्तौति विद्योतमानःप्रति हरति वर्षन्नुद्गायत्युउद्गृह्णन् निधनम्।-----अतिथीन् प्रति पश्यति हिङ्कृत्यभि वदति प्र स्तौत्युदकं याचत्युद्गायति। उप हरति प्रति हरत्युच्छिष्टं निधनम्।— अथर्ववेद ९.१०.१

४. महाव्रत स्तोत्र : आसन्दीमारुह्योद्गायति देवसाक्ष्य एव तदुपरिषद्यं जयति।---सर्वेणात्मना समुद्धृत्योद्देयमेषु लोकेषु नेद्वयाहितोऽसानीति।-— ताण्ड्य ब्रा.५.५.१

५. अध्वर्य्युः शिरसोद्गायेन्मैत्रावरुणो दक्षिणेन पक्षेण ब्राह्मणाछंस्युत्तरेण गृहपति पुछेनोद्गातात्मना।— तां. ब्रा. ५.६.२

६. तिसृभिरुद्गातात्मनउद्गीयाथ या शिरसः स्तोत्रीया तां दध्यादपराभिस्तिसृभिरुद्गीयाथ या दक्षिणस्य पक्षस्य स्तोत्रीया तान्दध्यादपराभिस्ति-सृभिरुद्गीयाथ योत्तरस्य पक्षस्य स्तोत्रीया तान्दध्यात्तिसृभिर्वैकया वा स्तुतं स्यादथ या पुच्छस्य स्तोत्रीया तान्दध्यात्। आत्मन्येव तदङ्गानि प्रतिदधति स्वर्गस्य लोकस्य समष्ट्यै।— तां. ब्रा. ५.६.४

७.----तेन पुनः प्रसृप्य यथायतनमुपविश्या-सन्दीमारुह्योद्गातात्मनोद्गायति।— तां.ब्रा. ५.१.६७

८. अथो खल्वाहुः कथमध्वर्य्यु र्बह्वृचः साम गायदित्युद्गातैव सर्वेणोद्गायेत्तदेव समृद्धं समृद्धावेव प्रतितिष्ठन्ति।--— तां. ब्रा. ५.६.७

९. प्राजापत्यो वा उदुम्बरः प्राजापत्य उद्गाता यदुद्गातौदुम्बरीं प्रथमेन कर्म्मणान्वारभते स्वयैव तद्देवतयात्मानमार्त्विज्याय वृणीते।-------उद्गाता द्वारा औदुम्बरी स्थापना का वर्णन-— तां.ब्रा.६.४.१

१०. उदङ्ङासीन उद्गायत्युदीचीन्तद्दिशमूर्ज्जा भाजयति प्रत्यङ्ङासीनः प्रस्तौति प्रतीचीन्तद्दिशमूर्ज्जा भाजयति दक्षिणासीनः प्रतिहरति दक्षिणान्तद्दिशमूर्ज्जा भाजयति प्राञ्चोऽन्य ऋत्विज आर्त्विज्यं कुर्व्वन्ति----- तां.ब्रा. ६.४.१४

११. द्रोणकलशस्य प्रोहणं : यदाह बार्हस्पत्य द्रोणकलश इति बृहस्पतिर्वै देवानामुद्गाता तमेव तद्युनक्ति।— तां.ब्रा. ६.५.५

१२. यत् द्रोणकलशमुपसीदन्ति तेनोद्गातारो वृताः। प्राजापत्या वा उद्गातारः प्राजापत्यो द्रोणकलशो द्रोणकलश एवैनानार्त्विज्याय वृणीते। तां.ब्रा ६.५.१७

१३. अनभिजिता वा एषोद्गातृणां दिग्यत्प्राची यत् द्रोणकलशं प्राञ्चं प्रोहन्ति दिशोऽभिजित्यै। — तां.ब्रा. ६.५.२०

१४. यन्नवित्याहुरन्तराश्वः प्रासेवौ युज्यतेऽन्तरा शम्य अनड्वान्क उद्गातृणां योग इति यत् द्रोणकलशमुपसीदन्ति स एषां योगः— तां.ब्रा. ६.५.२१

१५. यजमान के पापों अथवा भद्र आदि की कामना के अनुसार उद्गाता द्वारा ग्रावों पर द्रोणकलश स्थापित करने की विधि का वर्णन— तां.ब्रा.६.६.१

१६. एतद्वा उद्गातृणां हस्तकार्य्यं यत्पवित्रस्य विग्रहणं।------— तां.ब्रा. ६.६.१२

१७. प्र शुक्रैतु देवी मनीषास्मद्रथः सुतष्टो न वाजीत्युद्गाता धारामनुमन्त्रयते।-— तां.ब्रा. ६.६.१६

१८. बृहस्पतिर्वै देवानामुदगायत्तं रक्षांस्यजिघांसन् स य एषां लोकानामधिपतयस्तान् भागधेयेनोपाधावत्।------— तां.ब्रा. ६.७.१

१९. वाग्वै देवेभ्योऽपाक्रामत्तां देवा अन्वमन्त्रयन्त सा ऽब्रवीदभागास्मि भागधेयम्मेऽस्त्विति कस्ते भागधेयं कुर्य्यादित्युद्गातार इत्यब्रवीदुद्गातारो वै वाचे भागधेयं कुर्वन्ति।-— तां.ब्रा. ६.७.५

२०. यद्युद्गातावच्छिद्यते यज्ञेन यजमानो वृध्यतेऽदक्षिणः स यज्ञक्रतुः संस्थाप्योऽथान्य आहृत्यस्तस्मिन्देयं यावद्दास्यन् स्यात्। — तां.ब्रा.६.७.१४

२१. प्रस्तरमासद्योद्गायेद्धविषोऽस्कन्दाय।-— तां.ब्रा. ६.७.२१

२२. वज्रेण वा एतत्प्रस्तोतोद्गातारमभिप्रवर्त्तयति यद्रथन्तरं प्रस्तौति समुद्रमन्तर्द्धायोद्गायेद्वागित्यादेयं वाग्वै समुद्रः समुद्रमेवान्तर्दधात्यहिंसायै।— तां.ब्रा. ७.७.९

२३. इयं (पृथिवी) वै देवरथ इमामालभ्योद्गायेन्नास्मादवपद्यते। ईश्वरं वै रथन्तरमुद्गातुश्चक्षुः प्रमथितोः प्रस्तूयमाने सम्मीलेत्स्वर्दृशं प्रतिवीक्षेत नैनञ्चक्षुर्जहाति।— तां.ब्रा. ७.७.१४

२४. प्रजननं वै रथन्तरं यत्तस्थुष इत्याह स्थायुकोद्गातुर्वाग् भवत्यपि प्रजननं हन्त्यस्थुष इति वक्तव्यं सुस्थुष इति वा स्थायुकोद्गातुर्वाग् भवति न प्रजननमपि हन्ति।— तां.ब्रा. ७.७.१६

२५. ध्रुव आसीनो वामदेव्येनोद्गायेत्पशूनामुप वृत्यै।--अन्तरिक्षं वै वामदेव्यमधून्वतेवोद्गेय-मधूतमिव ह्यन्तरिक्षं पशवो वै वामदेव्यमहिंसते वोद्गेयं पशूनामहिंसायै।— तां.ब्रा. ७.९.७

२६. एष वै यजमानस्य प्रजापतिर्यदुद्गाता यच्छ्यैतेन हिङ्करोति प्रजापतिरेव भूत्वा प्रजा अभिजिघ्रति— तां.ब्रा. ७.१०.१६

२७. एषा वै शिशुमारी यज्ञपथेऽप्यस्ता यज्ञायज्ञीयं यद्गिरागिरेत्याहात्मानं तदुद्गातागिरति। ऐरङ्कृत्वोद्गेयमिरायां यज्ञं प्रतिष्ठापयत्यप्रमायुक उद्गाता भवति।— तां.ब्रा. ८.६.९

२८. वैश्वानरे वा एतदुद्गातात्मानं प्रदधाति यत्प्रप्रवयमित्याह प्रप्रीं वयमिति वक्तव्यं वैश्वानरमेव परिक्रामति।— तां.ब्रा. ८.६.११

२९. वैश्वानरं वा एतदुद्गातानु प्रसीदन्नेतीत्याहु-र्य्यद्यज्ञायज्ञीयस्यर्च्चं संप्रत्याहेति परिक्रामतेवोद्गेयं वैश्वानरमेव परिक्रामति— तां.ब्रा. ८.७.५

३०. उद्गात्रा पत्नी संख्यापयन्ति रेतोधेयाय। हिङ्कारं प्रति संख्यापयन्ति हिङ्कृताद्धि रेतो धीयत। — तां.ब्रा. ८.७.१२

३१. सोमस्याभिदाहे प्रायश्चित्तं : यदि सोममभिदहेउद्गहानध्वर्य्युः स्पाशयेत स्तोत्राण्युदद्गाता शस्त्राणि होताथ— तां.ब्रा. ९.९.१५

३२.--- -यजमानं वा अनु प्रतितिष्ठन्तमुद्गाता प्रतितिष्ठति य एवं विद्वान् वैरूपेणोद्गायति।— तां.ब्रा. १२.४.९

३३. दक्षिण ऊरावुद्गातुरग्निम्मन्थन्ति दक्षिणतो हि रेतः सिच्यते।------— तां.ब्रा. १२.१०.१२

षोडशी ग्रहस्य दर्शनम् : त्रीणि ज्योतींषि सचते स षोडशीत्युद्गाता ग्रहमवेक्षते।— तां.ब्रा. १२.१३.३२

३४. साद्यस्क्री नामक पञ्चैकाहः :- आदित्याश्चाङिरसश्चादीक्षन्त ते स्वर्गे लोके ऽस्पर्द्धन्त तेऽङ्गिरस आदित्येभ्यः श्वः सुत्यां प्राब्रुवंस्त आदित्याः एतमपश्यं स्तं सद्यः परिक्रीयायास्यमुद्गातारं वृत्वा तेन स्तुत्वा स्वर्गं लोकमायन्नहीयन्ताङ्गिरसः।— तां.ब्रा. १६.१२.१

३५. स्रगुद्गातुः— तां.ब्रा. १८.३.२

३६. स्रगुद्गातुस्सौर्य्य उद्गाता न वै तस्मै व्यौछदथोव्येवास्मै वासयति।— तां.ब्रा. १८.९.८

३७. ऋत्विक् समानता : यो होता सोध्वर्युः स पोता य उद्गाता स नेष्टा सोच्छावाको-- — तां.ब्रा. २५.५.५

३८. सर्प सत्रस्य ऋत्विजाः :- ---धृतराष्ट्र ऐरावतो ब्रह्मा पृथुश्रवा दौरेश्रवस उद्गाता ग्लावश्चाजगावश्च प्रस्तोतृप्रतिहर्त्तारौ---— तां.ब्रा. २५.१५.३

३९. तपो गृहपतिर्ब्रह्म ब्रह्मेरापत्न्यमृतमुद्गाता भूतं प्रस्तोता भविष्यत्प्रतिहर्त्तार्त्तव उपगातार-- — तां.ब्रा. २५.१८.४

४०. स य एवं विद्वान् अग्निष्टोमेनोद्गायति प्राजाताः प्रजा जनयति परि प्रजाता गृह्णाति।— जै.ब्रा.१.६७

४१.---प्रजापतिर् उद्गाता प्राजापत्य उदुम्बरः। वृणुते ऽन्यान् ऋत्विजो नोद्गातारम्। यद् उद्गाता प्रथमेन कर्मणौदुम्बरीम् अन्वारभते स्वयैव तद् देवतयात्मानम् आर्त्विज्याय वृणीते।---— जै.ब्रा. १.७०

४२. प्रजापतिर् उद्गातोर्ग् उदुम्बरः। स एष ऊर्जि श्रितः प्रजापतिः प्रजाभ्य ऊर्जम् अन्नाद्यं विभजति। उदङ्ङ् आसीन उद्गायति। उदीचीम् एव तद् दिशम् ऊर्जा भाजयति। --------यद् उदीचीनदेवत्या उद्गातारो ऽथ कस्माद् विपर्यावृत्य दिश आर्त्विज्यं कुर्वन्तीत्य् आहुः। ब्रूयाद् दिशाम् अभिष्ट्यै दिशाम् अभिप्रेत्यै। तस्मात् सर्वासु दिक्ष्व् अन्नं विद्यत इति।---— जै.ब्रा. १.७२

४३.--- -अकर्म वयं तद् यद् अस्माकं कर्म इत्य् आह उद्गातारं पृच्छत इति। उद्गातः किं स्तुतं स्तोत्रं होता प्रातरनुवाकेनान्वशंसीत् इति। अकर्म वयं तद् यद् अस्माकं कर्म इति ब्रूयाद् अगासिष्म यद् अत्र गेयम् इति। तं यदि ब्रूयुः तमांसि वा अगासीर् न ज्योतींषि इति ज्योतींष्य् एवाहम् अगासिषम् इति ब्रूयात् न तमांसि इति।-- — जै.ब्रा. १.७६

४४. द्रोणकलशस्य प्रोहणम् : उद्गातार उद्गीथायाधोऽधोऽक्षं द्रोणकलशं प्रोहन्ति।----नाक्षम् उपस्पृशेत्।---- — जै.ब्रा. १.७७

४५. एतेनैवोद्गाताभिमृशति तनूपा असि तन्वं मे पाहि।---- — जै.ब्रा.१.७८

४६.-----स नः पवस्व शं गवे शं जनाय शम् अर्वते। शं राजन्न् ओषधीभ्यः।। इति। शम् एवोद्गात्रे भवति शं यजमानाय शं प्रजाभ्यः।-- ---- -अथोद्गात्रैकर्चो गायत्रं गायति उच्चा ते जातम् अन्धसा इति। स उदित्येवेतो देवेभ्यो हव्यं वहति------ जै.ब्रा. १.८१

४७. देवक्षेत्रं वा एषो ऽध्यवस्यति यस् सोमस्योद्गायति।---- -सोमोद्गायोद्गाय सोम इत्य् आह। सोमो वै देवानां क्षेत्रपतिः। सोमायैव तद् देवानां क्षेत्रपतये प्रोच्योद्गायति नार्तिम् आर्छति।— जै.ब्रा. १.८४

४८. अध्वर्युः प्रथमस् सर्पति प्राणो यज्ञस्य।-- प्रस्तोता द्वितीयस् सर्पति मुखं साम्नः।-- -उद्गाता तृतीयस् सर्पति सर्वदेवत्यः प्रजापतिः। प्रतिहर्ता चतुर्थस् सर्पति तुरीयं साम्नः। यजमानः पञ्चमस् सर्पति। पांक्तो यज्ञः पांक्ताः पशवः।— जै.ब्रा. १.८५

४९. प्रजापतिर् एष यद् उद्गाता तम् एतत् प्रजा अन्नकाशिनीर् अभितस् समन्तं परिविशन्ति। ताभ्यो हिंकारेणैवान्नाद्यं सृजते। तद् ओंकारेण सृष्टं वारयते।-- — जै.ब्रा.१.८८

५०. प्रजापतिं कल्पयित्वोद्गायेत्। यो ह वै प्रजापतिं कल्पयित्वोद्गायति कल्पते ऽस्मै दिशः प्रदिश आदिशो विदिश उद्दिशो दिश इति।— जै.ब्रा. १.८९

५१. स्वरेण संपाद्योद्गायेत्। एतद् वै साम्नस् स्वं यत् स्वरः। स्वेनैवैनत् तत् समृद्धयति। एतद् वै साम्नो ऽन्नाद्यं यत् स्वराः। एतद् वै साम्न आयतनं यत् स्वरः।-- — जै.ब्रा. १.११२

५२. यो वा अंशुम् एकाक्षरं वेदान्नाद एव श्रेष्ठस् स्वानां भवति। अथो सह एव तस्यै जनताया उद्गायति। वाग् वा अंशुर् एकाक्षरः।-- ----एते ह वै रसदिहौ ये एते गायत्र्या उत्तमे अक्षरे। यस् ते उद्गायन्न् आरभते रसदिहाव् उरसि निमृदते।— जै.ब्रा.१.११४

५३. रथन्तरस्य महिम्नस् संभृत्य रथन्तरेणोद्गायेत् यस् ते अग्नौ महिमा यस् ते अप्सु रथे यस् ते महिमा-- ---- -। द्रविणस्वद् एवोद्गात्रे भवति द्रविणस्वद् यजमानाय---- — जै.ब्रा.१.१२८

५४. अनेजन्न् उद्गायेत् पशूनाम् अपरावापाय। यद् एजन्न् उद्गायेत् पशून् परावपेत्।----प्रावृत एवानेजन्न् उद्गायेत्।— जै.ब्रा.१.१३८

५५. अक्षं ह स्म वा एतत् पुरा विशश् शीर्षन् निदधति य एव तम् उद्गायन् नावपातयिष्यति स न उद्गास्यतीति। तद् उ तद् उपकार्यरूपम् एव। कामम् एवोद्गेयम्।— जै.ब्रा. १.१३९

५६.---प्रतिहार एव प्रतिह्रियमाणः वाक् इत्य् उद्गाता ब्रूयात्। वाग् वै ब्रह्म।-- — जै.ब्रा. १.१४०

५७. नार्मेधम् साम-- -यजमानस्य वै त उद्गातुः पुत्रौ पुत्रम् अमीमरताम् अन्तकधृतिं सौव्रतिं नकिरश् च शकपूतश् चेति।— जै.ब्रा.१.१७१

अथ ह हृत्स्वाशया आल्लकेयो महावृषो राजा पुत्रं दीक्षयांचकार। तस्य ह सोमशुष्मस् सात्ययज्ञिर् उद्गीथायोढ आस। तम् उ ह महावृषाणां दूता आसस्तुर् आगच्छ समितिर् वा इयम् इति। तद् ध प्रधावयन्न् उवाचोद्गातर् एतं ते पुत्रं परिददानीति। स हेष्ट्वा पुनर् आजगाम। स होवाचोद्गातः क्व यज्ञं प्रत्यतिष्ठिपः क्व यजमानं क्वास्य पशून् इति।------— जै.ब्रा. १.२३४

प्रजापतिर् एष यद् उद्गाता। स त्वष्टा स रेतसस् सेक्ता स रूपाणां विकर्ता।----अरेतस्का ह वै दुरुद्गातुर् वर्तन्यां गर्भा जायन्ते।— जै.ब्रा. १.२५९

५८. त्रयो ह वा एते समुद्रा यत् पवमाना अग्निर् वायुर् असाव् आदित्यः। तैश् छन्नैर् उद्गायेत्। स यर्हि वै प्रजापतिः प्रजाभ्यो वृष्टिम् अन्नाद्यं प्रयच्छति छाद्यन्त एते तर्हि। प्रजापतिर् एष सः। यद् उद्गास्यन् पवमानैश् चान्यैर् उद्गायति छादयत्य् एव यजमानम् अन्नाद्येन छादयत्य् आत्मानं छादयति प्रजा बहुवर्षी तत्र पर्जन्यो भवतीति ह स्माह कूटश् शैलनो यत्राहम् उद्गायामीति।— जै.ब्रा. १.२७४

५९. देवा वै पवमानाः प्रजाः पृष्ठोक्थानि। तैश् छन्नैः परोक्षम् अनिरुक्तैः पवमानैर् उद्गायेत्।---- — जै.ब्रा.१.२७४

६०. दैवीं ह वा एष संसदम् एति य पवमानैर् उद्गायति।— जै.ब्रा.१.२७५

६१. अथैता अमृतव्याहृतीर् अभिव्याहरति भूर् भुवस् स्वः। क इदम् उद्गास्यति स इदम् उद्गास्यति इति। प्रजापतिर् वै कः। तम् एवादाव् आर्त्विज्याय वृणीते। स य एवं तद् उद्गायति वाचैवास्य कृतं भवत्य् अनृण आत्मना भवति।— जै.ब्रा. १.३२७

६२. क्षिप्रं प्रजया पशुभिः प्रजाया इति प्रतिहारेप्रतिहार उद्गाता इळ् इति ब्रूयात्।— जै.ब्रा.१.३३०

६३. तद् उद्गाता यजमानस्य पञ्चदशेन वज्रेण द्विषन्तं पाप्मानं भ्रातृव्यं स्तृणाति।------ जै.ब्रा.१.३३१

६४. अग्निर् एष यद् रथन्तरम्। अग्निर् वै मृत्युः। स यो ऽन्यत्राक्षरेभ्यस् स्तोब्धि स एवोद्गाता यजमानं मृत्योर् आस्ये ऽप्यस्यति।— जै.ब्रा.१.३३२

६५. तद् आहुः उद्गातर् अहन् रात्रिम् अगासी रात्र्याम् अहाः इति। उभयम् इति ब्रूयात् अहन्न एव रात्रिम् अगासिषं रात्र्याम् अहः इति।— जै.ब्रा. १.३४०

६६. ---यदि कामयेरन् उद्गातैषां म्रियेतेत्य् उद्गातारं तृतीयसवने ब्रूयुः प्रजापतेर् ऋग्भिर् जुहुधि इति।----- अध्वर्युः प्रथमो युज्यते। तस्य प्रातस्सवनम् आयतनम्। अथ होता। तस्य माध्यंदिनं सवनम् आयतनम्। अथोद्गाता। तस्य तृतीयसवनम् आयतनम्।— जै.ब्रा.१.३४३

६७. उद्गातुर् हिंकारम् अनु हिंकुर्वन्ति। तस्माद् आत्मनो वशम् अङ्गानि यन्ति।-- -ऋत्वजों द्वारा शिर आदि विभिन्न अंगों से गाने का वर्णन।— जै.ब्रा.१.४०७

६८. उद्गाता पञ्चविंशेनात्मना राजनेनोद्गायति। इमं तद् आत्मानं प्रतिदधाति। तस्माद् अयम् आत्मा प्रतिहितः।- त (ऋत्विजः) एकैकयास्तुतयोद्गातारम् उपसमायन्ति। ताभिर् उद्गातोद्गायति। आत्मन् एव तद् अंगानि प्रतिदधाति।--- जै.ब्रा. २.४०८

६९. अथो मनो वै गायत्रम्।-- मनसा हिंकुर्वन्ति, मनसा प्रस्तौति, मनसादिम् आदत्ते, मनसोद्गायति। मनसा प्रतिहरति, मनसोपद्रवति, मनसा निधनम् उपयन्त्य् असमाप्तस्य समाप्त्यै।— जै.ब्रा. ३.३०५

७०. छन्दांसि यद् अयजन्त तेषां बृहत्य् एवोदगायत्। अथ याव् एता उत्तरौ प्रगाथौ तौ प्रस्तोतृप्रतिहर्तारावृ आस्ताम्।-- — जै.ब्रा. ३.३६९

७१. देवा यद् अयजन्त तेषां बृहस्पतिर् एवोद्गायत्। गौश् चायास्यश् च प्रस्तोतृप्रतिहर्तारावृ आस्ताम्। प्रजापतिर् एव गृहपतिर् आसीत्।---— जै.ब्रा.३. ३७४

७२. ज्योतिष्टोमे सुत्येऽहनि प्रातरनुवाकात् पूर्वं विश्वरूपागानं : अध्वर्यवित्याहोद्गाता मा स्म मेऽनिवेद्य होत्रे प्रातरनुवाकमुपाकरोरिति।-षड्विंश ब्राह्मण १.४.१

७३. विश्वरूपागाने ज्योतिर्गानं :---- -स ब्रूयादकार्षमहं तद्यन्मम कर्म उद्गातारं पृच्छतेति। उद्गातः किं स्तुतं स्तोत्रं होता प्रातरनुवाकेनान्वशंसीदिति स ब्रूयादकार्षमहं तद्यन्मम कर्मागासिषं यद्गेयमिति। तं चेद् ब्रूयुस्तमो वै त्वमगासीर्न ज्योतिरिति। स ब्रूयाज्ज्योतिस्तेन येन ज्योतिः----— षड्. ब्रा. १.४.७

७४. असितमृगा ह स्म वै पुरा कश्यपा उद्गायन्त्यथ ह युवानमनूचानं कुसुरुबिन्दमौद्दालकिं ब्राह्मणा उद्गीथाय वव्रे।— षड्. ब्रा.१.४.१६

७५. यावत्साम्नोद्गातोद्गातृष्वेव तावद् (यज्ञः)।— षड्. ब्रा.१.६.५

धूर्गाने बहिष्पवमाने : एष वाव जात एषोऽवलुप्तजरायुरेष आर्त्विजीनो यस्य धुरो गीयन्ते यश्चैवं विद्वान् धुरो गायति। जातमेवैनमन्नाद्याय परिवृणक्ति। उभावन्नमत्त उद्गाता च यजमानश्च।— षड्. ब्रा. २.२.३

७६. अथैतस्यामुदीच्यां दिशि भूयिष्ठं पर्जन्यो विद्योतते तस्मादेतां दिशमुद्गाता प्रत्युद्गायति।— षड्. ब्रा.२.४.४

७७. प्रातसवने : पर्जन्यो म उद्गाता स मोपह्वयतामुद्गातरुपमाह्वयस्वेत्युच्चैः।----प्राणो यजमानः।— षड्.ब्रा. २.५.५

७८. माध्यन्दिन सवने : श्रोत्रं म उद्गाता स मोपह्वयताम् उद्गातरुप माह्वयस्वेत्युच्चैः।---अपानो यजमानः।— षड्. ब्रा.२.६.२

७९. तृतीय सवने : समानो म उद्गाता स मोपह्वयताम् उद्गातरुप माह्वयस्वेत्युच्चैः।----स उदानो यजमानः।— षड्. ब्रा.२.७.२

८०. देवानां वा एतद्यज्ञस्य मुखं यदुद्गातृचमसम्। तस्मादुद्गातृचमसं नान्यो भक्षयेत्।— षड्. ब्रा. २.७.८

८१. यदुद्गाता जहाति श्रोत्रं ह तद्यजमानं जहाति। स यत्तत् करोति स्वं श्रोत्रं यजमाने दधाति। स विष्वङ् श्रोत्रेणामुष्मिंल्लोके संभवति।— षड्.ब्रा ३.१.४

८२. पशवो हाध्वर्युमनु कीर्तिर्होतारं योगक्षेमो ब्रह्माणमात्मा च प्रजा चोद्गातारम्।— षड्.ब्रा. ३.१.१०

८३. अथ यद्यात्मना वा प्रजया वा व्याधीयेतोद्गाता म इदमकरिति विद्यात्।— षड्.ब्रा. ३.२.१

८४. --- पर्जन्यो म उद्गाता-- -। स एतान् दैवानृत्विजो वृत्वाथैतान् मानुषान् वृणीत।— षड्. ब्रा.३.३.२

८५. पर्जन्यो म उद्गाता। स मे देवयजनं ददातु। उद्गातर्देवयजनं मे देहीत्युच्चैः।— षड्. ब्रा. ३.३.९

८६. इन्द्र एष यदुद्गाता। स यथासावमीषां रसमादत्त एवमेष तेषां रसमादत्ते।---ते य एवेमे मुख्याः प्राणाः। एत एवोद्गातारश्च उपगातारश्च। इमे ह त्रय उद्गातार इम उ चत्वार उपगातारः।— जैमि.उप.ब्रा.१.६.३.२

८७. तद्यथा वा अतो ह्रदात् कुल्ययोर्वरामुदकमुपनयन्त्येवमेव एतन्मनसोऽधि वाचोद्गाता यजमानाय स्वकामान् प्रयच्छति। स य उद्गातारं दक्षिणाभिराराधयति तं सा कुल्योपधावति। य उ एनं नाराधयति स उ तामपि हन्ति।— जै.उ.ब्रा. १.१८.३.४

८८. तं (शर्यातं मानवं)देवा बृहस्पतिनोउद्गात्रा दीक्षामहा इति पुरस्तादागच्छन्।---बम्बेन आजद्विषेण पितरो दक्षिणतः-- -। उशनसा काव्येन असुराः पश्चात्- - -। अयास्येनाङ्गिरसेन मनुष्या उत्तरतः-- -। उद्गाताओं से प्राप्ति का वर्णन।— जै.उ.ब्रा.२.३.१.१

८९. वाक्, मन, चक्षु, श्रोत्र, प्राण द्वारा उद्गान करने पर पाप्मा द्वारा इनका वेधन करना। मुख्य प्राण (अयास्य आंगिरस) द्वारा उद्गान करने पर पाप्मा का नष्ट होना।— जै.उ.ब्रा. २.४.१.१

९०. ता उ ह वै जाबालौ दिदीक्षाते शुक्रश्च गोश्रुश्च। तयोर्ह प्राचीनशालिर्वृत उद्गाता।— जै.उ.ब्रा. ३.२.२.७

९१. स यस्तां देवतां वेद,यां च स ततोऽनुसंभवति या चैनं तं मृत्युमतिवहति स उद्गाता मृत्युमतिवहतीति।— जै.उ.ब्रा. ३.२.४.४

९२. यस्त्रयाणां मृत्यूनां साम्ना अतिवाहं वेद स उद्गाता मृत्युमतिवहतीति।— जै.उ.ब्रा. ३.२.४.११

९३. ते ह काण्ड्वियवमुद्गातारं चक्रिरे ब्राह्मणं प्राचीनशालिम्।-------- तं ह वा एवंविदुद्गाता यजमानमोमित्येतेनाक्षरेण आदित्यं मृत्युमतिवहति। वागित्यग्निम्। हुमिति वायुम्। भा इति चन्द्रमसम्।--- जै.उ.ब्रा. ३.२.५.२

९४. श्रीर्वा एषा प्रजापतिः साम्नो यद्धिंकारः। तमिदुद्गाता श्रिया प्रजापतिना हिङ्कारेण मृत्युमपसेधति।— जै.उ.ब्रा. ३.३.२.३

९५. तमेतदुद्गाता यजमानमोमित्येतेनाक्षरेण अन्ते स्वर्गे लोके दधाति।---- जै.उ.ब्रा. ३.३.३.८, ३.३.४.९

९६. तस्य (यज्ञस्य) होताध्वर्युरु-उद्गातेत्यन्यतरां वाचा वर्तनिं संस्कुर्वन्ति।-- — जै.उ.ब्रा. ३.४.२.२

९७. ओमिति वै होता प्रतिष्ठितः। ओमित्यध्वर्युः। ओमित्युद्गाता।— जै.उ.ब्रा.३.४.५.६

९८. तत्सप्तविधं साम्नः। सप्तकृत्व उद्गाता आत्मानं च यजमानं च शरीरात् प्रजनयति।— जै.उ.ब्रा. ३.६.६.४

९९. तदाहुः। स वा उद्गाता यो यजमानस्य प्राणेभ्योऽधि मृत्युपाशान् मुञ्चतीति।------एवंवा एवंविदुद्गाता यजमानस्य प्राणेभ्योऽधि मृत्युपाशान् उन्मुञ्चति।------- तदाहुः। स वा उद्गाता यो यजमानस्य प्राणेभ्योऽधि मृत्युपाशानुन्मुच्य अथैनं साङ्गं सतनुं सर्वमृत्योः स्पृणातीति।-— जै.उ.ब्रा. ४.७.१.३

१००. आलोभी : इन्धानास्त्वा शतं हिमा इत्येतद्ध वै दाशर्म आरुणिमुवाचाग्नि-मादधिवाँसमुद्गातः केनाग्नि-रुपस्थेय इति तस्मै हैतदग्न्युपस्थानमुवाच -— काठक संहिता ७.६

१०१. आलोभी : अग्ने त्वं नो अन्तम इत्येतद्ध वै दिवोदासो भैमसनिरारुणिमुवाचाग्नि-मादधिवाँसमुद्गातः केन गार्हपत्य उपस्थेय इति तस्मै उवाच— का.सं. ७.८

१०२. उत्सीदनम् : महाहविर्होता सत्यहविरध्वर्युः--अयास्य उद्गाता — का.सं. ९.९

१०३. उत्सीदनम् (सप्तहोता) :- महाहविर्होतासीत्-अयास्य उद्गाता।— का.सं. ९.१२

१०४. उत्सीदनम् : दशहोतारं व्याख्याय बहिष्पवमानेनोद्गायेत्--चतुर्होतारं व्याख्यायाज्यैरुद्गायेत्---पञ्चहोतारं व्याख्याय माध्यंदिनेन पवमानेनोद्गायेत्---सप्तहोतारं व्याख्यायर्भवेण पवमानेनोद्गायेत्। — का.सं. ९.१४

१०५. सर्पराज्ञ्या ऋग्भिर्दशमेऽहन्नुद्गातोद्गायेदियं वै सर्पराज्ञ्यन्नं चतुर्होतारोऽन्नमेवाप्त्वान्नमवरुन्द्धे--— का.सं. ९.१५

१०६.----- -मनसा प्रस्तौति मनसोद्गायति मनसा प्रतिहरति रेत एवैतदुद्गातारः प्रसिञ्चन्ति-— का.सं. ९.१५

१०७. इषुः :- प्रजापतेर्वा उद्गातोर्गुदुम्बर्यां श्रयते प्रजास्वेवोर्जं न्यनक्ति----— का.सं. २५.१०

१०८. धिष्ण्यम् : उद्गात्रा पत्नीं संख्यापयति वृषा वा उद्गाता पत्न्याः प्रजाः प्रजायन्ते--- — का.सं.२६.१

१०९. वाचस्पतिः :- प्राजापत्या एत ऋत्विजस्त्रयो वृता युक्ता यज्ञे भवन्ति प्रस्तोतोद्गाता प्रतिहर्ता यद्धिङ्करोत्युद्गातृनेव वृणीते तेऽस्य वृता युक्ता यज्ञे भवन्ति।— का.सं २७.९

११०. आयुष्यम् : यदुद्गात्रे ददाति प्राजापत्यो वा उद्गाता प्रजापतिमेव तेन प्रीणाति— का.सं २८.५

१११. दीर्घजिह्वी : उद्गातृभ्यो हरन्ति सोमदेवत्यं वै साम साम्नस्सवीर्यत्वाय सतनूत्वाय— का.सं. २९.२

११२. एकादशिनी : आसन्दीमारुह्योद्गाता महाव्रतेनोद्गायति प्रेङ्खमारुह्य होता महदुक्थमनुशँसति---— का.सं. ३४.५

११३. प्रायश्चित्तिः :- चत्वारो वरा देया ब्रह्मण उद्गात्रे होत्रेऽध्वर्यव एते वै यज्ञस्येन्द्रास्तानेव प्रीणाति— का.सं. ३५.१६

११४. प्रायश्चित्तिः :- यस्य सोममभिदहेउद्गहानध्वर्युस्स्पाशयेत स्तोत्राण्युद्गाता शस्त्राणि होता--- — का.सं. ३५.१६

११५. सप्तहोता : महाहविर्होता, सत्यहविरध्वर्युः--अयास्य उद्गाता-—मैत्रायणी संहिता १.९.१, १.९.५

११६. राजसूय ब्राह्मणम् : स्रगुद्गातुः, सौर्यो वा उद्गाता, ऽथो अमुमेवास्मा आदित्यमाप्त्वोन्नयति-— मै.सं. ४.४.८

११७. प्राजापत्यो वा उद्गाता, संक्शाप्यमानो वा उद्गाता पत्न्या रेता आदत्ते,-- — मै.सं. ४.५.४

११८. त्रयो वै प्राजापत्या ऋत्विज, उद्गाता प्रस्तोता प्रतिहर्ता, ते वा अस्यैतर्ह्यवृत्ता अयुक्ता, यद्धिंकरोति तेनैवास्य ते वृत्ता युक्ता भवन्ति— मै.सं. ४.६.४

११९. राजसूयविषयस्य दशपेयस्याभिधानम् : प्राकाशावध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मँ होत्रे-— तैत्तिरीय संहिता १.८.१८.१

१२०. स्तोत्रोपाकरणप्रतिगराङ्गमन्त्राभिधानम् : वायुर्हिंकर्ताऽग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वेदेवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनं ते देवा प्राणभृतः प्राणं मयि दधत्वेतद्वै सर्वमध्वर्युरुपा-कुर्वन्नुद्गातृभ्य उपाकरोति— तै.सं. ३.३.२.१

१२१. काम्ययाज्यापुरोनुवाक्याभिधानम् : बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् — तै.सं. ३.४.११.३

१२२. धिष्णियाभिधानम् : नाध्वर्युरुप गायेद्वाग्वीर्यो वा अध्वर्युर्यदध्वर्युरुपगायेदुद्गात्रे वाचँ सं प्र यच्छेदुपदासुकाऽस्य वाक्स्यात्-— तै.सं. ६.३.१.५

१२३. आग्रयण ग्रह कथनम् : त्रिर्हिंकरोत्युद्गातृनेव तद्वृणीते— तै.सं. ६.४.११.३

१२४. ----नेष्टा पत्नियामुद्गात्रा सं ख्यापयति प्रजापतिर्वा एष यदुद्गाता प्रजानां प्रजननायाप उप प्र वर्तयति रेत एव तत्सिंञ्चत्यूरुणोप प्र वर्तयत्यूरुणा हि रेता सिच्यते--— तै.सं. ६.५.९.६

१२५. सहस्रतम्याभिधानम् : तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽध्वर्यवे वा दद्यात्सहस्रमस्य सादत्ता भवति-— तै.सं. ७.१.७.२

१२६. सामविशेषकथनम् : नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति---- - दिग्भ्य एवान्नाद्यँ सं भरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यम् संभृत्य तेज आत्मन्दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवति---- आसन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छन्ति-— तै.सं. ७.५.८.४

१२७. प्रकाशावध्वर्यवे ददाति। प्रकाशमेवैनं गमयति। स्रजमुद्गात्रे। व्येवास्मै वासयति। रुक्मँ होत्रे। आदित्यमेवास्मा उन्नयति-— तैत्तिरीय ब्राह्मण १.८.२.३

१२८. अश्वमेधे उद्गातुः प्रोक्षणं : शतेन क्षत्तसंग्रहीतृभिः सहोद्गाता। उत्तरतो दक्षिणा तिष्ठन्प्रोक्षति। अनेनाश्वेन मेध्येनेष्ट्वा। अयँ राजा सर्वमायुरेत्विति। आयुर्वा उद्गाता। आयुः क्षत्तसंग्रहीतारः। आयुषैवास्मिन्नायुर्दधाति।— तै.ब्रा. ३.८.५.३

१२९. अश्वस्योद्गातृस्थाने वरणं : यदुद्गातोद्गायेत्। यथा क्षेत्रज्ञोऽन्येन पथा प्रतिपादयेत्। तादृक्तत्। उद्गातारमपरुद्ध्य। अश्वमुद्गीथाय वृणीते। यथा क्षेत्रज्ञोऽञ्जसा नयति। एवमेवैनमश्वः सुवर्गं लोकमञ्जसा नयति।— तै.ब्रा. ३.८.२२.१

१३०. सप्तहोतृमन्त्र : महाहविर्होता। सत्यहविरध्वर्युः।----अयास्य उद्गाता।— तैत्तिरीय आरण्यक ३.५.१

१३१. तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः---- प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत्।— तैत्तिरीय आरण्यक १०.६४.१

१३२. तस्याग्निर्होतासीद्, वायुरध्वर्युः, सूर्य उद्गाता, चन्द्रमा ब्रह्मा, पर्जन्यः सदस्य,-- — गोपथ ब्रा. १.१.३

१३३. यदुद्गाता साम्ना करोति, दिवं तेनाप्याययति। तत्र ह्यादित्यः शुक्रश्चरति। तदप्येतदृचोक्तम्-उच्चा पतन्तमरुणं सुपर्णम् इति।— गो.ब्रा. १.२.९

१३४. --- -किं विद्वानुद्गातौद्गात्रं करोति,------ चक्षुषैवोद्गातौद्गात्रं करोति। चक्षुषा हीमानि भूतानि पश्यन्ति। अथो चक्षुरेवोद्गाता, चक्षुर्ब्रह्म, चक्षुर्देव इति।— गो.ब्रा. १.२.११

१३५. चत्वारो वा नमे वेदा----। चतस्रो वा इमा होत्रा हौत्रमाध्वर्यवमौउद्गात्रं ब्रह्मत्वमिति।-— गो. ब्रा. १.२.१६

१३६. सामविदमेवोद्गातारं वृणीष्व, स ह्यौद्गात्रं वेद। आदित्यो वा उद्गाता।— गो.ब्रा. १.२.२४

तस्मात्-सामविदमुद्गातारम्।— गो.ब्रा. १.३.१

१३७. तं वा एतं महावाद्यं कुरुते, यदृचैव हौत्रमकरोद् यजुषाध्वर्यवं साम्नौउद्गात्रम-थर्वाङ्गिरोभिर्ब्रह्मत्वम्।— गो.ब्रा. १.३.२

१३८. तद् यदौदुम्बर्यां म आसिष्ट हिङ्ङकार्षीद् मे प्रास्तावीद् म उदगासीद् मे सुब्रह्मण्यामाह्वासीदित्युउद्गात्रे दक्षिणा नीयन्ते, — गो.ब्रा. १.३.४

१३९. अथोद्गातारं दीक्षयति। आदित्यो वा उद्गाताधिदैवं चक्षुरध्यात्मम्। पर्जन्य आदित्यः। पर्जन्यादधि वृष्टिर्जायते।— गो.ब्रा. १.४.३

१४०. अथोद्गात्रे प्रस्तोतारं दीक्षयति।-- -अथोउद्गात्रे सुब्रह्मण्यं दीक्षयति।— गो.ब्रा. १.४.६

१४१. स सत्रेणोभयतोऽतिरात्रेणान्ततो ऽयजत। वाचं ह वै होत्रे प्रायच्छत्, प्राणमध्वर्यवे, चक्षुरुउद्गात्रे, -- -य एवमानन्त्यमात्मानं दत्वानन्त्यमाश्नुत।— गो.ब्रा. १.५.८

१४२. एते ह वा अविद्वांसो यत्रानृग्विद्धोता भवत्ययजुर्विदध्वर्युरसामविदुद्गाता—गो.ब्रा. १.५.११

१४३. होतैव भर्गो ऽध्वर्युरेव मह उद्गातैव यशो ब्रह्मैव सर्वम्। वागेव भर्गः प्राण एव महश्चक्षुरेव यशो मन एव सर्वम्।— गो.ब्रा. १.५.१५

१४४. साम्नोद्गाता छादयन्नप्रमत्त औदुम्बर्यां स्तोभदेयः सगउद्गदः। विद्वान् प्रस्तोता विदहाथ सुष्टुतिं सुब्रह्मण्यः प्रतिहर्ताथ यज्ञे।।— गो.ब्रा. १.५.२४

१४५. तं (घर्मं) संभृत्योचतुः-ब्रह्मन् घर्मेण प्रचरिष्यामः, होतर्घर्ममभिष्टुहि, उद्गातः सामानि गाय, इति।— गो.ब्रा. २.२.६

१४६. --- -हिंकृत्योद्गातारः साम्ना स्तुवन्ति।-— गो.ब्रा. २.३.९

१४७. पुरुषो वै यज्ञः। तस्य मन एव ब्रह्मा, प्राण उद्गाता, अपानः प्रस्तोता, व्यानः प्रतिहर्ता,-— गो.ब्रा. २.५.४

१४८. अथ यत् प्रस्तोता प्रस्तौति, अपानमेव तत् प्राणैः संदधाति। अथ यत् प्रतिहर्ता प्रतिहरति, व्यानमेव तदपानैः संदधाति। अथ यदुद्गातोद्गायति, समानमेव तत् प्राणैः संदधाति।— गो.ब्रा. २.५.४

१४९. पञ्च प्रयाजयागाः :— 'उपावर्तध्वम्' इत्येवाध्वर्युरुद्गातृभ्यो यज्ञं सम्प्रयच्छति। त उद्गातारो नापव्याहरेयुः-आ उत्तमायाः। 'एषोत्तमा' इत्येवोद्गातारो होत्रे यज्ञं सम्प्रयच्छन्ति।— शत. ब्रा.१.५.२.१२

१५०. शुक्रामन्थिनौ ग्रहौ : अथ संप्रेष्यति-प्रैतु होतुश्चमसः, प्र ब्रह्मणः, प्रोद्गातृणाम्, प्रयजमानस्य,-—— श.ब्रा. ४.२.१.२९

१५१. विप्रुड्होमः :- अथ स्तीर्णायै वेदे द्वे तृणेऽअध्वर्युरादत्ते। तावध्वर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ यज्ञस्य। अथ प्रस्तोता वागेव यज्ञस्य। अथोद्गाता आत्मैव प्रजापतिर्यज्ञस्य। अथ प्रतिहर्ता भिषग्वा व्यानो वा।— श.ब्रा. ४.२.५.३

१५२. स्तोमो वाऽएष प्रजापतिः-यदुद्गातारः। स इदं सर्वं युते, इदं सर्वं सम्भवति।— श.ब्रा. ४.२.५.६

१५३. माध्यन्दिन सवनग्रहाः :- सर्वे वाऽअन्यऽउद्गातुः प्राञ्च आर्त्विज्यं कुर्वन्ति, तथो हास्यैतत् प्रागेवार्त्विज्यं कृतं भवति। श.ब्रा. ४.३.२.२

१५४. प्रजापतिर्वाऽउद्गाता, योषऽग्घोंता। स एतत्प्रजापतिरुद्गाता योषायामृचि होतरि रेतः सिञ्चति।— श.ब्रा. ४.३.२.३

१५५. दक्षिणादानम् : अथ ब्रह्मणे। अथोद्गात्रे। अथ होत्रे।-- — श.ब्रा. ४.३.४.२२

१५६. अथ वासः। त्वचमेवैतेनात्मनस्त्रायते। त्वग्घि वासः। तद् बृहस्पतयऽउद्गायतेऽददात्।— श.ब्रा. ४.३.४.२६

१५७. पात्नीवत ग्रहः :- अथ सम्प्रेष्यति- --- उद्गात्रा सङ्ज्ञापय-- -- — श.ब्रा. ४.४.२.१७

१५८. उदानयति नेष्टा पत्नीम्। तामुद्गात्रा सङ्ज्ञापयति। प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि इति। प्रजापतिर्वाऽउद्गाता, योषा पत्नी। मिथुनमेवैतत्प्रजननं क्रियते।— श.ब्रा. ४.४.२.१८

१५९. व्यूढद्वादशाहः :- ---व्यूहत उद्गाता च होता च छन्दांसि।— श.ब्रा. ४.५.९.१

१६०. किं नु तत्राध्वर्योः-यदुद्गाता च होता च छन्दांसि व्यूहतः।-—— श.ब्रा. ४.५.९.१३

१६१. दशपेय सोमयाग दीक्षा। ऋत्विग्विशेष दक्षिणा : हिरण्मयीं स्रजमुद्गात्रे। रुक्मं होत्रे।---- श.ब्रा. ५.४.५.२२

१६२. तम् रसं अध्वर्युर्ग्रहेण गृह्णाति। यद्गृह्णाति-तस्माद्ग्रहः। तस्मिन्नुद्गाता महाव्रतेन रसं दधाति। सर्वाणि हैतानि सामानि यन्महाव्रतम्।— श.ब्रा. १०.१.१.५, १०.४.१.१३

१६३. वसंत आग्नीध्रः।-- -ग्रीष्मोऽध्वर्युः।-- - वर्षा उद्गाता। तस्माद्यदा बलवद्वर्षति। साम्न इवोपब्दिः क्रियते। शरद्ब्रह्मा। हेमन्तो होता।— श.ब्रा. ११.२.७.३२

१६४. अथोद्गातारं दीक्षयति। पर्जन्यो वा उद्गाता। पर्जन्यादु वै वृष्टिर्जायते।-----— श.ब्रा.१२.१.१.३

१६५. अथोद्गात्रे प्रस्तोतारं दीक्षयति। तं हि सोऽनु।-- --- श.ब्रा.१२.१.१.६

१६६. अथोउद्गात्रे सुब्रह्मण्यां दीक्षयति। तं हि सोऽनु।-- — श.ब्रा. १२.१.१.९

१६७. अश्वमेधः :- यदुद्गातोद्गायेत्। यथाऽक्षेत्रज्ञोऽन्येन पथा नयेत्। तादृक्तत्। अथ

यदुद्गातारमपरुध्याश्वमुद्गीथाय वृणीते। यथा क्षेत्रज्ञोऽञ्जसा नयेत्। एवमेवैतत् यजमानमश्वः स्वर्गं लोकमञ्जसा नयति।— श.ब्रा. १३.२.३.२

१६८. अश्वमेधस्य फलाधिकारिकालादिकम् : सा याऽसौ फाल्गुनी पौर्णमासी भवति। तस्यै पुरस्तात् षडहे वा सप्ताहे वा ऋत्विजः उपसमायंति। अध्वर्युश्च होता च ब्रह्मा चोद्गाता च। एतान्वा अन्वन्य ऋत्विजः।— श.ब्रा. १३.४.१.४

१६९. पारिप्लवाख्यानब्राह्मणम् : प्रमुच्याश्वं दक्षिणेन वेदिं हिरण्मयं कशिपूपस्तृणाति। तस्मिन् होतोपविशति।---- -दक्षिणतो ब्रह्मा चोद्गाता च हिरण्मयोः कशिपुनोःपुरस्तात्।— श.ब्रा.१३.४.३.१

१७०. अथोद्गाता वावातामभिमेथति। वावाते हयेहये। वावाते! ऊर्ध्वामेनामुच्छ्रापय इति। तस्यै शतं राजन्या अनुचर्यो भवंति। ता उद्गातारं प्रत्यभिमेथंति। उद्गातर्हयेहय उद्गातः! ऊर्ध्वमेनमुच्छ्रयतात् इति।— श.ब्रा.१३.५.२.६

१७१. ब्रह्मोद्यम् : अथ ब्रह्मोद्गातारं पृच्छति-पृच्छामि त्वा चितये देवसख इति। तं प्रत्याह अपि तेषु त्रिषु पदेष्वस्मि इति। अथोद्गाता ब्रह्माणं पृच्छति-केष्वंतः पुरुष आविवेश इति। तं प्रत्याह पंचस्वंतः पुरुष आविवेश इति----अथ ब्रह्मोद्गातारं पृच्छति कत्यस्य विष्ठाः कत्यक्षराणि इति। तं प्रत्याह षडस्य विष्ठाः शतमक्षराणि इति। अथोद्गाता ब्रह्माणं पृच्छति-को अस्य वेद भुवनस्य नाभिम् इति। तं प्रत्याह वेदाहमस्य भुवनस्य नाभिम् इति।— श.ब्रा. १३.५.२.१४

१७२. अथातो दक्षिणानाम्। मध्यं प्रति राष्ट्रस्य।-- प्राची दिक् होतुः दक्षिणा ब्रह्मणः, प्रतीची अध्वर्योः उदीची उद्गातुः, तदेव।— श.ब्रा. १३.५.४.२४, १३.६.२.१८, १३.७.१.१३

१७३. अथ यैषा पत्न्यै व्रतदुघा। तामुद्गातृभ्यो ददाति। पत्नीकर्मेव वा एतेऽत्र कुर्वंति-यदुद्गातारः।— श.ब्रा. १४.३.१.३५

१७४. उद्गीथ ब्राह्मणम् : वाक्, प्राण,चक्षु, श्रोत्र,मन द्वारा क्रमशः उद्गान करना, पाप्मा द्वारा विद्ध होना, अन्त में आसन्य प्राण द्वारा उद्गान करने पर पाप्मा का नष्ट होना। आसन्य प्राण का अयास्य आंगिरस नाम होना।— श.ब्रा. १४.४.१.१

१७५. अथ यानीतराणि स्तोत्राणि। तेषु आत्मने अन्नाद्यमागायेत्। तस्मादु तेषु वरं वृणीत। यं कामं कामयेत। तं स एष एवंविदुद्गाता आत्मने वा यजमानाय वा कामं कामयते। तमागायति।— श.ब्रा. १४.४.१.३३

१७६. अश्वल ब्राह्मणं : अथ केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमते इति। उद्गात्रर्त्विजा वायुना प्राणेन। प्राणो वै यज्ञस्योद्गाता। तत् यः अयं प्राणः। स वायुः स उद्गाता सा मुक्तिः।— श.ब्रा. १४.६.१.८

१७७. अश्वल ब्राह्मणम् : कत्ययमद्योद्गाताऽस्मिन् यज्ञे स्तोत्रियाः स्तोष्यतीति। तिस्र इति। कतमास्तास्तिस्र इति। पुरोऽनुवाक्या च, याज्याच, शस्यैव तृतीया।---- प्राणेव पुरोऽनुवाक्या। अपानो याज्या। व्यानः शस्या।— श.ब्रा. १४.६.१.१२

१७८. यत् (होता) सर्पेदृचमेव तत्साय्यंऽनुवर्त्मानं कुर्याद्य एनं तत्र ब्रूयादनुवर्त्मा न्वा अयं होता सामगस्याभूदुद्गातरि यशोऽधाद् च्योष्टाऽऽयतनाच्च्योष्यत आयतनादिति शश्वत्तधा स्यात्।— ऐ.ब्रा. २.२२

१७९. आग्नीध्रीये होमादूर्ध्वं कर्तव्यानि : ते ततः सर्पन्ति-- -यथायथमन्य ऋत्विजो व्युत्सर्पन्ति संसर्पन्त्युद्गातारस्ते सर्पराज्ञ्या ऋक्षु स्तुवते।-- ऐ.ब्रा. ५.२३

१८०. हनू सजिह्वे प्रस्तोतुः श्येनं वक्ष उद्गातुः कण्ठ काकुद्रः प्रतिहर्तुः-- ऐ.ब्रा. ७.१

हरिश्चन्द्रस्य राजसूयानुष्ठानं : तस्य ह विश्वामित्रो होताऽऽसीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्माऽयास्य उद्गाता-- ऐ.ब्रा. ७.१६

१८१. प्रेङ्खं होताधिरोहत्यौदुम्बरीमासन्दीमुद्गाता वृषा वै प्रेङ्खो योषासन्दी तन्मिथुनं मिथुनमेव तदुक्थमुखे करोति प्रजात्यै।— ऐतरेय आरण्यक १.२.४

१८२. ज्योतिष्टोम-अग्निष्टोम : एकश्रुति-विधानान्मन्त्रान् कर्माणि चोउद्गातैव कुर्यादनादेशे। यावद्यजुरनादिष्टान् तान् मन्त्रान्।— द्राह्यायण श्रौत सूत्र १.१.४

१८३. युगपत्कर्मसु सर्वेषूउद्गातुर्दक्षिणमनु बाहुं प्रस्तोता सव्यं प्रतिहर्ता।— द्रा.श्रौ.सू. ३.१.१

१८४. प्रस्तोता प्रथमोऽतिसर्पेत्। तत उद्गाता तत प्रतिहर्ता।— द्रा.श्रौ.सू. ३.१.१२

१८५. अभिषुते राजन्यृतपात्रमसीति द्रोणकलशमालभ्य वानस्पत्य इति प्रोहेयुः। दक्षिणे पाणावुद्गाता दशापवित्रं कुर्वीत। अक्षं चेदुपहन्युः पुनः प्रोहेयुः।— द्रा.श्रौ.सू. ३.१.१८

१८६. संततायां धारायामुद्गाता जपेत् प्र शुक्रैत्विति।— द्रा.श्रौ.सू. ३.२.२९

१८७. आग्रयणं गृह्णन्नध्वर्युर्हिं करोति तदा प्रवृणीरन्नग्निः प्रस्तोताहं मानुषो बृहस्पतिरुद्गाताहं मानुषो वायुः प्रतिहर्ताहं मानुषः इति यथालिङ्गम्। न प्रवृणीरन्निति धानंजय्यः। प्रवृणीरन्नेवेति शाण्डिल्यः।— द्रा.श्रौ.सू. ३.३.१

१८८. स्तुते बहिष्पवमाने विसृजेरन्। उत्तराद्धविर्धानात् ध्रुवस्थालीं हरन्तः पश्चिमेनोउद्गातॄन् हत्वा तेनैव प्रतिहरेयुः।— द्राः श्रौ.सू.३.३.७

१८९. अभिपीड्य पवित्रमध्वर्युर्निःसर्पन्तं प्रस्तोता संतनुयात्। तमुद्गातोद्गातारं प्रतिहर्ता तं ब्रह्मा ब्रह्माणं यजमानः।— द्रा.श्रौ.सू. ३.३.१०

१९०. संसुतसोमे त्वधिकामुद्गाता जुहुयात् संवेशायोपवेशायेति यथासवनं छन्दाँस्यादिशन्।— द्रा.श्रौ.सू. ३.३.१७

१९१. चात्वालदेशं प्राप्याध्वर्यावुपविष्टे तस्मात्प्रत्यगुपविशेयुर्यो म आत्मेति। प्रत्यङ्मुखः प्रस्तोतोदङ्मुख उद्गाता पश्चिमेनोद्गातारं गत्वा दक्षिण पूर्वमष्टमदेशमीक्षमाणः प्रतिहर्ता।— द्रा.श्रौ.सू. ३.३.२७

१९२. याजमान ब्रह्मत्वे चेदुद्गाता कुर्यात्।— द्रा.श्रौ.सू. ४.४.१

१९३. इडा भक्षणम् : मिथ उपहूयोद्गाता प्रथमः।— द्रा.श्रौ.सू. ५.१.४

१९४. सौम्यमाहृतमुद्गातावेक्षेतायुर्भं प्राण इति।— द्रा.श्रौ.सू. ६.२.६

१९५. यज्ञायज्ञीयस्य हिंकारं प्रति पत्नीमुउद्गातेक्षेत।— द्रा.श्रौ.सू. ६.२.९५

१९६. अहिंकारेऽपि प्रतिहारवेलायां पत्नीमुद्गातावेक्षेत।— द्रा.श्रौ.सू. ६.३.२

१९७. हारियोजन्यो नाम धाना द्रोणकलशे भवन्ति। तासामुद्गाता प्रथमं आददानः समुपहूता भक्षयिष्याम इति ब्रूयात्।— द्रा.श्रौ.सू. ६.३.१६

१९८. षोडशि साम्ना स्तोष्यमाणो यथासनमुपविश्य हविर्धानं गत्वा षोडशिग्रहमवेक्षेतोद्गाता यस्मादन्य इति।— द्रा.श्रौ.सू. ७.१.१

१९९. यो यः सामाङ्गं ब्रूयात्स हिरण्यं धारयेत्। उद्गाता निधनमुपयत्सु। सर्वे वाभिमृशेयुः।— द्रा.श्रौ.सू. ७.१.९

२००. उद्गात्रे दद्यादश्वहिरण्ये दक्षिणावत्सु।— द्रा.श्रौ.सू. ७.१.१६

२०१. एष वै यजमानस्य प्रजापतिर्यदुद्गातेति ह्याह।— द्रा.श्रौ.सू. ७.४.३

२०२. ------पत्नीसंयाजेषु गार्हपत्य उद्गाता जुहुयादुपसृजन्धरुणं मात्रे मातरं धरुणो धयन्-— द्रा.श्रौ.सू. ९.३.२३

२०३. आहवनीयं गत्वाऽयंसहोहा इति त्रिरुद्गाता गायेत्। निधनमितरावनूपेयाताम्।— द्रा.श्रौ.सू. ९.४.१

२०४. उत्तरत उद्गातौदुम्बरीं गृह्णीयात् पश्चात् प्रतिहर्ता दक्षिणतो ब्रह्मा पुरस्तादितरे सर्वे।— द्रा.श्रौ.सू. ९.४.२१

२०५. महाव्रतम् : सर्वाण्युद्गाता सकृत् सकृ-उद्गायन्निधनमितरावनूपेयाताम्।—द्रा.श्रौ.सू. १०.१.५

महाव्रतम् : पूर्वेण पत्नीशालामुद्गाता गत्वा दक्षिणे वेद्यन्ते प्राचो दर्भान् संस्तीर्य तेष्वेनं प्राङ्मुखमुपवेशयेत्। अथास्मै (राज्ञे) वर्माभिहरेत्।— द्रा.श्रौ.सू. १०.२.५

२०६. तामुत्तरेणोद्गाता गत्वा पश्चादुपविश्य भूमिस्पृशोऽस्या पादान् कृत्वा कूर्चानधस्तादुपोह्य-ाभिमृशेद् बृहद्रथन्तरे ते पूर्वौ पादौ श्यैतनौधसे अपरौ वैरूपवैराजें अनूची शाक्वर रैवते तिरश्ची इत्येतैः पृथगङ्गानि।— द्रा.श्रौ.सू. १०.४.७

२०७. ब्रह्मत्वम् : निधीयमाने गवां व्रतं यदग्निमीडे इति। तान्युद्गातृकर्मैके। उद्गाता सामवेदेनेति श्रुतेः।— द्रा.श्रौ.सू. १२.२.५

२०८. ब्रह्मौदनप्राशनम् : कर्मयोगाच्चो-उद्गातुश्चत्वारो महर्त्विजः प्राशन्तीति हि चातुष्प्राश्यप्राशनम्। अधिकारात्तु ब्रह्मणः। औउद्गात्रे चाविधानात्। दृष्टं चानेन सामगानं ब्रह्मा रथचक्रेऽभिगायतीति। उद्गातेति यथाभूयसवाद।— द्रा.श्रौ.सू. १२.२.११

२०९. गायत्रे तु विकल्पः (निधनस्य) सर्वे वोद्गाता वा।----हिंकारः प्रस्तावात् पूर्वः। उद्गीथादोंकारः।— द्रा.श्रौ.सू. १८.२.४

२१०. सर्वेषाम् (साम्नाम्) ओंङ्कारेणो-उद्गीथादानम्।— द्रा.श्रौ.सू. १८.२.२५

२११. प्रस्तुतं वै सामावसीदति तदुद्गातोङ्का-रेणोत्तभ्नातीति ब्राह्मणम्।— द्रा.श्रौ.सू. १८.३.१

२१२. सौमेधस्यौर्णायवयोर्ऋषभस्य पावमनस्य निधनस्य मार्गीयवस्यैतेषामुपरिष्टात् प्रतिहारस्योद्गाता स्तोभं भजते।— द्रा.श्रौ.सू. १८.३.१५

२१३. सदृशगीतिषु सर्वेषु पृथक्पृथक्पदानि विभजेरन्। प्रत्यन्तादनादेशे। शेषमुद्गाता तानि विभाग्यानि।— द्रा.श्रौ.सू. २०.१.३१

२१४. प्रथमायैवानुगानाय प्रस्तोता प्रस्तुयादात्मने च। इतराण्यनुगानान्युउद्गातैव सर्वाणि ब्रूयात्। तेषां निधनेष्वेनमनूपेयाताम्।— द्रा.श्रौ.सू. २०.२.१६

२१५. भासनिधने दशमस्य पदस्योपायमुउद्गातैव ब्रूयात्।— द्रा.श्रौ.सू. २०.२.२२

२१६.- इडेति धानंजय्यः।-- -प्रत्युउद्गीतस्तु खल्वेषां तदोद्गाता भवति।— द्रा.श्रौ.सू. २०.३.४१

२१७. महाव्रते दक्षिणा : पृष्ठेन च स्तुवानायोउद्गात्रे।— द्रा.श्रौ.सू. २२.२.२३

२१८. सोमप्रवाकाः :- प्राञ्चं होतारं वहेयुरुदञ्चमुद्गातारं प्रत्यञ्चमध्वर्युं दक्षिणा ब्रह्माणम्।— द्रा.श्रौ.सू. २२.३.१६

२१९. साद्यस्क्रीः :- अश्वः श्वेत एतस्य दक्षिणा तमुउद्गात्रे दद्यात्। किंचिच्चेतरेभ्यः।— द्रा.श्रौ.सू. २२.३.२५

२२०. रुक्मो होतुरिति निष्कोनामालंकारस्तं दद्यात्। स्रगुउद्गातुरिति हिरण्मयी स्यात्।— द्रा.श्रौ.सू. २४.२.३

२२१. राजसूयः (दशपेयः) :- तस्य ब्राह्मणं दश दश चमसमभियन्तीति ब्रह्मण्यचतुर्था उद्गातृचमसं भक्षयेयुः षट्सु चान्ये।— द्रा.श्रौ.सू. २५.२.२

२२२. स्रगुउद्गातुरिति स्रप्स्यतेऽस्मै बहिष्पवमानं हिरण्यस्रजं त्रिपुष्करां प्रतिमुञ्चेत्।— द्रा.श्रौ.सू. २५.२.८

२२३. अश्वमेधः :- हिरण्यकशिपुन्यासीनो ब्रह्मोद्गाता चोदङ्मुखौ।— द्रा.श्रौ.सू. २७.१.१६

२२४. मध्यमेऽहन्यश्वस्य बालधिमालभ्य बहिष्पवमानं सर्पेयुः। सर्पत्सु यजमान उद्गातारं ब्रूयादुउद्गातरुप त्वा वृणे शतेन निष्केण चाश्वो ममोउद्गास्यतीति।--तां (वडवां) यदाभिक्रन्देदथ यजमान उद्गातारं ब्रूयादुउद्गातरुप त्वा वृणे शतेन चैव निष्केण च त्वमेव ममोउद्गास्यसीति।— द्रा.श्रौ.सू. २७.२.१

२२५. उदञ्चमश्वमुत्क्रमय्यास्ताव उपविश्यो-द्गाताश्वव्रतेन स्तुयादभिवाजी विश्वरूप इति तृचेन----द्रा.श्रौ.सू. २७.२.५

२२६. उद्गाता परिवृक्तीमभिमेथेद्यदस्या अंशुभेद्याः कृधुस्थूलमुपातसन्मुषष्काविदस्या एजतो गोशफेशकुलाविवेति निर्दिशेत्।— द्रा.श्रौ.सू. २७.२.१२

२२७. पतन्तकोऽश्वमेधः :- होत्राध्वर्युणा चोक्ते ब्रह्मा पृच्छेदुद्गातारं पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसानुवेत्थ येषु विष्णुस्त्रिषु पदेष्वस्थात्तेषु विश्वं भुवनमाविवेशाऽऽइति। तं प्रति ब्रूयादपि तेषु त्रिषु पदेष्वस्मिन् येषु विश्वं भुवनमाविवेश----द्रा.श्रौ.सू.२७.३.२

२२८. उद्गाता पृच्छेद् ब्रह्माणं किंस्विदन्तः पुरुष आविवेश। कान्यन्तः पुरुषे अर्पितानि।— द्रा.श्रौ.सू. २७.३.४

२२९. प्राचीं होत्रे दिशं दद्याद्-दक्षिणां ब्रह्मणेऽध्वर्यवे प्रतीचीमुदीचीमुउद्गात्रे।— द्रा.श्रौ.सू. २७.३.११

२३०. गवामयनम् : सर्वे सहर्त्विजो महाव्रतेन स्तुवीरन्नित्युद्गातृविकार एव स्यात्।— द्रा.श्रौ.सू. २८.४.१

२३१. गवामयनम् : तिसृभिरुद्गातात्मन उद्गीयेति चात्मना जघन्यस्तवनं दर्शयति।— द्रा.श्रौ.सू. २८.४.६

२३२. ननादेशस्तवनं छन्दोगानामेव स्यात्। उद्गातैव सर्वेणोउद्गायदिति ह्युक्त्वा तस्य देशान् विदधाति। हविर्धाने शिरसा स्तुत्वा-— द्रा.श्रौ.सू. २९.४.८

२३३. अग्निहोत्र दशहोता : स्वादासनादुपसंचारं ब्रह्मेतरे होत्रे कुर्यात्। तथोद्गातृप्रस्तोतारावाग्नीध्रश्च।— द्रा.श्रौ.सू. ३०.३.८

२३४. यो नेष्टा स उद्गातेत्यभविष्यत्।— द्रा.श्रौ.सू. ३०.३.१०

२३५.----- -आग्नीध्रः पोतोद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इति। एतेऽहीनैकाहैर्याजयन्ति।— आश्वलायन श्रौत सूत्र ४.१.६

२३६. बहिष्पवमानः :- तत्स्तोत्रायोप-विशन्त्युद्गातारमभिमुखाः।— आ.श्रौ.सू. ५.२.७

(सोम भक्षणे) होतुर्वषट्कारे चमसा हूयन्त उद्गातुर्ब्रह्मणो यजमानस्य। तेषां होताऽग्रे भक्षयेदिति गौतमः।-आ.श्रौ.सू. ५.६.२३

२३७. आहतं सौम्यं (चरुं) पूर्वमुद्गातृभ्यो गृहीत्वाऽवेक्षेत यत्ते चक्षुर्दिवि यत्सुपर्णे येनैकराज्यमजयो हि ना। दीर्घं यच्चक्षुरदितेरनन्तं सोमो नृचक्षा मयि तद्दधात्विति।— आ.श्रौ.सू. ५.१९.४

२३८. ब्रह्मोद्यं वदन्ति----केषु विष्णुस्त्रिषु पदेष्वस्थ केषु विश्वं भुवनमाविवेशति ब्रह्मोद्गातारं पृच्छति।-— आ.श्रौ.सू. १०.९.२

२३९. दर्शपूर्ण मासः :- उपाकृत (स्तोत्रे) ऽउद्गातार ऽआहोतृप्रैषात् (नापव्याहरेयुः)।— कात्यायन श्रौत सूत्र २.३.१८

२४०. सोमयागः :- प्रोह्य द्रोणकलशमृजीष-मुखेष्वद्रिषु निदधत्युद्गातारः। पवित्रं च वितन्वन्त्युदक्।— का.श्रौ.सू. ९.५.१३

२४१. सोमयागः :- अध्वर्युप्रतिप्रस्थातृ-प्रस्तोत्रु-द्गातृप्रतिहर्तृसुन्वन्तः समन्वारब्धा निष्क्रामन्ति।— का.श्रौ.सू. ९.६.२६

२४२. प्रैतुहोतुश्चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्य प्रयन्तु सदस्यानां—का.श्रौ.सू. ९.११.५

२४३. आज्यमासिच्योद्गात्रे सौम्यं (चरुं) प्रयच्छति चतुर्गृहीतं प्रचरण्या धिष्ण्येषु जुहोति---— का.श्रौ.सू. १०.६.१३

२४४. सोमयागः-- -नेष्टः पत्नीमुदानयोद्गात्रा सङ्ग्रापय-— का.श्रौ.सू.१०.६.१९

२४५. यज्ञायज्ञीयं स्तोत्रमुपाकरोति होतृचमस-मुपस्पृश्य। प्रोर्णुते चेच्छन्नुद्गातृवत्। पत्नींसदः प्रवेश्यापरेणोत्तरत उपविष्टामुद्गात्रा समीक्षयति प्रजापतिर्वृषासीति। पात्रेजनी-भिरभिषिञ्चति विवृत्य दक्षिणोरुम्। उद्गात्रा अनुज्ञाता गच्छति, ईक्षिता वा त्रिः।— का.श्रौ.सू. १०.७.१

२४६. चयनम् : आहवनीयस्य पुरस्तादुद्गात्रा-सन्दीवदासन्द्यां चतुरश्राङ्ग्यां शिक्यवत्यां निदधाति देवाअग्निमिति।— का.श्रौ.सू. १६.५.५

२४७. एकाहे दक्षिणा : शताश्वरथमध्वर्यवे ददात्यग्नौ चीयमाने। उद्गात्रे व्रतकाले।— का.श्रौ.सू. २२.२.२

२४८. रुक्मललाटोऽश्वः श्वेतो दक्षिणा। अश्वाभावे गौः। तमुद्गात्रे ददाति। प्राकृतस्यानि-वृत्तिरुद्गातृयोगात्। निवृत्तिः क्रतुयोगात्।— का. श्रौ. सू. २२.२.११

२४९. प्रायश्चित्तानि :------आग्नीध्रीये सोमे (वर्तमाने)। स्वरित्यौउद्गात्र (विहिते भ्रेषे) आहवनीये (जुहोति)।— का.श्रौ.सू. २५.१.८

२५०. सत्रे प्रायश्चित्तानि : आपवस्व हिरण्य-वदित्युद्गातृहोमो ध्वाङ्क्षारोहणे यूपस्य।— का.श्रौ.सू.२५.६.९ :

२५१. प्रायश्चित्तानि : अनीतासु चेद्दक्षिणा-सूद्गात्रपच्छेदोऽदक्षिणं संस्थाप्य पुनराहारः।— का. श्रौ. सू. २५.११.७

२५२. यस्मिन्नहन्युद्गात्रपच्छेदोऽहर्गणे तस्या-वृत्तिः।— का.श्रौ.सू. २५.११.१२

२५३.-चन्द्रमा मे ब्रह्मा पर्जन्यो म उद्गाताकाशो मे सदस्य---- इत्युपांशु देवतादेशनम्। असौ मानुष इत्युच्चैः।— आपस्तम्ब श्रौत सूत्र १०.१.१४

२५४. अग्निष्टोम प्रातसवनम् :---- - चक्षुरुपावधीश्चक्षुस्त्वा हास्यतीत्युद्गाता।-— आप.श्रौ.सू. १०.२.११

२५५. पर्जन्य उद्गाता स म उद्गातोद्गातर्देवयजनं मे देहीत्युद्गातारम्। — आप.श्रौ.सू.१०.३.१

उद्दिवं स्तभानान्तरिक्षं पृणेति प्राचीनकर्णां सहोद्गात्रोच्छ्रयति। उच्छ्रयस्व वनस्पते सजूर्देवेन बर्हिषेति वा। द्युतानस्त्वा मारुतोमिनोत्विति प्राचीनकर्णां सहोद्गात्रा मिनोति।— आप.श्रौ.सू. ११.९.१३

२५६. बहिष्पवमानः :- अध्वर्यु प्रस्तोतान्वारभते प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गातोद्गातारं ब्रह्मा ब्रह्माणं यजमानः।— आप.श्रौ.सू.१२.१७.१

२५७. वायुर्हिङ्कर्तेति प्रस्तोत्रे बर्हिर्मुष्टिं प्रयच्छति।— आप.श्रौ.सू. १२.१७.७

२५८. ततः संप्रेष्यति प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातुः प्र यजमानस्य। प्रोद्गातृणामित्येके समामनन्ति।— आप.श्रौ.सू. १२.२३.१३

२५९. दक्षिणेनोत्तरेण वा प्रशास्तुर्धिष्णियं परीत्योद्गातारो माध्यंदिनेन पवमानेन स्तुवते।— आप.श्रौ.सू. १३.२.९

२६०. अग्निष्टोम माध्यन्दिन सवनम् : एवं ब्रह्मणे मनः। अध्वर्यवे प्राणम्। उद्गात्रे चक्षुः।-- — आप.श्रौ.सू. १३.६.६

२६१. अग्निष्टोम माध्यन्दिन सवनम् : उद्गातृभ्यो (आज्यं) हरन्ति। तमुद्गातारो ऽवेक्षन्ते सत्रो त एतद्यदु त इहेति।— आप.श्रौ.सू. १३.१४.१

२६२. होतृचमसे ध्रुवायावकाशं कुरूद्गात्रा पत्नींसंख्यापयाप उपप्रवर्तयेति।— आप.श्रौ.सू. १३.१४.११

२६३. विश्वस्य ते विश्वावत इति हिङ्कारमनूद्गात्रा पत्नीं संख्यापयति।-— आप.श्रौ.सू. १३.१५.८, १४.१.७

२६४. यज्ञे मृतस्य प्रायश्चित्तम् : उद्गातारस्तिसृभिः सर्पराज्ञीभिरप्रतिहताभिः स्तुवीरन्।— आप.श्रौ.सू. १४.२१.१३

२६५. यदि सदोहविर्धानान्यभिदह्येरन्ग्रहान-ध्वर्युः स्पाशयेत्। स्तोत्राण्युद्गाता। शस्त्राणि होता।— आप.श्रौ.सू. १४.२५.१

२६६. यद्यौदुम्बरी नश्येदन्या प्रच्छिद्योर्गस्यूर्जं मयि धेहि-। धर्त्रि धरित्रि जनित्रि यमित्रीत्यध्वर्यु-रुद्गाता यजमानश्चोच्छ्रयन्ति।— आप.श्रौ.सू. १४.३३.२

२६७. अश्वमेधः :- उद्गातारमपरुध्याश्वमुद्गीथाय वृणीते। तस्मै वडवा उपरुन्धन्ति। ता यदभिहिङ्करोति स उद्गीथः। उदगासीदश्वो मेध्यो यज्ञिय इति शतेन शतपलेन च निष्केणोद्गातारमुपशिक्ष्येमां देवतामुद्गायन्तीमनूद्गायति संप्रेष्यति। तेन हिरण्येन स्तोत्रमुपाकरोति।— आप.श्रौ.सू. २०.१३.११

२६८. अग्न्याधेयम् (देवयजनयाजनम्) :---- उद्गातर्देवयजनं मे देहीत्युद्गातारं पर्जन्यो देवो दैव उद्गाता स ते देवयजनं ददात्वित्यों तथेति प्रतिवचनं---- बौ.श्रौ.सू. २.२,२.४

२६९. आङ्गिरसो ऽध्वर्युर्वासिष्ठो ब्रह्मा वैश्वामित्रो होतायास्य उद्गाता--- बौधायन श्रौत सूत्रम् २.३

२७०. अकुनखिनमध्वर्युमकिलासिनं ब्रह्माणम-खण्डँ होतारमकरालमुद्गातारमशिपिविष्टँ सदस्यम्— बौ.श्रौ.सू. २.३

२७१. अथोद्गातारमाहोद्गातरेहीममौदुम्बर्या अवटं खन प्राक् पुरीषमुद्वपतादिति तँ स खनति वा खानयति वा सो ऽत एव सदो विमिमीते-— बौ.श्रौ.सू. ६.२६

२७२. अग्निष्टोम प्रातः सवनम्। औदुम्बरी : अथैनामुद्गातृभ्यः प्राहुस्तस्यां तच्चेष्टन्ति यत्ते विदुरेतस्या

उच्छ्रयणमनु प्राचीनकर्णा स्थूणा उच्छ्रयन्ति-- बौ.श्रौ.सू. ६.२७

२७३. सोम राजन्नेह्यवरोहेति द्वाभ्यामथैन-मुद्गातृभ्यः प्राहुस्तस्मिँस्तच्चेष्टन्ति यत्ते विदुरथाप उपस्पृश्याहैहि यजमान इति— बौ.श्रौ.सू. ७.१, ७.२०, ८.१४

२७४. अग्निष्टोम तृतीय सवनम् : नेष्टः पत्नीमुदानयोद्गात्रा संख्यापयाप उपप्रवर्तयतादूरुणो-पप्रवर्तयान्नग्नं कृत्वोरुमुपप्रवर्तयत-बौ.श्रौ.सू. ८.१४

२७५. द्वादशाह मीमाँसा : चात्वाले ऽवनयेदास्तावे निनयेत्प्रोक्षणी कुर्वीत पुरोडाशीयानि पिष्टानि संयौयादित्यनादृत्य तदुद्गातृष्वधीना एवैना कुर्यादुद्गातारो हैताभिररण्येगेयानाँ साम्नाँ शुचँ शमयन्तो मन्यन्ते— बौ.श्रौ.सू. १६.४

२७६. अच्छावाकचमसे ग्रावस्तुदुद्गातृचमसे सुब्रह्मण्यो ऽपि वा सर्व एवाग्नीध्रचमसे भक्षयेयुः— बौ.श्रौ.सू. २५.१९

२७७. होतृचमसे चोद्गातृचमसे च सप्तसप्ताथेतरेषु नवनव— बौ.श्रौ.सू. २६.२

## उद्गीथ

१. ऋक् साम यजुरुच्छिष्ट उद्गीथः प्रस्तुतं स्तुतम्। हिङ्कार उच्छिष्टे स्वरः साम्नो मेडिश्च तन्मयि।।— अथर्ववेद ११.९.५

२. आसन्दी : सामासाद उद्गीथोऽपश्रयः~ तामासन्दीं व्रात्य आरोहत्।— ाथर्ववेद १५.३.९

३. सर्वप्रायश्चित्त विधायकं ब्राह्मणम्ः तदाहुः। यदृचा हौत्रं क्रियते। यजुषाऽऽध्वर्यवम्। साम्नोद्गीथः। अथ केन ब्रह्मत्वमिति। अनया त्रय्या विद्यायेति ह ब्रूयात्।— शतपथ ब्राह्मण ११.५.८.७

४. सर्वप्रायश्चित्त विधायकं ब्राह्मणम्ः-----ते ऋग्वेदेनैव हौत्रमकुर्वत। यजुर्वेदेनाध्वर्यवम्। सामवेदेनोद्गीथम्। यदेव त्रय्यै विद्यायै शुक्रम्, तेन ब्रह्मत्वम्।— श.ब्रा. ११.५.८.४

५. उद्गीथ ब्राह्मणम्। वैराज ब्राह्मणं वा : वाक्, प्राण, चक्षु, श्रोत्र, मन आदि द्वारा उद्गीथ के उद्गान से पाप्मा के निवारण का प्रयत्न करना तथा असफल होना। केवल अयास्य आंगिरस नामक प्राण द्वारा उद्गान करने पर ही पाप्मा से मुक्ति का वर्णन।— श.ब्रा. १४.४.१.१

६. एष उ वा उद्गीथः। प्राणो वा उत्। प्राणेन हीदं सर्वमुत्तब्धम्। वागेव गीथा। उच्च गीथा चेति। स उद्गीथः।— श.ब्रा. १४.४.१.२५

७. श्रीमन्थ कर्म ब्राह्मणम् : अथैनमभिमृशति---- --हिंकृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीय-मानमसि श्रावितमसि प्रत्याश्रावितमसि- — श.ब्रा. १४.९.३.९

८. असितमृगा ह स्म वै पुरा कश्यपा उद्गायन्त्यथ ह युवानमनूचानं कुसुरुबिन्दमौद्दालकिं ब्राह्मणा उद्गीथाय वव्रे।-— षड्. ब्रा. १.४.१६

९. तस्य ह वा एतस्य संवत्सरस्य साम्नोऽहोरात्राणि हिंकारोऽर्धमासा प्रस्तावो मासा आदिर्ऋतव उद्गीथः पौर्णमास्यः प्रतिहारोऽष्टका उपद्रवोऽमावास्या निधनम्। तस्य ह वा एतस्य संवत्सरस्य साम्नो वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्।— षड्. ब्रा. ३.४.२२

१०. -----प्रबाहुग्वा ऋत्विजामुद्गीथ उद्गीथ एवोद्गातृणाम्-— तैत्तिरीय सं. ३.२.९.५

११. अश्वमेधः :- यदुद्गातोद्गायेत्। यथा क्षेत्रज्ञोऽन्येन पथा प्रतिपादयेत्। तादृक्तत्। उद्गातारमपरुद्ध्य। अश्वमुद्गीथाय वृणीते।-— तैत्तिरीय ब्राह्मण ३.८.२२.१

१२. एष वै सोमस्योद्गीथो यत्पवते सोमोद्गीतमेव साम गायति।— ताण्ड्य ब्रा. ६.६.१८

१३. ते वै पञ्चान्यद् भूत्वा पञ्चान्यद् भूत्वाकल्पेताम्- आहावश्च हिंकारश्च प्रस्तावश्च प्रथमा चर्गुउद्गीथश्च मध्यमा च प्रतीहारश्चोत्तमा च निधनं च वषट्कारश्च।— गोपथ ब्रा. २.३.२०

१४. अग्निचिति :--- हिंकारेण त्वा छन्दसा सादयामि, प्रस्तावेन त्वा छन्दसा सादयाम्युद्गीथेन त्वा छन्दसा सादयामि, प्रतिहारेण त्वा छन्दसा सादयामि,

स्तुतेन त्वा छन्दसा सादयामि, निधनेन त्वा छन्दसा सादयामि।— मैत्रायणी सं. २.१३.४

१५. होतः किं स्तुतं स्तोत्रं प्रातरनुवाकेनान्वशंसीः इति। अकर्म वयं तद् यद् अस्माकं कर्म इत्य् आह उद्गातारं पृच्छत इति। उद्गातः किं स्तुतं स्तोत्रं होता प्रातरनुवाकेनान्वशंसीत् इति। अकर्म वयं तद् यद् अस्माकं कर्म इति ब्रूयाद् अगासिष्म यद् अत्र गेयम् इति।— जै.ब्रा. १.७६

१६. उद्गातार उद्गीथायाधोऽधो ऽक्षं द्रोणकलशं प्रोहन्ति। अस्माद् एवैतल् लोकाद् द्विषन्तं भ्रातृव्यम् अन्तरति।— जैमिनीय ब्रा. १.७७

१७. अथ मैधातिथम्। काण्वायनास् सत्राद् उत्थायायन्त आयुञ्जानाः। ते होद्गीथा इति किमुद्वत्यैतद्धनाम् उर्वारुबहुप्रवृत्तं शयानम् उपेयुः।-- जै.ब्रा. १.२२६

१८. तस्य गायत्रम् एव हिंकारो रथन्तरं प्रस्तावो वामदेव्यम् उद्गीथो बृहत् प्रतिहारो यज्ञायज्ञीयं निधनम्।— जै.ब्रा. १.२९२

१९. तद् आहुर् यद् ऋचा होतृत्वं क्रियते यजुषाध्वर्यवं साम्नोद्गीथो ऽथ केन ब्रह्मत्वं क्रियत इति।— जै.ब्रा. १.३५८

२०. तस्य गायत्रम् एव हिंकारो, रथन्तरं प्रस्तावो, वामदेव्यम् उद्गीथो, बृहत् प्रतिहारो, यज्ञायज्ञीयं निधनम्।— जै.ब्रा. २.४३३

२१. ---स एव प्रणवो ऽभवत्। स प्रतिगरस् स उद्गीथस् तद् आश्रावणम्। तस्माद् ओम् इति प्रणौत्य् ओम् इति प्रत्यागृणात्य् ओम् इत्य् उद्गायत्य् ओम् इत्य् आश्रावयति।— जै.ब्रा. ३.३२२

२२. तस्माद् एष एव साम। स एष एवोद्गीथः। स यद् उद् इत्य् एतेन हीदं सर्वम् उत्तब्धम्। अथ यद् गीत्य् एष हीदं सर्वं गिरति। अथ यत् थ इत्य् अन्नम् एवास्यैतत्। तस्माद् एष एवोद्गीथः।— जै.ब्रा. ३.३७९

२३. तेभ्यो (पशुभ्यो) हिंकारं प्रायच्छत्।--- प्रस्तावं मनुष्येभ्यः।---आदिं वयोभ्यः।--उद्गीथं देवेभ्योऽमृतम्। तस्मात्तेऽमृताः। प्रतिहारमारण्येभ्यः पशुभ्यः।-----उपद्रवं गन्धर्वाप्सरोभ्यः।----निधनं पितृभ्यः।— जैमिनीय उपनिषद ब्रा. १.३.१.६

२४. स यदनुदितः स हिंकारः। अर्धोदितः प्रस्तावः। आसंगवम् आदिः। माध्यंदिन उद्गीथः। अपराह्णः प्रतिहारः। यदुपास्तमयं लोहितायति स उपद्रवः। अस्तमित एव निधनम्।— जै.उ.ब्रा. १.३.२.४

२५. स वसन्तमेव हिंकारमकरोत्। ग्रीष्मं प्रस्तावम्। वर्षामुद्गीथम्। शरदं प्रतिहारम्। हेमन्तं निधनम्।— जै.उ.ब्रा. १.३.२.७

२६. स पुरोवातमेव हिंकारमकरोत्। जीमूतान् प्रस्तावम्। स्तनयित्नुमुद्गीथम्, विद्युतं प्रतिहारम्, वृष्टिं निधनम्-- — जै.उ.ब्रा. १.३.३.१

२७. स यजूंष्येव हिंकारमकरोत्। ऋचः प्रस्तावम्। सामान्युउद्गीथम्। स्तोमं प्रतिहारम्। छन्दो निधनम्।— जै.उ.ब्रा. १.३.३.३

२८. स मन एव हिंकारमकरोत्। वाचं प्रस्तावम्। प्राणमुद्गीथम्। चक्षुः प्रतिहारम्। श्रोत्रं निधनम्।— जै.उ.ब्रा. १.३.३.५

२९. अथैतदेकविंशं साम। तस्य त्रय्येव विद्या हिंकारः। अग्निर्वायुः असावादित्य एष प्रस्तावः। इम एव लोका आदिः येषु हीदं लोकेषु सर्वमाहितम्। श्रद्धा यज्ञो दक्षिणा एष उद्गीथः। दिशोऽवान्तरदिश आकाश एष प्रतिहारः। आपः प्रजा ओषधय एष उपद्रवः। चन्द्रमा नक्षत्राणि पितर एतन्निधनम्।— जै.उ.ब्रा. १.५.१.२

३०. स प्रजापतिर्हरसा हिंकारमुदजयत्। अग्निस्तेजसा प्रस्तावम्। रूपेण बृहस्पतिरुद्गीथम्। स्वधया पितरः प्रतिहारम्। वीर्येणेन्द्रो निधनम्।— जै.उ.ब्रा. १.६.२.२

३१. तस्यैतस्य (इन्द्रस्य) साम्न इयमेव प्राची दिक् हिंकारः। इयं प्रस्तावः। इयमादिः। इयमुद्गीथः। असौ प्रतिहारः। अन्तरिक्षमुपद्रवः। इयमेव निधनम्।--अथ यदुदीच्यां दिशि तत् सर्वमुद्गीथेन आप्नोति।— जै.उ.ब्रा. १.१०.१.३

३२. मन एव हिंकारः। वाक् प्रस्तावः। प्राण उद्गीथः। अन्नमेव चतुर्थः पादः।----अथाधिदैवतम्। चन्द्रमा एव हिंकारः। अग्निः प्रस्तावः। आदित्य उद्गीथः। आप एव चतुर्थः पादः।-----मण्डलं पुरुषः। रश्मय एव हिंकारः।-- -मण्डलं प्रस्तावः। पुरुष उद्गीथः। य एता आपोऽन्तः स एव चतुर्थः पादः।— जै.उ.ब्रा. १.११.१.५

३३. एवमेव चन्द्रमसो रश्मयो मण्डलं पुरुषः। रश्मय एव हिंकारः। मण्डलं प्रस्तावः। पुरुष उद्गीथः।— जै.उ.ब्रा. १.११.१.१०

३४. अथैतत् पर्जन्ये साम। तस्य पुरोवात एव हिंकारः। अथ यदभ्राणि संप्लावयति स प्रस्तावः। अथ यत् स्तनयति स उद्गीथः। अथ यद् विद्योतते स प्रतिहारः। अथ यद् वर्षति तन्निधनम्।— जै.उ.ब्रा. १.१२.२.१

३५. अथैतत् पुरुषे साम। तस्यायमेव हिंकारः। अयं प्रस्तावः। अयमुद्गीथः। अयं प्रतिहारः। इदं निधनम्।— जै.उ.ब्रा.१.१२.२.३

३६. तिर्यञ्चो लोकाः :- तस्य लोमैव हिंकारः। त्वक् प्रस्तावः। मांसमुद्गीथः। अस्थि प्रतिहारः। मज्जा निधनम्।— जै.उ.ब्रा. १.१२.२.६

३७. सम्यञ्चो लोकाः :- तस्य मन एव हिंकारः। वाक् प्रस्तावः। प्राण उद्गीथः। चक्षुः प्रतिहारः। दिश एव निधनम्।— जै.उ.ब्रा. १.१२.२.८

३८. अथैतद्देवतासु साम। तस्य वायुरेव हिंकारः। अग्निः प्रस्तावः। आदित्य उद्गीथः। चन्द्रमा प्रतिहारः। दिश एव निधनम्।— जै.उ.ब्रा. १.१२.२.९

३९. तौ (सा च अमः च) विराड् भूत्वा प्राजनयताम्। हिंकारश्च आहावश्च प्रस्तावश्च प्रथमा चोद्गीथश्च मध्यमा च प्रतिहारश्च उत्तमा च निधनं च वषट्कारश्च एवं विराड् भूत्वा प्राजनयताम्।— जै.उ.ब्रा. १.१७.२.८

४०. सोऽसावादित्यः स एष एव उत्। अग्निरेव गी। चन्द्रमा एव थम्। सामान्येव उत्। ऋच एव गी। यजूंष्येव थम्। इत्यधिदैवतम्। अथाध्यात्मम्। प्राण एव उत्। वागेव गी। मन एव थम्।।— जै.उ.ब्रा. १.१८.२.८

४१. तेषां (देवानां) वायुरेव हिंकार आस। अग्निः प्रस्तावः। इन्द्र आदिः। सोमाबृहस्पती उद्गीथः। अश्विनौ प्रतिहारः। विश्वेदेवाः उपद्रवः। प्रजापतिरेव निधनम्।— जै.उ.ब्रा. १.१८.३.९

४२. स एष पुत्री प्रजावानुद्गीथो य प्राणः तस्य स्वर एव प्रजाः।— जै.उ.ब्रा. २.१.२.६

४३. स एष वशी दीप्ताग्र उद्गीथो यत्प्राणः। एष हीदं सर्वं वशे कुरुते। वशी भवति। वशे स्वान् कुरुते।----तं हैतमुद्गीथं शाट्यायनिराचष्टे वशी दीप्ताग्र इति।— जै.उ.ब्रा. २.२.२.१

४४. प्राण उद्गीथ इति विद्वानेकं मनसा ध्यायेत् एको हि प्राणः।-- -प्राण उद्गीथ इत्येव विद्वान् द्वौ मनसा ध्यायेत्। द्वौ हि प्राणापानौ द्वौ हैवास्याजायेते।-- -प्राण उद्गीथ इत्येव विद्वाँस्त्रीन् मनसा ध्यायेत्। त्रयो हि प्राणोऽपानो व्यानः।----प्राण उद्गीथ इत्येव विद्वाँश्चतुरो मनसा ध्यायेत्। चत्वारो हि प्राणोऽपानो व्यानः समानः।-- -प्राण उद्गीथ इत्येव विद्वान् पञ्च मनसा ध्यायेत्। पञ्च हि प्राणोऽपानो व्यानः समानोऽवानः।-- -प्राण उद्गीथ इत्येव विद्वान् षण् मनसा ध्यायेत्। षड् हि प्राणोऽपानो व्यानः समानोऽवानः उदानः।---प्राण उद्गीथ इत्येव विद्वान् सप्त मनसा ध्यायेत्। सप्त हीमे शीर्षण्याः प्राणाः -- -प्राण उद्गीथ इत्येव विद्वान्नव मनसा ध्यायेत्। सप्त शीर्षण्याः प्राणाः। द्वाववाञ्चौ।--- -प्राण उद्गीथ इत्येव विद्वान् दश मनसा ध्यायेत्। सप्त शीर्षण्याः प्राणाः। द्वाववाञ्चौ। नाभ्यां दशमः।--प्राण उद्गीथ इत्येव विद्वान् सहस्रं मनसा ध्यायेत्। सहस्रं हैत आदित्यरश्मयः। तेऽस्य पुत्राः।— जै.उ.ब्रा. २.२.४.१

४५. एवं हैवैतमुद्गीथं पर आट्णारः कक्षीवांस्त्रसदस्युरिति पूर्वे महाराजाः श्रोत्रियाः सहस्रपुत्रमुपनिषेदुः।— जै.उ.ब्रा. २.२.४.११

४६. शर्यातो वै मानवः प्राच्यां स्थल्यामयजत। तस्मिन् ह भूतान्युद्गीथेऽपि समैषिरे।---- जै.उ.ब्रा. २.३.१.१

४७. बहवो ह्येत आदित्यस्य रश्मयः तेऽस्य पुत्राः। तस्मात् बहुपुत्र एष उद्गीथ इत्येवोपासितव्यम्।— जै.उ.ब्रा. २.३.३.१०

४८. स एष इन्द्र उद्गीथः। स यदैष इन्द्र उद्गीथ आगच्छति नैवोद्गातुश्चोपगातॄणां च विज्ञायते। इत एवोर्ध्वः स्वर उदेति। स उपरि मूर्ध्नो लेलायति।— जै.उ.ब्रा. ३.६.९.६

४९. स वा एष उद्गीथः कामानां संवत्। ओंवा३च् ओंवा३च् ओंवा३च् हुम् भा ओं वागिति।— जै.उ.ब्रा. ४.६.३.९

५०. पुरुषो वै यज्ञः। पुरुषो होद्गीथः। अथैत एव मृत्यवो यदग्निर्वायुरादित्यश्चन्द्रमाः।-— जै.उ.ब्रा. ४.७.१.१

५१. तस्मा एतं गायत्रस्योद्गीथमुपनिषदममृत-मुवाचाग्नौ वायावादित्ये प्राणेऽन्ने वाचि।— जै.उ.ब्रा. ४.८.५.२

५२. एवं वा एतं गायत्रस्योउद्गीथमुपनिषदम-मृतमिन्द्रोऽगस्त्यायोवाच।— जै.उ.ब्रा. ४.९.१.१

५३. ओमित्येतदक्षरमुद्गीथमुपासीत, ओमिति ह्युद्गायति तस्योपव्याख्यानम्। एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः। स एष रसानाँ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः।— छान्दोग्योपनिषद १.१.१

५४. समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। -छा.उ. १.१.८

५५. तद्ध देवा उद्गीथमाजहुरनेनैनानभि-भविष्याम इति। ते ह नासिक्यं प्राणमुद्गीथमुपा-संचक्रिरे----अथ ह वाचमुद्गीथमुपा-सांचक्रिरे---अथ ह चक्षुरुद्गीथ-मुपासांचक्रिरे---अथ ह श्रोत्रमुद्गीथमुपासांचक्रिरे--अथ ह मन उद्गीथमुपासांचक्रिरे----अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे तँ हासुरा ऋत्वा विदध्वँसुर्यथाऽश्मानमाखणमृत्वा विध्वँसेत।--- तँ हाङ्गिरा उद्गीथमुपासांचक्र एतमु एवाङ्गिरसं मन्यन्तेऽङ्गानां यद्रसः। तेन तँह बृहस्पतिरुद्गीथमुपासांचक्र----तेन तँहायास्य उद्गीथमुपासांचक्र--आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम्।— छां.उ. १.२.२

५६. अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति-— छां. उ. १.३.१

५७. तस्माद्वा एतमिममुं चोद्गीथमुपासीत। अथ खलु व्यानमेवोद्गीथमुपासीत।----यत्साम स उद्गीथस्तस्मादप्राणन्नपानन्नुद्गायति।---- एतस्य हेतोर्व्यानमेवोद्गीथमुपासीत।— छां.उ. १.३.२

५८. अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वँ स्थितम्। द्यौरेवोदन्तरिक्षं गी पृथिवी थमादित्य एवोद्वायुर्गीरग्निस्थँ सामवेद एवोद्यजुर्वेदो गीर्ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहो ऽन्नवानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपासत उद्गीथ इति।— छां.उ. १.३.६

५९. ॐमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम्।— छां.उ. १.४.१

६०. अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति।— छां.उ. १.५.१

६१. अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति।----अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ-— छां.उ. १.५.३

६२. तस्यर्क् च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता-— छां.उ. १.६.८

६३. त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति, ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति।-— छां.उ. १.८.१

६४. स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति---य एतदेवं विद्वानपरोवरीयाँसमुद्गीथमुपास्ते।— छां.उ. १.९.२

६५. यावत्त एनं प्रजायामुद्गीथं वदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति।— छां.उ. १.९.३

६६. एवमेवोद्गातारमुवाचोद्गातर्या देवोद्गीथ-मन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति।— छां. उ. १.१०.१०, १.११.६, १.११.७

६७. अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज।— छां.उ. १.१२.१

६८. पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्ष-मुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु। अथावृत्तेषु द्यौर्हिंकार आदित्यः प्रस्तावोऽन्तरिक्ष-मुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम्।— छां.उ. २.२.१

६९. पुरोवातो हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहारः।— छां.उ. २.३.१

७०. वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम्।— छां.उ. २.५.१

७१. अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम्।— छां.उ. २.६.१

७२. प्राणो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं— छां. उ. २.७.१

७३. यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम्।— छां.उ. २.८.२

७४. यत्पुरोदयात्स हिंकारः-- -यत्प्रथमोदिते स प्रस्तावः--यत्सङ्गववेलायाँ स आदिः-यत्संप्रति मध्यन्दिने स उद्गीथ स्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमा प्राजापत्यानामुद्गीथ-भाजिनो ह्येतस्य साम्नः।— छां.उ. २.९.२

७५. हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम्।-- -उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्समम्।— छां.उ. २.१०.३

७६. गायत्र साम : मनो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम्।— छां.उ. २.११.१

७७. रथन्तर साम : अभिमन्थति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार-— छां.उ. २.१२.१

७८. वामदेव्यं साम : उपमन्त्रयते स हिंकारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं-— छां.उ. २.१३.१

७९. बृहत् साम : उद्यन्हिंकार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनम्— छां.उ. २.१४.१

८०. वैरूपं साम : अभ्राणि संप्लवन्ते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनम्।— छां.उ. २.१५.१

८१. वैराजम् साम : वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम्— छां.उ. २.१६.१

८२. शक्वर साम : पृथिवी हिंकारो ऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनम्— छां.उ. २.१७.१

८३. रैवत साम : अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम— छां.उ. २.१८.१

८४. यज्ञायज्ञीयम् साम : लोम हिंकारस्त्वक्प्रस्तावो माँसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनम् — छां.उ. २.१९.१

८५. राजनं साम : अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनम्— छां.उ. २.२०.१

८६. त्रयी विद्या हिंकारस्त्रय इमे लोकाः स प्रस्तावो ऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाँसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनम्— छां.उ. २.२१.१

८७. अग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य— छां.उ. २.२२.१

८८. अथैनमभिमृशति---- -हिंकृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमसि-- बृहदारण्यक उ. ६.३.४

८९. अंबुः पृथगुद्गीथदोषान् भवन्तो ब्रुवन्त्विति।— प्रणवोपनिषद

९०. प्रणवोद्गीथवपुषे महाश्वशिरसे नमः स्वाहा स्वाहा नमः। उद्गीथ प्रणवोद्गीथ सर्ववागीश्वरेश्वर।— हयग्रीवोपनिषद १.२

९१. स एष इन्द्रः सर्वं यद्गायत्री उद्गीथो वसवः प्रातस्सवनमिति।----स होवाचेन्द्रो यत्त्वा-मुद्गीथेनोपावनेष्यन्ते तेनैव ते कल्पयिष्यन्तीति।----- यदुद्गीथं सप्तभिरभिप्रपद्यन्ते तत्सप्तति।-- -यदिन्द्र एवोद्गीथस्तद्वृषभ इति। मरुत्वन्तं वृषभं वावृधानम्-— शौनकोपनिषद

९२. अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणवा इत्येवं ह्याहोद्गीथं प्रणवाख्यं प्रणेतारं भारूपं-— मैत्रायण्युपनिषद ६.४

९३. एषाऽग्नौ हुतमादित्यं गमयत्यतो यो रसोऽस्रवत्स उद्गीथं वर्षति तेनेमे प्राणाः-— मैत्रायण्युपनिषद ६.३७

९४. आसन्दी वर्णनम् :- ----सोमांशव उपस्तरणमुद्गीथ उपश्रीः श्रीरुपबर्हणं तस्मिन्ब्रह्मास्ते-— कौषीतकिब्राह्मणोपनिषद १.५

९५. अग्न्याधेय : व्याहृतीभिरेवोद्गीथं भवतीति वाजसनेयकम्।— आपस्तम्ब श्रौ.सू. ५.१६.८

९६. ----बहिष्पवमानं सर्पन्त्यग्निर्मूर्धेति। उद्गातारमपरुध्याश्वमुद्गीथाय वृणीते। तस्मै वडवा उपरुन्धन्ति। ता यदभिहिङ्करोति स उद्गीथः। यत्प्रत्यभिहिङ्कुर्वन्ति स उपगीथः।— आपस्तम्ब श्रौ.सू. २०.१३.४

९७. --- -अभ्यश्वं वडवाः क्रन्दन्त्यभ्यश्वो वडवाः क्रन्दति सो ऽश्वस्योद्गीथस्तत्पुण्या वाचः संप्रवदन्ति।— बौ.श्रौ.सू. १५.१७

९८. ---यां विगणँ ह्वयति स शस्त्रस्य प्रतिगरो यदभिक्रोशन्ति स उद्गीथः--- बौ.श्रौ.सू. १८.२४

९९. यदि दीक्षा दीर्घाः स्युराश्वासिका आहर्तारस्तथोद्गीथः कामं दीक्षयेदिति।— बौ.श्रौ.सू. २१.७

## उद्धव

१. इमं यम प्रस्तरमा हि सीदाऽङ्गिरोभिः पितृभिः संविदानः।— ऋ.१०.१४.४

२. अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनम्। (इन्द्रः)— ऋ.१०.२३.४

३. ततस्त्वा ब्रह्मोदह्वयत् स हि नेत्रमवेत् तव (वशा गौ)— अथर्ववेद १०.१०.२२

४. ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय।— अ.१६.२.६

५. इमं यम प्रस्तरमा हि रोहाङ्गिरोभिः पितृभिः संविदानः।— अ.१८.१.६०

६. उदह्वमायुरायुषे क्रत्वे दक्षाय जीवसे।— अ.१८.२.२३

७. रोहितेन त्वाऽग्निर्देवतां गमयतु इत्याह ऐते वै देवाश्वाः यजमानः प्रस्तरो यदेतैः प्रस्तरं प्रहरति देवाश्वैरेव यजमानं सुवर्गं लोकं गमयति।— तैत्तिरीय संहिता १.७.४.४

८. बर्हिविषयक प्रयोगः :- पुरस्तात्प्रस्तरं गृह्णाति मुख्यमेवैनं करोतीयन्तं गृह्णाति----। उत्तरं बर्हिषः प्रस्तरं सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोति।— तै.सं.२.६.५.२

९. किं यज्ञस्य यजमान इति प्रस्तर इति तस्य क्व सुवर्गो लोक इत्याहवनीय इति ब्रूयाद्यत्प्रस्तरमाहवनीये प्रहरति यजमामेव सुवर्गं लोकं गमयति वि वा एतद्यजमानो लिशते यत्प्रस्तरं योयुप्यन्ते।— तै.सं.२.६.५.५

१०. आतिथ्येष्टिः :- प्रजापतेर्वा एतानि पक्ष्माणि यदश्ववाला ऐक्षवी तिरश्ची, यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची, प्रजापतेरेव तद्यक्षुः संभरति।— तै.सं.६.२.१.५

११. यूपस्थापनम् : ते (देवाः) प्रस्तरं स्रुचां निष्क्रयणमपश्यन्त्स्वरुं यूपस्य, संस्थिते सोमे प्र प्रस्तरं हरति, जुहोति स्वरुमयज्ञवेशसाय।— तै.सं.६.३.४.९

१२. अनग्नंभावुकोऽध्वर्युर्बर्हिषि प्रस्तरं सादयति यजमानो वै प्रस्तरः प्रजा बर्हि यजमानमेव प्रजास्वधि सादयति-— काठक सं.२५.५

१३. प्रस्तरं धारयन् परिधीन् परिदधाति यजमानो वै प्रस्तरस्वयमेतद्यजमान आत्मानं परिदधाति रक्षसामपहत्यै।— काठक संहिता ३१.१०

१४. मरुतां पृषती वशा पृश्निर्भूत्वा दिवं गच्छेति यजमानो वै प्रस्तरो हविर्भूतमेवैनं स्वर्गं लोकं गमयति ततो नो वृष्टिमेरयेति-— काठक सं. ३१.११

१५. रोहितेन त्वाग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो देवतां गमयत्विति यजमानो वै प्रस्तरो हविर्भूतमेवैनं स्वर्गं लोकं गमयति-— काठक सं.३२.३

१६. प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यज्ञं नो वह स्वर्देवेषु गन्तवे।— काठक सं. ४०.१३

१७. अध्वर्युः प्रस्तरं हरन् संर्पति। तम् अनुमन्त्रयते एतद् अहं दैव्यं वाजिनं संमाज्मि इति। संसृष्टम् एवैनं शान्तम् आरोहति नार्तिम आर्छति।— जै.ब्रा.१.८४

१८. ब्रह्मा षष्ठस् सर्पति। षड् वै छन्दांसि---- प्रस्तरं हरन्तस् सर्पन्ति। यजमानो वै प्रस्तरो बर्हिः प्रजाः। यद् उपर्युपरि बर्हिः प्रस्तरं हरन्ति यजमानम् एव तत् प्रजास्व् अध्यूहन्ति।--- जै.ब्रा.१.८६

१९. औद्धवान्धारयमाणस्त्रिरस्तृणन्प्रतिपर्येति। औद्धवः प्रस्तरः। प्रस्तरस्य ग्रहणसादने तूष्णीम्।— आप.श्रौ.सू.८.१४.६

२०. शरमयं बर्हिः। औद्धवः प्रस्तरः।--- आप.श्रौ.सू.२२.४.२०

२१. प्रसव्यमुद्धावं त्रिः परिस्तीर्य कर्ष्वामुद्धवानास्तृणाति।— मानव श्रौ.सू.१.१.२.१०

२२. दर्व्योद्धृत्योद्धवेषु पिण्डान्निदधाति।— मानव श्रौ.सू.१.१.२.१९

२३. उद्धवाननुप्रहृत्य वीरं नो दत्त पितर इत्युदङ्कीमवजिघ्रेत्।— मानव श्रौ.सू.१.१.२.३३

२४. श्वोभूते पश्चाउद्गार्हपत्यस्योदीच उद्धूय संस्तृणाति।— मानव श्रौ.सू.१.२.१.१

२५. उद्धूय बर्हिः स्तृणाति। प्रसव्यमुद्धावं त्रिः परिस्तीर्योद्धवात्प्रस्तरं तूष्णीं गृह्णाति— मानव श्रौ.सू. १.७.६.१८

२६. तूष्णीं प्रस्तरमुद्धवमादत्ते। समन्तं बर्हिस्त्रिः स्तृणन्पर्येत्या विष्ठेति।— वाराह श्रौ.सू.१.७.४.२२

२७. यद्युद्धून्वन्निव वातो वायात्तमनुमंत्रयते भूर्भुवः सुवो भूर्भुवः सुवो भूर्भुवः सुवो भुवो ऽधायि भुवो ऽधायि भुवो ऽधायि-— बौधा.श्रौ.सू.९.१८

२८. इध्माबर्हिषोः प्रोक्षणस्तरणपूर्वकं परिधिपरिधानम् : अथ विस्रंस्य ग्रन्थिं पुरस्तात् प्रस्तरं गृह्णाति-विष्णोस्तुपोऽसि इति। यज्ञो वै विष्णुः, तस्येयमेव शिखा स्तुपः।— शत. ब्रा.१.३.३.५

२९. अथ बर्हिस्तृणाति। अयं वै स्तुपः प्रस्तरः। अथ यान्यवाञ्चि लोमानि, तान्येवास्यः यदितरं बर्हिः, तान्येवास्मिन्नेतद्दधाति।— श.ब्रा.१.३.३.७

३०. शिरो वै यज्ञस्याहवनीयः। उपर्युपरि प्रस्तरं धारयन् कल्पयति। अयं वै स्तुपः प्रस्तरः। एतमेवास्मिन्ननेतत् प्रति दधाति।— श.ब्रा.१.३.३.१२

३१. स द्वे तृणे आदाय तिरश्ची निदधाति-सवितुर्बाहू स्थः। अयं वै स्तुपः प्रस्तरः। अथास्यैते भ्रुवावेव तिरश्ची निदधाति।---क्षत्रं वै प्रस्तरः, विश इतरं बर्हिः।— श.ब्रा.१.३.४.१०

३२. अथ ते पवित्रे प्रस्तरेऽपिसृजति। यजमानो वै प्रस्तरः, प्राणोदानौ पवित्रे; यजमाने तत् प्राणोदानौ दधाति।— श.ब्रा.१.८.१.४४

३३. अथ प्रस्तरमादत्ते। यजमानो वै प्रस्तरः। यत्रास्य यज्ञोऽगन्,तदेवैतद् यजमानं स्वगाकरोति।--- श.ब्रा.१.८.३.११

३४. सो ऽनक्ति-व्यन्तु वयोऽक्तं रिहाणाः (खादन्तु इमं प्रस्तरं देवाः येभ्यो होष्यते)— श.ब्रा.१.८.३.१४

३५. अथैकं तृणं अपगृह्णाति। यजमानो वै प्रस्तरः। स यत्कृत्स्नं प्रस्तरम् अनुप्रहरेत् क्षिप्रे ह यजमानो ऽमुं लोकमियात्---- श.ब्रा.१.८.३.१६

३६. तं (प्रस्तरं) प्राञ्चमनुसमस्यति-प्राची हि देवानां दिक्। अथो उदञ्चम्। उदीची हि मनुष्याणां दिक्। तमङ्गुलिभिरेव योयुप्येरन्, न काष्ठैः।— श.ब्रा.१.८.३.१८

३७. स सम्प्रगृह्णाति। संस्रवभागा स्थेषा बृहन्तः। संस्रवो ह्येव खलु परिशिष्टो भवति। प्रस्तरेष्ठा परिधेयाश्च देवाः इति। प्रस्तरश्च हि परिधयश्चानुप्रहृता भवन्ति।— श.ब्रा.१.८.३.२५

३८. पत्नीसंयाजः :- तदिडान्तं भवति। नह्यत्र परिधयो भवन्ति, न प्रस्तरः। यत्र वा अदः प्रस्तरेण यजमानं स्वगा करोति, पतिं वा अनुजाया-तदेवास्यापि पत्नी स्वगाकृता भवति।— श.ब्रा.१.९.२.१४

३९. त्रेधा बर्हिः सन्नद्धं भवति। तत्पुनरेकधा। एतद्धि प्रजननस्य रूपम्। प्रजननमु हीदम्-पिता, माता, यज्जायते तत्तृतीयम्। तस्मात्त्रेधा सन्पुनरेकधा। प्रस्व उपसन्नद्धा भवन्ति। तं प्रस्तरं गृह्णाति। प्रजननमु हीदम् प्रजननमु हि प्रस्वः। तस्मात् प्रसूः प्रस्तरं गृह्णाति।— श.ब्रा.२.५.१.१८

४०. सूक्तवाकं होता प्रतिपद्यते। अथैता उभावेव प्रस्तरौ समुल्लुम्पतः, उभावनुप्रहरतः, उभौ तृणे अपगृह्योपासाते-यदा होता सूक्तवाकमाह।— श.ब्रा.२.५.२.४२

४१. न प्रस्तरं गृह्णाति। सकृदु ह्येव पराञ्चः पितरः। तस्मान्न प्रस्तरं गृह्णाति।— श.ब्रा.२.६.१.१४

४२. अथ सन्नहनमनुविस्रंस्य, अपसलवि त्रिः परिस्तृणन् पर्येति। सो ऽपसलवि त्रिः परिस्तीर्य यावत् प्रस्तरभाजनं तावत् परिशिनष्टि। अथ पुनः प्रसलवि त्रिः पर्येति।---- श.ब्रा.२.६.१.१५

४३. पितृयज्ञः :- इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय-इति। सूक्तवाकं होता प्रतिपद्यते। नाध्वर्युः। प्रस्तरं समुल्लुम्पति इत्येवोपास्ते-यदा होता सूक्तवाकमाह।— श.ब्रा.२.६.१.४५

४४. वैसर्जन होमः :- आश्ववालः प्रस्तरः। यज्ञो ह देवेभ्यो ऽपचक्राम। सोऽश्वो भूत्वा पराङाववर्त। तस्य देवाः अनुहाय वालानभिपेदुः। तानालुलुपुः।-- -तत एता ओषधयः समभवन्-यदश्ववालाः।— श.ब्रा. ३.४.१.१७

४५. आददते ग्राव्णः,---- आश्ववालं प्रस्तरम्, ऐक्षव्यौ विधृती।---— श.ब्रा.३.६.३.१०

४६. ---तत्प्रोक्ष्योपनिनीय विस्रंस्य ग्रन्थिम्। आश्ववालः प्रस्तर उपसन्नद्धो भवति। तं गृह्णाति। गृहीत्वा प्रस्तरमेकवृद्बर्हिः स्तृणाति। स्तीर्त्वा बर्हिः---— श.ब्रा. ३.६.३.१४

४७. प्रवर्ग्य कर्मणि अवान्तरदीक्षा : अथ प्रस्तरे निह्नुवते।---यज्ञो वै प्रस्तरः। तद् यज्ञं पुनरारभन्ते---- न देवेभ्य आवृश्च्यन्ते। तस्मात् प्रस्तरे निह्नुवते।-— श.ब्रा. ३.४.३.१९

४८. अथाह समुल्लुप्य प्रस्तरम् : अग्नीन्मदन्ति आपा ३ इति। मदन्तीत्यग्नीदाह। ताभिरेहीत्यु-पर्य्युपर्य्यग्निमतिहरति।-— श.ब्रा. ३.४.४.२२

४९. वैश्वकर्मणहोमः :- प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे।— श.ब्रा. ९.५.१.४८

५०. अथ यद्बर्हिः स्तृणाति। तस्मादिमाः प्रजा लोमशा जायन्ते। अथ यत्पुनरिव प्रस्तरं स्तृणाति। तस्मादासां पुनरिव श्मश्रूण्ययौपपक्ष्माणि दुर्बीरिणानि जायन्ते। अथ यत्केवलमेवाग्रे प्रस्तरमनु प्रहरति, तस्माच्छीर्षण्येवाग्रे पलितो भवति।---— श.ब्रा. ११.४.१.१४

५१. यत्प्रस्तरं यजुषा गृह्णीयात्। प्रमायुको यजमानः स्यात्। यन्न गृह्णीयात्। अनायतनः स्यात्। तूष्णीमेव न्यस्येत्। न प्रमायुको भवति। नानायतनः।— तैत्तिरीय ब्राह्मण १.६.८.८

५२. पुरस्तात् प्रस्तरं गृह्णाति। मुख्यमेवैनं करोति।-- -यजमानो वै प्रस्तरः। प्राणापानौ पवित्रे। यजमान एव प्राणापानौ दधाति। ऊर्णाम्रदसं त्वा स्तृणामीत्याह।---- धारयन्प्रस्तरं परिधीन्परिदधाति।— तै.ब्रा.३.३.६.७

५३. स्रुक्षु प्रस्तरमनक्ति। इमे वै लोकाः स्रुचः। यजमानः प्रस्तरः। यजमानमेव तेजसा अनक्ति। त्रेधाऽनक्ति। त्रय इमे लोकाः।---- तै.ब्रा.३.३.९.२

५४. अयं प्रस्तर उभयस्य धर्ता। धर्ता प्रयाजानामुतानुयाजानाम्। स दाधार समिधो विश्वरूपाः। तस्मिन्त्स्रुचो अध्यासादयामि।— तै.ब्रा.३.७.६.८

५५. बहिष्पवमान में प्रसर्पण के समय : अध्वर्युः प्रस्तरं हरति। यजमानो वै प्रस्तरो यजमानमेव तत् स्वर्गं लोकं हरति। यज्ञो वै देवेभ्यो ऽश्वो भूत्वापाक्रामत्तं देवाः प्रस्तरेणारमयंस्तस्मादश्वः प्रस्तरेण सम्मृज्यमान उपावरमते यदध्वर्यु प्रस्तरं हरति यज्ञस्य शान्त्या अप्रत्रासाय।-— ताण्ड्य ब्रा.६.७.१७

५६. प्रस्तरमासद्योद्गायेद्धविषोऽस्कन्दाय।— तां.ब्रा. ६.७.२१

५७. अतमृतवादिभ्योनमो दिवे नमः पृथिव्या इति प्रस्तरे निह्नुवते द्यावापृथिवीभ्यामेव तं नमस्कुर्वन्ति अथो एने वर्धयन्त्येव वर्धयन्त्येव।— ऐ.ब्रा.१.२६

## उन्नेता

१. ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति।।— ऋग्वेद १.११६.८

२. विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण।।— ऋ.१.११६.२४

३. नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन् त्सास्युक्थ्यः।।— ऋ.२.१३.१२

४. युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः।।— ऋ.३.८.४

५. हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः। उन्नीयमानाः कविभिः पुरस्ताद् देवा देवानामपि यन्ति पाथः।।— ऋ.३.८.९

६. पुरू सहस्रा नि शिशा अभि क्षामुत् तूर्वयाणं धृषता निनेथ।।— ऋ.६.१८.१३

७. इन्द्रासोमा वासयथ उषासमुत् सूर्यं नयथो ज्योतिषा सह। उप द्यां स्कम्भथुः स्कम्भनेनाप्रथतं पृथिवीं मातरं वि।।— ऋ.६.७२.२

८. प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः। दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः।।— ऋ.९.८१.१

९. उत देवा अवहितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः।।— ऋ.१०.१३७.१

१०. अयं देवानामसुरो वि राजति वशा हि सत्या वरुणस्य राज्ञः। ततस्परि ब्रह्मणा शाशदान उग्रस्य मन्योरुदिमं नयामि।— अथर्ववेद १.१०.१

११. दशवृक्ष मुञ्चेमं रक्षसो ग्राह्या अधि यैनं जग्राह पर्वसु। अथो एनं वनस्पते जीवानां लोकमुन्नय।।— अ.२.९.१

१२. नीचैः पद्यन्तामधरे भवन्तु ये नः सूरिं मघवानं पृतन्यान्। क्षिणामि ब्रह्मणामित्रानुन्नयामि स्वानहम्।।— अ.३.१९.३

१३. उत देवा अवहितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः।।— अ.४.१३.१

१४. उदेनमुत्तरं नयाग्ने घृतेनाहुत। समेनं वर्चसा सृज प्रजया च बहुं कृधि।।— अ.६.५.१

१५. यददीव्यन्नृणमहं कृणोम्यदास्यन्नग्न उत संगृणामि। वैश्वानरो नो अधिपा वसिष्ठ उदिन्नयाति सुकृतस्य लोकम्।।— अ.६.११९.१

१६. यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम। अयं तस्माद् गार्हपत्यो नो अग्निरुदिन्नयाति सुकृतस्य लोकम्।।— अ. ६.१२०.१

१७. यद् दारुणि बध्यसे यच्च रज्ज्वां यद् भूम्यां बध्यसे यच्च वाचा। अयं तस्माद् गार्हपत्यो नो अग्निरुदिन्नयाति सुकृतस्य लोकम्।।— अ. ६.१२१.२

१८. को अस्या नो द्रुहोऽवद्यवत्या उन्नेष्यति क्षत्रियो वस्य इच्छन्। को यज्ञकामः क उ पूर्तिकामः को देवेषु वनुते दीर्घमायुः।।— अ. ७.१०८.१/ ७.१०३.१

१९. जीवलां नघारिषां जीवन्तीमोषधीमहम्। अरुन्धतीमुन्नयन्तीं पुष्पां मधुमतीमिह हुवेऽस्मा अरिष्टतातये।— अ.८.७.६

२०. इदं सदो रोहिणी रोहितस्यासौ पन्थाः पृषती येन याति। तां गन्धर्वाः कश्यपा उन्नयन्ति तां रक्षन्ति कवयोऽप्रमादम्।।— अ.१३.१.२३

२१. विपश्चितं तरणिं भ्राजमानं वहन्ति यं हरितः सप्त बह्वी। स्रुताद् यमत्त्रिर्दिवमुन्निनाय तं त्वा पश्यन्ति परियान्तमाजिम्।— अ.१३.२.४

२२. अभितोऽग्निमंसावुन्नयति। योषा वै वेदिः, वृषाग्निः। परिगृह्य वै योषा वृषाणं शेते। मिथुनमेवैतत्प्रजननं क्रियते। तस्मादभितोऽग्निमंसा उन्नयति।— श.ब्रा.१.२.५.१५

२३. उपवसथ ब्राह्मणम् : अथाश्वमाक्रमयति। तमाक्रमय्य प्राञ्चमुन्नयति। तं पुनरावर्त्तयति।--— श.ब्रा.२.१.४.२३

२४. अथ चतुरुन्नयति, चतुर्द्धा विहितं हीदं पयः। अथ समिधमादायोदाद्रवति।-- -स वै द्विरग्नौ जुहोति, द्विरुपमार्ष्टि, द्विः प्राश्नाति, चतुरुन्नयति, तद्दश। दशाक्षरा वै विराट्। विराड् वै यज्ञः।— श.ब्रा.२.३.१.१७

२५. अथ गृह्णाति। समुद्रस्य त्वाक्षित्याऽउन्नयामि। इति। आपो वै समुद्रः। अप्स्वेवैतदक्षितिं दधाति। तस्मादापऽएतावति भोगे भुज्यमाने न क्षीयन्ते। तदन्वेकधनानुन्नयन्ति। तदनु पात्रेजनान्।— श.ब्रा.३.९.३.२७

२६. दक्षिणादानम् :---- -अथाच्छावाकाय। अथोन्नेत्रे। अथ ग्रावस्तुते। अथ सुब्रह्मण्यायै प्रतिहर्त्रे उत्तमाय ददाति।— श.ब्रा.४.३.४.२२

२७. तृतीयसवनग्रहेषु आदित्यग्रहः :- ते सम्प्रपद्यन्ते -अध्वर्युश्च, यजमानश्च, आग्नीध्रश्च, प्रतिप्रस्थाता च, उन्नेता। अथ योऽन्यः परिचरो भवति। उभे द्वारेऽअपिदधाति।— श.ब्रा.४.३.५.९

२८. स मेक्षयति। विवस्वन्नादित्यैष ते सोमपीथः, तस्मिन्मत्स्व इति। अथोन्नेत्रऽउपांशुसवनं प्रयच्छति। अथाहोन्नेतारम्-आसृज ग्राव्णा इति। तानाधवनीये वा सृजति चमसे वा। राजानमुन्नीय। आदित्यानां वै तृतीयसवनम्, आदित्यान्वाऽअनु ग्रावाणः। तदेनान्त्स्वऽएव भागे प्रीणाति। अपोर्णुवन्ति द्वारे।— श.ब्रा. ४.३.५.१८

२९. अथ पुनः प्रपद्याग्रयणमादत्ते। उदीचीनदशं पवित्रं वितन्वन्ति। प्रस्कन्दयत्यध्वर्युः आग्रयणस्य संप्रगृह्णाति प्रतिप्रस्थाता। संस्रवावानयत्युन्नेता चमसेन वोदञ्चनेन वा।— श.ब्रा.४.३.५.२१

३०. अथ सम्प्रेष्यति-अग्नीन्नेष्टुरुपस्थमासीद, नेष्टः पत्नीमुदानय। उद्गात्रा सङ्ख्यापय, उन्नेतर्होतुश्चमसमनून्नय, सोमं माऽतिरीरिच इति। यद्यग्निष्टोमः स्यात्।— श.ब्रा. ४.४.२.१७

३१. हारियोजन ग्रहः :- तस्योन्नेता-ऽऽश्रावयति। अतिरिक्तो वाऽउन्नेता-न ह्येषोऽन्यस्याश्रावयति। अतिरिक्त एष ग्रहः। तस्मादतिरिक्तऽएवैतदतिरिक्तं दधाति। तस्मादुन्नेता-ऽऽश्रावयति। मूर्धन्नभिनिधायाश्रावयति मूर्धा ह्यस्यैषः। अथाह-धानासोमेभ्योऽनुब्रूहीति। आश्राव्याह-धानासोमान्प्रस्थितान् प्रेष्येति।----— श.ब्रा.४.४.३.८

३२. पात्रावकाशमन्त्राः :- वैश्वदेवौ वाऽअम्भृणौ अतो हि देवेभ्य उन्नयन्ति, अतो मनुष्येभ्यः, अतः पितृभ्यः। तस्माद्वैश्व-देवावम्भृणौ।— श.ब्रा.४.५.६.३

३३. गर्गत्रिरात्रमहीनम्ः द्वौ वोन्नेतारौ कुर्वीत। तयोर्यतरो नाश्रावयेत्-तस्मा एनां दद्यात्। व्यृद्धो वाऽएष उन्नेता-य ऋत्विक्सन्नाश्रावयति। व्यृद्धोऽएषा विराट् या विवृढा। तद् व्यृद्धऽएवैतद् व्यृद्धं दधाति।— श.ब्रा. ४.५.८.१३

३४. अथास्यै (उखायाः) सर्वतस्तीरमुन्नयति।— श.ब्रा.६.५.२.३

३५. तस्यै (उखायाः) स्तनानुन्नयति। ऊधसस्तत् स्तनानुन्नयति। चतुःस्तना भवति। — श.ब्रा.६.५.२.१८

३६. अथ क्षत्रियस्य-उदेषां बाहूऽअतिरमुद्वर्धोऽअथो बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाँ अहम् इति। यथैव क्षिणुयादमित्रान्, उन्नयेत् स्वान्।----अयं वाऽअग्निः-ब्रह्म च क्षत्रं च।— श.ब्रा.६.६.३.१५

३७. स होवाच-इडैव मे मानव्यग्निहोत्री।---- आश्विमुन्नीयमानम्। वैश्वदेवमुन्नीतम्।— श. ब्रा. ११.५.३.५

३८. गवामयनब्राह्मणम् : अथाध्वर्यवे नेष्टारमुन्नेता दीक्षयति। तं हि सोऽनु। अथ ब्रह्मण आग्नीध्रं दीक्षयति। तं हि सोऽनु। अथोद्गात्रे सुब्रह्मण्यां दीक्षयति। तं हि सोऽनु। अथ होत्रे ग्रावस्तुतं दीक्षयति। तं हि सोऽनु। एतांश्चतुर उन्नेता दीक्षयति।— श.ब्रा.१२.१.१.९

३९. गवामयन ब्राह्मणम् : अथोन्नेतारं स्नातको वा ब्रह्मचारी वाऽन्यो वा दीक्षितो दीक्षयति। न पूतः पावयेत् इति ह्याहुः। सैषाऽनुपूर्वदीक्षा।— श. ब्रा. १२.१.१.१०

४०. तेषां वा उन्नेतोत्तमो दीक्षते। प्रथमोऽवभृथादुदायतामुदैति। प्राणो वा उन्नेता। प्राणमेवैष्वेतदुभयतो दधाति।— श. ब्रा.१२.१.१.११

४१. तदाहुः-यस्याग्निहोत्रं स्रुच्युन्नीतं स्कन्देत्। किं तत्र कर्म। का प्रायश्चित्तिरिति। स्कन्नप्रायश्चित्तेनाभिमृश्य अद्भिरुपनिनीय परिशिष्टेन जुहुयात्।— श.ब्रा.१२.४.२.६

४२. इत्थमेव कुर्यात्। तदेवोपविशेत्। यत् स्थाल्यां परिशिष्टं स्यात्। तदस्मा उन्नीयाहरेयुः। तद्धैक उपवल्हन्ते। हुतोच्छिष्टं वा एतत्।------ तस्माद्यत्स्थाल्यां परिशिष्टं स्यात्। तदस्मा उन्नीयाहरेयुः। यद्यु तत्र न स्यात्। यदन्यत् विंदेत्। तदग्नावधिश्रित्यावज्योत्यापः प्रत्यानीयोद्वास्य तददो हैवोन्नेष्यामीत्युक्तं भवति। अथात्र यथोन्नीतमेवास्मा उन्नीयाहरेयुः। तेन कामं जुहुयात्।— श. ब्रा. १२.४.२.८

४३. तदाहुः-यस्याग्निहोत्रं स्रुच्युन्नीतम-मेध्यमापद्येत। किं तत्र कर्म का प्रायश्चित्तिरिति। तद्धैके होतव्यं मन्यन्ते।— श.ब्रा.१२.४.२.९

४४. तदाहुः-यस्याग्निहोत्रं स्रुच्युन्नीत-मुपरिष्टादववर्षेत्। किं तत्र कर्म का प्रायश्चित्तिरिति। तद्विद्यात्। उपरिष्टान्मा शुक्रमागन्नुप मां देवाः प्राभूवन् श्रेयान् भविष्यामि इति। तेन कामं जुहुयात्।— श.ब्रा.१२.४.२.१०

४५. (यदेष दीर्घसत्र्यग्निहोत्रं जुह्वत् प्रवसन् म्रियेत): नोन्नेष्यामीत्याह। न चतुरुन्नयति। यद्धोन्नेष्यामीति ब्रूयात्। यद्यतुरुन्नयेत्। देवत्रा कुर्यात्। सकृदेव तूष्णीं न्यक् पर्यस्यति। पितृदेवत्यमेवैनत् तत्करोति।— श.ब्रा. १२.५.१.९

४६. ज्योतिष्टोम प्रायश्चित्त ब्राह्मणम् : अथ यदि चमसेषून्नीतः किंचिदापद्येत। विश्वेभ्यो देवेभ्यः स्वाहा-इति जुहुयात्। विश्वे हि स तर्हि देवा भवति। अप पाप्मानं हते।— श.ब्रा.१२.६.१.२७

४७. महावीरादि प्रवर्ग्यपात्र संभरणम् :--- -मध्ये संगृहीतमिव हि शिरः। अथोपरिष्टात्त्र्यंगुलं मुखमुन्नयति। नासिकामेवास्मिन्नेतद्दधाति।— श. ब्रा. १४.१.२.१७

४८. गवाजपयोऽवसेचनं ब्राह्मणम् : अथोन्नयति-घर्माय दीष्व इति। एष वा अत्र घर्मो रसो भवति। यमेषा पिन्वते।— श.ब्रा.१४.२.१.१०

४९. अग्निहोत्रं वै प्रवर्ग्यः।-- -यदुन्नीतं, तदुचितः। (यदुचितः, तद्वायुः)।— श. ब्रा. १४.३.२.२६

५०. सोमो वै प्रवर्ग्यः।---यदुन्नीतः, तद् रुचितः।— श.ब्रा.१४.३.२.३०

५१. अभिषोतव्यस्य सोमस्य शकटादुपावरोहः :- देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यो देवत्रा धत्त---- कार्षिरस्यपापां मृध्रँ समुद्रस्य वोऽक्षित्या उन्नये।— तै.सं.१.३.१३.२

५२. प्राधान्येनाऽऽश्रावणादिमन्त्राः :- अस्तु श्रौषडित्युपावास्राग्यजेत्युदनैषीद्ये यजामह इत्युपासदद्वषट्कारेण दोग्ध्येष वै सूनृतायै दोहो— तै.सं.१.६.११.३

५३. सोमोपस्थानमन्त्रोत्पादनम् : ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्प्रत्येव सोमँ स्थापयति प्रति स्तोमं— तै.सं.३.१.२.४

५४. अग्निधारणाभिधानम् : उदेषां बाहू अतिरमुद्वर्च उदू बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाँ अहम् (इति उत्तमे यजमानं वाचयंस्तूष्णीमौदुम्बर्यौ समिधा-वादधाति)।।— तै.सं.४.१.१०.३

५५. यज्ञतन्वाख्येष्टकाभिधानम् : वैश्वदेव उन्नीतो-- -— तै.सं.४.४.९.१

५६. अग्निप्रणयनाभिधानम् : उदेनमुत्तरां नयाग्ने घृतेनाऽऽहुत। रायस्पोषेण सँसृज प्रजया च धनेन च (इति तिसृभिरौदुम्बरी समिधो घृतोषितास्तिस्र आधाय पशुबन्धवदग्निं प्रणयति)।— तै.सं.४.६.३.१

५७. उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतेऽवसं करोति तादृगेव तत्।— तै.सं.५.४.६.१

५८. वेद्याभिधानम् : सुवर्गं वा एते लोकं यन्ति य उपसद उपयन्ति तेषां य उन्नयते हीयत एव स नोदनेषीति सूत्रीयमिव यो वै स्वार्थेतां यताँ श्रान्तो हीयत उत स निष्ट्याय सह वसति तस्मात्सकृदुन्नीय नापरमुन्नयेत दध्नोन्नयेतैतद्वै पशूनाँ रूपं रूपैणैव पशूनवरुन्धे।— तै.सं.६.२.४.१

५९. सोमोपावहरणकथनम् : समुद्रस्य वोऽक्षित्या उन्नय इत्याह तस्मादद्यमानाः पीयमाना आपो न क्षीयन्ते— तै.सं.६.४.३.४

६०. हारियोजनग्रहकथनम् :--- यदप्रहृत्य परिधीञ्जुहुयादन्तराधानाभ्याम् घासं प्र यच्छेत्प्रहृत्य परिधीञ्जुहोति निराधानाभ्यामेव घासं प्र यच्छत्युन्नेता जुहोति यातयामेव ह्येतर्ह्यध्वर्युः स्वगाकृतो---- उन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तमेवाव रुन्धत— तै.सं.६.५.९.३

६१. गर्गत्रिरात्राभिधानम् : अथाऽऽहुरुन्नेत्रे देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजाम्— तै.सं.७.१.५.६

६२. तं (यूपं)धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति ये वा अनूचानास्ते कवयस्त एवैनं तदुन्नयन्ति।— ऐतरेय ब्राह्मण २.२

६३. आ त्वा वहन्तु हरय इति प्रातःसवन उन्नीयमानेभ्योऽन्वाह वृषण्वती पीतवती सुतवतीर्मद्वती रूपसमृद्धाः।— ऐ.ब्रा.६.९

६४. असावि देवं गोऋजीकमन्ध इति मध्यंदिन उन्नीयमानेभ्योऽन्वाह वृषण्वतीः पीतवतीः सुतवतीर्मद्वती रूपसमृद्धाः।— ऐ.ब्रा.६.११

६५. इहोप यात शवसो नपात इति तृतीयसवन उन्नीयमानेभ्योऽन्वाह वृषण्वतीः पीतवतीः सुतवतीर्मद्वती रूपसमृद्धास्ता ऐन्द्रार्भव्यो भवन्ति।— ऐ.ब्रा.६.१२

६६. तिस्रश्चैव कीकसा अर्धं च वैकर्तस्योन्नेतुः— ऐ.ब्रा.७.१

६७. यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत का तत्र प्रायश्चित्तिः-स यद्येकस्मिन्नुन्नीते यदि द्वयोरेष एव कल्पस्तद्येद्व्यपनयितुं शक्नुयान्निःषिच्यैतद्दुष्टम-दुष्टमभिपर्यासिच्य तस्य यथोन्नीत्ती स्यात्तथा जुहुयात्सा तत्र प्रायश्चित्तिः— ऐ.ब्रा.७.५

६८. तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतं यजमान-चमसमुन्नयेत्तस्मिन्द्वे दर्भतरुणके प्रास्ते स्यातां-- ऐ.ब्रा.७.३३

६९. पितृलोके वा एतद्यजमानश्चरति। यत्पितृभ्यः करोति।। स ईश्वर आर्तिमार्तोः। प्रजापतिस्त्वा वैनं तत उन्नेतुमर्हतीत्याहुः। यत्प्राजापत्ययर्चा पुनरैति। प्रजापतिरेवैनं तत उन्नयति। नाऽऽर्तिमार्छति यजमानः।— तैत्तिरीय ब्रा.१.३.१०.१०

७०. यस्य प्रातःसवने सोमोऽतिरिच्यते। माध्यंदिनँ सवनं कामयमानोऽभ्यतिरिच्यते। गौर्धयति मरुतामिति धयद्वतीषु कुर्वन्ति---- मरुत्वतीषु कुर्वन्ति। तेनैव माध्यंदिनात्सवन्नान्नयन्ति। होतुश्चमसमनून्नयन्ते। होताऽनुशँसति। मध्यत एव यज्ञँ समादधाति। यस्य माध्यंदिने सवने सोमोऽतिरिच्यते। आदित्यं तृतीयसवनं कामयमानोऽभ्यतिरिच्यते। गौरिवीतँ साम भवति। अतिरिक्तं वै गौरिवीतम्।-----होतुश्चमसमनून्नयन्ते होताऽनुशँसति मध्यत एव यज्ञँ समादधाति। यस्य तृतीयसवने सोमोऽतिरिच्यते। उक्थ्यं कुर्वीत---- होतुश्चमसमनून्नयन्ते। होताऽनुशँसति। मध्यत एव यज्ञँ समादधाति।— तै.ब्रा.१.४.५.१

७१. रुक्मँ होत्रे। आदित्यमेवास्मा उन्नयति।— तै.ब्रा.१.८.२.३

७२. (निष्टप्तायां स्रुचि चतुर्वारं हविष्पूरणं स्रुवेण कुर्यादिति विधत्ते): चतुरुन्नयति। चतुष्पादः पशवः।

पशूनेवावरुन्धे। सर्वान्पूर्णानुन्नयति। सर्वे हि पुण्या राद्धाः। अनूच उन्नयति। प्रजाया अनूचीनत्वाय अनूच्येवास्य प्रजार्धुका भवति।— तै.ब्रा.२.१.३.५

७३. ब्रह्मवादिनो वदन्ति। चतुरुन्नयति। द्विर्जुहोति। अथ क्व द्वे आहुती भवत इति। अग्नौ वैश्वानर इति ब्रूयात्।— तै.ब्रा.२.१.४.४

७४. अग्निहोत्र एवाहँ सायं प्रातर्वज्रं भ्रातृव्येभ्यः प्रहरामि। तस्मान्मत्पापीयाँसो भ्रातृव्या इति। चतुरुन्नयति। द्विर्जुहोति। समित्सप्तमी। सप्तपदा शक्वरी। शाक्वरो वज्रः।— तै. ब्रा. २.१.५.११

७५. रौद्रं गवि।----धातुरुद्वासितम्। बृहस्पतेरुन्नीतम्। सवितुः प्रक्रान्तम्।— तै. ब्रा. २.१.७.१

७६. वायव्यं वा एतदुपसृष्टम्।--त्वाष्ट्रमुन्नीय-मानम्। बृहस्पतेरुन्नीतम्।— तै. ब्रा. २.१.८.२

७७. रेतो वा एतस्य हितं न प्रजायते। यस्याग्निहोत्रमहुतँ सूर्योऽभ्युदेति। यद्यन्ते स्यात्। उन्नीय प्राङुदाद्रवेत्। स उपसाद्याऽऽतमितोरासीत। स यदाऽऽताम्येत्। अथ भूः स्वाहेति जुहुयात्। प्रजापतिर्वै भूतः। तमेवोपासरत्। स एवैनं तत उन्नयति।— तै.ब्रा.२.१.९.२

७८. (अग्निहोत्र एव चतुर्होतृफलं दर्शयति) :- चतुरुन्नयति। चतुर्होतारमेव तद्यज्ञक्रतुमाप्नोति दर्शपूर्णमासौ। चतुरुन्नयति समित्पञ्चमी पञ्चहोतारमेव तद्यज्ञक्रतुमाप्नोति चातुर्मास्यानि।---चतुरुन्नयति द्विर्जुहोति। षड्होतारमेव तद्यज्ञक्रतुमाप्नोति पशुबन्धम्।-- चतुरुन्नयति। द्विर्जुहोति। समित्सप्तमी। सप्तहोतारमेव तद्यज्ञक्रतुमाप्नोति सौम्यमध्वरम्।-- चतुरुन्नयति। द्विर्जुहोति। द्विर्निमार्ष्टि। द्विः प्राश्नाति। दशहोतारमेव तद्यज्ञक्रतुमाप्नोति संवत्सरम्।— तै. ब्रा. २.३.७.२

७९. प्राञ्चौ वेद्यँसावुन्नयति। आहवनीयस्य परिगृहीत्यै। प्रतीची श्रोणी। गार्हपत्यस्य परिगृहीत्यै।— तै.ब्रा.३.२.९१।९

८०. (यूपाय परिवीयमाणायानुब्रूहीति प्रेषितेन होत्रा पठनीयामृचम्) :- युवा सुवासाः परिवीत आगात्। स उ श्रेयान्भवति जायमानः। तं धीरासः कवय उन्नयन्ति। स्वाधियो मनसा देवयन्तः।— तै.ब्रा. ३.६.१.३

८१. दशपेय : रुक्मोहोतुराग्नेयो होताथो अमुमेवास्मा आदित्यमुन्नयति।-ताण्ड्य ब्रा.१८.९.९

८२. यः प्रतिप्रस्थाता सो अग्नीत्स उन्नेता— तां.ब्रा. २५.४.५

८३. सर्प सत्रे ऋत्विजाः :- चक्रपिशंगावुन्नेतारौ— तां.ब्रा. २५.१५.३

८४. तपो गृहपतिः---ऊर्गुन्नेता--- तां.ब्रा. २५.१८.४

८५. आदित्यं हि तमो जग्राह। तदत्रिपनुनोद। तदत्रिरन्वपश्यत्। तदप्येतदृचोक्तम् --स्रुताद् यमत्रिर्दिवमुन्निनाय। दिवि त्वात्रिरधारयत् सूर्या मासाय कर्तवे।— गोपथ ब्राह्मण १.२.१७

८६. किंदेवत्यं वत्समुन्नीयमानम्? किंदेवत्यं वत्समुन्नीतम्?--किंदेवत्यम् (दुग्धं) उन्नीयमानम्? किंदेवत्यमुन्नीतम्?— गो.ब्रा. १.३.११

८७. रौद्रं मे गवीडायां,--- वैराजं वत्समुन्नीयमानं, जागतमुन्नीतम्,----धात्रमुद्वासितं, वैश्वदेवमुन्नीयमानं, सावित्रमुन्नीतं,-— गो.ब्रा. १.३.१२

८८. तिस्रश्चैव कीकसा अर्धं चापानस्योन्नेतुः— गो.ब्रा. १.३.१८

८९. अथाध्वर्यवे नेष्टारमुन्नेता दीक्षयति। स हैनमनु। अथ ब्रह्मण आग्नीध्रं दीक्षयति। अथोउद्गात्रे सुब्रह्मण्यं दीक्षयति। अथ होत्रे ग्रावस्तुतं दीक्षयति। अथ तमन्यः स्नातको वा ब्रह्मचारी वा दीक्षयति। न पूतः पावयेदित्याहुः।— गो.ब्रा.१.४.६

९०. अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता निहितं पादमेकम्। समन्तरिक्षं यजुषा स्तुवन्तो वायुं पादं ब्रह्मणा धारयन्ति।— गो.ब्रा.१.५.२४

९१. यथार्हामः स्रस्तमतिरेतदन्त्येतेष एवेश्वर उन्नेता।— गो.ब्रा.२.६.१४

९२. रौद्रं गवि----वैश्वदेवम् उन्नीतं-- जैमिनीय ब्रा.१.२१

९३. अथाह उन्नेष्यामि इति। ओं मामहं स्वर्गं लोकम् अभि इति ब्रूयात्।— जै.ब्रा.१.३९

९४. स यं प्रथमं स्रुवम् उन्नयति तद् वै दर्शपूर्णमासयो रूपम्। दर्शपूर्णमासाभ्याम् एवास्येष्टं भवति य एवं विद्वान् प्रथमं स्रुवम् उन्नयति। अथ यं द्वितीयं स्रुवम् उन्नयति तद् वै चातुर्मास्यानां रूपम्। चातुर्मास्यैर् एवास्येष्टं भवति य एवं विद्वान् द्वितीयं स्रुवम् उन्नयति। अथ यं तृतीयं स्रुवम् उन्नयति तद् वा इष्टिपशुबन्धानां रूपम्। इष्टिपशुबन्धैर् एवास्येष्टं भवति य एवं विद्वांस् तृतीयं स्रुवम् उन्नयति। अथ यं चतुर्थं स्रुवम् उन्नयति तद् वै त्र्यम्बकवाजपेयाश्वमेधानां रूपम्। त्र्यम्बकवाज-पेयाश्वमेधैर् एवास्येष्टं भवति य एवं विद्वांश् चतुर्थं स्रुवम् उन्नयति।— जै.ब्रा.१.४०

९५. यद्य् उ नीची स्रुक् स्याद् अपि वा भिद्येत किं तत्र कर्म का प्रायश्चित्तिर् इति।--तद् उ हैके तत एव प्रत्येत्योन्नयन्ति तद् उ तथा न कुर्यात्।---अथास्मिन् स्थालीम् आहरेयुस् स्रुवं च स्रुचं च निर्णिज्य। तद् अद एवास्योन्नेष्यामीत्य् उक्तं भवति। अथ यथोन्नीतम् उन्नीय समिधम् आदाय प्राक् प्रेयात्।— जै.ब्रा.१.५४

९६. उन्नेतर् उन् मा नयेत्य् आह। विष्णुर् वा उन्नेता। यज्ञो वै विष्णुः। यज्ञ एवैनं तत् सर्वस्मात् पाप्मनो विमुच्योन्नयति।— जै.ब्रा.२.६८

९७. पुरोडाशः :- ऊर्जे त्वाग्नेर्जिह्वासि सुपूर्देवेभ्यो धाम्ने धाम्ने त्वा यजुषे यजुषे हविरसि वैश्वानरमुन्नीतशुष्मँ-- काठक संहिता १.१०

९८. ज्योतिरिकम् : देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमस्तं---- कार्ष्यसि समुद्रस्य वोऽक्षित्या उन्नये।— काठक सं.३.९

९९. ग्रहाः :- उन्नेतर्वस्योऽभ्युन्नया नः।— काठक सं.४.१३

१००. अग्निहोत्र ब्राह्मणम् : यद्यधिश्रितँ स्कन्देदन्यामभिदुह्याधिश्रित्योन्नीय जुहुयात्, सैव तत्र प्रायश्चित्तिर्यद्युन्नीयमानं यद्युन्नीतं यदि पुर उपसन्नमहुते स्कन्देत् पुनरवनीयान्यामभिदुह्याधिश्रित्योन्नीय जुहुयात्— काठक सं.६.३

१०१. समेवं जीर्यतः पूर्णमग्र उन्नयेदथ संमितमथ संमितमथ संमिततममुत्तममनुज्येष्ठमेवास्य पुत्रा ऋध्नुवन्ति संमितमग्र उन्नयेदथ भूयोऽथ भूयोऽथ पूर्णमुत्तमं भूयो भूय एवान्नाद्यमभ्युत्क्रामति कनिष्ठस्त्वस्य पुत्राणामर्धुको भवति सर्वान् समावदुन्नयेद्यः कामयेत---- - चतुरुन्नयति चतुष्पद एवास्मै पशून्-- काठक सं.६.४

१०२. यदि सायमहुतेऽग्निहोत्रे पूर्वोऽग्निरनुगच्छेदग्निहोत्रमधिश्रित्योन्नीयाग्निना पूर्वेणोद्दुत्याग्निहोत्रेणानूद्द्रवेदाहुत्यैवैनं च्यावयति— काठक सं.६.६

१०३. वाचं यच्छेदग्निहोत्र उन्नीयमाने— काठक सं.६.७

१०४. मारुतम् : यावद्ग्रहास्स्तोमाश्छन्दाँसि यावदेवास्ति तावतास्मै चिकित्सत्युद्धराम्युत्सृजाम्युन्नयामीति यथा वध्यमुद्धरत्युत्सृजत्युन्नयत्येवमेवैनमेतदुद्धरत्युत्सृजत्युन्नयति— काठक सं.११.८

१०५. श्रीराजसूयम् : युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः।।— काठक सं.१५.१२

१०६. अग्निवीशिका : उदेषां बाहू अतिरमुद्वर्चो अथो बलम्। क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ अहम्।— काठक सं.१६.७

१०७. चमाः :- उदेनमुत्तरां नयाग्ने घृतेनाहुतः। रायस्पोषेण संसृज प्रजया च बहुं कृधि।— काठक सं. १८.३

१०८. सावित्राः उदेषां बाहू अतिरमुद्वर्चो अथो बलमित्याशिषमेवाशास्ते क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ अहमिति यथायजुः।— काठक सं. १९.१०

१०९. आयुष्यम् :--- तस्मादयमतिरिक्तः प्रजापतिः प्रजा एवाभिवपते द्रोणकलशेनोन्नेता हारियोजनं

जुहोत्यतिरिक्तं वा एतत् पात्राणां यद् द्रोणकलशोऽतिरिक्त एष ऋत्विजां यदुन्नेतातिरिक्त एष सोमानां यद्धारियोजनो ऽतिरिक्तेनैवातिरिक्त-माप्नोत्युन्नेतर्युपहवमिच्छन्ते— काठक सं.२८.९

११०. पुरोडाश ब्राह्मणम् : प्राञ्चौ बाहू उन्नयत्याहवनीयमेव परिगृह्णाति प्रतीची श्रोणी गार्हपत्यमेव परिगृह्णाति— काठक सं.३१.८

१११. एकादशिनी :---इन्द्रो ऽभिमातिहेन्द्रो वृत्रतूरुन्नीयमान आयुरुपाँश्वन्तर्यामयोर्यमो-ऽभिषुतः।— काठक सं.३४.१५

११२. निभूयपूराधवनीये सुपूतपूः पूतभृति---- वैश्वदेव उन्नीयमान ऐन्द्राग्न उन्नीतो— काठक सं. ३४.१६

११३. हिरण्यमेवापोऽभ्यवनयेद्धिरण्यमभ्युन्न-येदमृतं वा आप आयुर्हिरण्यममृतादेवाध्यायुरात्मन् धत्ते— काठक सं.३५.१६

११४. चातुर्मास्यानि : अमुं वा एते लोकं निगच्छन्ति ये पितृयज्ञमुपयन्ति प्रजापतिस्त्वा एनानत उन्नेतुमर्हति— काठक सं.३६.१३

११५. ज्योतिष्टोमयागः :- १६ ऋत्विजों के नाम- आश्वलायन श्रौत सूत्र ४.१.६

११६. आहृतमुन्नेत्रा द्रोणकलशमिळामिव प्रतिगृह्योपहवमिष्ट्वाऽवेक्षेत। हरिवतस्ते हारियोजनस्य स्तुतस्तोमस्य शस्त्वोक्थस्येष्टयजुषो यो भक्षो गोसनिरश्वसनिस्तस्य त उपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयित्वा---— आश्व.श्रौ.सू. ६.१२.१

११७. अवभृथम् : उन्नेतैनानुन्नयति। उन्नेतरुन्नोन्नयोन्नेतर्वस्वो अभ्युन्नया न इत्युन्नीयमाना जपन्ति। — आश्व.श्रौ.सू.६.१३.१३

११८. राजसूये दक्षिणाः :- वत्सतर्युन्नेतुस्त्रिवर्षः साण्डो ग्रावस्तुतः— आश्व.श्रौ.सू. ९.४.२०

११९. तिस्रश्चैव कीकसा अर्धं च वैकर्तस्योन्नेतुः।— आश्व.श्रौ.सू.१२.९.११

१२०. सोमयागः :- उन्नेतुः पात्रयोजनम्। खरोत्तरपूर्वार्द्ध उपाँश्वन्तर्यामयोः। दक्षिणमुपाँशोः।----- - कात्यायन श्रौ.सू.९.२.१

१२१. सोमयागः :- ऐहि यजमानेत्याह हविर्धानं प्रविशन्त्यध्वर्युर्यजमानप्रतिप्रस्थात्रग्नी-दुन्नेतारः। पत्नी चापरेण। अपिहितद्वार आदित्यपात्रमादाय सँस्रवांश्चोपरि पूतभृतस्तत आदित्यग्रहं गृह्णाति सँस्रवेभ्यः कदाचनेति।— का.श्रौ.सू.१०.४.१

१२२. सोमयागः :- उपाँशुसवनमुन्नेत्रे प्रयच्छत्यासृज ग्राव्ण इति चाह। आधवनीये चमसे वा सोमवति ग्राव्णोऽवधाय स्थाने निदधाति।--- — का.श्रौ.सू.१०.४.७

१२३. आग्रयणमादायासिञ्चति पवित्रेऽधिपूत-भृतम्। प्रतिप्रस्थाता च संस्रवौ। आधवनीयादुन्नेतोदञ्चनेन चमसेन वा। तत आग्रयणं गृह्णाति।- का.श्रौ.सू.१०.५.१

१२४. द्वादशाहः :- अध्वर्युर्गृहपतिं दीक्षयति---- -नेष्ट्रादीनुन्नेता उन्नेतारं ब्रह्मचारी स्नातकोऽन्यो वा ब्राह्मणो 'न पूतः पावयेत्' इति श्रुतेः। अनुपति पत्नीरुत्तर उत्तरः। त एवोन्नेतुः। — का.श्रौ.सू.१२.२.१५

१२५. गवामयने अवभृथः :- उन्नेतारौ वा कृत्वानाश्रावयते। दशदशाऽभेदेन दक्षिणा दद्यात्।— का.श्रौ.सू.१३.३.४७

१२६. अग्निष्टोमसामादि : हारियोजन्यो नाम धाना द्रोणकलशे भवन्ति। तासामुद्गाता प्रथम आददानः समुपहूता भक्षयिष्याम इति ब्रूयात्। तथेतरौ। उन्नेतर्युपहवमिष्ट्वा हारियोजनस्य त इति तिरोह्न्यस्येत्यतिरात्र सर्वत्र वा यथाधीतं द्विरुपघ्राय पश्चादाहवनीयस्यान्तः परिधि निवपेयुः।-द्राह्यायण श्रौ.सू.६.३.१८

१२७. अग्निष्टोम (माध्यन्दिन सवनम्) :- आग्नीधः पोतुर्नेष्टुर्ग्रावस्तु उन्नेतुः---बौधायन श्रौ.सू.८.६

१२८. अग्निष्टोम (यज्ञपुच्छम्) :- ---शंयुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचौ विमुच्योन्नेतारमाहोन्नेतर्ग्रहस्ते प्रचरेति तच्छ्रुत्वोन्नेता

द्रोणकलश आग्रयणतृतीयं ग्रहं गृह्णात्युपयाम गृहीतोऽसि हरिरसि हारियोजनो हर्यो स्थाता वज्रस्य भर्ता पृश्नेः प्रेता--------स यावन्त ऋत्विजस्तेभ्य उन्नेता धाना व्यावपति त उन्नेतर्युपहवमिष्ट्वैकैकामन्वस्यन्ते मनसा संबाधते।-बौ.श्रौ.सू.८.१६

१२९. द्वादशाहे दीक्षणीयेष्टिः :- ----आग्नीधः पोतुर्नेष्टुर्ग्रावस्तुत उन्नेतुः सुब्रह्मण्यस्य---- बौ.श्रौ.सू.१६.२

१३०. परिधिषु प्रहृतेषून्नेता हारियोजनं गृह्णाति। उपयामगृहीतो ऽसि हरिरसीति द्रोणकलशेन सर्वमाग्रयणं गृहीत्वा न सादयति।----- अपरेणोत्तरवेदिं द्रोणकलशं प्रतिष्ठाप्योन्नेतर्युपहव-मिष्ट्वा सर्वे हारियोजनं भक्षयन्तीष्टयजुषस्ते देव सोमेति।— आप.श्रौ.सू.१३.१७.१

१३१. गर्गत्रिरात्रम् : यास्तिस्रस्तिस्रस्त्रिंशत्यधि तास्वेनामुपसमाहृत्य तामग्नीधे ब्रह्मणे होत्र उद्गात्र उन्नेत्रे ऽध्वर्यवे वा दद्यात्। द्वौ वोन्नेतारौ वृत्वा यतरो नाश्रावयेत्तस्मै वा।— आप.श्रौ.सू.२२.१६.११

## उपमन्यु

१. नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः।— ऋ.१.२४.६

२. मा नो वधाय हत्नवे जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे।।— ऋ.१.२५.२

३. नि वो यामाय मानुषो दध्र उग्राय मन्यवे। जिहीत पर्वतो गिरिः।।— ऋ.१.३७.७

४. इमे चित् तव मन्यवे वेपेते भियसा मही। यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु स्वराज्यम्।।— ऋ.१.८०.११

५. त्वष्टा चित् तव मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम्।।— ऋ.१.८०.१४

६. स मन्युमीः समदनस्य कर्ता ऽस्माकेभिर्नृभिः सूर्यं सनत्।— ऋ.१.१००.६

७. यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन् पिप्रुमव्रतम्। — ऋ.१.१०१.२

८. देवासो मन्युं दासस्य शम्नन् ते न आ वक्षन् त्सुविताय वर्णम्।।— ऋ.१.१०४.२

९. यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना।— ऋ.१.१३९.२

१०. ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत् ते महित्वनम्।।— ऋ.२.२३.४

११. यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि।— ऋ.२.२४.२

१२. ब्रह्मणस्पतेरभवद् यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः।— ऋ.२.२४.१४

१३. तव त्विषो जनिमन् रेजत द्यौ रेजद् भूमिर्भियसा स्वस्य मन्योः।— ऋ.४.१७.२

१४. यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृळ्हं भयत एजदस्मात्।। — ऋ.४.१७.१०

१५. किमादुतासि वृत्रहन् मघवन् मन्युमत्तमः। अत्राह दानुमातिरः।।— ऋ.४.३०.७

१६. सं यत् त इन्द्र मन्यव सं चक्राणि दधन्विरे। अध त्वे अध सूर्ये।।— ऋ.४.३१.६

१७. इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे।— ऋ.५.७.१०

१८. अग्ने युक्ष्वा हि ये तवाऽश्वासो देव साधवः। अरं वहन्ति मन्यवे।।— ऋ.६.१६.४३

१९. अध द्यौश्चित् ते अप सा नु वज्राद् द्वितानमद् भियसा स्वस्य मन्योः।— ऋ.६.१७.९

२०. आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र।— ऋ.६.२५.२

२१. बाधसे जनान् वृषभेव मन्युना घृषी मीळह ऋचीषम।— ऋ.६.४६.४

२२. इन्द्रो मन्युं मन्युभ्यो मिमाय भेजे पथो वर्तनिं पत्यमानः।।— ऋ.७.१८.१६

२३. प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम्।।— ऋ.७.३६.४

२४. सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु। अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः।।— ऋ.७.५६.२२

२५. सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु।।— ऋ.७.६०.११

२६. उद् वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान्। अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत।।— ऋ.७.६१.१

२७. न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः।— ऋ.७.८६.६

२८. यथा नातः पुनरेकश्चनोदयत् तद् वामस्तु सहसे मन्युमच्छवः।।— ऋ.७.१०४.३

२९. प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा। विश्वे त इन्द्र पृतनायवो यहो नि वृक्षा इव येमिरे।।— ऋ.८.४.५

३०. समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः।।— ऋ.८.६.४

३१. यदस्य मन्युरध्वनीद् वि वृत्रं पर्वशो रुजन्। अपः समुद्रमैरयत्।।— ऋ.८.६.१३

३२. तदग्ने द्युम्नमा भर यत् सासहत् सदने कं चिदत्रिणम्। मन्युं जनस्य दूढयः।।— ऋ.८.१९.१५

३३. अतीहि मन्युषाविणं सुषुवांसमुपारणे। इमं रातं सुतं पिब।।— ऋ.८.३२.२१

३४. अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः।।— ऋ.८.४८.८

३५. नहि मन्युः पौरुषेय ईशे हि वः प्रियजात। त्वमिदसि क्षपावान्।।— ऋ.८.७१.२

३६. स मन्युं मर्त्यानामदब्धो नि चिकीषते। पुरा निदश्चिकीषते।।— ऋ.८.७८.६

३७. इषा मन्दस्वादु ते ऽरं वराय मन्यवे। भुवत् त इन्द्र शं हृदे।।— ऋ.८.८२.३

३८. कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम्। वराय देव मन्यवे।।— ऋ.८.८४.४

३९. विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि।।— ऋ.८.९९.६

४०. प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः। (मन्यु, उपमन्यु, व्याघ्रपाद आदि ऋषि)— ऋ.९.९७.८

४१. उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत् कृणोति।। (अक्ष-कितव निन्दा)— ऋ.१०.३४.८

४२. नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु।।— ऋ.१०.३४.१४

४३. आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्यग्निं समिधानमीमहे।।— ऋ.१०.३५.४

४४. अश्वादियायेति यद्वदन्त्योजसो जातमुत मन्य एनम्। मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद।।— ऋ.१०.७३.१०

४५. यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक्। (मन्यु सूक्त)— ऋ.१०.८३.१

४६. त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः। (मन्यु सूक्त)— ऋ.१०.८४.१

४७. मन्योर्मनसः शरव्या जायते या तया विध्य हृदये यातुधानान्।।— ऋ.१०.८७.१३

४८ .यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि।।— ऋ.१०.८९.६

४९. इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे।— ऋ.१०.११३.६

५०. अग्ने मन्युं प्रतिनुदन् परेषामदब्धो गोपाः परि पाहि नस्त्वम्।— ऋ.१०.१२८.६

५१.श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं नर्यं विवेरपः।— ऋ.१०.१४७.१

५२. वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभि-दासतः।।— ऋ.१०.१५२.३

५३. ततस्परि ब्रह्मणा शाशदान उग्रस्य मन्योरुदिमं नयामि।।— अथर्ववेद१.१०.१

५४. नमस्ते राजन् वरुणास्तु मन्यवे विश्वं ह्युग्र निचिकेषि दुग्धम्। सहस्रमन्यान् प्र सुवामि साकं शतं जीवाति शरदस्तवायम्।।— अ.१.१०.२

५५. यश्च सापत्नः शपथो जाम्याः शपथश्च यः। ब्रह्मा यन्मन्युतः शपात् सर्वं तन्नो अधस्पदम्।।— अ.२.७.२

५६. असितस्य तैमातस्य बभ्रोरपोदकस्य च। सात्रासाहस्याहं मन्योरव ज्यामिव धन्वनो वि मुञ्चामि रथाँ इव।।— अ.५.१३.६

५७. तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां न सा मृषा। अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्त्येनम्।।— अ.५.१८.९

५८. अशत्रिन्द्रो अभयं नः कृणोत्वन्यत्र राज्ञामभि यातु मन्युः।।— अ.६.४०.२

५९. अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः। यथा संमनसौ भूत्वा सखायाविव सचावहै।। (दे.मन्युः)— अ.६.४२.१

६०. अयं दर्भो विमन्युकः स्वाय चारणाय च। मन्योर्विमन्युकस्यायं मन्युशमन उच्यते।। (दे. मन्युशमनम्)— अ.६.४३.१

६१. अव मन्युरवायताव बाहू मनोयुजा।— अ.६.६५.१

६२. यावन्तो अस्मान् पितरः सचन्ते तेषां सर्वेषां शिवो अस्तु मन्युः।।— अ.६.११६.३

६३. ब्रध्नः समीचीरुषसः समैरयन्। अरेपसः सचेतसः स्वसरे मन्युमत्तमाश्चिते गोः।।— अ.७.२२.२

६४. अपाञ्चौ त उभौ बाहू अपि नह्याम्यास्यम्। अग्नेर्देवस्य मन्युना तेन तेऽवधिषं हविः।। अपि नह्यामि ते बाहू अपि नह्याम्यास्यम्। अग्नेर्घोरस्य मन्युना तेन तेऽवधिषं हविः।।— अ.७.७०.४/ ७.७३.४

६५. त्वाष्ट्रेणाहं वचसा वि त ईर्ष्याममीमदम्। अथो यो मन्युष्टे पते तमु ते शमयामसि।।— अ.७.७४.३/७.७८.३

६६. इन्द्रेण मन्युना वयमभि ष्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति।।— अ.७.९३.१/७.९८.१

६७. ज्यायान् निमिषतोऽसि तिष्ठतो ज्यायान्त्समुद्रादसि कृप मन्यो। ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।।— अ.९.२.२३

६८. क्रोधो वृक्षौ मन्युराण्डौ प्रजा शेपः।।— अ.९.७.१३/९.१२.१३

६९. यन्मन्युर्जायामावहत् संकल्पस्य गृहादधि। क आसं जन्याः के वराः क उ ज्येष्ठवरोऽभवत्।। (दे.मन्युः)— अ.११.८.१/११.१०.१

७०. यत् त्वा क्रुद्धाः प्रचक्रुर्मन्युना पुरुषे मृते। सुकल्पमग्ने तत् त्वया पुनस्त्वोद् दीपयामसि।।— अ.१२.२.५

७१. य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति। आ स देवेषु वृश्चते ब्राह्मणानां च मन्यवे।।— अ.१२.४.१२

७२. ये वशाया अदानाय वदन्ति परिरापिणः। इन्द्रस्य मन्यवे जाल्मा आ वृश्चन्ते अचित्त्या।।— अ.१२.४.५१

७३. स यद् देवाननु व्यचलदीशानो भूत्वानुव्यचलन्मन्युमन्नादं कृत्वा। मन्युनान्नादेनान्न-मत्ति य एवं वेद।।— अ.१५.१४.१९

७४. नमो वः पितरो भामाय नमो वः पितरो मन्यवे।।— अ.१८.४.८२

७५. यन्मे छिद्रं मनसो यच्च वाचः सरस्वती मन्युमन्तं जगाम। विश्वैस्तद् देवैः सह संविदानः सं दधातु बृहस्पतिः।।— अ.१९.४०.१

७६. समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः।।— अ.२०.१०७.१

७७. स्वप्नं तन्द्रीं मन्युम् अशनयाम् अक्षकाम्यां स्त्रीकाम्याम् इति। एते ह वै पाप्मानः पुरुषम् अस्मिन् लोके सचन्ते।— जै.ब्रा.१.९८

७८. अथानुमन्त्रयेत प्राणैर् अमुष्य प्राणान् वृङ्क्ष्व। तक्षणेन तेक्षणीयसायुर् अस्य प्राणान् वृङ्क्ष्व। क्रुद्ध एनं मनुन्या दण्डेन जहि। धनुर् एनम् आतत्येष्वा विध्य इति।— जै.ब्रा.१.१२९

७९. षड् वै पुरुषे पाप्मानष् षड् विषुवन्त स्वप्नश् च तन्द्री च मन्युश् चाशनया चाक्षकाम्या च स्त्रीकाम्या च।— जै.ब्रा.२.३६३

८०. यद् एको ऽध्यगच्छद् यद् एको यद् एकस् तद् अस्य मन्यौ योनाव् असिञ्चन्। तत इन्द्रस् संभवत्। तद् एषाभ्यनूच्यते -अश्वाद् इयायेति यद् वदन्त्य् ओजसो जातम् उत मन्य एनम्। मन्योर् इयाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद इति। मन्योर् इयायेति यद् अस्य मन्यौ योनाव् असिञ्चन्। हर्म्येषु तस्थाव् इति हृदयान्य् उ वै हर्म्याणि।--- जै.ब्रा.३.३६५

८१. प्रजापतेर्विस्रस्ताद्देवता उदक्रामन्। तमेक एव देवो नाजहात्-मन्युरेव। सोऽस्मिन्नन्तर-विततोऽतिष्ठत्। सोऽरोदीत्। तस्य यान्यश्रूणि प्रास्कन्दन्-तान्यस्मिन्मन्यौ प्रत्यतिष्ठन्। स एव शतशीर्षा रुद्रः समभवत्-सहस्राक्षः शतेषुधिः।---- श.ब्रा.९.१.१.६

८२. नमस्ते रुद्र मन्यवे इति। य एवास्मिन्त्सोऽन्तर्मन्युर्विततोऽतिष्ठत्-तस्मा एतन्नमस्करोति।--- श.ब्रा.९.१.१.१४

८३. सौत्रामणी : व्याघ्रलोमानि भवंति। मन्युमेव राज्यमारण्यानां पशूनामवरुंधे।— श.ब्रा.१२.७.२.८

८४. पुनराधानमन्त्राः :- यत्त्वा क्रुद्धः परोवप मन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि। यत्ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्।— तै.सं.१.५.३.२

८५. --- यत्ते मन्युपरोप्तस्येत्याह देवताभिरेव एनँ सं भरति वि वा एतस्य यज्ञश्छिद्यते योऽग्निमुद्वासयते--- — तै.सं.१.५.४.२

८६. राजसूयविषयस्य रथेन विजयस्याभिधानम् (वाराही उपानह का त्याग) :- पशूनां मन्युरसि तवेव मे मन्युर्भूयात्नमो मात्रे पृथिव्यै माऽहं मातरं पृथिवीं हिंसिषं मा मां माता पृथिवी हिँसीद्— तै.सं.१.८.१५.१

८७. जयादिहेतुपशुविधिः :- इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तँ स्वेन भागधेयेनोप धावति स एवास्मिन्निद्रियं मन्युं मनो दधाति--— तै.सं.२.१.३.१

८८. इन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निवपेत्सङ्ग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा सङ्ग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तँ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति---— तै.सं.२.२.८.२

८९. भक्षमन्त्राभिधानम् :--नमो वः पितरो मन्यवे--— तै.सं.३.२.५.६

९०. चित्याग्निहोमोक्तिः :- नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः।— तै.सं.४.५.१.१

९१. वसोर्धाराभिधानम् : ज्यैष्ठ्यँ च म आधिपत्यं च मे मन्युश्च मे भामश्च मे— तै.सं. ४.७.२.१

९२. विहव्याख्येष्टकाभिधानम् : अग्निर्मन्युं प्रतिनुदन्पुरस्तात् अदब्धो गोपाः परि पाहि नस्त्वम्।— तै.सं.४.७.१४.२

९३. अश्वमेधशेषभूतचतुर्थपशुसंघविधिः :- मन्यवे स्वजः---— तै.सं.५.५.१४.१

९४.-नमो वः पितरो मन्यवे।-— तै.ब्रा. १.३.१०.८

९५. पशूनां मन्युरसि तवेव मे मन्युर्भूयादिति वाराही उपानहावुपमुञ्चते। पशूनां वा एष मन्युः। यद्वराहः। तेनेव पशूनां मन्युमात्मन्धत्ते। — तै.ब्रा.१.७.९.४

९६. त्वया मन्यो सरथमारुजन्तः। हर्षमाणासो धृषता मरुत्वः।---मन्युर्भगो मन्युरेवाऽऽस देवः। मन्युर्होता वरुणो विश्ववेदाः। मन्युं विश ईडते देवयन्तीः। पाहि नो मन्यो तपसा श्रमेण।।— तै.ब्रा.२.४.१.११

९७. यानि नो जिनन्धनानि। जहर्थ शूर मन्युना। इन्द्रानुविन्द नस्तानि। अनेन हविषा पुनः।— तै.ब्रा.२.५.३.१

९८. ओजोऽस्योजो मयि धेहि। मन्युरसि मन्युं मयि धेहि। महोऽसि महो मयि धेहि। सहोऽसि सहो मयि धेहि। — तै.ब्रा.२.६.१.५

९९. ----जिह्वा मे भद्रम्। वाङ्महः। मनो मन्युः। स्वराड् भामः।---- — तै.ब्रा.२.६.५.४

१००. होता यक्षद्वनस्पतिम्। शमितारँ शतक्रतुम्। भीमं न मन्युँ राजानं व्याघ्रं नमसाऽश्विना भामम्।--- तै.ब्रा.२.६.११.८

१०१. ईशायै मन्युँ राजानं बर्हिषा दधुरिन्द्रियम्। वसुवने वसुधेयस्य वियन्तु यज।— तै.ब्रा.२.६.१४.६

१०२. पुरोडाशस्य याज्या : आभिः स्पृधो मिथतीररिषण्यन्। अमित्रस्य व्यथया मन्युमिन्द्र। आभिर्विश्वा अभियुजो विषूचीः। आर्याय विशोऽवतारीर्दासीः।।— तै.ब्रा.२.८.३.३

१०३. हविषस्य पुरोनुवाक्या : अयँ शृण्वे अध जयन्नुत घ्नन्। अयमुत प्र कृणुते युधा गाः। यदा सत्यं कृणुते मन्युमिन्द्रः। विश्व दृढं भयत एजदस्मात्।।— तै.ब्रा.२.८.३.३

१०४. पुरोडाशस्य पुरोनुवाक्या : ब्रह्मणस्पतेरभवद्यथा वशम्। सत्यो मन्युर्महिकर्मा करिष्यतः। यो गा उदाजत्स दिवे वि चाभजत्। महीव रीतिः शवसा सरत्पृथक्।।— तै.ब्रा.२.८.५.२

१०५. मन्यवेऽयस्तापम्। क्रोधाय निसरम्। शोकायाभिसरम्।--- तै.ब्रा.३.४.१०.१

१०६. ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।— तै.ब्रा. ३.१०.८.९

१०७. ईर्ष्यासूये बुभुक्षाम्। मन्युं कृत्यां च दीधिरे। रथेन किँशुकावता। अग्ने नाशय संदृशः।।— तै.आ.१.२८.१

१०८. आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः--- तै.आ.१०.१४.१

१०९. अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। अहस्तदवलुम्पतु।— तै.आ. १०.२४.१

११०. सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यद्रात्रिया पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुम्पतु।--- तै.आ. १०.२५.१

१११. तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्नि --- तै.आ. १०.६४.१

११२. मन्युरकार्षीन्नमो नमः। मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा।। (श्रावणी पूर्णिमा को प्रातःकाल जपा जाने वाला मन्त्र)— तै.आ. परिशिष्ट ६२

११३. इन्द्राय मन्युमते मनस्वत एकादशकपालं निर्वपेत् संग्रामे मन्युना वै वीर्यं करोतीन्द्रियेण जयति मन्युं चैवेष्विन्द्रियं च सयुजौ कृत्वा तयोर्मनो जित्यै दधाति-— काठक सं.१०.८

११४ .आदित्यो वै तेज ओजो बलं---मनो मन्युर्मनुर्मृत्युः--- महानारायणोपनिषद १२.३

११५. अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्।---सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्।-- महानारायणोपनिषत् १४.३

११६. कामोऽकार्षीन्नाहं करोमि---मन्युरकार्षीन्नाहं करोमि मन्युः करोति-— महानारायणोपनिषत् १८.२

११७. तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी----- काम आज्यं मन्युः पशुः---- महानारायणोपनिषत् २५.१

११८. यस्ते मन्योरिति च चतुर्दशर्चस्य सूक्तस्य रुद्रो दुर्वासास्तपनपुत्रो मन्युर्देवता। अपनिलयन्तामिति बीजम्।-- वनदुर्गोपनिषत् ४५९

११९. अग्न्याधेय/पुनराधेय : यत्त्वा क्रुद्धः परोवपेति दक्षिणाग्निम्। यत्ते मन्युपरोप्तस्येतीतरान्।— आप.श्रौ.सू.५.२७.१२

१२०. अग्निष्टोम प्रातःसवनम् : इन्द्रेण मन्युना युजावबाधे पृतन्यता। घ्नता वृत्राण्यप्रतीति शुक्रं यजमानो ऽन्वारभत आ होमात्।— आप.श्रौ.सू. १२.२२.५

१२१. राजसूयः :- पशूनाम् मन्युरसीति वाराही उपानहावुपमुच्य नमो मात्र इत्यवरोक्ष्य-न्पृथिवीमभिमन्त्र्यवरुह्य मणीन्प्रतिमुञ्चते।— आप.श्रौ.सू. १८.१७.१२

१२२. अश्वमेधः :- वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासत इति वैमृधीभ्यां यजमानो मुखं विमृष्टे।— आप.श्रौ.सू.२०.२०.७

१२३. द्वादशाहः :- अरेपसः समोकसः सचेतसः सरेतसः स्वसरे मन्युमन्तश्चिदाकोरिति।— आप.श्रौ.सू.२१.९.१५

१२४. मन्युसूक्ते निविद्धाने लिङ्गक्लृप्ते। (यस्ते मन्यो इति तथा त्वया मन्यो इति सूक्तों में प्रथम निष्केवल्य है तथा दूसरा हर्षमाणासो धृषिता मरुत्व में मरुत्वलिङ्ग से मरुत्वतीय है-टीका)— शांखायन श्रौ.सू.१४.२२.५

१२५. यानि नो धनानि क्रुद्धो जिनासि मन्युना। इन्द्रानुविद्धि नस्तान्यनेन हविषा पुनः।-आश्वलायन श्रौ.सू.२.१०.१२

१२६. श्येन व अजिर नामक दो एकाह : अहं मनुर्गर्भे नु संस्त्वया मन्यो यस्ते मन्यविति मध्यंदिनौ।— आश्व.श्रौ.सू.९.७.२

१२७. विनुत्यभिभूत्योरिषुवज्रयोश्च मन्युसूक्ते।— आश्व.श्रौ.सू.९.८.१९

१२८. उपमन्यूनां वासिष्ठाभरद्वस्विन्द्रप्रमदेति----- आश्व.श्रौ.सू.१२.१५.२

१२९. यत्त्वा क्रुद्धः परोवप मन्युनेति तिसृभिस्त्रिः समिन्द्धे।— मानव श्रौ.सू. १.६.५.७

१३०. इन्द्रेण मन्युनेति यजमानो जपति।— मानव श्रौ.सू. २.४.१.१५

१३१. द्वैध सूत्र : अध्याय २० से लेकर अध्याय २३ तक विभिन्न कर्मकाण्डों के संदर्भ में बौधायन, शालीकि, औपमन्युओं तथा उपमन्यवीपुत्र के दृष्टिकोणों में भेदों का कथन— बौधायन श्रौ.सू.

१३२. उपमन्यव औपगवा माण्डलेखयः कापिञ्जला जालागतास्तपोलोकास्त्रैवर्णश्चैव पार्णागारिः सुराक्षराः शैलालयो महाकर्णायना वालशिखा औद्राहमानयो बालायना भागुरिथ्थायना कुण्डोदरायणा लाक्ष्मणेया काचान्तयो वार्काश्वकय आनृक्षरायणा आलबवाः कपिकेशाः इत्येत उपमन्यवस्तेषां त्र्यार्षेय प्रवरो भवति वासिष्ठैन्द्रप्रमदाभरद्वसवेति होताभरद्वसुवदिन्द्र-प्रमदवद्वसिष्ठवदित्यध्वर्युः।— बौधा.श्रौ.सू.प्रवर ४७

## उपानह

१. दामयतः पदो रोगान् उपानहौ दण्डस् त्वा दत्तः परि पातु सर्पात्।— पैप्पलाद सं.७.१५.८

२. आ नयामि ते मनो अश्वम् इवाश्वाभिधान्या। उप ते मुञ्चे मनः पदोर् उपानहौ यथा।।— पै.सं.१९.३७.४

३. प्रतीचीनान् वो अभ्य् अधाम् अश्वम् इवाश्वाभिधान्या। कृण्वे वो मामके वशे पदोर् उपानहौ यथा।।— पै.सं.२०.५२.५

४. वृष्ट्यै त्वोपनह्यामि इति कृष्णाजिने पिण्डीरुपनह्यति।— मानव श्रौ.सू.५.२.६.७

५. ऊर्ध्वं पूर्वाहिकीभ्यां कृष्णाजिनस्योपानहं प्रतिमुच्यापामिदं न्ययनं नमस्ते हरसे शोचिष इति द्वाभ्यामग्निमाक्रामति।— मानव श्रौ.सू. ६.२.४.१६

'६. वृष्णस्संदानमसि वृष्ट्यै त्वोपनह्यामि वृषा ह्यश्वो वृषा पर्जन्यः-— काठक सं. ११.९,११.१०

७. कृष्णाजिन उपनह्यति ऋक्सामयोर्वा एतद्रूपं यत्कृष्णाजिनं ऋक्सामाभ्यामेवस्मै वृष्टिमिच्छति— काठक सं. ११.१०

८. देवानामेष उपनाह आसीदपां पतिरोषधीनाम्— काठक सं. १३.९

९. सरस्वत्यै सत्यवाचे चरुस्तिसृधन्वं शुष्कदृतिर्दण्ड उपानहौ तद्दक्षिणाश्वो वा शोणकर्णः।— काठक सं. १५.९

१०. वरुणमेनिर्वा एष उपनद्ध उदुतिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इत्यूर्ध्वामेव वरुणमेनिमुत्सुवति-— काठक सं. १९.५

११. कृष्णाजिनस्योपानहौ कुरुते ब्रह्मणो वा एतद्रूपं यत् कृष्णाजिनं मृत्युरग्निर्ब्रह्मणैव मृत्योरन्तर्धत्तेऽन्तर्मृत्योर्धत्तेऽन्तरमन्नाद्यादन्यतरामुपानहं कुर्वीतान्तर्मृत्योर्धत्तेऽवान्नाद्यं रुन्द्धे-— काठक सं. २१.७

१२. छन्दांसि मीयमानो वरुण उपनद्धः पूषा सोमक्रयण्यां-— काठक सं. ३४.१४

१३. यद् दीक्षितानां प्रमीयेत तं दग्ध्वास्थान्य् उपनह्यापभज्य सोमं यो ऽस्य नेदिष्ठतमस् स्यात् तेन सह दीक्षयित्वा याजयेयुः।— जै.ब्रा.१.३४५

१४. क्रीत्वा (सोमं) तु नानोपनह्यति। नानर्त्विजो भवन्ति।— जै.ब्रा.२.१६५

१५. वरुणदेवत्यो वा एष तावद्यावदुपनद्धो यावत्परिश्रितानि प्रपद्यते।---- यज्ञो वै सुतर्मा नौः कृष्णाजिनं वै सुतर्मा नौ---— ऐ.ब्रा.१.१३

१६. हिरण्यमिव ह वा एष एतद्देवेभ्यश्छदयति यत्कृष्णाजिनम्।----वरुणदेवत्यो वा एष तावद्यावदुपनद्धो यावत्परिश्रितानि प्रपद्यते-— ऐ.ब्रा.१.३०

१७. कारीरीष्टिविधिः :- ---वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामि।— तै.सं.२.४.७.२

१८. कारीरीष्टिमन्त्रव्याख्यानम्: :- वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनं समर्धयति वर्षस्यवरुद्ध्यै।— तै.सं. २.४.९.४

१९. वृषालम्भन कर्म : देवानामेष उपनाह आसीदपां गर्भ ओषधीषु न्यक्तः। सोमस्य द्रप्समवृणीत पूषा बृहन्नद्रिरभवत्तदेषाम्।।— तै.सं. ३.३.९.१

२०. यज्ञतन्वाख्येष्टका :----वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः--— तै.सं. ४.४.९.१

२१. संभृतमृदो यज्ञभूमौ समाहरणम् : सुजातो ज्योतिषा सहेत्यनुष्टुभोप नह्यत्यनुष्टुप् सर्वाणि छन्दांसि छन्दांसि खलु वा अग्नेः प्रिया तनूः----वेदुको वासो भवति य एवं वेद वारुणो वा अग्निरुपनद्ध--— तै.सं. ५.१.५.३

२२. वरुणो वा एष यजमानमभ्यैति यदग्निरुपनद्ध-- — तै.सं.५.१.५.९

२३. उखा निर्माण : वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्रंसयति सवितृप्रसूत एवास्य विषूचीं वरुणमेनिं वि सृजत्यप उप सृजत्यापो वै शान्ताः--— तै.सं.५.१.६.१

२४. परिषेचनाद्यभिधानम् : मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्ते— तै.सं.५.४.४.४

२५. ब्रह्म वै छन्दांसि ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी उपानहावुपमुञ्चते छन्दोभिरेवाऽऽत्मानं छादयित्वाऽग्निमुप चरत्यात्मनोऽहिंसायै— तै.सं.५.६.६.१

२६. सोमोन्मानम् : वाससोप नह्यति सर्वदेवत्यं वै वासः-- -पशवो वै सोमः प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति-— तै.सं.६.१.९.६

२७. क्रीतसोमस्य शकटेन नयनम् : वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शान्त्या-- — तै.सं.६.१.११.१

२८. सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति रक्षसामपहत्यै— तै.सं.६.१.११.४

२९. अदाभ्य ग्रह : उपनद्धस्य गृह्णाति--— तै.सं.६.६.९.२

३०. गवामयनगुणविकाररूपोत्सर्गः :- यथा दृतिरुपनद्धो विपतत्येवं संवत्सरो वि पतेद----— तै.सं.७.५.६.२

३१. त्र्यम्बकहविर्यागः :- तान् द्वयोर्मूतकयोरुपनह्य, वेणुयष्ट्यां वा कुपे वा उभयत आबध्य -— श.ब्रा.२.६.२.१७

३२. यूपारोहणम् : आश्वत्थेषु पलाशेषूपनद्धा भवन्ति। स यदेवादो ऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत। तस्माद्--- श.ब्रा.५.२.१.१७

३३. अभिषेकोत्तरकर्माणि : अथ वाराह्याऽउपानहा ऽउपमुञ्चते। अग्नौ ह वै देवा घृतकुम्भं प्रवेशयांचक्रुः। ततो वराहः सम्बभूव। तस्माद् वराहो मेदुरः। घृताद्धि सम्भूतः। तस्माद्वराहे गावः सञ्जानते। स्वमेवैतद्रसमभि संजानते। तत्-पशूनामेवैतद्रसे प्रतितिष्ठति। तस्माद्वाराह्याऽउपानहा-ऽउपमुञ्चते।— श.ब्रा.५.४.३.१९

३४. अथ राजानं क्रीत्वा द्वेधोपनह्य परिवहन्ति। ततोऽर्धमासन्द्यामासाद्य प्रचरति।--- श.ब्रा. ५.४.५.१५

३५. केशवपनीय अतिरात्र : आसन्द्या उपानहाऽउपमुञ्चते। उपानद्भ्यामधि यदस्य यानं भवति, रथो वा किञ्चिद्वा-सर्वं वा ऽएष इदमुपर्युपरि भवति।— श.ब्रा.५.५.३.७

३६. अथैनमुपनह्यति। योनौ तद्रेतो युनक्ति। तस्माद्योनौ रेतो युक्तं न निष्पद्यते। योक्त्रेण। योक्त्रेण हि योग्यं युञ्जन्ति।— श.ब्रा.६.४.३.७

३७. अथैनं विष्यति। तद् यदेवास्यात्रोपनद्धस्य संशुच्यति-तामेवास्मादेतच्छुचं बहिर्धा दधाति।— श.ब्रा.६.४.४.२०

३८. यदि दीक्षितानां प्रमीयेत दग्ध्वास्थीन्युपनह्य यो नेदिष्ठो स्यात्तं दीक्षयित्वा सह यजेरन्।— ताण्ड्य ब्रा. ९.८.१

३९. कुण्डपायिनामयनम् : मासन्दीक्षिता भवन्ति ते मासि सोमं क्रीणन्ति तेषां द्वादशोपसद उपसद्भिश्चरित्वा सोममुपनह्य मासमग्निहोत्रञ्जुह्वति।--- तां.ब्रा. २५.४.१

४०. अग्निष्टोम प्रातःसवनम् : उपनद्धस्य राज्ञस्त्रीनंशून्प्रवृहति।— आप.श्रौ.सू. १२.७.१९

४१. अग्निचयन : मृत्खनने अप आनीय समुद्यम्य कृष्णाजिनस्यान्तान्सुजातो ज्योतिषा सहेति क्षौमेण मौञ्जेनार्कमयेण वा दामनोपनह्यति।— आप.श्रौ.सू. १६.३.७

४२. व्रीहियवश्यामाकान्क्रीत्वा क्षौमे वासस्युपनद्धान्व्रीहींस्तोक्मानि कुर्वन्ति।— आप.श्रौ.सू. १९.५.७

४३. --- तिस्रः पिण्डीकृत्वा पुष्करपलाशैः संवेष्ट्य समुद्यम्य कृष्णाजिनस्यान्तान्वृष्णो अश्वस्य संदानमसीति कृष्णेन दाम्नोपनह्यति।— आप.श्रौ.सू. १९.२६.१

४४. अदाभ्यग्रहं : वसवस्त्वा प्रवृहन्त्वित्येतैरुपनद्धस्य राज्ञस्त्रीनंशूनादाय---- वैखा.श्रौ.सू. १५.१०

४५. प्रातः सवनायालमुपनद्धस्य राज्ञो ऽर्धमादत्त इतरमुष्णीषेणोपनह्योद्वृह्य पूर्व-वत्सादयति-— वैखा.श्रौ.सू. १५.१३

४६. अग्निचयन : योक्त्रेण त्रिवृता सुजातो ज्योतिषा सहेत्युपनह्येद्-— वैखा.श्रौ.सू.१८.१

४७. अथोपनद्धां मृत्तिकां वि पाजसेति विस्रंसयत्यापो हि ष्ठा मयोभुव इति-— वैखा.श्रौ.सू. १८.१

४८. कार्ष्णाजिनीरुपानह उपमुञ्चते चिते त्वेत्यध्वर्युराचिते त्वेति प्रतिप्रस्थाता मनश्चिते त्वेति ब्रह्मा तपश्चिते त्वेति यजमानश्चिते त्वेति वा सर्वे तूष्णीं वा-— वैखा.श्रौ.सू.१८.१४

४९. अग्निचयनम् : अथ कार्ष्णाजिनीरुपानह उपमुञ्चन्ते चिते त्वेत्यध्वर्युराचिते त्वेति प्रतिप्रस्थाता मनश्चिते त्वेति ब्रह्मा तपश्चिते त्वेति यजमानश्चिते त्वा चिते त्वेत्येव वा सर्वे ऽपि वा तूष्णीमेव— बौधा.श्रौ.सू.१०.२३

५०. --- तिस्रः पिण्डीः कृत्वा समुद्यित्य कृष्णाजिस्यान्तान्संदानेनोपनह्यति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोपनह्यामीति---अथैना अनसः प्रथमायां गधायामाबध्नाति।— बौधा.श्रौ.सू.१३.३८

५१. उपनद्धस्य राज्ञस्त्रीनंशून्प्रवृहति वसवस्त्वा प्रवृहन्तु गायत्रेण छन्दसाग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्रवृहन्तु त्रैष्टुभेन छन्दसा-— बौधा.श्रौ.सू.१४.१२

५२. पुष्करपर्णे (पिण्डं) निदधाति। --- आस्तीर्णयोरन्तानुद्वृह्णाति सुजात इति। त्रिवृता

मुञ्जयोक्त्रेणोपनह्यति वासो अग्न इति।— कात्यायन श्रौ.सू.१६.३.१

५३. दामनी द्वे द्वे। उपानहौ च कर्णिन्यौ कृष्णे स्यातामित्येके।— कात्यायन श्रौ.सू. २२.४.२२

५४. अथामो दैवोपानहि पादं जरितारोथामो-- — आश्व.श्रौ.सू.८.३.१९

५५. सोममुपनह्य प्रवर्ग्यपात्राण्युत्साद्योपनह्य वा मासमग्निहोत्रं जुह्वतति।-- — आश्व.श्रौ.सू.१२.३.५

## उर्वशी

१. मर्तानां चिदुर्वर्शीरकृप्रन् वृधे चिदर्य उपरस्यायोः— ऋ. ४.२.१८

२. अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु। उर्वशी वा बृहद्दिवा गृणानाऽभ्यूर्ण्वाना प्रभृथस्यायोः।। — ऋ. ५.४१.१९

३. उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधि जातः। द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त।। — ऋ. ७.३३.११

४. अथाधरारणिं निदधाति-उर्वश्यसि-इति। अथोत्तरारण्याऽऽज्यविलापनीमुपस्पृशति-आयुरसि-इति। तामभिनिदधाति-पुरूरवा असि- इति। उर्वशी वाऽअप्सराः।। पुरूरवाः पतिः। अथ यत् तस्मान्मिथुनादजायत-तदायुः।— श. ३.४.१.२२

५. आश्वत्थ्योररण्योरुत्पत्तिख्यापकं ब्राह्मणम् : उर्वशी हाप्सरा पुरूरवसमैडं चकमे। तं ह विंदमानोवाच। त्रिः स्म माऽह्नो वैतसेन दंडेन हतात्। अकामां स्म मा निपद्यासै।---- श. ११.५.१.१

६. पञ्चचूडेष्टकोपधानम् : अथ मध्ये। अयमुपर्यर्वाग्वसु इति। पर्जन्यो वाऽउपरि।----- उर्वशी च पूर्वचित्तिश्चाप्सरसौ इति। दिक्चोपदिशा चेति ह स्माह माहित्थिः। आहुतिश्च तु ते दक्षिणा च।-- — श. ८.६.१.२०

७. क्रय प्रदेश को जाती हुई सोमक्रयणी गौ के पद संग्रह का अभिधान :---सं देवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव संदृशि माऽहँ रायस्पोषेण वि योषम्। — तै. सं. १.२.५.२

८. यूपे पशुनियोजनार्थमुपाकरणाभिधानम्------ अग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि पुरूरवा घृतेनाक्ते वृषणं दधातां-----— तै. सं. १.३.७.१

९. चोडाख्येष्टकाभिधानम् : अयमुपर्यर्वाग्वसुस्तस्य----उर्वशी च पूर्वचित्तिश्चाप्सरसौ-- — तै. सं. ४.४.३.२

१०. अग्निमन्थनाभिधानम् : अग्नेर्जनित्रमसीत्याहाग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इत्याह वृषणौ ह्येतावुर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणं दधाथामित्याह-----— तै. सं. ६.३.५.२

११. उर्वशी वै पुरूरवस्यासीत् सान्तर्वती देवान् पुनः परैत् सोऽदो देवेष्वायुरजायत तामन्वागच्छत् तां पुनरयाचत तामस्मै न पुनरददुस्तस्मा आयुं प्रायच्छन्नेष आयुरित्यग्निं चोख्यमुखायाँ समुप्यैतमाधत्स्व तेन प्रजनिष्यस इति स-------काठक सं. ८.१०

१२. धिष्ण्यम् : उर्वश्यस्यायुरसि पुरूरवा असीति माता वा उर्वश्यायुर्गर्भः पिता पुरूरवा रेतो घृतं यद् घृतेनारणी समनक्ति मिथुन एव रेतो दधाति -काठक सं. २६.७

१३. ---वृषणौ स्थ इत्यभिप्राण्यारण्यौ। तयोरुपर्यधरारणिम्। दक्षिणतो मूलान्। पश्चात्प्रजननामुर्वश्यसीत्यायुरसीति।-— कौशिक सूत्र ६९.१७

१४. पशुबन्धः :- अथारणी आदत्त उर्वश्यस्यायुरसि पुरूरवा इत्यथैने आज्यस्थाल्याँ समनक्ति घृतेनाक्ते वृषणं दधाथामित्यथ प्रजातीर्वाचयति-— बौधा. श्रौ. सू. ४.५

१५. अग्निष्टोम प्रातःसवम् : तोते राय इति यजमान पत्न्या अथ पत्नीं सोमक्रयण्या समीक्षयति सं देवि देव्योर्वश्या पश्यस्वेत्यथ पत्नी यजमानमीक्षते त्वष्टीमती ते सपेय सुरेता रेतो दधाना-— बौधा. श्रौ. सू. ६.१३

१६. वृषणौ स्थ इति दूर्वे वा शकले वा निदध्यादुर्वश्यसीत्यधरारणिमाददीत पुरूरवा इत्युत्तरारणिमथैने-— बौधा. श्रौ. सू. २०.२७

१७. सदोपसदौ : पुरूरवा ह पुरा ऐडो राजा कल्याण आस तँ होर्वश्यप्सराभिदध्यौ तँ संवत्सरं कामयमानानुचचारैवँ ह स्म वै पूर्वे ऽभिश्राम्यन्ति— बौधा. श्रौ. सू. १८.४४

१८. अपि वाग्निं मथित्वोपाकुर्यात्। अग्नेर्जनित्रमसीत्यधिमन्थनं शकलं निदधाति। वृषणौ स्थ इति प्राञ्चौ दर्भौ। उर्वश्यसीत्यधरारणिमादत्ते। पुरूरवा इत्युत्तरारणिम्।---— आप. श्रौ. सू. ७.१२.११

१९. सं देवि देव्योर्वश्या पश्यस्वेति सोमक्रयण्या पत्नीं संख्यापयति। त्वष्टीमती ते सपेयेति पत्नी--- — आप. श्रौ. सू. १०.२३.६

२०. चातुर्मास्यानि : अग्नेर्जनित्रमिति शकलमादाय वेद्यां करोति। वृषणाविति कुशतरुणे तस्मिन्। उर्वश्यसीत्यधरारणिं तयो। आयुरसीत्युत्तरयाऽऽज्यस्थालीं सँस्पृश्य पुरूरवा इत्यभिनिधानं तया।— कात्या. श्रौ. सू ५.१.२२

२१. तत्तल्लोकेच्छया अप्सरसा उर्वश्या तस्मिन् गोवर्धनाद्रौ तप आतन्यत।-सामरहस्योपनिषद

२२. शशपृष्ठात् गौतमः, वसिष्ठ उर्वश्याम्, अगस्त्यः कलशे जात इति श्रुतत्वात्।— वज्रसूचिकोपनिषत्

## उलूक

१. उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम्। सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र।।— ऋ. ७.१०४.२२

२. यदुलूको वदति मोघमेतद्यत् कपोतः पदमग्नौ कृणोति। यस्य दूतः प्रहित एष एतत् तस्मै यमाय नमो अस्तु मृत्यवे।।— ऋ. १०.१६५.४

३. अमून् हेतिः पतत्रिणी न्येतु यदुलूको वदति मोघमेतत्। यद् वा कपोतः पदमग्नौ कृणोति।। यौ ते दूतौ निर्ऋत इदमेतोऽप्रहितौ प्रहितौ वा गृहं नः। कपोतोलूकाभ्यामपदं तदस्तु।।— अथर्व ६.२९.२

४. उलूकयातुं शुशुलूकयातुं— अथर्व. ८.४.२२

५. विष्कन्धस्य काष्ठस्य कर्दमस्योलूक्या। अपस्फानस्य कृत्या यास् तेषां त्वं रधूगिले जहि।।— पैप्पलाद सं. १.५८.१

६. उलूकयातुर् भृमलो यश् च यातुस् त्यं या नुदषि वधास् सपित्र्यास् तेन श्रयाहिर् उत मंहिधेहिभिः।।— पैप्पलाद सं. १३.१०.४

७. उलूकयातुं शुशुलूकयातुं— पैप्पलाद सं. १६.११.२

८. कर्णादृश द्रतामह उलुकीं केशिनीं क्रकूम्। षडुरिमं बर्हिष्यं नाशयामस् सदान्वाः।।— पै. सं. १७.१२.३

९. यद् उलूको वदति मोघम् एतद् यत् कपोतः पदम् अग्नौ कृणोति।-— पै. सं. १९.२७.११, १९.४८.३

१०. त्रिंशन् मुष्का कध्वस्य दश मुष्काव् उलूक्या।-— पै. सं. १९.५२.१५

११. सुमङ्गलेन वचसा केशिन् ग्रामं त्वं वद। ब्रह्माब्रह्मा तुव उलूकाच्छा वदामसि।।— पै. सं. २०.२७.७

१२. शग्मम् उलूक नो वद यं द्विष्मस् तम् इतो नय। राज्ञो यमस्य त्वा गृह एह मूषकवेह भागः।— पै. सं. २०.२७.९

१३. यस् त्वा पृतन्यो यद् उलूका न्य् उत् तान् अपक्षितः। स मे ध्रियमाणम् आ वहद् अप द्वेषः परा वहत्।।— पै. सं. २०.५४.६

१४. घ्नन्तु कृष्णाम् इव त्वचं सुभागम् अस्तु मे मुखम्। इन्द्रेण प्रेषित उलूक सं भजामि ते।।

--- -सूर्येण प्रेषित उलूक सं भजामि ते।।-----सोमेन प्रेषित उलूक सं भजामि ते।----- -बृहस्पतिना प्रेषित उलूक सं भजामि ते।----प्रजापतिना प्रेषित उलूक सं भजामि ते।— पै. सं. २०.५९.५

१५. ग्राह्या दूतो ऽस्य् उलूक सं भजामि ते। निर्ऋत्या दूतो ऽस्य् उलूक सं भजामि ते।। वरुणस्य दूतो ऽस्य् उलूक सं भजामि ते।। यमस्य दूतो ऽस्य् उलूक सं भजामि ते।। मृत्योर् दूतो ऽस्य् उलूक सं भजामि ते।— पै. सं. २०.६०.१

१६. इन्द्रानुवचनम् : कपोत उलूकश्शशस्ते नैर्ऋता— काठक सं. ४७.८

१७. इत्थादुलूक आपप्तत्। हिरण्याक्षो अयोमुखः। रक्षसां दूत आगतः। तमितो नाशयाग्ने, इति।— तै. आ. ४.३३

१८. अध्रिगू प्रैषः :-------ऊवध्यगोहं पार्थिवं खनतात्। अस्ना रक्षः सँसृजतात्। वनिष्ठुमस्य मा राविष्ट। उरूकं मन्यमानाः।— तै. ब्रा. ३.६.६.३

१९. वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितार इति ये चैव देवानां शमितारो ये च मनुष्याणां तेभ्य एवैनं तत्परिददाति, इति।— ऐ. ब्रा. २.७

२०. ----कपोत उलूक शशस्ते नैर्ऋता— तै. सं. ५.५.१८.१

२१. अथ---खर-करभ-मन्थ-कङ्क-कपोत-उलूक-काक-गृध्र-- संस्थान्युपरि पांसुमांसपेश्य-स्थिरुधिरवर्षाणि प्रवर्तन्ते-----तान्येतानि सर्वाणि वायुदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।— षड्विंश ब्रा.६.७.२

२२. अग्न्याधेयम् : उलूके मे श्वभ्यशः-— बौ. श्रौ. सू.२.५

२३. प्रवर्ग्य प्रायश्चित्तानि : अथ यद्युलूकोलूकी वाश्येत तमनुमन्त्रयत इत्थादुलूक आपप्तदित्यथ-— बौ. श्रौ. सू.९.१८

२४. अथ यदि गृध्रः सलावृकी भयेडको दीर्घमुख्युलूको भूतोपसृष्टः शकुनिर्वा वदेदसृङ्मुखः यदेतत्। यदीषितः। दीर्घमुखि। इत्थादुलूकः।— आप. श्रौ. सू. १५.१९.४

२५. अग्नीषोमीय पशुयाग प्रकरणम् : वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितार इत्यध्रिगौ-— शां. श्रौ. सू. ५. १७. ९, आश्व. श्रौ. सू. ३.३.१

२६. कण्टकशल्ययोलूकपत्रयासितालकाण्डया हृदये विध्यति।— कौशिक सूत्र ३५

२७. नर्दनं च बिडालानां क्षीरवृक्षनिषेषणम्। खरैर्दीप्तैरुलूकैश्च रसद्भिः सह विग्रहः।।— अथर्व परि. ६४.७.५

२८. गृहे यस्य पतेउदृध्र उलूको वा कथंचन। कपोत प्रविशेच्चैव जीवा वारण्यसंभवाः।।— अथर्व परि. ६७.३.१

२९. यद्याति वेश्म कपोतः प्रविशेत विशेषतः। राजवेश्मन्युलूको वा तत्त्याज्यमचिराउदृहम्।।— अथर्व परि. ७० ग.२७.९

३०. उत्पात : काकोलूककृकलासश्येननिपतिते राजछत्त्रे भग्ने ध्वजे-— अथर्व परि. ७२.२.६

३१. ---वृषदंशातिमार्जनमुलूक प्रतिगर्जनं श्येनगृध्रादीनां ध्वजाभिलपनं-— अथर्व परि. ७२.३.७

३२. उलूकस्य यथा भानुरन्धकारः प्रतीयते। स्वप्रकाशे परानन्दे तमो मूढस्य जायते।— आत्मप्रबोधोपनिषत् २५

## उलूखल

१. यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे। उलूखलसुतानामवेद्विन्द्र जल्गुलः।।

----------,-

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे। इह द्युमत्तमं वद जयतामिव दुन्दुभिः।।

---------- -ऋ.१.२८.१

२. ये व्रीहयो यवा निरूप्यन्ते अंशव एव ते। यान्युलूखलमुसलानि ग्रावाण एव ते।-— अथर्व. ९.६.१५

३. उलूखले मुसले यश्च चर्मणि। यो वा शूर्पे तण्डुलः कणः। यं वा वातो मातरिश्वा पवमानो ममाथाग्निष्टद्धोता सुहुतं कृणोतु।।— अथर्व. १०.९.२६

४. तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम्। द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी सप्तऋषय प्राणापानाः। चक्षुर्मुसलं काम उलूखलम्। दितिः शूर्पमदितिः शूर्पग्राही वातोऽपाविनक्।। अश्वाः कणा गावस्तण्डुला मशकास्तुषाः।— अथर्व. ११.३.१

५. यद्यत् कृष्णः शकुन एह गत्वा त्सरन् विषक्तं बिल आससाद। यद् वा दास्या३र्द्रहस्ता समङ्क्त उलूखलं मुसलं शुम्भतापः।।— अथर्व. १२.३.१३

६. महानग्न्युलूखलमतिक्रामन्त्यब्रवीत्। यथा तव वनस्पते निरघ्नन्ति तथैवति।।— अथर्व. २०.७०.६

७. यज्ञायुधसंभृत्याभिधानम् :---- कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि य एवं वेद मुखतोऽस्य यज्ञः कल्पते--— तै. सं. १.६.८.३

८. स्वयमातृण्णास्थापनम् : उलूखलमुप दधात्येषा वा अग्नेर्नाभि सनाभिमेवाग्निं चिनुतेऽहिंसाया औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्जमेवाव रुन्धे-— तै. सं. ५.२.८.७

९. आसन्द्याभिधानम् : प्रजापतिर्वा एष यदग्निस्तस्योखा चोलूखलं च स्तनौ तावस्य प्रजा उप जीवन्ति यदुखां चोलूखलं चोपदधातति ताभ्यामेव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे-- — तै. सं. ५.६.९.२

१०. षड्रात्रकथनम् : उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै-— तै. सं. ७.२.१.३

११. एषा वै विष्णोर्नाभिर्यदुलूखलमुपदधाति विष्णोरेव नाभा अग्निं चिनुत औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्जमेव मध्यतो दधाति यजमाने च प्रजासु च-— काठक सं. २०.७

१२. मनसा वै प्रजापतिर्यज्ञमतनुतौलूखलस्योद्वदितोरध्वर्युश्च यजमानश्च वाचं यच्छेतां-— काठक सं. ३२.७

१३. अन्वाहार्यपचने पिष्टलेपस्य होमे मन्त्रम् : उलूखले मुसले यच्च शूर्पे। आशिश्लेष दृषदि यत्कपाले। अवप्रुषो विप्रुषः संयजामि। विश्वे देवा हविरिदं जुषन्ताम्। — तै. ब्रा. ३.७.६.२१

१४. अग्निहोत्रम् : अथैतां चितां चिन्वन्ति।---- - पार्श्वयोर् मुसल च शूर्पे च पत्त उलूखलम्।-— जै. ब्रा. १.४८

१५. चक्रवती सदोहविर्धाने भवत, उलूखलबुध्नो यूप, उत्क्रान्त्या अनपभ्रंशाय।— जै. ब्रा. २.२९८

१६. उपगु-इन्द्र संवाद :---तं ह याजयांचकार। स्वयम् एव सदोहविर्धाने उत्तस्थतुः। उलूखले सोमम् अभिषुषाव।-— जै. ब्रा. ३.२००,२०१

१७. पात्रासादनम् : अथ तृणैः परिस्तृणाति। द्वन्द्वं पात्राण्युदाहरति------ -उलूखलमुसले।---- श. ब्रा. १.१.१.२२

१८. पुरोडाशकरणम् : अथ दक्षिणेनोलूखलमाहरति। नेदिह पुरा नाष्ट्रा रक्षांस्याविशानिति। ब्राह्मणो हि राक्षसामपहन्ता, तस्मादभिनिहितमेव सव्येन पाणिना भवति।।— श. ब्रा. १.१.४.६

१९. अथोलूखलं निदधाति-अद्रिरसि व्वानस्पत्यो ग्रावासि पृथुबुध्न इति वा। तद्यथैवाद सोमं राजानं ग्रावभिरभिषुण्वन्ति, एवमेवैतदुलूखल-मुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञमभिषुणोति। अद्रय इति वै तेषामेकं नाम। तस्मादाह-अद्रिरसीति। वानस्पत्य इति वानस्पत्यो ह्येष। ग्रावासि पृथुबुध्न इति। ग्रावा ह्येष, पृथुबुध्नो ह्येष।-------- अथ मुसलमादत्ते-बृहउद्ग्रावासि वानस्पत्य इति।— श. ब्रा.१.१.४.७

२०. तद्यदेतामत्र वाचं विसृजते-एष हि यज्ञ उलूखले प्रत्यष्ठात्। एष हि प्रासारि। तस्मादाह-वाचो विसर्जनमिति।।— श. ब्रा. १.१.४.८

२१. दक्षिणा ब्राह्मणम् : उलूखलमुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञं घ्नन्ति।— श. ब्रा. २.२.२.१

२२. माहेन्द्रग्रहः :- अथोपाकृत्यैतां वाचं वदति-अभिषोतारोऽभिषुणुत, औलूखलानुद्वादयत, अग्नीदाशिरं

विनय, सौम्यस्य वित्तादिति। ते वै तृतीयसवनायैवाभिषोतारोऽभिषुण्वन्ति। तृतीय-सवनायौलूखलानुद्वादयन्ति। तृतीयसवनायाग्नीदाशिरं विनयति।— श.ब्रा. ४. ३.३.१९

२३. दक्षिणादानम् : घ्नन्ति वाऽएतद्यज्ञम्-यदेनं तन्वते। यन्त्वेव राजानमभिषुण्वन्ति-तत् तं घ्नन्ति, यत्पशुं संज्ञपयन्ति, विशासति-तत् तं घ्नन्ति, उलूखलमुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञं घ्नन्ति।— श. ब्रा. ४.३.४.१

२४. अथ यत्-स्रुचाऽउपदधाति, यदुलूखलमुसले। या समिध आदधाति-सा वानस्पत्येष्टका।— श. ब्रा. ६.१.२.३०

२५. अथोलूखलमुसलेष्टकोपधानम् : अथोलूखलमुसलेऽउपदधाति। विष्णुरकामयत-अन्नादः स्यामिति। स एतेऽइष्टकेऽअपश्यत्-उलूखलमुसले। तेऽउपाधत्त। तेऽउपधायान्नादोऽ-भवत्। तथैवैतद्यजमानो यदुलूखलमुसलेऽ-उपदधाति, येन रूपेण यत्कर्म कृत्वा विष्णुरन्नादोऽभवत्-तेन रूपेण तत्कर्म कृत्वा-ऽन्नादोऽसानीति। तदेतत्सर्वमन्नम्-यदुलूखलमुसले। उलूखलमुसलाभ्यां ह्येवान्नं क्रियते। उलूखल-मुसलाभ्यामद्यते।-- प्रादेशमात्रे भवतः। प्रादेशमात्रो वै गर्भो विष्णुः। अन्नमेतद्।----औदुम्बरे भवतः। ऊर्ग्वै रस उदुम्बरः------ चतुः स्रक्ति भवति। चतस्रो वै दिशः। सर्वासु तद्दिक्षु वनस्पतीन्दधाति।---- -मध्ये सङ्गृहीतं भवति-उलूखलरूपतायै। यद्वेवोलूखलमुसलेऽउपदधाति। प्रजापतेर्विस्र-स्तात्प्राणो मध्यत उदचिक्रमिषत्। तमन्नेनागृह्णात्।— श. ब्रा. ७.५.१.१५

२६. सोऽब्रवीत्। अयं वाव मा सर्वस्मात्पाप्मन उदभार्षीदिति। यदब्रवीदुदभार्षीन्मेति-तस्मादुदुम्भर। उदुम्भरो ह वै तमुदुम्बर इत्याचक्षते-परोऽक्षम्।---- - उरु मेऽकरदिति-तस्मादुरूकरम्। उरूकरं ह वै तदुलूखलमित्याचक्षते। परोऽक्षम्-परोक्षकामा हि देवा। सैषा सर्वेषां प्राणानां योनि-यदुलूखलम्। शिरो वै प्राणानां योनिः।— श. ब्रा. ७.५.१.२२

२७. द्विदेवत्ययोपदधाति। द्वे ह्युलूखलमुसले।---- श. ब्रा. ७.५.१.२५

२८. अथोखामुपदधाति। योनिर्वाऽउखा। योनिमेवैतदुपदधाति। तामुलूखलऽउपदधाति। अन्तरिक्षं वाऽउलूखलम्। यद्वै किञ्चास्या ऊर्ध्वम्-अन्तरिक्षमेव तत्।---- — श. ब्रा. ७.५.१.२६

२९. -----इमे वै लोका उखा। इमे लोकाः प्रजापतिः। तामुलूखलऽउपदधाति। तदेनमेतस्मिन्त्-सर्वस्मिन्प्रतिष्ठापयति-प्राणेऽन्नऽऊर्जि।-- श. ब्रा. ७.५.१.२७

३०. उखोपरि होमः :- उदरमुखा। योनिरुलूखलम्। उत्तरोखा भवति-अधरमुलूखलम्। उत्तरं ह्युदरम्-अधरा योनिः। शिश्नं मुसलम्।---— श. ब्रा. ७.५.१.३८

३१. अथ यजुष्मत्यः-दर्भस्तम्बः,---- उलूखलमुसले, उखा,----— श. ब्रा. १०.४.३.१४

३२. अथ यदुत्तानं पुरुषमुपदधाति-उत्ताने स्रुचा उत्तानमुलूखलम्, उत्तानामुखां तदुत्तानश्चीयते।— श. ब्रा. १०.५.५.७

३३. घ्नंति वा एतद्यज्ञं, यदेनं तन्वते।------ उलूखलमुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञं घ्नन्ति।— श. ब्रा. ११.१.१.१

३४. यजमान को मृत जैसा मानने पर :---- - शिश्नस्यांते शम्याम्। आंडयोरंते वृषास्वौ। अन्वगुलूखलं च मुसलं च। अंतरेणोरू अन्यानि यज्ञपात्राणि। — श. ब्रा. १२.५.२७

३५. पिण्डपितृयज्ञोऽपराह्णेऽमावास्यायाम्। दक्षिणाग्नेः पुरस्ताच्छूर्पं स्थालीं स्फयं पात्रीमुलूखलमुसले च संसाद्य।-— शां. श्रौ. सू. ४.३.२

३६. यजमानस्य जीवतः मृत्यु कर्माणि : ऊर्वोरष्ठीवतोश्चोलूखलमुसले।— शां. श्रौ. सू. ४.१४.३२

३७. सरस्वत्या विनशने दीक्षा सारस्वतानाम्।---- उलूखलबुध्नो यूपः।— शां. श्रौ. सू. १३.२९.५

३८. ओदनेनोपयम्य फलीकरणानुलूखलेन जुहोति। एवमणून्।— कौशिक सूत्र १४.१९

३९. द्वादशाहान्तर्गत पंचरात्रे सारस्वतम् अयनम् ---- उलूखलबुध्न एषां यूपो भवति-— बौ. श्रौ. सू. १६.९

४०. अग्रेण हविर्धाने चर्मण्युलूखलमुसले निधायाँशून्समवक्षुदां चकार यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे। इह द्युमत्तमं वद जयतामिव दुन्दुभिरिति---— बौ. श्रौ. सू. १८.४१

४१. दर्शपूर्णमासस्य द्वैध सूत्राणि : कृष्णाजिनस्यास्तरण इति। स ह स्माह बौधायनो ऽविसृजन्नेतत्कर्म कुर्यात्कृष्णाजिनावधवनादास्तरणा-देवमुलूखलाध्यूहनादा-— बौ. श्रौ. सू. २०.६

४२. द्वैध सूत्राणि : उलूखलबुध्नो यूपो भवतीति। सर्वान्कारान्कुर्यादिति बौधायनः प्रोक्ष्यैनमुच्छ्रयेदिति शालीकिः प्रोक्ष्योपास्य यूपशकलमुच्छ्रयेदित्यौपमन्यवः।— बौ. श्रौ. सू. २३.१२

४३. अमावास्यायां पिण्डपितृयज्ञः :- अपरेणान्वाहार्यपचनं प्रत्यगुदग्ग्रीवे कृष्णाजिन उलूखले प्रतिष्ठिते दक्षिणाप्राची तिष्ठन्ती पत्न्यवहन्ति परापावमविवेकम्।— आप. श्रौ. सू. १.७.१०

४४. दर्शपूर्णमासे फलीकरणहोमं : एवं पिष्टलेपानुलूखले मुसले यच्च शूर्प आशिश्लेष दृषदि यत्कपाले। अवप्रुषो विप्रुषः संयजामि विश्वे देवा हविरिदं जुषन्ताम्।-— आप. श्रौ. सू. ३.१०.१

४५. प्रातः सवनम् : नखेषूलूखलधर्मान-मुसलधर्मांश्च करोति।— आप. श्रौ. सू. १२.४.१५

४६. अग्निचयनम् : यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे। इह द्युमत्तमं वद जयतामिव दुन्दुभिरिति प्रादेशमात्रं चतुः स्रक्त्यौदुम्बरमुलूखलमुत्तरे अंसे प्रयुनक्ति। अपरिमितं मुसलम्। उत स्म ते वनस्पते वातो वि वात्यग्रमित्। अथो इन्द्राय पातवे सुनु सोममुलूखलेति सर्वौषधस्य पूरयित्वावहत्येदं विष्णुर्विचक्रम इति मध्ये ऽग्नेरुपदधाति। तद्विष्णोः परमं पदमिति मुसलम्।— आप. श्रौ. सू.१६.२६.१

४७. सत्यं पूर्वैर्ऋषिभिश्चाकुपानो ऽग्निः प्रविद्वानिह तद्दधात्विति वोलूखलमुपदधातीति वाजसनेयकम्।— आप. श्रौ. सू. १६.२६.१२

४८. सत्राणि : उलूखलबुध्नो यूपः प्रकृष्य उपोप्त एव।— आप. श्रौ. सू. २३.१२.१५

४९. दर्शपूर्ण मासः :- शूर्पाग्निहोत्रहवणि स्फ्यकपालं शम्याकृष्णाजिनमुलूखलमुसलं दृषदुपलम् अर्थवच्च।— कात्या. श्रौ. सू. २.३.८

५०. दर्शपूर्ण मासः :- उलूखले मुसले यच्च शूर्पऽआशिश्लेष दृषदि यत् कपाले। उत्प्रुषो विप्रुषः सत्याः सन्तु यजमानस्य कामाः स्वाहेति पिष्टलेपाञ्जुहोति।— कात्या. श्रौ. सू. ३.८.१

५१. सोमयागः :- शुक्रं पूतभृत्यासिच्य पृष्ठमुपाकृत्य प्रेष्यत्यभिषोतारोऽभिषुणुतौलूखलानु-द्रवादयताग्नीदाशिरं विनय सौम्यस्य वित्तादिति।— कात्या. श्रौ. सू. १०.३.१२

५२. चयनम् : उलूखलस्य रेतः सिग्वेलायामरत्निमात्र श्रुतेः।— कात्या. श्रौ. सू. १७.४.२१

५३. उलूखलऽउखां कृत्वोपशयां पिष्ट्वा न्युप्य पुरस्ताद्ध्रुवासीत्युखाम्।—कात्या. श्रौ. सू. १७.५.४

५४. सत्राणि : उलूखलबुध्नो यूपः प्रकृष्यः।— कात्या. श्रौ. सू. २४.५.२७

५५. पिण्डपितृयज्ञः :- कृष्णाजिन उलूखलं कृत्वेतरान्पत्न्यवहन्यादविवेचम्।— आश्व. श्रौ. सू. २.६.७

५६. विजातायाः परिदां करोति दक्षिणार्धे ऽगारस्याग्निमुपसमाधाय सर्षपान्फलीकरण-मिश्रानञ्जलावध्युप्य जुहोति शण्डो मर्क उपवीरस्तुण्डिकेर उलूखलः। च्यवनो नश्यतादितः स्वाहेति-— भा. गृ. सू. १.२३

५७. अष्टका : उपासन एव जुहोत्युलूखला ग्रावाणो घोषमक्रत हविः कृण्वन्तः परिवत्सरीणाम्।-— भा. गृ. सू. २.१५

५८. बालकसूतिक काले होमा: :- सर्षपान्फलीकरणमिश्रान्दर्व्या जुहोति शण्डो मर्कोपवीतस्तौण्डुलेय: उलूखलश्चपलो नश्यतामित: स्वाहा। अनालिखन्नवलिखन् किंवदन्त उलूखलश्चपलो नश्यतामित: स्वाहा। हर्यक्ष्ण: कुम्भि: शक्तिर्हन्ता चुपणीमुखश्चपलो नश्यतामित: स्वाहा।-— काठक. गृ. सू. ३५.१

५९. उलूखलान्मुसलं पतितं हिनस्ति पत्नीं कुले ज्येष्ठम्।— अथर्व परि. ३७.१.२

६०. यद्वत्प्रजा: पापनयद्धस्ताद्यदि वोलूखलात्। सपत्नान्मे परिपाहि मां त्वेवं परिपाहि न:।— अथर्व परि: ३७.१.५

६१. उत्पात : नर्तनं च कुशूलानां धान्यराशेश्च कम्पनम्। उलूखलानां संसर्पो मुसलानां प्रवेशनम्।।— अथर्व परि. ६४.४.१०

६२. कश्यपोलूखल: ख्यातो रज्जुर्माता- ऽदितिस्तथा।— कृष्णोपनिषद २१

## उशन्

१. ताँ उशतो वि बोधय यदग्ने यासि दूत्यम्। देवैरा सत्सि बर्हिषि।।— ऋ. १.१२.४

२. अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये।।— ऋ. १.२२.९

३. पतिं न पत्नीरुषतीरुशन्तं स्पृशन्ति त्वा शवसावन् मनीषा:।।— ऋ. १.६२.११

४. उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनय: सनीळा:। — ऋ. १.७१.१

५. स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून्।— ऋ. १.७१.६

६. आ त्वा सुशिप्र हरयो वहन्तूशन् हव्यानि प्रति नो जुषस्व।।— ऋ. १.१०१.१०

७. युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति।— ऋ. १.१०९.४

८. जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्स:।।— ऋ. १.१२४.७

९. अस्तोढ्वं स्तोम्या ब्रह्मणा मे ऽवीवृधध्वमुशतीरुषास:।— ऋ. १.१२४.१३

१०. अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम्।।— ऋ. १.१४५.४

११. यत् ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति1 मा तद् भूम्यामा श्रिथन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु।।— ऋ. १.१६२.११

१२. स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ।।— ऋ. २.४.३

१३. स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू।।— ऋ. २.११.६

१४. आ वक्षि देवाँ इह विप्र यक्षि चोशन् होतर्नि षदा योनिषु त्रिषु।— ऋ. २.३६.४

१५. विश्वेभिर्विश्वां ऋतुना वसो मह उशन् देवाँ उशत: पायया हवि:।।— ऋ. २.३७.६

१६. आ योनिमग्निर्घृतवन्तमस्थात् पृथुप्रगाणमुशन्तमुशान:।— ऋ. ३.५.७

१७. प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।— ऋ. ३.३३.१

१८. इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार।— ऋ. ३.४३.७

१९. अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासा:।— ऋ. ४.३. २

२०. सखा पिता पितृतम: पितृणां कर्तेमु लोकमुशते वयोधा:।— ऋ. ४.१७.१७

२१. दृळ्हान्यौभ्नादुशमान ओजो ऽवाभिनत् ककुभ: पर्वतानाम्।— ऋ. ४.१९.४

२२. उशन्नु षु ण: सुमना उपाके सोमस्य नु सुषुतस्य स्वधाव:। पा इन्द्र प्रतिभृतस्य मध्व: समन्धसा ममद: पृष्ठ्येन।।— ऋ. ४.२०.४

२३. दधानो वज्रं बाह्वोरुशन्तं द्याममेन रेजयत् प्र भूम।।— ऋ. ४.२२.३

२४. पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय।।— ऋ. ४.२३. १

२५. कृणोत्यस्मै वरिवो य इत्थेन्द्राय सोममुशते सुनोति। सध्रीचीनेन मनसाविवेनन् तमित् सखायं कृणुते समत्सु।।— ऋ. ४.२४.६

२६. हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु।।— ऋ. ५.४३.११

२७. देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।— ऋ. ५.४६. ७

२८. एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान्।।— ऋ. ६.४.१

२९. इमं यज्ञं चनो धा अग्न उशन् यं त आसानो जुहुते हविष्मान्।— ऋ. ६.१०.६

३०. अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः।— ऋ. ६.३९.२

३१. आ याहि शश्वदुशता ययाथेन्द्र महा मनसा सोमपेयम्।— ऋ. ६.४०.४

३२. अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः।— ऋ. ६.४७.३

३३. आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः।।— ऋ. ७.३.९

३४. वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः।— ऋ. ७.१०.१

३५. स्वर्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म।— ऋ. ७.१०.२

३६. उत द्वार उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह।।— ऋ. ७.१७.२

३७. ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम्।।— ऋ. ७.३९.४

३८. उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा।।— ऋ. ७.९३.१

३९. उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान् पाहि सोमान्।।— ऋ. ७.९८.२

४०. यदीमेनाँ उशतो अभ्यवर्षीत् तृप्यावतः प्रावृष्यागतायाम्।— ऋ. ७.१०३.३

४१. अद्रोघमा वहोशतो यविष्ठय देवाँ अजस्र वीतये।— ऋ. ८.६०.४

४२. पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये।— ऋ. ८.९३.२२

४३. तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम्।— ऋ. ९.६८.६

४४. रथिरायतामुशती पुरंधिरस्मद्र्यगा दावने वसूनाम्।।— ऋ. ९.९३.४

४५. अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ। नमस्यन्तीरुप च यन्ति सं चा ऽऽ च विशन्त्युशतीरुशन्तम्।।— ऋ. ९.९५.३

४६. एष स्य ते पवत इन्द्र सोमश्चमूषु धीर उशते तवस्वान्।— ऋ. ९.९७.४६

४७. यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।।— ऋ. १०.९.२

४८. यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन्।।— ऋ. १०.११.३

४९. तभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु।।— ऋ. १०.१५.८

५०. उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि। उशन्नुशत आ वह पितॄन् हविषे अत्तवे।।— ऋ. १०.१६.१२

५१. अध्वर्यवो हविष्मन्तो हि भूताऽच्छाप इतोशतीरुशन्त।-ऋ १०.३०.२

५२. एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ।— ऋ. १०.३०६

५३. आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन् देवयन्तीः।— ऋ. १०.३०.१५

५४. अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत।— ऋ. १०.४३.१

५५. अहेळता मनसा देव बर्हिरिन्द्रज्येष्ठाँ उशतो यक्षि देवान्।।— ऋ. १०.७०.४

५६. आ वां देवास उशती उशन्त उरौ सीदन्तु सुभगे उपस्थे।।— ऋ. १०.७०.६

५७. स देवानां पाथ उप प्र विद्वानुशन् यक्षि द्रविणोदः सुरत्नः।।— ऋ. १०.७०.९

५८. उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः।।— ऋ. १०.७१.४

५९. या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम्।।— ऋ. १०.८५.३७

६०. इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः। भूया अन्तरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः।।— ऋ. १०.९१.१३

६१. सध्रीचीः सिन्धुमुशतीरिवायन् त्सनाज्जार आरितः पूर्भिदासाम्।— ऋ. १०.१११.१०

६२. य उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति। न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति।।— ऋ. १०.१६०.३

६३. उशतीः कन्यला इमाः पितृलोकात् पतिं यतीः। अव दीक्षामसृक्षत स्वाहा।।— अथर्व. १४.२.५२

६४. सो चिन्नु भद्रा क्षुमती उशस्वत्युषा उवास मनवे स्वर्वती। यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन्।।— अथर्व. १८.१.२०

६५. उशती रात्र्यनु सा भद्राभि तिष्ठते मित्र इव स्वधाभिः।।— अथर्व. १९.४९.२

६६. सिंहस्य रात्र्युशती पींषस्य व्याघ्रस्य द्वीपिनो वर्च आ ददे।— अथर्व. १९.४९.४

६७. चक्षुष्मती मे उशती वपूंषि प्रति त्वं दिव्या न क्षाममुक्थाः।।— अथर्व. १९.४९.८

६८. स्विष्टकृदाहुतिः :-- पिप्रीहि देवाँ उशतो यविष्ठ इति। तदनुवाक्यायै वैश्वदेवम्।— शतपथ १.७.३.१६

६९. पितृयज्ञः :- सोऽन्वाह-उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशत आवह पितॄन् हविषे अत्तवे-इति।— शतपथ २.६.१.२२

७०. अथ राजानमादत्ते----इन्द्रस्योरुमाविश दक्षिणम् इति।----उशन्नुशन्तम् इति। प्रिय प्रियमित्येवैतदाह।— शतपथ ३.३.३.१०

७१. अथ मिनोति-या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गाऽयासः। अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि।— शतपथ ३.७.१.१५

७२. ऐन्द्रवायव ग्रहः - अथापगृह्य पुनरानयति। इन्द्रवायूऽइमे सुता उप प्रयोभिरागतम्। इन्दवो वामुशन्ति हि। उपयामगृहीतोऽसि--- शतपथ ४.१.३.१९

७३. समिष्ट यजुः :- यान् ऽआवह उशतो देव देवांस्तान् प्रेरय स्वे अग्ने सधस्थे इति। अग्निं वाऽआह-अमून् देवानावह अमून्देवानावहेति।— शतपथ ४.४.४.११

७४. अक्षोदयच्छवसा क्षाम· बुध्नम्। वार्णवातस्तविषीभिरिन्द्रः। दृढान्यौघ्नादुशमान ओजः। अवाभिनत्ककुभः पर्वतानाम्।— तै. ब्रा. २.४.५.३

७५. शुचिं नु स्तोमं नवजातमद्य। इन्द्राग्नी वृत्रहणा जुषेथाम्। उभा हि वाँ सुहवा जोहवीमि। ता वाजँ सद्य उशते धेष्ठा इति— तै. ब्रा. २.४.८.३

७६. पितृयज्ञः :- उशन्तस्त्वा हवामह आ नो अग्ने सुकेतुना। त्वँ सोम महे भगं त्वँ सोम प्रचिकितो मनीषा।--- तै. ब्रा. २.६.१६.१

७७. पिप्रीहि देवाँ उशतो यविष्ठ। विद्वाँ ऋतूँर्ऋतुपते यजेह।---- तै. ब्रा. ३.५.७.५

७८. पत्नी संयाजः :- देवानां पत्नीरुशतीरवन्तु नः। प्रावन्तु नस्तुजये वाजसातये।---- तै. ब्रा. ३.५.१२.१

७९. स्विष्टकृतः पुरोनुवाक्या : पिप्रीहि देवाँ उशतो यविष्ठ। विद्वाँ ऋतूँर्ऋतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने। त्वँ होतृणामस्याऽऽयजिष्ठः।— तै. ब्रा. ३.६.११.४

८०. उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस।----- तै. ब्रा. ३.११.८.१

८१. यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।— तै. आ.४.४२.४

८२. उशन्नु षु णः सुमना उपाके इति यजति। एतामेव तद् देवतां यथाभागं प्रीणाति।— गोपथ ब्रा. २.४.१

८३. मोक्षमेव धारणं विद्यात्। उशंतीव मातरं कुर्यात्।—लिङ्गोपनिषद

८४. --- -चत्वारिंशादथ तिस्रः समिधा उशतीरिव मातरो मा विशन्तु।— त्रिपुरोपनिषत् ३

८५. हवं देवी जुजुषाणा घृताची शग्मां नो वाचामुशती शृणोतु।— सरस्वतीरहस्योपनिषत् २

८६. यां गामुशन्तीमुशन्नभिपूर्णामारक्त-नीलाममृतां रजन्तीमालालयन् लालितकङ्कणाङ्गीं तस्मै प्रजेशाय वरदाय पित्रे स्वाहा।— पारमात्मिकोपनिषत् ६.७

८७. उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस।— कठोपनिषत् १

## उशना

१. तक्षद् यत त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः।— ऋ. १.५१.१०

२. मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वङ्कु वङ्कुतराधि तिष्ठति।— ऋ. १.५१.११

३. आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे।।— ऋ. १.८३.५

४. इदं श्रेष्ठं ज्योतिषां ज्योतिरागात्— ऋ. १.११३.१; ऊहागानम् सत्र३.९

५. यं ते काव्य उशना मन्दिनं दाद् वृत्रहणं पार्यं ततक्ष वज्रम्।।— ऋ. १.१२१.१२

६. उशना यत् परावतो ऽजगन्नूतये कवे। सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः।।— ऋ. १.१३०.९

७. शंसात्युक्थमुशनेव वेधास्चिकितुषे असुर्याय मन्म।।— ऋ. ४.१६.२

८. अहं कुत्समार्जुनेयं न्यृञ्जे ऽहं कविरुशना पश्यता मा।।— ऋ. ४.२६.१

९. अबोध्यग्निः समिधा जनानां---— ऋ. ५.११; ऊहगानम् सत्र ३.८

१०. उशना यत् सहस्यैरयातं गृहमिन्द्र जूजुवानेभिरश्वैः।— ऋ. ५.२९.९

११. उग्रमयातमवहो ह कुत्सं सं ह यद् वामुशनारन्त देवाः— ऋ. ५.२१.८

१२. यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत्।।— ऋ. ५.३४.२

१३. न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे।— ऋ. ५.३२.१०

१४. आ भात्यग्निरुषसामनीकमुद् विप्राणां देवया वाचो अस्थुः।— ऋ. ५.७६.१; ऊहगानम् सत्र ३.१०

१५. त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय।— ऋ. ६.२०.११

१६. शुक्रं ते अन्यद् यजतं ते अन्यद् विषुरूपे अहनी द्यौरिवासि।— ऋ. ६.५८.१; शुक्र ग्रह अर्चना का सूक्त।

१७. उशना यत् परावत उक्ष्णो रन्ध्रमयातन। द्यौर्न चक्रदद् भिया।।— ऋ. ८.७.२६

१८. उशना काव्यस्त्वा नि होतारमसादयत्। आयजिं त्वा मनवे जातवेदसम्।।— ऋ. ८. २३.१७

१९. प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्। अग्निं रथं न वेद्यम्।।— ऋ. ८.८४.१; ऋ. उशना काव्यः

२०. तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत्।।— ऋ. ९.३३.४; ऊहगानम् सत्र ५.१०

२१. प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष।— ऋ. ९.८७.१; ऋ. उशना काव्यः। ऊहगानम् दशरात्र१.४

२२. ऋषर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन।— ऋ. ९.८७.३

२३. अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि।— ऋ. ९.८८.१; ऋ. उशना काव्यः

२४. प्रो स्य वह्निः पथ्याभिरस्यान् दिवो न वृष्टिः पवमानो अक्षाः।— ऋ. ९.८९.१; ऋ. उशना काव्यः

२५. साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।— ऋ. ९.९३.१; ऊहगानम् सत्र २.४

२६. प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति।— ऋ. ९.९७.७

२७. आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु।— ऋ. ९.९७.३७; ऊहगानम् अहीन ८.५; ताण्ड्य ब्रा. १५.९.३

२८. प्र याह्यच्छोशतो यविष्ठाऽथा वह सहस्येह देवान्।।— ऋ. १०.१.७

२९. पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँर्ऋतुपते यजेह।— ऋ. १०.२.१

३०. इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि।— ऋ. १०.३.१; ऊहगानम् एकाह २.२०

३१. अध ग्मन्तोशना पृच्छते वां कदर्था न आ गृहम्।— ऋ. १०.२२.६

युवं ह भुज्युं युवमश्विना वशं युवं शिञ्जारमुशनामुपारथुः।— ऋ. १०.४०.७

३२. हिरणयवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः।— अथर्व. १.३३.१; शुक्र ग्रह अर्चना हेतु सूक्त।

३३. यौ मेधातिथिमवथो यौ त्रिशोकं मित्रावरुणावुशनां काव्यं यौ।— अथर्व. ४.२९.६

३४. आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे।।— अथर्व. २०.२५.५

३५. शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म।।— अथर्व. २०.७७.२

३६. देवासुरास् संयत्ता ज्योङ् न व्यजयन्त। बृहस्पतिर् देवानां पुरोहित आसीद् उशना काव्यो ऽसुराणाम्।---इन्द्र द्वारा त्रिशीर्ष गन्धर्व से विजय के सम्बन्ध में पृच्छा। इन्द्र का शुक बन कर उडना। गन्धर्व द्वारा शुक पक्ष की विजय का कथन। इन्द्र द्वारा उशना काव्य को अपनी ओर मिलाना तथा विरोचन की कामदुघा गायों का भी हरण करना। असुरों को स्वर्ग में आने से रोकने के लिए ऊहागानम् १.१.४ (स्वायुधः पवते देव इन्दुर् इत्यादि) का गान। उशना काव्य द्वारा इस साम से देवों में अमर्त्य गन्धर्वलोक की प्राप्ति।— जै. ब्रा. १.१२५

३७. देवरथ का स्वरूप ---औशनकावे आणी नौधसकालेये वन्धुराथिष्ठानं वामदेव्यम् उपस्थो यज्ञायज्ञीयम् अध्यास्थाता स एष पुरुषः।— जै. ब्रा. १.१३०

३८. दैव्य् एषा नौर् यद् यज्ञः। ताव् एतत् पितापुत्राव् एवाजतः। औशनं पुरस्ताद् भवति कावम् उपरिष्टाद् यज्ञस्यैवारिष्टयै।— जै.ब्रा. १.१६६

३९. अथैतद् औशनं त्रैष्टुभम्। तद् यत्र देवासुरास् संयत्ता आसंस् तद् एष्व् अब्रवीत् त्रिर् अहं ष्टुब् अस्मीति।--- जै. ब्रा. १.३२४

४०. अथ यौधाजयं त्रिणिधनं, सवनानां कलृप्त्यै। अथौशनम् अन्त्यं साम। अन्त्येन साम्नान्त्यं स्वर्गं लोकम् अश्नवामहा इति।— जै. ब्रा. २.१४

४१. ---औशनम् एव त्रिष्टुभि।--- जै. ब्रा. २.१२७

४२. अथौशनम् अन्त्यं साम, अन्त्येन साम्नान्त्यं स्वर्गं लोकम् अश्नवाता इति। — जै.ब्रा. २.१९४

४३. अथ यद् वो ऽवोचं स्वर्गस्य स्म लोकस्य पथो ऽञ्जसायनान् मेतेत्य्, औशनकावे एव वस् तद् अवोचम् इति। एष ह वै स्वर्गस्य लोकस्य पन्था अञ्जसायनो यद् औशनकावे।। औशनं पुरस्ताद् भवति कावम् उपरिष्टात्। ताव् एतत् पितापुत्राव् एव नावम् अजतः।---- जै.ब्रा. २.४२१

४४. अथौशनम् अन्त्यं सामान्त्येन साम्नान्त्यं स्वर्गं लोकम् अश्नवामहा इति। अथ रथन्तरम्।-- — जै.ब्रा.३.१५

४५. अथौक्ष्णोरन्ध्रम्। उक्ष्णो वै रन्ध्रः काव्यो ऽकामयताद्भिः प्रतीपं स्वर्गं लोकम् आरोहेयम्-----। स ह वाव रौमण्वतः। स एवोशना काव्यः। स ह स यमुनयैव प्रतीपं स्वर्गं लोकम् आरोहत्।— जै.ब्रा ३.१५०

४६. अथौशनम्। उशना वै काव्यो देवेष्व् अमर्त्यं गन्धर्वलोकम् ऐच्छत। स एतत् सामापश्यत्। तेनास्तुत। ततो वै स देवेष्व् अमर्त्यं गन्धर्वलोकम् आश्नुतैतं रोमण्वन्तम्। ते हैते काव्याः।---अग्निर् वै देवेष्व् अवसत्। तं देवा नाप्रीणन्। सो ऽप्रीयमाण उशनसं काव्यम् आगच्छत्। तम् अब्रवीद् ऋषे प्रीणीहि मा, ऽप्रीतो वा अस्मीति। तम् अकामयत-प्रीणीयाम् एनम् इति। स एतत् सामापश्यत्। तेनैनम् अप्रीणात्। प्रेष्ठं वो अतिथिम् स्तुषे मित्रम् इव प्रियम् इति— जै.ब्रा. ३.२३२

४७. दिवि हि सोमः, वृत्रो वै सोम आसीत्। तस्यैतच्छरीरम्-यद्गिरयो, यदश्मानः। तदेषोऽशाना नामौषधिर्जायते-इति ह स्माह श्वेतकेतुरौद्दालकिः। तामेतदाहृत्याभिषुण्वन्ति।— शतपथ ब्रा. ३.४.३.१३, ४.२.५.१५

४८. अथ वायुरौशनं प्रावृहत। तद्वै स प्राणवीर्य्यं प्रावृहत प्राणावा औशनं।---वायुर्वा उशँस्तस्यैतदौशनं। उशना वै काव्योऽसुराणां पुरोहित आसीत्तं देवा कामदुघाभिरुपामन्त्रयन्त तस्मा एतान्यौशनानि प्रायछन् कामदुघा वा औशनानि। कामदुघा एनमुपतिष्ठन्ते य एवं वेद।— तां. ब्रा. ७.५.१६

४९. माध्यन्दिन पवमानस्य सामानि : यौधाजयं भवति यदेव यौधाजयस्य ब्राह्मणं। औशनं यदौशनस्य स्तोमः। तां. ब्रा. ११.२.११

५०. आप्ते षडहे छन्दाँसि स्तोमान् कृत्वा प्रयन्ति। प्र काव्यमुशनेव ब्रुवाण इति (ऋ. ९.९७.७) गायत्र्या रूपेण प्रयन्ति।— तां. ब्रा. १४.१.२

५१. उक्थानां प्रथमस्य स्तोत्रीयं तृचम् : प्रेष्ठं वो अतिथिमित्यातिथ्यस्यैव तद्रूपं क्रियते।— तां. ब्रा. १४.१२.१

५२. प्रथमस्योक्थस्य साम : औशनं भवति। उशना वै काव्योऽकामयत यावानितरेषां काव्यानां लोकस्तावन्तँ स्पृणुयामिति स तपोऽतप्यत स एतदौशनमपश्यत्तेन तावन्तं लोकमस्पृणोद्या-वानितरेषां काव्यानामासीत्तद्वाव स तर्ह्यकामयत कामसनि सामौशनं काममेवैतेनावरुन्धे।— तां.ब्रा. १४.१३.४

५३. अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणां तौ प्राजापतिं प्रश्नमैताँ स प्रजापतिरग्निं दूतं वृणीमह इत्यभि पर्यावतत ततो देवा अभवन्पराऽसुरा-- — तै.सं. २५.८.५

५४. उशना ह काव्योऽसुराणां पुरोहित आस। स ह देवानामन्नमशित्वा परिदद्रे। स हैक्षत। कथं नु तेन यज्ञक्रतुना यजेयं येनेष्ट्वा पाप्मानमपहन्यामिति। स एतमुशनस्तोमं यज्ञक्रतुमपश्यत्। तेनेष्ट्वा पाप्मानमपाहत। तेन पाप्मानमपजिघांसमानो यजेत। उदरव्याधितश्च।-----उशना यत्सहस्यैरयातं (ऋ. ५.२९.९) वरिवस्यन्नुशने काव्याय (ऋ.६.२०.११) इति उशनवती तदेतस्याह्नो रूपम्। शांखा. श्रौ.सू.१४.२७.१

५५. स हैक्षत। पाप्मानमपहत्य कथं नु तेन यज्ञक्रतुना यजेयं येनेष्ट्वान्नाद्यमाप्नुयामिति। स एतमुत्तरमुशनस्तोमं यज्ञक्रतुमपश्यत्। तेनेष्ट्वान्नाद्यमाप्नोत्।-— शांखा. श्रौ. सू. १४.२८.१

५६. आतिथ्यायाँ गायत्रीसामौशनम्।— द्राह्या.श्रौ. सू. २.२.२४

५७. गवामयनम् : औशनकावे अन्त्ये।— द्राह्या.श्रौ.सू. ८.१.२२

५८. अभिवायुमित्यौशनम् (सा. १४२६)— द्राह्या.श्रौ.सू. ८.२.१५

५९. उशनसस्तोमेन गरगीर्णमिवाऽऽत्मानं मन्यमानो यजेत। उशना यत्सहस्यै३रयातं---- आश्वलायन श्रौ.सू. ९.५.१

६०. पुनस्तोमौ : इन्द्र द्वारा सूर्यवर्चा गन्धर्व की जाया से असुरों पर देवों की विजय न होने का कारण पूछना।---- -स (इन्द्रो)ह गत्वैवोशनसं काव्यमुपमन्त्रयां चक्रे जयन्त्याश्च दुहित्रा चतसृभिश्च कामदुघाभिः स हाज्ञप्तो ऽसुरेभ्यो ऽधि देवानुपसमियाय ततो ह वा एतद्देवा असुरान्महासंग्रामे जिग्युः। स ह गुरुरिव मेने गरमिव गीर्त्वा बहु वित्तमसुराणां प्रतिगृह्य स होवाच गुरुरिवास्मि गरमिव गीर्त्वा बहुवित्तमसुराणां प्रतिगृह्य हन्त मा याजयेति तं द्वादशस्तोमेनाग्निष्टोमेन बृहस्पतिराङ्गिरसो याजयां चकार तेन हेष्ट्वोर्ध्वँ हिरण्यमुज्जगार-----ते ह वा एत औशनसा नाम कुरुक्षेत्रे पर्वतगाः।--- बौ. श्रौ. सू. १८.४७

६१. औशनसा दिश्याः प्रशस्ताः सुरूपाक्षा महोदरा विगद्वकाः सुबुध्या निहिता गुहा इत्येत औशनसा गौतमास्तेषां त्र्यार्षेयः प्रवरो भवत्याङ्गिरस गौतमौशनसेति होतोशनसवद्गोतमवदङ्गिरो-वदित्यध्वर्युः।— बौ.श्रौ. प्रवर १४

६२. आदित्यमौशनसं वाऽवस्थाय प्रयोधयेत्।- आश्वलायन गृह्य सू. ३.१२.१६

## उशिज

१. धिष्णियाभिधानम् : तुथोऽसि विश्ववेदा उशिगसि कविः----- तै.सं.१.३.३.१

२. यूपे पशुनियोजनार्थमुपाकरणाभिधानम् :----- वह्नीरुशिजो------ तै.सं.१.३.७.१

३. गार्हपत्याहवनीययोरुपस्थानम् : सोमानँ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजम्।— तै.सं.१.५.६.४

४. सौमिकब्रह्मत्वविधिः :- प्रवाऽस्यनुवाऽ-सीत्याह मिथुनत्वायोशिगसि वसुभ्यस्त्वा वसूञ्जिन्वेत्याह— तै.सं.३.५.२.३

५. अदाभ्यांशुग्रहापेक्षितमन्त्राभिधानम् :--- उशिकत्वं देव सोम गायत्रेण छन्दसाऽग्नेः प्रियं पाथो अपीहि-- — तै.सं.२.३.३.२

६. चातुर्मास्यगतवैश्वदेवाख्यपर्वविहितहविषां याज्यापुरोनुवाक्या : स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धिया समृण्वति।— तै.सं. ४.१.११.४

७. आसन्दीस्थापिताग्नेरुपस्थानम् : त्वामग्ने यजमाना अनु द्युन्विश्वा वसूनि दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः।।— तै.सं.४.२.२.५

८. आहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम् : रातिं भृगूणामुशिजं कविक्रतुं पृणक्षि सानसिम् रयिम्।— तै.सं.४.२.७.३

९. पञ्चमचितिशेषस्तोमभागाभिधानम् :- -उशिगसि वसुभ्यस्त्वा वसूञ्जिन्व-— तै.सं.४.४.१.२

१०. ---प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून्प्रकेत इति रुद्रान्--- तै.सं.५.३.६.१

११. केषांचिद्धविषामभिधानम् :----एतं वै पर आट्णारः कक्षीवाँ औशिजो वीतहव्यः-- -प्रजाकामा अचिन्वत ततो वै ते सहसँ सहस्रं पुत्रानविन्दन्त-- — तै.सं.५.६.५.३

१२. अन्वारोहणाद्यभिधानम् : पिता मातरिश्वाऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुः-- — तै.सं.५.६.८.६

१३. पशुनियोजनम : वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादेवमाह-— तै.सं.६.३.६.१

१४. बृहदुपस्थानम् : अथान्तरेणाहवनीयं च गार्हपत्यं च प्राङ् तिष्ठन्नग्निमीक्षमाणो जपति। सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः।— शत. ब्रा.२.३.४.३.५

१५. अग्नीषोमीयपशुयागः :- उशिजो वह्नितमान् इति। विद्वांसो हि देवा। तस्मादाह उशिजो वह्नितमानिति। — श.ब्रा.३.७.३.१०

१६. अदाभ्य-अंशु ग्रहः :- अथांशून्पुनरप्यर्जति। उशिक्त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि, वशी त्वं देव सोमेंद्रस्य प्रियं पाथोऽपीहि, अस्मत्सखा त्वं देव सोम

विश्वेषां देवानां प्रियं पाथोऽपीहि इति।—श.ब्रा. ११.५.९.१२

१७. इन्द्रः सुवर्षा जनयन्नहानि। जिगायोशिग्भिः पृतना अभिश्रीः। प्रारोचयन्मनवे केतुमह्नाम्। अविन्दज्ज्योतिर्बृहते रणाय इति।— तै.ब्रा.२.४.३.६

१८. स्तोमभागाः :- उशिगसि वसुभ्यस्त्वा वसून् जिन्व सवितृप्रसूता बृहस्पतये स्तुत।— तां.ब्रा.१.९.९

१९. काक्षीवतं भवति। कक्षीवान्वा एतेनौशिजः प्रजातिं भूमानमगच्छत् प्रजायते बहुर्भवति काक्षीवतेन तुष्टुवानः।— तां.ब्रा.१४.११.१६

२०. पराह्णारस्त्रसदस्यः पौरुकुत्सोवीतहव्यः श्रायसः कक्षीवानौशिजस्त एतत्प्रजातिकामा सत्रायणमुपायँस्ते सहस्रँ सहस्रँ पुत्रानपुष्यन्नेवं वाव ते सहस्रँ सहस्रं पुत्रान् पुष्यन्ति य एतदुपयन्ति।। — तां.ब्रा.२५.१६.३

२१. उशिगसि, प्रकेतो ऽसि, सुदितिरसीति।— गोपथ ब्रा.२.२.१३

२२. तस्य पाहि नो अग्न एकये त्य् एतासु नार्मेधस्यर्क्षु रथन्तरं पृष्ठं भवति। एताभिर् वै नृमेधा औशिजो ऽग्नेर् हरांस्य् अपैरयत।— जै.ब्रा.२.१३७

२३. कक्षीवतामाङ्गिरसौचथ्यगौतमौशिजकाक्षीवतेति। दीर्घतमसामाङ्गिरसौचथ्यदैर्घतमसेति।— आश्व.श्रौ.सू.१२.११.४

२४. सोमग्रह गृहण मन्त्राः :- ---तिस्रो यह्वस्य समिधः परिज्मनो देवा अकृण्वन्नुशिजो अमर्त्यवे।---- आप.श्रौ.सू.१२.७.१०

२५. आधवनानंशून्प्रज्ञातान्त्रिधायोशिक्त्वं देव सोम गायत्रेण छन्दसेत्येतैः प्रतिमन्त्रमनुसवनमेकैकं महाभिषवेष्वपिसृजति।— आप.श्रौ.सू.१२.८.४

२६. अथौचथ्या गौतमाः। तेषां त्र्यार्षेयः। आङ्गिरसौचथ्य गौतमेति। गोतमवदुचथ्यवदङ्गिरो-वदिति। अथौशिजा गौतमाः। तेषां त्र्यार्षेयः। आङ्गिरसौशिज काक्षीवतेति। कक्षीवद्वदुशिज-वदङ्गिरोवदिति।— आप.श्रौ.सू. २४.६.१२

२७.-- चतुरो धिष्णियान्समान्तरालानुदगन्तान् तुथो ऽसि विश्ववेदा रौद्रेणोशिगसि कवी रौद्रेणाङ्गारिरसि बम्भारी रौद्रेणावस्युरसि दुवस्वान्रौद्रेणेत्येतैर्ब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकानं प्रतिमन्त्रमुपवपति-— वैखा.श्रौ.सू.१४.१२

२८. --- अदाभ्यांशूनां प्रथममुशिक् त्वं देव सोमेति प्रातःसवने ऽपिसृज्याभिषुणुयान्माध्यन्दिने मध्यममुत्तमं तृतीयसवने-— वैखा.श्रौ.सू.१५.१३

२९. तुथ उशिगन्धारिरवस्युरिति ब्राह्मणाच्छंसिप्रभृतीनामुदञ्चः।— द्राह्या.श्रौ.सू.४.२.९

३०. --सोमानँ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजमित्यथ रात्रिमुपतिष्ठते— बौधा.श्रौ.सू. ३.९

३१. पशुबन्धः :----बर्हिषी आदायोपाकरोत्युपवीरस्युपो देवान्दैवीर्विशः प्रागुर्वह्नी-रुशिजो— बौधा.श्रौ.सू.४.५

३२. अग्निष्टोम प्रातः सवनम् : तुथो ऽसि विश्ववेदा इत्युत्तरतो ब्राह्मणाच्छँसिन उशिगसि कविरित्युत्तरतः पोतुः-— बौधा.श्रौ.सू.६.२९

३३. अग्निचयनम् :--अग्नेरुक्थेनाग्नि-मनुशँसति पिता मातरश्चाच्छिद्रा पदा धा अच्छिद्रा उशिजः पदानुतक्षुः-— बौधा.श्रौ.सू.१०.४९

३४. औपानुवाक्यम् : अथ प्रदक्षिणमावृत्य राजन्येवाँशूनपिसृजत्युशिक् त्वं देव सोम गायत्रेण छन्दसाग्नेः प्रियं पाथो अपीह्यस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीही— बौधा.श्रौ.सू.१४.१२

३५. अंशून्त्सोमे निदधात्युशित्क्तमिति प्रतिमन्त्रम्।— कात्या.श्रौ.सू.१२.५.१८

३६. ज्योतिष्टोमे धिष्ण्योपस्थानम् : तुथोऽसि विश्ववेदा इति ब्राह्मणाच्छंसिनः। उशिगसि कविरसीति पोतुः।-— शांखा.श्रौ.सू. ६.१२.१७

३७. आज्यं शंसिष्यन्पिता मातरिश्वाच्छिद्रा पदोशिगसीयानुतक्षिषत्-— शांखा.श्रौ.सू.७.९.१

३८. पुरुषमेधप्रकरणम् : शौन:शेपं प्रथमम्।--- काक्षीवतं द्वितीयम्। यथा कक्षीवानौशिज: स्वनये भावयव्ये सनिं ससान।— शांखा.श्रौ.सू. १६.११.१

## उशीनर

१. समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अन:। भरतामप यद्रपो: द्यौ: पृथिवि क्षमा रपो मो षु ते किं चनाममत्।।— ऋ. १०.५९.१०

२. उत्तिष्ठताव पश्यतेन्द्रस्य भागमृत्वियम्। यदि श्रातो जुहोतन यद्यश्रातो ममत्तन।।— ऋ. १०.१७९.१; ऋषि: शिबिरौशीनर:

३. अथ गार्ग्यो ह वै बालाकिरनूचान: संस्पृष्ट आस सोऽवददुशीनरेषु स वसन्मत्स्येषु कुरुपञ्चालेषु-— कौशीतकिब्राह्मणोपनिषत् ४.१

४. देवासुरा ह यत्र महासंग्रामँ संयेतिरे तद्ध शिबिरौशीनरो देवानां वर्गादसुरान्जिगाय तस्यो हेन्द्रो जितवरं ददौ स होवाच शिबिर्नैष्ठयं भयं न गच्छेदिति-— बौधा.श्रौ.सू.१८.४९

## उषा:

१. केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथा:।।— ऋ.१.६.३; दे. इन्द्र

२. कस्त उष: कधप्रिये भुजे मर्तो अमर्त्ये। कं नक्षसे विभावरि।। वयं हि ते अमन्महा ऽऽन्तादा पराकात्। अश्वे न चित्रे अरुषि।। त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिव:। अस्मे रयिं नि धारय।। — ऋ.१.३०.२० दे.उषा

३. आत् सूर्यं जनयन् द्यामुषासं तादीत्ना शत्रुं न किला विवित्से।।— ऋ.१.१२.४ दे.इन्द्र

४. त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम्।।— ऋ.१.३४.३

५. आ नासत्या गच्छतं हूयते हविर्मध्व: पिबतं मधुपेभिरासभि:। युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति।।— ऋ.१.३४.१०

६. अग्ने विवस्वदुषसश् चित्रं राधो अमर्त्य। आ दाशुषे जातवेदो वहात्वमद्या देवाँ उषर्बुध:।।— ऋ. १.४४.१ दे.अग्नि:

७. सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत्।।— ऋ.१.४४.२ दे.अग्नि:

८. सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षप:। कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर।।— ऋ.१.४४.८

९. पतिर्ह्यध्वराणामग्ने दूतो विशामसि। उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृश:।।— ऋ.१.४४.९

१०. अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शत:।— ऋ.१.४४.१०

११. पिबतु सोमं वरुणो धृतव्रतो ऽश्विभ्यामुषसा सजू:।।— ऋ.१.४४.१४

१२. एषो उषा अपूर्व्या व्युच्छति प्रिया दिव:। स्तुषे वामश्विना बृहत्।।— ऋ.१.४६.१

१३. युवोरुषा अनु श्रियं परिज्मनोरुपाचरत्। ऋता वनथो अक्तुभि:।।— ऋ.१.४६.१४,दे.अश्विनौ

१४. सह वामेन न उषो व्युच्छा दुहितर्दिव:।— ऋ.१.४८.१, उषा: देवता सूक्त।

१५. उषो भद्रेभिरा गहि दिवश्चिद् रोचनादधि।— ऋ. १.४९.१, उषा: देवता सूक्त।

१६. देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्य:।— ऋ.१.५६.४, दे.इन्द्र:

१७. अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे।— ऋ.१.५७.३, दे.इन्द्र:

१८. गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्ध:। वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभाय:।।— ऋ.१.६२.५,दे.इन्द्र:

१९. सनाद् दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवै:। कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या।— ऋ.१.६२.८,दे.इन्द्र:

२०. उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः। स्वसारः श्यवीमरुषीमजुष्रञ्चित्रमुच्छन्तीमुषसं न गावः।— ऋ.१.७१.१, दे. अग्निः

२१. त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः। नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः।।— ऋ.१.७३.७

२२. शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः।।— ऋ.१.७९.१, दे.अग्निः

२३ .क्षपो राजन्नुतत्मनाग्ने वस्तोरुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति।।— ऋ.१.७९.६, दे.अग्निः

२४. मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः। मधु द्यौरस्तु नः पिता।।— ऋ.१.९०.७

२५. एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते।— ऋ.१.९२.१; उषाः देवता सूक्त।

२६. इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा।--— ऋ.१.११३.१; उषाः देवता सूक्त।

२७. सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्। यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम्।।— ऋ.१.११५.२

२८. ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसं मर्त्यासः। अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान्।।— ऋ.१.११३.११

२९. यावयद् द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती। सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ।।— ऋ.१.११३.१२

३०. शश्वत् पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी। अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः।— ऋ.१.११३.१३

३१. व्यञ्जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देव्यावः। प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन।।— ऋ.१.११३.१४

३२. आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना। ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत्।।— ऋ.१.११३.१५

३३. यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम्। तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः।।— ऋ.१.११३.२०

३४. हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ।।— ऋ.१.११८.११

३५. अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः।— ऋ.१.१२१.६ दे.इन्द्रः

३६. पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः।---- -— ऋ.१.१२३.१; उषाः देवता सूक्तम्।

३७. उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत्।-ऋ१.१२४.१; उषाः देवता सूक्तम्।

३८. उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः।— ऋ.१.१३१.६, दे.इन्द्रः

३९. प्र बोधया पुरंधिं जार आ ससतीमिव। प्र चक्षय रोदसी वासयोषसःश्रवसे वासयोषसः।। तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु।— ऋ.१.१३४.३, दे.वायुः

४०. इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः। उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः। सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये।।— ऋ.१.१३७.२, दे.मित्रावरुणौ

४१. स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव।।— ऋ.१.१५१.५, दे.मित्रावरुणौ

४२. अबोध्यग्निर्ज्म उदेति सूर्यो व्युषाश्चन्द्रा मह्यावो अर्चिषा। आयुक्षातामश्विना यातवे रथं प्रासावीद् देवःसविता जगत् पृथक्।।— ऋ.१.१५७.१, दे.अश्विनौ

४३. पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः।— ऋ.१.१७९.१, दे.रतिः

४४. हिरण्यया वां पवयः प्रुषायन् मध्वः पिबन्ता उषसः सचेथे।।— ऋ.१.१८०.१, दे.अश्विनौ

४५. वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे।।— ऋ.१.१८३.२, दे.अश्विनौ

४६. ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः।— ऋ.१.१८४.१, दे.अश्विनौ

४७. सुरुक्मे हि सुपेशसा ऽधि श्रिया विराजतः। उषासावेह सीदताम्।— ऋ.१.१८८.६ आप्रीसूक्त,दे.उषासानक्ता।

४८. अभि त्वा नक्तीरुषसो ववाशिरे ऽग्ने वत्सं न स्वसरेषु धेनवः।— ऋ.२.२.२

४९. दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि। प्राची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि दिद्युतुः।। स इधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना। होत्राभिरग्निर्मनुषःस्वध्वरो राजा विशामतिथिश्चारु-रायवे।।— ऋ.२.२.७

५०. य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते। यस्य व्रतं न मीयते।।— ऋ.२.८.३, दे.अग्निः

५१. यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः।— ऋ.२.१२.७

५२. सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिप्रेष।— ऋ.२.१५.६, दे.इन्द्रः

५३. मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत् पूर्व्याणि।।— ऋ.२.२०.५, दे.इन्द्रः

५४. रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत्।।— ऋ.२.२१.४

५५. तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः। उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून्।।— ऋ. २.२८.२

५६. अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान् वरुण तासु शाधि।।— ऋ.२.२८.९

५७. उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा।।— ऋ.२.३४.१२, दे.मरुतः

५८. आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा विरूपे।— ऋ.३.४.६, आप्रीसूक्तं, दे. उषासानक्ता

५९. प्रत्यग्निमुषसश्चेकितानो ऽबोधि विप्रः पदवी कवीनाम्।— ऋ.३.५.१

६०. पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके।।— ऋ.३.५.२, दे.अग्निः

६१. पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः।— ऋ.३.७.१०, दे.अग्निः

६२. द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ।— ऋ.३.१४.३

६३. त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः।— ऋ.३.१५.२, दे.अग्निः

६४. त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने।— ऋ.३.१७.३

६५. अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः।— ऋ.३.२०.१

६६. दिदृक्षन्त उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकम्।— ऋ.३.३०.१३, दे.इन्द्रः

६७. अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन्। तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः।।— ऋ. ३.३१.४

६८. इन्द्रो नृभिरजनद् दीद्यानः साकं सूर्यमुषसं गातुमग्निम्।।— ऋ.३.३१.१५

६९. दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसाः।।— ऋ.३.३२.८,दे.इन्द्रः

७०. हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः।— ऋ ३.४४.२, दे. इन्द्रः

७१. उषसः पूर्वा अध यद् व्यूषुर्महद् वि जज्ञे अक्षरं पदे गोः।— ऋ.३.५५.१

७२. आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः।।— ऋ.३.५८.१

७३. उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि।— ऋ.३.६१.१, उषाःदेवता सूक्तम्

७४. स त्वं नो अग्ने ऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।— ऋ.४.१.५

७५. अश्मव्रजा सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवाना।।— ऋ.४.१.१३

७६. नेशत् तमो दुधितं रोचत द्यौरुद् देव्या उषसो भानुरर्त।— ऋ.४.१.१७

७७. यस्त्वा दोषा य उषसि प्रशंसात् प्रियं वा त्वा कृणवते हविष्मान्। अश्वो न स्वे दम आ हेम्यावान् तमंहसःपीपरो दाश्वांसम्।।— ऋ.४.२.८

७८. अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः।— ऋ.४.२.१९, दे.अग्निः

७९. शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ।।— ऋ.४.३.११

८०. कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः।।— ऋ.४.५.१३, दे.वैश्वानरोऽग्निः

८१. प्रत्यग्निरुषसामग्रमख्यद् विभातीनां सुमना रत्नधेयम्। यातमश्विना सुकृतो दुरोणमुत् सूर्यो ज्योतिषा देव एति।।— ऋ.४.१३.१

८२. प्रत्यग्निरुषसो जातवेदा अख्यद् देवो रोचमाना महोभिः। आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ।।— ऋ.४.१४.१

८३. इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन्। स इधानः प्रति दोषामुषासं पुष्यन् रयिं सचते घ्नन्नमित्रान्।।— ऋ.४.१२.२

८४. आवहन्त्यरुणीर्ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना। प्रबोधयन्ती सुविताय देव्ययुषा ईयते सुयुजा रथेन।। आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ। इमे हि वां मधुपेयाय सोमा अस्मिन् यज्ञे वृषणा मादयेथाम्।।— ऋ.४.१४.३, दे.अग्निः

८५. पूर्वीरुषसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद् वि सिन्धून्।— ऋ.४.१९.८, दे.इन्द्रः

८६. कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष।— ऋ.४.२३.५, दे.इन्द्रः

८७. ऋणा चिद् यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे।।— ऋ.४.२३.७

८८. दिवश्चिद् घा दुहितरं महान् महीयमानाम्। उषासमिन्द्र सं पिणक्।।— ऋ.४.३०.९

८९. आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम। उच्छन्तीर्मामुषसः सूदयन्त्वति विश्वानि दुरितानि पर्षन्।।— ऋ.४.३९.१, दे.दधिक्राः

९०. यो अश्वस्य दधिक्राव्णो अकारीत् समिद्धे अग्ना उषसो व्युष्टौ।— ऋ.४.३९.३

९१. उद् वां पृक्षासो मधुमन्त ईरते रथा अश्वास उषसो व्युष्टिषु।— ऋ.४.४५.२, दे.अश्विनौ

९२. हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः।— ऋ.४.४५.४

९३. इदमु त्यत् पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात्।— ऋ.४.५१.१, उषाः देवता सूक्तम्

९४. प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः।— ऋ१।४.५२.१, उषाःदेवता सूक्तम्

९५. उषो मघोन्या वह सूनृते वार्या पुरु। अस्मभ्यं वाजिनीवति।।— ऋ.४.५५.९

९६. यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम्।।— ऋ.५.१.४, दे.अग्निः

९७. सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा। दोषामुषासमीमहे।।— ऋ.५.५.६, दे.उषासानक्ता

९८. समिद्धो अग्निर्दिवि शोचिरश्रेत् प्रत्यङ्ङुषसमुर्विया वि भाति। एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची।।— ऋ.५.२८.१

९९. तस्मा अमृध्रा उषसो व्युच्छान् य इन्द्राय सुनवामेत्याह।। — ऋ.५.३७.१

१००. विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः। अपावृत व्रजिनीरुत् स्वर्गाद् वि दुरो मानुषीर्देव आवः।।— ऋ.५.४५.१

१०१. सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः। आ याह्यग्ने अत्रिवत् सुते रण।।— ऋ.५.५१.८

१०२. मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम्। आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः।।— ऋ.५.५९.८

१०३. हिरण्यरूपमुषसो व्युष्टावयः स्थूणमुदिता सूर्यस्य। आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च।।— ऋ.५.६२.८

१०४. अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः। अयाजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवम्।।— ऋ.५.७५.९

१०५. आ भात्यग्निरुषसामनीकमुद् विप्राणां देवया वाचो अस्थुः।— ऋ.५.७६.१, दे.अश्विनौ

१०६. महे नो अद्य बोधयोषो राये दिवित्मती।— ऋ.५.७९.१, उषाः देवता सूक्तम्

१०७. द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीम्।— ऋ.५.८०.१, उषाः देवता सूक्तम्

१०८. वि नाकमख्यत् सविता वरेण्यो ऽनु प्रयाणमुषसो वि राजति।।— ऋ.५.८१.२

१०९. पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना।— ऋ.६.१५.५,दे.अग्निः

११०. याभिः सूर्यमुषसं मन्दसानो ऽवासयोऽप दृळ्हानि दर्द्रत्। महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस्परि स्वात्।। — ऋ.६.१७.५

१११. आ गावो अग्मन्नुत भद्रमक्रन् त्सीदन्तु गोष्ठे रणयन्त्वस्मे। प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः।।— ऋ.६.२८.१

११२. त्वमपो वि दुरो विषूचीरिन्द्र दृळ्हमरुजः पर्वतस्य। राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन् द्यामुषासम्।।— ऋ.६.३०.५

११३. वर्धाहैनमुषसो यामन्नक्तोर्वर्धान् मासाः शरदो द्याव इन्द्रम्।।— ऋ.६.३८.४

११४ .अयं द्योतयदद्युतो व्यक्तून् दोषा वस्तोः शरद इन्दुरिन्द्रः। इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार।। — ऋ.६.३९.३

११५. अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः। अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळ्हम्।।— ऋ.६.४४.२३

११६. अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मना-मुषसामनीके।— ऋ.६.४७.५, दे.सोमः

११७. आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात्। यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि।।— ऋ.६.५०.८

११८. अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः।— ऋ.६.५२.४

११९. दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान्।।— ऋ.६.६०.२,दे.इन्द्राग्नी

१२०. एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः।---- ऋ.६.६५.१, उषाःदेवता सूक्तम्

१२१. इन्द्रासोमा वासयथ उषासमुत् सूर्यं नयथो ज्योतिषा सह।— ऋ.६.७२.२

१२२. तमिद् दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः।— ऋ.७.३.५

१२३. पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम्।।— ऋ.७.५.५

१२४. उषो न जारः पृथु पाजो अश्रेद् दविद्युतद् दीद्यच्छोशुचानः।— ऋ. ७.१०.१, दे.अग्निः

१२५. स्वर्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म। अग्निर्जन्मानि देव आ वि विद्वान् द्रवद् दूतो देवयावा वनिष्ठः।।— ऋ.७.१०.२

१२६. न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः।— ऋ.७.१८.२०

१२७. त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः। त्रयो घर्मास उषसं सचन्ते सर्वाँ इत् ताँ अनु विदुर्वसिष्ठाः।।— ऋ.७.३३.७

१२८. शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः।— ऋ.७.३५.१०

१२९. समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु।।अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः।।— ऋ.७.४१.६

१३०. विभ्राजमान उषसामुपस्थाद् रेभैरुदेत्यनु-मद्यमानः। एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम।।— ऋ.७.६३.३

१३१. अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः।।— ऋ.७.६७.२

१३२. एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा। इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिःसदा नः।।— ऋ.७.६८.९, दे.अश्विनौ

१३३. यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः। तेन नःशं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन्।।— ऋ.७.६९.५

१३४. अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम्। अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद् युयोतम्।।— ऋ.७.७१.१, दे.अश्विनौ

१३५. उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः।— ऋ.७.७२.३

१३६. व्युषा आवो दिविजा ऋतेनाऽऽविष्कृण्वाना महिमानमागात्।-— ऋ.७.७५.१, उषसःदेवता सूक्तम्

१३७. उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्।-— ऋ.७.७६.१, उषसः देवता सूक्तम्

१३८. उषो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै।--— ऋ.७.७७.१, उषसःदेवता सूक्तम्

१३९. प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते।--— ऋ.७.७८.१,उषसःदेवता सूक्तम्

१४०. व्युषा आवः पथ्या जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती।-— ऋ.७.७९.१, उषसः देवता सूक्तम्

१४१. प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन्।----— ऋ.७.८०.१, उषसःदेवता सूक्तम्

१४२. प्रत्यु अदर्श्यायत्युच्छन्ती दुहिता दिवः।— ऋ. ७.८१.१, उषसः देवता सूक्तम्

१४३. पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत्। घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके।।— ऋ.७.८५.१

१४४. वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महाभिः। स्तोतारं विप्रःसुदिनत्वे अह्नां यान्नु द्यावस्ततनन् यादुषासः।।— ऋ.७.८८.४

१४५. उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः। गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः।।— ऋ.७.९०.४

१४६. कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन्। ते वायवे मनवे बाधितायाऽवासयन्नुषसं सूर्येण।।— ऋ.७.९१.१

१४७. उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम्।— ऋ.७.९९.४

१४८. प्र बोधयोषो अश्विना प्र देवि सूनृते महि। प्र यज्ञहोतरानुषक् प्र मदाय श्रवो बृहत्।।— ऋ.८.९.१७

१४९. यदुषो यासि भानुना सं सूर्येण रोचसे। आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम्।।— ऋ.८.९.१८

१५०. त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि।।— ऋ.८.१९.३१, दे.अग्निः

१५१. ताविद् दोषा ता उषसि शुभस्पती ता यामन् रुद्रवर्तनी। मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम्।।— ऋ.८.२२.१४

१५२. आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः। विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः।।— ऋ.८.२७.२

१५३. --- -सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना।।— ऋ.८.३५.१-३

१५४---सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना।।— ऋ.८.३५.४-६

१५५. ---- सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना।।— ऋ.८.३५.७-९

१५६. ----सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना।।— ऋ.८.३५.१०-१२

१५७. ---सजोषसा उषसा सूर्येण चाऽऽदित्यैर्यातमश्विना।।— ऋ.८.३५.१३-१५

१५८.----सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना।।— ऋ.८.३५.१६-१८

१५९. ---सजोषसा उषसा सूर्येण चाऽश्विना तिरोअह्नयम्।।— ऋ.८.३५.१९-२१

१६०. एते त्ये वृथगग्नय इद्धासः समदृक्षत। उषसामिव केतवः।।— ऋ.८.४३.५

१६१. एक एवाग्निर्बहुधा समिद्धः एकः सूर्यो विश्वमनु प्रभूतः। एकैवोषः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम्।।— ऋ.८.५८.२

१६२. अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी। अन्ति षद्भूतु वामवः।।— ऋ.८.७३.१६

१६३. अस्मा उषास आतिरन्त याममिन्द्राय नक्तमूर्म्याः सुवाचः।— ऋ.८.९६.१

१६४. आपानासो विवस्वतो जनन्त उषसो भगम्। सूरा अण्वं वि तन्वते।।— ऋ.९.१०.५

१६५. स पवस्व विचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः।।— ऋ.९.४१.५

१६६. परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि। सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति।।— ऋ.९.७१.७

१६७. अभीमृतस्य दोहना अनूषताऽधि त्रिपृष्ठ उषसो वि राजति।।— ऋ.९.७५.३

१६८. अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः। मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः।।— ऋ.९.८३.३

१६९. कृण्वन् त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः।।— ऋ.९.८४.२

१७०. वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः।— ऋ.९.८६.१९

१७१. अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत्।— ऋ.९.८६.२१

१७२. अपः सिषासन्नुषसः स्वर्गाः सं चिक्रदो महो अस्मभ्यं वाजान्।।— ऋ.९.९०.४

१७३. अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात्।— ऋ.१०१.१

१७४. ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ।— ऋ.१०.६.३

१७५. सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती।— ऋ.१०.११.३

१७६. प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम्।— ऋ.१०.२९.२, दे.इन्द्रः

१७७. इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन्। अस्य स्तुतिं जरितुर्भिक्षमाणा आ नःशग्मास उप यन्तु वाजाः।।— ऋ.१०.३१.५

१७८. किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः। संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त।।— ऋ.१०.३१.७

१७९. अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु।— ऋ.१०.३५.१

१८०. अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः।।— ऋ.१०.३५.२

१८१. उषा उच्छन्त्यप बाधतामघं स्वस्त्यग्निं समिधानमीमहे।। — ऋ.१०.३५.३

१८२. प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु। भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्यग्निं समिधानमीमहे।।— ऋ.१०.३५.५

१८३. अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत्।— ऋ.१०.३५.६

१८४. यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता।— ऋ.१०.३९.१

१८५. परिज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे।।— ऋ.१०.४१.१,दे.अश्विनौ

१८६. वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः।।— ऋ.१०.४५.५, दे.अग्निः

१८७. यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टम्। यत् ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम्।। —ऋ.१०.५५.४, दे.इन्द्रः

१८८. सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना।।— ऋ.१०.६४.३

१८९. बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः।।— ऋ.१०.६७.५

१९०. त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये।— ऋ.१०.६५.१०

१९१. सनामाना चिद्ध्वसयोन्यस्मा अवाहन्निन्द्र उषसो यथानः।— ऋ.१०.७३.६

१९२. नवोनवो भवति जायमानो ऽह्नां केतुरुषसामेत्यग्रम्। भागं देवेभ्यो वि दधात्यययन् प्र चन्द्रमास्तिरते दीर्घमायुः।।— ऋ.१०.८५.१९

१९३ .उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन्।— ऋ.१०.७८.७, दे.मरुतः

१९४. विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्। आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन्।।— ऋ.१०.८८.१२

१९५. कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः। नोपस्पिजं वःपितरो वदामि पृच्छामि वः कवयो विद्मने कम्।।— ऋ.१०.८८.१८

१९६. यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो वसते मातरिश्वः। तावद्दधात्युप यज्ञमायन् ब्राह्मणो होतुरवरो निषीदन्।।— ऋ.१०.८८.१९

१९७. प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः।— ऋ.१०.८९.१२

१९८. प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासद। आ ते चिकित्र उषसामिवेतयो ऽरेपसः सूर्यस्येव रश्मयः।।— ऋ.१०.९१.५

१९९. इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम्। अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते।।— ऋ.१०.९२.२

२००. किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव। पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि।।— ऋ.१०.९५.२

२०१. सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात्। अस्तं ननक्षे यस्मिञ्चाकन् दिवा नक्तं श्नथिता वैतसेन।।— ऋ.१०.९५.४

२०२. दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः।।— ऋ.१०.१०१.१

२०३. सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन्। आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद।।— ऋ.१०.१११.७

२०४. त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः। त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजन्तो अध्वरे।।— ऋ.१०.१२२.७

२०५. निरु स्वसारमस्कृतोषसं देव्यायती। अपेदु हासते तमः।।— ऋ.१०.१२७.३,दे.रात्रिः

२०६. उप मा पेपिशत् तमः कृष्णं व्यक्तमस्थित। उष ऋणेव यातय।। — ऋ.१०.१२७.७

२०७. उभे यदिन्द्र रोदसी आपप्राथोषा इव। महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्।।— ऋ. १०.१३४.१

२०८. तव त्य इन्द्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलम्। यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः।।— ऋ.१०.१३८.१

२०९. इन्द्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुन्ध्यूरजहादुषा अनः।।— ऋ.१०.१३८.५

२१०. पितुभृतो न तन्तुमित् सुदानवः प्रति दध्मो यजामसि। उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता।।— ऋ.१०.१७२.२

२११. अपवासे नक्षत्राणामपवास उषसामुत। अपास्मत् सर्वं दुर्भूतमप क्षत्रियमुच्छतु।।-अथर्व.३.७.७

२१२. उदुषा उदु सूर्य उदिदं मामकं वचः। उदेजतु प्रजापतिर्वृषा शुष्मेण वाजिना।।— अ.४.४.२

२१३. ब्रध्नः समीचीरुषसः समैरयन्। अरेपसः सचेतसः स्वसरे मन्युमत्तमाश्चिते गोः।।— अ.७.२३.२/ ७.२२.२

२१४. अहानि शं भवन्तु न शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु।।— अ.७.७२.१/ ७.६९.१

२१५. अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश।। प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः। प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान।।— अ.७.८७.४/७.८२.४

२१६. छन्दःपक्षे उषसा पेपिशाने समानं योनिमनु सं चरेते। सूर्यपत्नी सं चरतः प्रजानती केतुमती अजरे भूरिरेतसा।।— अ.८.९.१२

२१७. तस्मा उषा हिङ्कृणोति सविता प्र स्तौति। बृहस्पतिरूर्जयोद्गायति त्वष्टा पुष्ट्या प्रति हरति विश्वे देवा निधनम्।।— अ.९.१०.१/९.५.१

२१८. यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहात्युषसश्च केतून्। एवाहं सर्वं दुर्भूतं कर्त्रं कृत्याकृता कृतं हस्तीव रजो दुरितं जहामि।— अ.१०.१.३२

२१९. केनापो अन्वतनुत केनाहरकरोद् रुचे। उषसं केनान्वैन्द्ध केन सायंभवं ददे।।— अ.१०.२.१६

२२०. नाम नाम्ना जोहवीति पुरा सूर्यात् पुरोषसः। यदजः प्रथमं संबभूव स ह तत् स्वराज्यमियाय यस्मान्नान्यत् परमस्ति भूतम्।। अ. १०.७.३१

२२१. एषा सनत्नी सनमेव जातैषा पुराणी परि सर्वं बभूव। मही देव्युषसो विभाती सैकेनैकेन मिषता वि चष्टे।।— अ.१०.८.३०

२२२. मुञ्चन्तु मा शपथ्यादहोरात्रे अथो उषाः। सोमो मा देवो मुञ्चतु यमाहुश्चन्द्रमा इति।।— अ.११.८.७/११.६.७

२२३. सुगार्हपत्यो वितपन्नरातिमुषामुषां श्रेयसीं धेह्यस्मै।।— अ.१२.२.४५

२२४. आ रोह तल्पं सुमनस्यमानेह प्रजां जनय पत्ये अस्मै। इन्द्राणीव सुबुधा बुध्यमाना ज्योतिरग्रा उषसः प्रति जागरासि।।— अ.१४.२.३१

२२५. सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः।। नवं वसानःसुरभिः सुवासा उदागां जीव उषसो विभातीः।— अ.१४.२.४३

२२६. --- तस्य दक्षिणायां दिशि। उषाः पुंश्चली मन्त्रो मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः।।— अ.१५.२.१३

२२७. स्वस्त्यद्योषसो दोषसश्च सर्व आपः सर्वगणो अशीय।।— अ.१६.३.६

२२८. अजैष्माद्यासनामाद्याभूमानागसो वयम्। उषो यस्माद् दुष्वप्न्यादभैष्माप तदुच्छतु।।— अ.१६.६.१, उषाः देवता सूक्तम्

२२९. व्युच्छन्तीरुषसः पर्वता ध्रुवाः सहस्रं प्राणा मय्या यतन्ताम्।।— अ.१७.१.३०

२३०. अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश।। प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः। प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान।।— अ.१८.१.२७

२३१. वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरीतोषसां दिवः। प्राणःसिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन् मनीषया।।— अ.१८.४.५८

२३२. उषा अपस्वसुस्तमः सं वर्तयति वर्तनिं सुजातता। अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः।।— अ.१९.१२.१

२३३. रात्रि मातरुषसे नः परि देहि। उषा नो अह्ने परि ददात्वहस्तुभ्यं विभावरि।।— अ. १९.४८.२

२३४. स्तोमस्य नो विभावरि रात्रि राजेव जोषसे। आसाम सर्ववीरा भवाम सर्ववेदसो व्युच्छन्तीरनूषसः।।— अ.१९.४९.६

२३५. उषसे नः परि देहि सर्वान् रात्र्यनागसः। उषा नो अह्ने आ भजादहस्तुभ्यं विभावरि।।— अ. १९.५०.७

२३६. उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः।— अ. २०.७२.३

२३७. अतिग्राह्यषोडशिग्रहाभिधानम् : ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः। अस्माभिरू नु प्रतिचक्ष्याऽभूदो ते यन्ति ये अपरीषु पश्यान्।।— तै.सं. १.४.३३.१

२३८. प्रवत्स्यतो यजमानस्योपस्थानमन्त्राः :- या इष्टा उषसो निम्रुचश्च ताःसं दधामि हविषा घृतेन।— तै.सं.१.५.१०.२

२३९. राजसूयविषयाणामभिषेकार्थं जल-संस्कारमन्त्राणामभिधानम् : हिरण्यवर्णावुषसां विरोकेऽयःस्थूणावुदितौ सूर्यस्याऽऽरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च।।— तै.सं.१.८.१२.३

२४०. काम्ययाज्यापुरोनुवाक्याभिधानम् : सुवर्ण शुक्रमुषसो दिद्युतुः।— तै.सं.२.२.१२.६

२४१. याज्यानुवाक्याभिधानम् : नवोनवो भवति जायमानोऽह्नां केतरुषसामेत्यग्रे। भागं देवेभ्यो वि दधात्यायन्प्र चन्द्रमास्तिरति दीर्घमायुः।— तै.सं.२.४.१४.१

२४२. काम्येष्टि याज्या/पुनराधेयप्रकरणम् : स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।— तै.सं.२.५.१२.३

२४३. प्रयाज विधिः :- समिधो यजति वसन्तमेवर्तूनामव रुन्धे----समिधो यजत्युषस एव देवतानामव रुन्धे-- — तै.सं.२.६.१०.१

२४४. कारीरी इष्टि में आहवनीय पर धूम का अनुमन्त्रण : हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान्। शुचिभ्राजा उषसः नवेदा यशस्वतीरपस्ययुवो न सत्याः।— तै.सं.३.१.११.४

२४५. त्रैधातवीयेष्टि मध्ये स्विष्टकृतः पुरोनुवाक्यारूपा संयाज्या : त्रीण्यायूँषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने।— तै.सं. ३.२.११.२

२४६. मृदाक्रान्त्याभिधानम्/वल्मीकवपाया प्रक्रमणम् : अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततान।।— तै.सं.४.१.२.२

२४७. अग्निधारणाभिधानम्/कृष्णाजिनप्रतिमोकं : नक्तोषासा समनसा विरूपे धापयेते शिशुमेकँ समीची। द्यावा क्षामा रुक्मः अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः।— तै.सं.४.१.१०.४

२४८. आसन्द्यामुखाग्निस्थापनम् : अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जग्मिवान्तमसो ज्योतिषाऽगात्।— तै.सं.४.२.१.४

२४९. कूर्मेष्टकोपधानम् : मधु नक्तमुतोषसि मधुमत्पार्थिवँ रजः। मधु द्यौरस्तु नः पिता।— तै.सं.४.२.९.३

२५०. व्युष्टिनामकेष्टकाभिधानम् : इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा।— तै.सं.४.३.११.१

२५१. छन्दोभिधेष्टकाभिधानम् : अबोध्यग्निः समिधा जनानाम् प्रति धेनुमिवाऽऽयतीमुषासम्। यह्वा इव प्र वयामुज्जिहाना प्र भानवः सिस्रते नाकमच्छ।— तै.सं.४.४.४.२

२५२. मण्डूकिअग्नेः विकर्षणाभिधानम् : पावक आ चितयन्त्या कृपा। क्षामन्रुरुच उषसो न भानुना।— तै.सं.४.६.१.२

२५३. मृत्खननगमनपूर्वकमश्वेन भूम्याक्रमणम् : अन्वग्निरुषसामग्रमख्यदित्याहानुख्यात्यै— तै.सं. ५.१.२.५

२५४. आसन्द्यां वह्निस्थापनं : अग्रे बृहन्नुषसामूर्ध्वो अस्थादित्याहाग्रमेवैनँ समानानां कराति— तै.सं.५.२.१.५

२५५. दर्भस्तम्बे होमाभिधानम् : सजूरब्दोऽयावभिः सजूरुषा अरुणीभिःसजूःसूर्य एतशेन-- — तै.सं.५.६.४.१

२५६. अश्वमेधगतमन्त्रकथनम् :--- -उषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहा---- तै.सं.७.२.२०.१

२५७. अश्वमेधे रथे ध्वजमुपगूहनम् : केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथा:।— तै.सं.७.४.२०.१

२५८. यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिर: सूर्यश्चक्षुर्वात:प्राण:-- — तै.सं.७.५.२५.१

२५९. ब्रह्मण: प्राशित्र हरणम् : प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ-दिवं वा, उषसं वा मिथुन्येनया स्यामिति। तां संबभूव। तद्वै देवानामाग आस-य इत्थं स्वां दुहितरमस्माकं स्वसारं करोतीति।— श.ब्रा.१.७.४.१

२६०. अग्निहोत्रे होमविधि: :- अथ प्रात: सजूर्देवेन सवित्रा इति, तत् सवितृमत्प्रसवाय। सजूरुषसेन्द्रवत्या इति, अह्ना-इति वा। तद् अह्ना वोषसा वा मिथुनं करोति।— श.ब्रा.२.३.१.३८

२६१. अथ बाहूऽउद्गृह्णाति-हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्राऽउदिथ:-सूर्यश्च। आरोहतं वरुण, मित्र गर्तम्, ततश्चाक्षाथाम् अदितिम्, दितिं च इति। बाहू वै मित्रावरुणौ, पुरुषो गर्त।-— श.ब्रा.५.४.१.१५

२६२.-भूतानां पतिर्गृहपतिरासीत्, उषा पत्नी:। तद् यानि तानि भूतानि -ऋतवस्ते। अथ य: स भूतानां पति:-सम्वत्सर: स:। अथ या सोषा:पत्नी-औषसी सा। तानीमानि भूतानि च, भूतानां च पति:सम्वत्सरऽउषसि रेतोऽसिञ्चन्। स संवत्सरे कुमारोऽजायत। सोऽरोददीत्।— श.ब्रा. ६.१.३.८

२६३. उखा सम्भरणे मृत्खननम् : अन्वग्निरुषसामग्रमख्यत् इति। तदेनमुष:स्वैच्छन्। अन्वहानि प्रथमो जातवेदा इति। तदेनमह:स्वैच्छन्।— श.ब्रा.६.३.३.६

२६४. अथैनम् (अग्निम्) इण्ड्वाभ्यां परिगृह्णाति। नक्तोषासा समनसा विरूपे इति। अहोरात्रे वै नक्तोषासा समनसा विरूपे। धापयेते शिशुमेकं समीची इति। यद्वै किञ्चाहोरात्रयो:-तेनैतमेव समीची धापयेते।-— श.ब्रा.६.७.२.३

२६५. वि नाकमख्यत् सविता वरेण्य:-इति। स्वर्गो वै लोको नाक:। तमेष उद्यन्नेवानुविपश्यति। अनु प्रयाणमुषसो विराजति -इति। उषा वा अग्रे व्युच्छति। तस्या ऽएष व्युष्टिं विराजन्ननूदेति।— श.ब्रा.६.७.२.४

२६६. अग्रे बृहन्नुषसामूर्ध्वोऽअस्थात्-इति। अग्रे ह्येष (अग्नि:) बृहन् उषसामूर्ध्वस्तिष्ठति। निर्ज्जगन्वान्तमसो ज्योतिषाऽऽगात्-इति।— श.ब्रा. ६.७.३.१०

२६७. सजूरब्द: -इति चिति:। अयवोभि:-इति पुरीषम्। सजूरुषा:-इति चिति:। अरुणीभि:-इति पुरीषम्।— श.ब्रा.७.२.३.८

२६८. आहवनीयाग्निचित्यायां पञ्चचितिकायां प्रथमा चिति: :- संवत्सरोऽसि, परिवत्सरोऽसि, इदावत्सरोऽसि, इद्वत्सरोऽसि, वत्सरोऽसि। उषसस्ते कल्पन्ताम्। अहोरात्रास्ते कल्पन्ताम्।— श.ब्रा. ८.१.४.८

२६९. अश्वावयवेषु विराडवयवोपासनं ब्राह्मणम् : उषा वा अश्वस्य मेध्यस्य शिर:, सूर्यश्चक्षु:, वात: प्राण:, व्यात्तमग्निर्वैश्वानर:।— श.ब्रा.१०.६.४.१

२७०. इममूषु वो अतिथिमुषर्बुधम्-इति। नवर्चं जातवेदसीयं शस्त्वा ऐकाहिके निविदं दधाति।— श.ब्रा.१३.५.१.१२

२७१. उषस्तब्राह्मणं वा निर्गुणात्मविद्या-ब्राह्मणम् : अथ हैनमुषस्तश्चाक्रायण: पप्रच्छ। याज्ञवल्क्येति होवाच। यत्साक्षादपरोक्षाद्ब्रह्म। य आत्मा सर्वांतर:। तं मे व्याचक्ष्वेति।— श.ब्रा.१४.६.५.१

२७२. श्रायन्तीयं साम (साम२६७):- प्रजापतिरुषसमध्यैत् स्वां दुहितरं तस्य रेत:परापतत्तदस्यांन्यषिच्यत तदश्रीणादिदं मे मादुषदिति तत्सदकरोत्पशूनेव। यच्छ्रायन्तीयं ब्रह्मसाम भवति श्रीणाति चैवैनँ सच्च कराति।— तां.ब्रा.८.२.१०, जै.ब्रा.३.२६२

२७३. सन्धिस्तोत्रेणस्तोतुं मध्ये व्युष्टि हेतु प्रायश्चित्तम् : अग्ने विवस्वदुषस इति सन्धिना स्तुयु: प्राणा वै

त्रिवृत् स्तोमानां प्रतिष्ठा रथन्तरँ साम्नां प्राणाँश्चैवोपयन्ति प्रतिष्ठाञ्च।— तां.ब्रा.९.३.४

२७४. अग्नेश्चिकित्त उषसामिवेतय इति (ऋ. १०.९१.५, साम ९८२) एतानीव ह्येतर्ह्यहानीत्याते यतन्ते रथ्यो यथा पृथगित्येव ह्येतर्ह्यहानि यतन्ते।— तां.ब्रा. १३.२.३

२७५. प्रातःसवने सन्धिस्तोत्रस्य प्रशंसा : पराच्योवा अन्या व्युछन्ति प्रतीच्योऽन्या एषा वाव प्रतीची व्युछति याश्विनेन व्युछति प्रतीचीरेवास्मा उषसाविवासयति।— तां.ब्रा.२०.१.४

२७६. वाग्वै त्रिरात्रो वाचो रूपेणाज्यानि चाहानि च विभज्यन्त एकाक्षरा वै वाक् त्र्यक्षरमक्षरमक्षरस्य रूपेण विभज्यन्ते त्रयो गन्धर्वास्तेषामेषा भक्तिरग्नेः पृथिवी वायोरन्तरिक्षमसावादित्यस्य द्यौस्त्रयोघर्मास उषसँ सचन्ते। अग्निरुषसँ सचते वायुरुषसँ सचतेऽसावादित्य उषसँ सचते। त्रीणि मिथुनानि तान्येष।— तां.ब्रा.२०.१५.२

२७७. तदभ्ययनूक्ता तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्य्यस्य यतः परिजार इवाचरन्त्यूषा ददृशे न पुनर्य्यतीवेति।— तां.ब्रा.२५.८.४

२७८. यद् वेव मैत्रावरुणानि शंसति-प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यै। उत वामुषसो बुधि साकं सूर्यस्य रश्मिभि इत्यृचाभ्यनूक्तम्।— गोपथ ब्रा.२.३.१३

२७९. अभिष्टवार्थं पठनीय सूक्तम् : आभात्यग्निरुषसामनीकमिति सूक्तम्।— ऐ.ब्रा. १.२१

२८०. यज्ञे पत्नीमीक्षणाय ऋचा : अरूरुचदुषसः पृश्निरग्रिय इति रुचितवती रुचमेवास्मिंस्तद्दधाति।— ऐ.ब्रा.१.२१

२८१. आप्रीसूक्तम् : उषासानक्ता यजत्यहोरात्रे वा उषासानक्ताऽहोरात्रे एव तत्प्रीणात्यहोरात्रयोर्य-जमानं दधाति इति।— ऐ.ब्रा.२.४

२८२. देवेभ्यः प्रातर्यावभ्यो होतरनु-ब्रूहीत्याहाध्वर्युः। एते वाव देवा प्रातर्यावाणो यदग्निरुषा अश्विनौ त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति।— ऐ.ब्रा.२.१५

२८३. सप्ताऽऽग्नेयानि च्छन्दांस्यन्वाह सप्त वै देवलोकः।-- सप्तोषस्यानि च्छन्दांस्यन्वाह सप्त वै ग्राम्याःपशवः।---सप्ताऽऽश्विनानि च्छन्दांस्यन्वाह सप्तधा वै वागवदत्तावद्वै वागवदत्सर्वस्यै वाचः सर्वस्य ब्रह्मणः परिगृहीत्यै।— ऐ.ब्रा.२.१७

२८४. प्रातरनुवाकस्य समाप्तिम् ऋचा : अभूदुषा रुशत्पशुरित्युत्तमया परिदधाति। तदाहुर्यत्त्रीन्क्रतूनन्वाहाऽऽग्नेयमुषस्यमाश्विनं कथ-मस्यैकयर्चा परिदधतः सर्वे त्रयः क्रतवः परिहिता भवन्ती।— ऐ.ब्रा.२.१८

२८५. अग्निमारुत शस्त्र हेतु उपाख्यानम् : प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्तं देवा अपश्यन्नकृतं वै प्रजापतिः करोतीति ते तमैच्छन्य एनमारिष्यत्येतमन्योन्यस्मिन्नाविदंस्तेषां या एव घोरतमास्तन्व आसंस्ता एकधा समभरंस्ता संभूता एष देवोऽभवत्तदस्यैतद्भूतवन्नाम।---या रोहित्सा रोहिणी-— ऐ.ब्रा.३.३३

२८६. उत्तराणि चत्वारि हवींषि : दिवे चरुं या द्यौः साऽनुमति सो एव गायत्र्युषसे चरुं योषाः सा राका सो एव त्रिष्टुब्भावे चरुं या गौः सा सिनीवाली सो एव जगती पृथिव्यै चरुं या पृथिवी सा कुहूः सो एवानुष्टुप्।-— ऐ.ब्रा.३.४८

२८७. तासां वै देवतानामाजिं धावन्तीनामधिसृष्टानामग्निर्मुखं प्रथमःप्रत्यपद्यत तमश्विनावन्वागच्छतां-----ता उषसमन्वागच्छतां तामब्रूतामपोदित्यावां वा इदं जेष्याव इति सा तथेत्यब्रवीत्तस्यै वै ममेहाप्यस्त्विति तथेति तस्या अप्यत्राकुरुतां तस्मादुषस्यमाश्विने शस्यते।— द्र.सायण भाष्य— ऐ.ब्रा.४.८

२८८. अश्वतरीरथेनाग्निराजिमधावत्तासां प्राजमानो योनिमकूलयत्तस्मात्ता न विजायन्ते। गोभिरुणैरुषा आजिमधावत्तस्मादुषस्यागताया-मरुणमिवैव प्रभात्युषसो रूपम्।— ऐ.ब्रा.४.९

२८९. इममू षु वो अतिथिमुषर्बुधमिति पञ्चमस्याह्न आज्यं भवति जागतमध्यासवत्पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम्।— ऐ.ब्रा.५.६

२९०. प्रउग शस्त्र :-उच्छन्नुषसः सुदिना अरिप्रा-— ऐ.ब्रा.५.१८

२९१. यस्य सर्व एवाग्नयो मिथः संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये विविचयेऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये स्वर्णवस्तोरुषसामरोचि-- इत्याहुतिं वाऽऽहवनीये जुहुयादग्नये विविचये स्वाहेति सा तत्र प्रायश्चित्तिः।— ऐ.ब्रा.७.७

२९२. शुनःशेप के यज्ञीय पाशों से मुक्त होने का आख्यान : तमश्विना ऊचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति स उषसं तुष्टावात उत्तरेण तृचेन (कस्त उषः, ऋ. १.३०.२०)— ऐ.ब्रा. ७.१७

२९३. -- उषसः श्रेयसीः श्रेयसीर्दधत्।— तै.ब्रा. १.२.१.२०

२९४. गवामयनशेष विधिः। अग्निप्रणयन काले गमनार्थाय मन्त्राः :---अन्वग्नि-रुषसामग्रमख्यत्। अन्वहानि प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीन्। अनु द्यावापृथिवी आततान।— तै.ब्रा.१.२.१.२३

२९५. पराची वा एतस्मै व्युच्छन्ती व्युच्छति। यस्याग्निमनुद्धृतँ सूर्योऽभ्युदेति। उषाः केतुना जुषताम्।-- ---प्रतीचीमेवास्मै विवासयति।— तै.ब्रा. १.४.४.५

२९६. राजसूयानुब्राह्मणम्। जल संस्कारः :- हिरण्यवर्णावुषसां विरोक इति त्रिष्टुभा बाहू उद्गृह्णाति। इन्द्रियं वै वीर्यं त्रिष्टुक्। इन्द्रियमेव वीर्यमुपरिष्टादात्मन्धत्ते।।— तै.ब्रा.१.७.६.८

२९७. अग्निहोत्रे अनुदितहोमपक्षः ---- - तस्माद्यदौषसं जुहोति। तदेव संप्रति। अथो यथा प्रार्थमौषसं परिवेवेष्टि। तादृगेव तत्। (द्र.सायण भाष्य)— तै.ब्रा.२.१.२.१२

२९८. उपहोमशेषाभिधानम्। आग्नेय कर्मणि विनियोक्तव्यो मन्त्रः :- यो देह्यो अनमयद्वधस्नैः। यो अर्यपत्नीरुषसश्चकार। स निरुध्या नहुषो यह्वो अग्निः। विशश्चक्रे बलिहृतः सहोभिः।।— तै.ब्रा.२.४.७.९

२९९. उपहोमशेषाभिधानम्। उषोदेवताके कर्मणि विनियोक्तव्यो मन्त्रः :- इमा एव ता उषसो याः प्रथमा व्यौच्छन्। ता देव्यः कुर्वते पञ्च रूपा। शश्वतीर्नावपृज्यन्ति। न गमन्त्यन्तम्।— तै.ब्रा. २.५.६.५

३००. कौकिल सौत्रामण्यां अवभृथे जल उपस्थान मन्त्रः :- समाववर्ति पृथिवी। समुषाः। समु सूर्यः। समु विश्वमिदं जगत्। वैश्वानर ज्योतिर्भूयासम्। विभुं कामं व्यश्नवै।— तै.ब्रा.२.६.६.५

३०१. प्रयाजानामेकादश पुरोरुचानाम् प्रथमा ऋचः :- समिद्ध इन्द्र उषसामनीके। पुरोरुचा पूर्वकृद्वावृधानः। त्रिभिर्देवैस्त्रिँशता वज्रबाहुः। जघान वृत्रं वि दुरो ववार।— तै.ब्रा.२.६.८.१

३०२. षष्ठम् प्रयाज देवः :- उषासा नक्ता बृहती बृहन्तम्। पयस्वती सुदुघे शूरमिन्द्रम्। पेशस्वती तन्तुना संव्ययन्ती। देवानां देवं यजतः सुरुक्मे।— तै.ब्रा.२.६.८.३

३०३. कौकिल सौत्रामण्यां पशुत्रये प्रयाजार्थं मैत्रावरुण प्रैषः :- होता यक्षत्सुपेशसोषे नक्तंदिवा। अश्विना संजानाने। समञ्जाते सरस्वत्या। त्विषिमिन्द्रे न भेषजम्। श्येनो न रजसा हृदा। पयः सोमः परिस्रुता घृतं मधु। वियन्त्वाज्यस्य होतर्यज।— तै.ब्रा.२.६.११.५

३०४. कौकिल सौत्रामण्यां सप्तम् प्रयाज याज्या :- उषासा नक्तमश्विना। दिवेन्द्रँ सायमिन्द्रियैः। संजानाने सुपेशसा। समञ्जाते सरस्वत्या।— तै.ब्रा.२.६.१२.३

३०५. कौकिल सौत्रामण्यां अनुयाजानां तृतीय मैत्रावरुण प्रैषः :- देवी उषासावश्विना। भिषजेन्द्रे सरस्वती। बलं न वाचमास्ये। उषाभ्यां दधुरिन्द्रियम्। वसुवने वसुधेयस्य वियन्तु यज।— तै.ब्रा.२.६.१४.२

३०६. कौकिल सौत्रामण्यां षष्ठम् प्रयाज देवः :- उषे यह्वी सुपेशसा। विश्वे देवा अमर्त्यः। त्रिष्टुप्छन्द इन्द्रियम्। पष्ठवाड्गौर्वयो दधुः।— तै.ब्रा.२.६.१८.३

३०७. कौकिल सौत्रामण्यां अनुयाजानां तृतीय मैत्रावरुण प्रैषः :- देवी देवं वयोधसम्। उषे इन्द्रमवर्धताम्। अनुष्टुभा छन्दसेन्द्रियम्। वाचमिन्द्रे वयो दधत्। वसुवने वसुधेयस्य वीतां यज।— तै.ब्रा.२.६.२०.२

३०८. अग्निष्टुद् ऋतुः :- त्वे अग्ने सुमतिं भिक्षमाणाः। दिवि श्रवो दधिरे यज्ञियासः। नक्ता च चक्रुरुषसा विरूपे। कृष्णं च वर्णमरुणं च संधुः।— तै.ब्रा.२.७.१२.५

३०९. इन्द्रस्तुद्यागः, ऐन्द्राग्नस्य पुरोरुक् : महि क्षेत्रं पुरुश्चन्द्रं विविद्वान्। आदित्सखिभ्यश्च रथँ समैरत्। इन्द्रो नृभिरजनद्दीद्यानः साकम्। सूर्यमुषसं गातुमग्निम्।— तै.ब्रा.२.७.१३.३

३१०. पशोः सूक्ते वपायाः पुरोनुवाक्या : सूर्यो देवीमुषसँ रोचमाना मर्यः। न योषामभ्येति पश्चात्। यत्रा नरो देवयन्तो युगानि। वितन्वते प्रति भद्राय भद्रम्।— तै.ब्रा.२.८.७.१

३११. पशोः सूक्ते हविषः पुरोनुवाक्या : योह स्य वाँ रथिरा वस्त उस्राः। रथो युजानः परियाति वर्तिः। तेन नः शं योरुषसो व्युष्टौ। न्यश्विना वहतं यज्ञे अस्मिन्।— तै.ब्रा.२.८.७.८

३१२. पशोर्हविषो याज्याः, उपहोमे प्रथम ऋचा : आ गावो अग्मन्नुत भद्रमक्रन्। सीदन्तु गोष्ठे रणयन्त्वस्मे। प्रजावतीः पुरुरूपा इह स्युः। इन्द्राय पूर्वीरुषसो दुहानाः।— तै.ब्रा.२.८.८.११

३१३. पशोर् हविषो याज्या : समध्वरायोषसो नमन्त। दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नः। रथमिवाश्वा वाजिन आवहन्तु।। अश्वावतीर्गोमतीर्न उषासः। वीरवतीः सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनाः। यूयं पात स्वस्तिभिः सदा नः।— तै.ब्रा.२.८.९.९

३१४. उषोदेवताके यागे पुरोनुवाक्या : प्रत्युवदृश्यायती। व्युच्छन्ती दुहिता दिवः। अपो मही वृणुते चक्षुषा। तमो ज्योतिष्कृणोति सूनरी। उदुस्रियाःसचते सूर्यः। सचा उद्यन्नक्षत्रमर्चिमत्। तवेदुषो व्युषि सूर्यस्य च।— तै.ब्रा.३.१.३.१

३१५. उषोदेवताया इष्टिः :- उषा वा अकामयत। प्रियाऽऽदित्यस्य सुभगा स्यामिति। सैतमुषसे चरुं निरवपत्। ततो वै सा प्रियाऽऽदित्यस्य सुभगाऽभवत्। प्रियो ह वै समानानाँ सुभगो भवति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। उषसे स्वाहा व्युष्ट्यै स्वाहा। व्यूषुष्यै स्वाहा व्युच्छन्त्यै स्वाहा। व्युष्टायै स्वाहेति।— तै.ब्रा.३.१.६.३

३१६. पाशुकहोत्रे प्रयाज विषये मैत्रावरुण प्रैषाः, षष्ठम् मन्त्रः :- होता यक्षदुषासानक्ता बृहती सुपेशसा नृँःपतिभ्यो योनिं कृण्वाने। सँस्मयमाने इन्द्रेण देवैरेदं बर्हिः सीदतां वीतामाज्यस्य होतर्यज।— तै.ब्रा.३.६.२.

३१७. दर्शपूर्ण मासे आदित्योपस्थान मन्त्राः :- यो नः शपादशपतः। यश्च नः शपतः शपात्। उषाश्च तस्मै निम्रुक्च। सर्वं पापँ समूहताम्।— तै.ब्रा.३.७.६.२३

३१८. उषसे स्वाहा व्युष्ट्यै स्वाहेत्याह। रात्रिर्वा उषाः। अहर्व्युष्टिः। अहोरात्रे एवावरुन्धे। अथो अहोरात्रयोरेव प्रतितिष्ठति। ता यदुभयीर्दिवा वा नक्तं वा जुहुयात्। अहोरात्रे मोहयेत्। उषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहेत्यनुदिते जुहोति। उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते जुहोति। अहोरात्रयोरव्यतिमोहाय।— तै.ब्रा.३.८.१६.४

३१९. सर्वान्ते होमं : उषसे स्वाहा व्युष्ट्यै स्वाहेत्यन्ततो जुहोति। सुवर्गस्य लोकस्य समष्ट्यै।— तै.ब्रा. ३.८.१८.६

३२०. विश्वप्री नामक होममन्त्राः :— उषसमुषसमशीय अहमसो ज्योतिरशीय— तै.ब्रा. ३.११.५.३

३२१. अरूरुचद् उषसः पृश्निर् अग्रयुः इति प्रजाकामस्य।— जै.ब्रा.१.८१

३२२. असुरों से जीते हुए धन के परस्पर विभाजन के लिए देवों में आजि/दौड। अग्नेः प्रथमो रथ आसीद् अथोषसो ऽथाश्विनोः। अश्विनौ द्वारा अग्नि और उषा से समझौता करके उन्हें यज्ञ में भाग देने का वर्णन।— जै.ब्रा.१.२१०

३२३. अथैष राथन्तरस् संधिर् भवति। प्रजापतिर् उषसं स्वां दुहितरं बृहस्पतये प्रायच्छत्। तस्या एतत् सहस्रम् आश्विनं वहतुम् अन्वाकरोत्।---- -देवों में धन के विभाजन के लिए आजि। अग्ने: प्रथमो रथ आसीद् अथोषसो ऽथाश्विनो:। ---- अश्विनौ द्वारा अग्नि व उषा से समझौता करके उन्हें यज्ञ में भाग देने का वर्णन।— जै.ब्रा.१.२१३

३२४.--अग्ने विवस्वद् उषस: इत्य् एतस्मिंस् तृचे राथन्तरं संधिम् अस्तोष्यत्। अग्ने इति तेनाग्नेयाद् रूपान् नैष्यत्। उषस: इत्य् उषस्यात् सजूर् अश्विभ्याम् इत्य् आश्विनात्। नास्योन्मदिष्णु: प्रजाभविष्यद् ब्रह्मवर्चसिनी त्व् एवाभविष्यद् इत्य् उत हैनम् उवाच।— जै.ब्रा.१.३४९

३२५.-----एते ह वाव द्वादश देवलोका:। अथ यथोषसो वा यद् वैवम् एवान्ये लोका:।— जै.ब्रा.२.६

३२६. -त्रयो घर्मास उषसं सचन्त इत्य् अग्निर् उषसं सचते, वायुर् उषसं सचत, आदित्य उषसं सचते। सर्वाँ इत् ताँ अनु विदुर् वसिष्ठा इति ये वै ब्राह्मणाश् शुश्रुवांसस् ते वसिष्ठास्, ते ह्य् एतत् सर्वं अनु विदु:।— जै.ब्रा.२.२४१-२४२

३२७. त्वया वयं प्रवत: शश्वतीर् अपो अति शूर तरामसि इत्य् एता ह वै प्रवत: शश्वतीर् आपो यत् संवत्सर ऋतवो मासा अर्धमासा अहोरात्राण्य् उषस:। ता एवैतेनातितरन्ति। — जै.ब्रा.२.३९१

३२८. अरूरुचद् उषस: पृश्निर् अग्रिय उक्षा मिमाति भुवनेषु वाजयु:।-- -इति पुनर् एवैतत् तृतीये ऽहनि गर्भम् आदधति चतुर्थस्यैवाह्न: प्रजात्यै। — जै.ब्रा.३.५४

३२९. पवस्व विश्वचर्षण आ मही रोदसी पृणा। उषास् सूर्यो न रश्मिभि:।।— इति सूर्यवतीर् भवन्ति। सौर्यं ह्य् एतद् अहर् एकविंशं प्रतिष्ठा वैराजम्।— जै.ब्रा.३.६०

३३०. अग्न इति पुंस, उषसाम् इवेति स्त्रियै।— जै.ब्रा.३.८७

३३१.तासु श्रायन्तीयम् (साम २६७, ऋ. ८.९९.३)।----प्रजापतिर् होषसं स्वां दुहितरम् अभ्यध्यायत्। सास्मै रोहिद् भूत्वातिष्ठत्। तां पृषतो भूत्वास्कन्दत्। स ऐक्षतास्मै वै मां देवा अजीजनन्न् औपद्रष्ट्र्याय। रुद्र द्वारा प्रजापति को इषु से विद्ध करने आदि का वर्णन।— जै.ब्रा.३.२६२

३३२. तस्योषस्येव पत्नी चन्द्रमास् सोमपीथ:। तस्मात् सपत्नीको दीक्षेत। सा हैषा देवता दीक्षमाणस्य तेज इन्द्रियं वीर्यं यश आदत्ते।— जै.ब्रा. ३.३५९

३३३. अहम् अरात्सम् ओषम् इति यद् अहम् इति तान्य् अहान्य् अभवन्। यद् अरात्सम् इति ता रात्रयो, यद् ओषम् इति ता उषस:।— जै.ब्रा.३.३८०

३३४. एष ह वाव स देवानाम् अधिदेवो य एष तपति। तस्यैतत् सहस्रस्थूणं विमितं दृढम् उग्रम् यत् संवत्सर ऋतवो मासा अर्धमासा अहोरात्राण्य् उषस:। स य एवम् एतत् सर्वं द्वादशाहम् आत्मानम् अभि संपद्यमानं वेद सर्व एनं कामा अभि संपद्यन्ते।— जै.ब्रा.३.३८५

३३५. चत्वारो होमकाला: :- उषस्युपोदयं समयाविषित उदिते वा प्रात:।— आप.श्रौ.सू.६.४.९

३३६. यदि महारात्रे पुनरेवौषसं हुत्वैतयैवोपतिष्ठेत।— आप.श्रौ.सू.९.१०.८

३३७. यदक्रन्द: प्रथमं जायमान इत्यश्वस्तोमीयं हुत्वैकस्मै स्वाहेत्येताननुवाकान्पुन:पुनरभ्यासं रात्रिशेषं हुत्वोषसे स्वाहेत्युषसि। व्युच्छन्त्यै स्वाहेति व्युच्छन्त्याम्। व्युष्ट्यै स्वाहेति व्युष्टायाम्।— आप.श्रौ.सू. २०.१२.१०

३३८. अग्निहोत्रम्। (सायंहोममन्त्रेषु) अग्निशब्दे सूर्य:। रात्र्युषसाऽह्नेति वा। ज्योति: सूर्य इति वा प्रात:।— कात्या.श्रौ.सू.४.१५.८

३३९. अथ यत्रैतदौषसी नोदेति तत्र जुहुयात्। उदेतु श्रीरुषस: कल्पयन्ती पूल्यान्कृत्वा पलित एतु चार:। ऋतून्बिभ्रती बहुधा विरूपान्मह्यं भव्यं विदुषी कल्पयाति।। औषस्यै स्वाहति हुत्वा।— कौशिकसूत्रं १०१.१

३४०. चातुर्मास्यान्तर्गत वैश्वदेवपर्व। प्रयाजाः :- उषासानक्ता अग्न आज्यस्य वीताम्।------ नवानुयाजाः। देवी उषासानक्ता वसुवने वसुधेयस्य वीताम्। -शां.श्रौ.सू.३.१३.२०

३४१. ज्योतिष्टोमे प्रातरनुवाकः। अथोषस्यम् क्रतुम्। गायत्रम्। कस्त उष इति तिस्रः। प्रति ष्या सूनरी। अथानुष्टुभम्। उषो भद्रेभिः। अथ त्रैष्टुभम्।— शां.श्रौ.सू.६.५.१

३४२. अभिप्लवषळह प्रकरणम् : इन्द्र दृह्यति वैश्वदेवं षष्ठस्याह्नो द्वितीयेऽभिप्लवे। उषासानक्तेति तृतीये।— शां.श्रौ.सू.११.९.९

३४३. विषुवत् प्रकरणम् : देवान्हुव इति द्वितीये। उषासानक्तेति तृतीये।— शां.श्रौ.सू. ११.१२.१६

३४४. एकाह प्रकरणम् : इममू षु वो अतिथिमुषर्बुधमिति चतस्रो देवानांपत्नीनां राकायाश्च।— शां.श्रौ.सू. १४.५७.९

३४५. राजसूय प्रकरणम्। शुनःशेपस्य बन्धनात् मुक्तिः।---तमश्विना ऊचतुः। उषसं नु स्तुह्यथ त्वोत्स्रक्ष्याव इति। स उषसं तुष्टावात उत्तरेणैव तृचेन। तस्य ह स्मर्च्यृच्युक्तायां नितरां पाशो मुमुचे।— शां.श्रौ.सू. १५.२२.१, द्र. ऋ. ४.३.११

३४६. द्वैध सूत्राणि। राज्ञ उपस्थान इति। स ह स्माह बौधायन उषसा नामेयमोषधिर्भवति तां दूतीं कुर्वीतैष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष-— बौधा.श्रौ.सू. २१.१२

३४७. प्रायश्चित्तानि। स यद्यनस्तमिते जुहुयात्पुनरेवास्तमिते जुहुयादथ यदि महारात्रे जुहुयात्पुनरेवौषसं जुहुयादिति।— बौधा.श्रौ.सू. २४.३१

३४८. दश रात्रादूर्ध्वं प्रवासं कृत्वा।---या इष्टा उषसो या अनिष्टास्ताःसंतनोमि हविषा घृतेन स्वाहेति। — आश्व.श्रौ.सू.२.५.१४

३४९. नव प्रयाजाः।----उषासा नक्ताग्न आज्यस्य वीतां- ---। नवानुयाजाः---- देवी उषासानक्ता वसुवने वसुधेयस्य वीताम्।— आश्व.श्रौ.सू. २.१६.९

३५०. यद्याहवनीयमप्रणीतमभ्यस्तमियात्।----- अथैतदाज्यं जुहुयात्पुरस्तात्प्रत्यङ्मुख उपविश्योषाः केतुना जुषतां स्वाहेति।— आश्व.श्रौ.सू. ३.१२.१८

३५१. उदग्ने शुचयस्तवाग्ने बृहन्नुषसामूर्ध्वो अस्थादिति।— आश्व.श्रौ.सू.३.१२.२९

३५२. आग्नेय क्रतुः।---प्रत्यग्निरुषस इति त्रीणि।— आश्व.श्रौ.सू.४.१३.७

३५३. --- -कतरा पूर्वोषासानक्तेति वैश्वदेवं— आश्व.श्रौ.सू.७.७.८

३५४. पृष्ठ्यः षडह। पञ्चमस्येममूषु वो अतिथिमुषर्बुधमिति नवाऽऽज्यम्।— आश्व.श्रौ.सू. ७.१२.६

३५५. दशमेऽहनि। अनुष्टुभां स्थानेऽग्निं नरो दीधितिभिररण्योरिति तृचमाग्नेये क्रतौ। उषा अपस्वसुस्तम इति पच्छो द्विपदां त्रिरुषस्ये।— आश्व.श्रौ.सू. ८.१२.३

३५६.-उषासानक्ता--- -इति निपातभाञ्जि।— अथर्व परि. ४८.१३३

३५७.-उषा।--इति संस्तविकास्तस्यैकवद्-बहुवत्स्त्रीवच्च।— अथर्व परि.४८.१३९

३५८. सूर्यस्य त्रयः पत्नयः :- वृषाकपायी सूर्योषाः सूर्यस्यैव तु पत्नयः।।अमुतोऽर्वाङ् निवर्तन्ते प्रतिलोमास्तदाश्रयाः। पुरोदयात्तामुषसं सूर्यां मध्यंदिने स्थिते।। वृषाकपायीं सूर्यस्य तामेवाहुस्तु निम्रुचि।— बृहद्देवता २.८

## उष्ट्र

१. प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः।— ऋ. १.१३८.२

२. यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत् सहस्रा दश गोनाम्।।— ऋ.८.५.३७

३. उदानट् ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत्। श्रवसा याद्वं जनम्।।— ऋ.८.६.४८

४. षष्टिं सहस्राश्वस्यायुतासनमुष्ट्रानां विंशतिं शता। दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा।।— ऋ.८.४६.२२

५. अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत्। अध श्वित्नेषु विंशतिं शता।।— ऋ.८.४६.३१

६. उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शासुरेथः।— ऋ.१०.१०६.२

७. उष्ट्रा यस्य प्रवाहणो वधूमन्तो द्विर्दश। वर्ष्मा रथस्य नि जिहीडते दिव ईषमाणा उपस्पृशः।।— अथर्व.२०.१२७.२

८. श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या।— वा.सं.२४.३९

९. ईशानाय परस्वत आलभते----त्वष्ट्र उष्ट्रान्।— वा.सं.२४.२८

१०. अग्निचितिः :- उष्टारयोः पील्वयोरथो आबन्धनीययोः। सर्वेषां विद्म वो नाम वाहाः कीलालपेशसः।— मै.सं.२.७.१२

११.--- -सौर्य एककपाल उष्टारौ दक्षिणा सीरं वा--— काठक सं.१५.२

१२. उष्टो ऽहिस् समुष्टो ऽहिर् निवीतो ऽरसः कृतः। विषस्य ब्रह्मणाम् आसीत् ततो जीवन् न मोक्ष्यसे।।— पैप्प.सं.३.१६.५

१३. अथ यदास्य गवां मानुषमहिष्यजाश्वोष्ट्रा प्रसूयन्ते,-----तान्येतानि सर्वाणि रुद्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।— षड्विंश ब्रा.६.११.२

१४. वरुणस्त्वा नयतु देवि दक्षिणे पूष्ण उष्ट्रं।— तां.ब्रा.१.८.१२

१५. अथ यस्माद् दशमे ऽहनि पञ्चदशत्रयस्त्रिंशौ स्तोमौ भवतस् तस्माद् उ यौ ज्येष्ठौ पशूनां तौ युक्तौ वहतो हस्ती चोष्ट्रश् च।— जै.ब्रा. ३.१८१

१६. पुरोडाश प्रकरणम् : स यं पुरुषमालभन्त-स किम्पुरुषोऽभवत्। यावश्वं च गाञ्च तौ गौरश्च गवयश्चाभवताम्। यमविमालभन्त-स उष्ट्रोऽभवत्। यमजमालभन्त-स शरभोऽभवत्।— श.ब्रा.१.२.३.९

१७. अथावेः। इममूर्णायुम् इति।---- -त्वष्टुः प्रजानां प्रथमं जनित्रम् इति।--- -अग्ने मा हिंसीः परमे व्योमन् इति।--- -उष्ट्रमारण्यमनु ते दिशामि इति। तदस्माऽउष्ट्रमारण्यमनुदिशति। तेन चिन्वानस्तन्वो निषीद इति। तेन चिन्वान आत्मानं संस्कुरुष्वेत्यतत्। उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु इति। तद् उष्ट्रे च शुचं दधाति। यं च द्वेष्टि तस्मिंश्च।— श.ब्रा.७.५.२.३५

१८.--ते ऽविमालभन्त सोऽवेरालब्धादुद-क्रान्तसोऽजं प्राविशत्तस्मादजो मेध्योऽभवदथैन-मुत्क्रान्तमेधमत्यार्जन्त स उष्ट्रोऽभवत् इति।— ऐ.ब्रा.२.८

१९. अथ (अङ्गारेषु शान्तेषु) यद्भस्माऽसीत्तत्पुरुष्यं व्यसर्पद्गौरो गवय ऋश्य उष्ट्रो गर्दभ इति ये चैतेऽरुणा पशवस्ते च इति।— ऐ.ब्रा.३.३४

२०. स्वरूपानुसंधानव्यतिरिक्तान्यशास्त्राभ्यास उष्ट्रकुङ्कुमभारवद्व्यर्थः।— संन्यासोपनिषत् २.५९, नारदपरिव्राजकोपनिषत् ५

२१. उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रो ऽसि त्वष्टृदैवत्य स्वस्ति मा संपारयेति।— पार.गृ.सू. ३.१५.५

२२. अग्न्याधेयम् :-उष्ट्रे मे तृष्णा-— बौधा.श्रौ.सू. २.५

२३. अग्निचयनम् : वरूत्रिं त्वष्टुर्वरुणस्य नाभिमित्यनुदुत्येमामूर्णयुं वरुणस्य मायामित्युष्ट्र-मारण्यमनु ते दिशामीति शुचमनूत्सृजति-— बौधा.श्रौ.सू. १०.३४

२४. सप्त ग्राम्याः पशवो गोअश्वमजाविकं पुरुषश्च गर्दभश्चोष्ट्रश्च सप्तमे ऽश्वतरमु हैके ब्रुवते-- — बौधा.श्रौ.सू.२४.५

२५. वैष्टपुरेया लोहितायना उष्ट्राक्षा नाडायनाः-- - वत्सा वात्स्यायना इत्येते वत्सास्तेषां पञ्चार्षेयः प्रवरो भवति-— बौधा.श्रौ.प्रवर ३

२६. धनंजयाः कारीषय आश्वतास्तुलभ्याः सैन्धवायना उष्ट्राक्षा महाक्षा इत्येते धनंजयास्तेषां त्र्यार्षेयः प्रवरो भवति-—— बौधा.श्रौ.प्रवर ३६

२७. नराशंसी ऋचाएं : उष्ट्रा यस्य प्रवाहिणो वधूमन्तो द्विर्दश। वर्ष्मा रथस्य नि जिहीळते दिव ईषमाणा उपस्पृशः।।— शाहा.श्रौ.सू. १२.१४.१

२८. गौरो गवयः शरभ उष्ट्रो मायुः किंपुरुष इत्यनुस्तरणाः।— शाङ्खा.श्रौ.सू. १६.३.१४, १६.१२.१३

२९. विश्वेभ्यो देवेभ्यश्छागानामुष्ट्राणां मेषाणाँ वपानां मेदस इतीतरेषाम्।— वाराह श्रौ.सू. ३.४.४.२७

३०. गजा वाजिन उष्ट्राश्च वृका नकुलचेटकाः। पीड्यन्ते व्याधिना सर्वे ये च शस्त्रोपजीविनः।।— अथर्व परि. ५७.२.६

३१. वराहैर्मकरैरुष्ट्रैर्वृकैः कङ्कैस्तथा खरैः। शशकाकृतयः कुर्युः संध्यायां जलदा भयम्।।— अथर्व परि. ६१.१.७

३२. स्वप्न विशेष का महत्व : संयुक्तं सूकरखरैरुष्ट्रैः कृष्णचतुष्पदैः। रथमारुह्य यो यायादक्षतस्तु युगंधरः।।— अथर्व परि. ६८.२.४३

३३. द्विसंवत्सरपर्यन्ताद्राजा तत्र विनश्यति। उष्ट्रो वृषो वाप्यश्वो वा गजो वा यत्र जायते।।— अथर्व परि. ७१.६.५

## उष्णीष

१. महावीरोपक्रमे घर्मदुग्दोहः - अदित्यै रास्नासीन्द्राण्या ऽउष्णीषः पूषासि घर्माय दीष्व।।—वा. यजुर्वेद संहिता ३८.३

२. स उदतिष्ठत् स प्राचीं दिशमनु व्यचलत्।---- श्रद्धा पुंश्चली मित्रो मागधो विज्ञानं वासोऽहरुष्णीषं--- ।।१२।। --- स उदतिष्ठत् स प्रतीचीं दिशमनु व्यचलत्।---- इरा पुंश्चली हसो मागधो विज्ञानं वासोऽहरुष्णीषं---।।२०।। --- स उदतिष्ठत् स उदीचीं दिशमनु व्यचलत्।---- विद्युत् पुंश्चली स्तनयित्नुर्मागधो विज्ञानं वासोऽहरुष्णीषं---।।२९।।— अथर्ववेद १५.२.५-२९

३. उष्णीशंत्या शीर्षवत्या द्वा स स्त्वा तं नामया चन्द्रं हिरण्यं— पैप्पलाद संहिता ७.१५.६

४. क्रतुर् यो नि द धी वासो जरायु पाण्डमु त्वं? नाभिर् उष्णीषम्। अस्यां अजरं दुहे तु मातरं वशी ब्रह्मभिः क्लृप्तस् स ह्म् अस्या बन्धुः।।— पैप्पलाद संहिता १३.५.२८

५. अथ संप्रेष्यति। सोमोपनहनमाहर, सोमपर्याणहनमाहर, उष्णीषमाहरेति।---यद्युष्णीषं विन्देत्- उष्णीषः स्यात्। यद्युष्णीषं न विन्देत्- सोमपर्याणहनस्यैव द्व्यङ्गुलं वा त्र्यङ्गुलं वाऽवकृन्तेद्- उष्णीषभाजनम्।— शतपथ ब्राह्मण ३.३.२.३

६. अथ सोमोपनहनस्य समुत्पार्यान्तानुष्णीषेण विग्रथ्नाति-प्रजाभ्यस्त्वा इति। प्रजाभ्यो ह्येनं क्रीणाति।— श. ब्रा. ३.३.२.१८

७. अनुबन्ध्याप्रायश्चित्तम् : तानि पशु श्रपणे श्रपयन्ति। तदेवैतं मेघं श्रपयन्ति। उष्णीषेणावेष्ट्य गर्भं पार्श्वतः पशुश्रपणस्योपनिदधाति।— श. ब्रा. ४.५.२.७

८. रत्नयागाः - एतद्वा ऽअस्यैकं रत्नं - यत् पालागलः। तस्माऽ एवैतेन सूयते। तं स्वमनपक्रमिणं कुरुते। तस्य दक्षिणा- अप्युक्ष्णवेष्टितं धनुः, चर्ममया बाणवन्तो, लोहित उष्णीषः।— श. ब्रा. ५.३.१.११

९. गवाजपयोऽवसेचनं ब्राह्मणम् : तमागता-मभिदधाति- अदित्यै रास्नाऽसीन्द्राण्या उष्णीषः इति। इन्द्राणी ह वा इन्द्रस्य प्रिया पत्नी। तस्या उष्णीषो विश्वरूपतमः। सोऽसीति तदाह।— श. ब्रा. १४.२.१.८

१०. सौश्रवस् साम के संदर्भ में आख्यान : औरव कुत्स जिसका रूप इन्द्र के समान था, को शची पौलोमी ने इन्द्र के भ्रम से पकड लिया। इन्द्र ने रूप में अन्तर करने के लिए कुत्स को गंजा कर दिया।--- तं ह खलतिं चकार। स होष्णीषं परिहृत्योपनिपेदे। स एवैष संग्रहीतुर् उष्णीषः। तं हाभ्य् एव जग्राह। तां होवाच कथेत्थम् अकर् इति। सा होवाच - न वां व्यज्ञासम्, उष्णीषेण वै मा परिहृत्योपन्यपादीति।— जैमिनीय ब्राह्मण ३.१९९

११. वशागर्भनिमित्तपूर्वोक्तमन्त्रव्याख्याभि-धानम् : अष्टाप्रूड्डिरण्यं दक्षिणाऽष्टापदी ह्येषा ऽऽत्मा नवमः

पशोराप्त्या अन्तरकोश उष्णीषेणाऽऽविष्टितं भवत्येवमिव हि पशुरुल्बमिव चर्मेव मा समिवास्थीव-— तैत्तिरीय संहिता ३.४.१.४

१२. राजसूयः। जलसंस्कारः - क्षत्रस्योल्बमसि क्षत्रस्योनिरसीति तार्प्यं चोष्णीषं च प्रयच्छति सयोनित्वाय।— तैत्तिरीय ब्राह्मण १.७.६.४

१३. आज्ययुक्ते महावीरे पयः प्रक्षेपणं प्रवृञ्जनम् : अदित्यै रास्नासि। इड एहि। अदित एहि। सरस्वत्येहि। असावेहि। असावेहि। असावेहि। अदित्या उष्णीसमसि। वायुरस्यैडः।— तैत्तिरीय आरण्यक ४.८.२.

१४. अदित्या उष्णीषमसीत्याह। यथा यजुरेवैतत्। वायुरस्यैड इत्याह वायुदैवत्यो वै वत्सः।— तैत्तिरीय आरण्यक ५.७.६

१५. देवों के सर्वचरु सत्र में त्रुटि के निवारण हेतु काद्रवेय सर्प ऋषि द्वारा माध्यन्दिन सवन में ग्रावास्तोत्रीय ऋचाओं का पाठ करने पर सोम राजा के मदाविष्ट होने पर उपाय : तान्ह राजा मदयांचकार ते होचुराशीविषो वै नो राजानमवेक्षते हन्तास्योष्णीषेणाक्ष्यावपिनह्यामेति तथेति तस्य होष्णीषेणाक्ष्यावपिनह्युस्तस्मादुष्णीषमेव पर्यस्य ग्राव्णोऽभिष्टुवन्ति तदनुकृति।— ऐतरेय ब्राह्मण ६.१

१६. इन्द्र द्वारा ऋग्वेद, यजुर्वेद व सामवेद का रूप धारण करके यज्ञ की रक्षा हेतु उसका आच्छादन करने पर भी देवताओं का संतुष्ट न होना। — स इन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणतः परीत्योपातिष्ठत्। तं देवा अब्रुवन्— एतत् तद् रूपं कुरुष्व, एतेन नो रूपेण भूयिष्ठं छादयसि, एतेन शक्ष्यसि गोप्तुमिति। तद् यदिन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणतः परीत्योपातिष्ठत्, तद् ब्रह्माभवत्। तद् ब्रह्मणो ब्रह्मत्वम्। तद् वा एतदथर्वणो रूपं यदुष्णीषी ब्रह्मा।— गोपथ ब्राह्मण १.२.१९

१७. अरण्य में दीक्षित द्वारा करणीय कर्म : उष्णीषम्बिभर्त्ति शिल्पत्वाय। — ताण्ड्य ब्राह्मण १६.६.१३

१८. व्रात्ययज्ञाद्यग्निहोत्र समाप्तिः। दक्षिणा द्रव्यं : उष्णीषञ्च प्रतोदश्च ज्याह्लोडश्च विपथश्च फलकास्तीर्णः-- --तां० ब्रा० १७.१.१४

१९. यदाहाष्टापदीं भुवनानु प्रथन्ताष्ठं स्वाहेत्यथास्योष्णीषेण वा वल्कनेन वा शिरः प्रतिनह्य व्युह्य पशुश्रपणं तदेनमुपसमादधाति— काण्व शतपथ ब्राह्मण ५.६.४.७

२०. पशुबन्धम् : ---तृतीयेऽन्तरकोश उष्णीषेणावेष्टितं भवति विबिलानिव कोशान् कुर्यादेवमेव हि पशुर्लोम चर्म माँसमस्थि मज्ञा पशुमेवाप्नोति— काठक संहिता १३.१०

२१. ध्रुवक्षिति : ---प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः। — काठक संहिता १७.१२

२२. अथ यत् पुनः समुह्याग्नये समद्यवति यथा शल्यं निर्हत्योष्णीषेण वेष्टयन्त्येवं तद्भूतिकामष्ठं याजयेत्— मैत्रायणी संहिता २.३.१

२३. अग्निचितिः— नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमः। — मै० सं० २.९.३

२४. राजसूय ब्राह्मणम् : क्षत्रस्य योनिरसि, क्षत्रस्योल्बमसि, क्षत्रस्य नाभिरसीति, न्द्रो वै यदजायत तस्य वा एष योनिरासीद्यत्तार्प्यमुल्बं पाण्डरं, नाभिरुष्णीषः, सूतवशाया अध्यजायत— मै० सं० ४.४.३

२५. स वै तिष्ठन्नभिष्टौति तिष्ठन्तीव वै ग्रावाणः स वा उष्णीष्यपि नद्धाक्षोऽभितुष्टाव तस्माद्वा अप्येतर्ह्युष्णीष्येव ग्राव्णोऽभिष्टौत्यथो खल्वा-हुश्चक्षुरियाय ससर्प आस-— शांखायन ब्राह्मण २९.१

२६. उष्णिक् छन्दः उष्णिगुत्स्नानात् स्निह्यतेर्वा कान्तिकर्मणोऽपि वोष्णीषिणीत्यौपमिकम्।— देवताध्याय ब्राह्मण ३.४

२७. उष्णिग्— उत्स्नाता भवति। स्निह्यतेर्वा स्यात्कान्तिकर्मणः। उष्णीषिणी-वा-इत्यौपमिकम्। उष्णीषं स्नायतेः।— यास्क निरुक्त ७.३.१२.७

२८. उषेर्नक् च इति भोजः। ओषति दीप्यते शोभत इति उष्णीषम्।— उणादि सूत्र प्रक्रिया सर्वस्व ४.३० टीका

२९. ष्णिह प्रीतौ— काशकृत्स्न धातु पाठ ३.३९

३०. यद्यष्टापदीत्यनुबुध्येत धाता रातिः सूर्यो देवो दिविषद्भ्य इत्याहुती हुत्वाष्टाप्रूड्भिरण्यमुष्णीषेणावेष्ट्या— आपस्तम्ब श्रौतसूत्र ९.१८.१६

३१. अग्निष्टोम प्रातसवनम् : नक्षत्राणां मातीकाशात्पाहीति शिरः। उष्णीषेण प्रदक्षिणं शिरो वेष्टयत इति वाजसनेयकम्। न पुरा सोमस्य क्रयादपोर्वीतेत्युक्तम्।— आप० श्रौ. सू. १०.९.९

३२. सोमक्रयण प्रकरणम् : प्रजाभ्यस्त्वेत्यवशिष्टानंशूनुपसमूह्य क्षौमेण वाससोपसंगृह्य प्राणाय त्वेति द्विगुणेनोष्णीषेणोपनह्य व्यानाय त्वेति विस्रस्यावेक्षते -— आप० श्रौ० सू० १०.२४.१४

३३. माध्यंदिन सवनं : विस्रस्य राजानं ग्रावस्तुते सोमोष्णीषं प्रयच्छति।— आप० श्रौ० सू० १३.१.५

३४. प्रायणीय अह में स्नान के पश्चात् : अहते वसानावुदितः। सोमोष्णीषं यजमानः परिधत्ते सोमोपनहनं पत्नी सोमपरिश्रयणं वा। ते उदवसानीयायामध्वर्यवे दत्तः।— आप० श्रौ० सू० १३.२२.३

३५. अग्निचयनम् : उदवसाय रोहिणीं वत्सच्छवीं सकर्णपुच्छावच्छातां सखुरां सखुरिकां वा बहिर्लोमः परिधायोष्णीषेण प्रदक्षिणं शिरो वेष्टयित्वौदुम्बरं चमसमादत्ते। — आप० श्रौ सू० १७.२६.१४

३६. राजसूयः -क्षत्रस्योल्बमसीति तार्प्यं यजमानः परिधत्ते। क्षत्रस्य योनिरसीति पाण्डरमुष्णीषं द्वितीयम्। श्वेतं पाण्डरमित्याचक्षते। त्रीण्येके पाण्डर तार्प्योष्णीषाणि। शिरसि वोष्णीषम्।— आप० श्रौ० सू० १८.१४.१

३७. सर्वेष्वाभिचरणिकेषु लोहितोष्णीषा लोहित-वसना निवीता ऋत्विजः प्रचरन्ति मल्हा इति।— आप० श्रौ० सू० १९.२६.१५

३८. कृष्णोष्णीषाः कृष्णवसना निवीता ऋत्विजः प्रचरन्ति।— आप० श्रौ० सू० १९.२६.१५

३९. लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति। — आप० श्रौ० सू० २२.४.२२

४०. उष्णीषं प्रतोदो ज्याह्रोडो रथो विपथः फलकास्तीर्णो -— आप० श्रौ० सू० २२.५.५

४१. प्रवर्ग्यः- असावेह्यसावेहीत्यिथैनाष्ठं रशनया-भिदधात्यदित्या उष्णीषमसीति— बौधायन श्रौतसूत्र ९.९

४२. अथास्मा (ग्रावस्तुतं) अध्वर्युरुष्णीषं प्रयच्छति। तदञ्जलिना प्रतिगृह्य त्रिः प्रदक्षिणं शिरः संमुखं वेष्टयित्वा यदा सोमांशूनभिषवाय व्यपोहन्त्थ ग्राव्णोऽभिष्टुयात्।----सूक्तयोरन्तरोपरिष्टात्पुरस्ताद्वा पावमानीरोप्य यथार्थमावाऽऽग्रहग्रहणाच्छिष्टया परिधाय वेद्यं यजमानस्योष्णीषम्।—आश्वलायन श्रौतसूत्र ५.१२.६

४३. अनूच्योन्मुच्योष्णीषमादित्यमीक्षयेन्मित्रस्य त्वा चक्षुषा प्रतीक्षे मित्रस्य त्वा चक्षुषा समीक्षे। —आश्वलायन श्रौतसूत्र ८.१४.१७

४४. सोमयागे सोमक्रयणम् : प्रेष्यति च सोमोपनहनमाहर सोमपर्याणहनमाहरोष्णीषमाहरेति। अत्र वा निवपनम्। शोभनं सोमोपनहनम्। उष्णीषाभावे सोमपर्याणहनाद् द्वयङ्गुलं वोष्णीषायावकृन्तति। — कात्यायन श्रौतसूत्र ७.७.४

४५. (सोमोपनहनस्य) अन्तान्त्संगृह्योष्णीषेण बध्नाति प्रजाभ्यस्त्वेति। —कात्यायन श्रौतसूत्र ७.७.१७

४६. राजसूयः - लोहित उष्णीषः। कृष्णापस्तर्य्यपहतोत्तमस्य।— कात्यायन श्रौ० सू० १५.३.२०

४७. सत्राणिः अवदानसहित-मधिश्रित्योष्णीषवेष्टितं गर्भं पार्श्वतो निदधाति -— कात्यायन श्रौ० सू० २५.१०.७

४८. माध्यन्दिन सवनम् : उत्तमे ग्रहे गृहीतेऽर्बुदस्योत्तमया परिधायादायोष्णीषमुत्सृज्यते। सत्राहीनानां त्वन्त्येऽहनि।— शांखायन श्रौ० सू० ७.१५.१७

४९. उदयनीय अतिरात्रम् : स्नान्ति। अलङ्कर्वन्ति। उष्णीषान्पर्यस्यन्त्या केशानां संजननात्। — शांखायन श्रौत सूत्र २४.१९.२३

पुराण विषय अनुक्रमणिका नामक ग्रन्थ शृंखला की यह द्वितीय कड़ी है। श्री विपिन कुमार और उनकी सुयोग्य अनुजा श्रीमती राधा गुप्ता (एम.ए.,पीएच.डी., डी.लिट्.) का यह अत्यन्त सराहनीय सम्मिलित प्रयास है। पुराणों में प्रयुक्त वैदिक पारिभाषिक शब्दों के सन्दर्भ प्रस्तुत करते हुए लेखक द्वय ने अपने व्यापक अध्ययन के आधार पर इसमें पुराणगत वैदिक सन्दर्भ खोजने एवं स्थान स्थान पर उनकी व्याख्या प्रस्तुत करने का प्रयास भी किया है। इससे न केवल इसको एक सन्दर्भ ग्रन्थ कहा जा सकता है, अपितु इसमें संदर्भ संग्रह के साथ साथ जो यत्र तत्र व्याख्या मिलती है उसके आधार पर इसे वेद एवं [illegible] का तुलनात्मक अध्ययन भी [illegible] दृष्टि से, इस ग्रन्थ शृंखला को [illegible] का आधारभूत [illegible] भी कह सकते हैं। [illegible] परम्परा को ऐतिहासिक [illegible] काल का मानते हैं, परन्तु [illegible] और ब्राह्मण ग्रन्थों में [illegible] और पुराणवेद जैसे शब्द [illegible] विचार करने को बाध्य [illegible]

अतः पुराणों में प्रयुक्त [illegible] यह संग्रह ग्रन्थ वेद [illegible] के शोधकर्ताओं के लिए अतिश[illegible] जाता है। ऐसा प्रतीत होता है [illegible] और पुराण एक ही वेद विज्ञान को [illegible] प्रकार से प्रस्तुत करते हैं। इस ग्रन्थमाला में वेद और पुराण की तुलनात्मक दृष्टि को अपनाकर हमारी सनातन भारतीय संस्कृति के उन रहस्यों के उद्घाटन का प्रयास किया गया है जो परम्पराजनित अनेक पूर्वाग्रहों के कारण अभी तक दुर्बोध बने हुए हैं। आशा है कि श्री विपिन कुमार की वैज्ञानिक दृष्टि और श्रीमती राधा गुप्ता का सांस्कृतिक वैदुष्य-इस दिशा में उत्तरोत्तर प्रगति करता हुआ शोधार्थियों और सुविज्ञ प्राध्यापकों के लिए एक अत्यन्त महत्वपूर्ण सामग्री प्रस्तुत करेगा। इस स्तुत्य कार्य के लिए दोनों ही साधुवाद के पात्र हैं।

**डा. फतहसिंह**

पूर्व निदेशक

प्राच्य विद्या प्रतिष्ठान, जोधपुर (राज.)

PARIMAL PUBLICATIONS
A HOUSE OF INDOLOGICAL BOOKS
27/28, SHAKTI NAGAR, DELHI 110007